श्री लक्ष्मीवल्लभगणि-विरचित-टीका-समेतम्

श्री उत्तराध्ययनसूत्रम्

(भाग-१)

: संपादको :

पंन्यास प्रवर श्री वज्रसेनविजयजी गणी

मुनि श्री भाग्येशविजयजी

: प्रकाशक :

भद्रंकर प्रकाशन

४९/१, महालक्ष्मी सोसायटी,

सुजाता फ्लेटनी पासे, शाहीबाग,

अमदावाद-३८० ००४. ✆ : २८६०७८५

॥ श्री आदिनाथाय नमः ॥

श्री लक्ष्मीवल्लभगणि-विरचित-टीका-समेतम्

श्री उत्तराध्ययनसूत्रम्

(भाग-१)

टीकाकारः

श्री लक्ष्मीवल्लभ गणी



: संपादको :

पंन्यास प्रवर श्री वज्रसेनविजयजी गणी

मुनि श्री भाग्येशविजयजी

●

: प्रकाशक :

भद्रंकर प्रकाशन

४९/१, महालक्ष्मी सोसायटी,

सुजाता फ्लेटनी पासे, शाहीबाग,

अमदावाद-३८० ००४. ✆ : २८६०७८५

: સંપાદક :

પરમપૂજ્ય, સકલાગમ રહસ્યવેદી આચાર્યદેવ શ્રીમદ્ વિજય **દાનસૂરીશ્વરજી મહારાજા**ના શિષ્યરત્ન, પરમ પૂજ્ય કર્મસાહિત્ય નિષ્ણાત આચાર્ય દેવ શ્રીમદ્ વિજય **પ્રેમસૂરીશ્વરજી મહારાજા**ના શિષ્યરત્ન, પરમ પૂજ્ય કલિકાલ કલ્પતરૂ આચાર્ય દેવ શ્રીમદ્ વિજય **રામચંદ્ર સૂરીશ્વરજી** મહારાજાના શિષ્યરત્ન પરમ પૂજ્ય અધ્યાત્મયોગી પંન્યાસ પ્રવર શ્રી **ભદ્રંકર વિજયજી** ગણિવર્યશ્રી ના શિષ્યરત્ન પરમ પૂજ્ય હાલારના હીરલા આચાર્ય દેવ શ્રીમદ્ વિજય **કુંદકુંદ સૂરીશ્વરજી મહારાજા**ના શિષ્યરત્ન પરમ પૂજ્ય પંન્યાસ પ્રવર શ્રી **વજસેન વિજયજી** ગણી.

: સહાયક :

શ્રી જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ - શિવ
૧૮૭, જૈન સોસાયટી
સાયન (વેસ્ટ), મુંબઈ - ૨૨

શ્રી ભદ્રંકર પ્રકાશન દ્વારા પ્રકાશિત થતાં શાસ્ત્રીય ગ્રંથોનાં પ્રકાશનમાં સંવત ૨૦૪૫ થી ઉપરોક્ત શ્રી સંઘનો આર્થિક સહકાર મળી રહ્યો છે. તેની આ પ્રસંગે હાર્દિક અનુમોદના અમે કરીએ છીએ.

લી. પ્રકાશક

પ્રાપ્તિસ્થાન :

હાલાર તીર્થ-આરાધના ધામ
વાયા જામખંભાલીયા
જી. જામનગર
મુ. વડાલીયા સીંહણ

સરસ્વતી પુસ્તક ભંડાર
રતનપોળ,
હાથીખાના,
અમદાવાદ-૧.

કિંમત : રૂા. ૧૫૦=૦૦

: મુદ્રક :
ભરત પ્રિન્ટરી
(કાંતિલાલ ડી. શાહ)
ન્યૂ માર્કેટ, પાંજરાપોળ, રીલીફ રોડ,
અમદાવાદ-૧. ફોન : ૨૧૩૫૩૮૦

श्री शङ्खेश्वरपार्श्वनाथभगवते नमः
पूज्यपाद् सिद्धि-विनय-भद्र-ॐकारसूरीश्वरसद्गुरुभ्यो नमः

પુરોવચન

મહિમાવંતુ, પવિત્ર **ઉત્તરાધ્યયનસૂત્ર** આગમ ગ્રન્થોના વર્ગીકરણમાં મૂળ સૂત્ર તરીકે આદરભર્યું સ્થાન પામેલ છે.

ઉત્તર એટલે શ્રેષ્ઠ, ૩૬ શ્રેષ્ઠ અધ્યયનો જેમાં આવેલા છે તે પવિત્ર સૂત્ર. નિર્યુક્તિકાર પૂજ્યપાદ **ભદ્રબાહુસ્વામી** મહારાજના વચનને ટાંકીને કહીએ તો નજીકના સમયમાં મોક્ષે જનારા ભવ્યો જ જેમનું અધ્યયન કરી શકે છે,[1] તે આ પવિત્ર અધ્યયનો સંયમી જીવનના ઘડતર માટેની સુન્દર શિક્ષા આપનારા છે. આથી જ, પહેલાં આચારાંગ સૂત્રના અધ્યાપન બાદ તરત જ [2]ઉત્તરાધ્યયન સૂત્ર સંયમીઓને ભણાવાતું. પૂજ્યપાદ **શય્યંભવ સૂરિ** મહારાજા દ્વારા દશવૈકાલિક સૂત્રની રચના થયા બાદ, હાલ, દશ વૈકાલિક સૂત્રના અધ્યાપન બાદ તરત આ પવિત્ર સૂત્રનું અધ્યયન સંયમીઓને કરાવાય છે. અને એ રીતે ઉત્તર એટલે પછી એ અર્થમાં "ઉત્તર" શબ્દનો પ્રયોગ થયો છે-એવું આ ગ્રન્થ પરના અનેક વિદ્વાન્ ટીકાકારો પૈકીના એક પૂજ્ય **ભાવવિજય ગણીએ** નોંધ્યું છે.

પ્રભુએ ઉત્તરકાળમાં કહેલા અધ્યયનો એવો અર્થ આ ગ્રન્થરત્નની પવિત્રતામાં સારો એવો ઉમેરો કરી આપે છે; કારણ કે પરમાત્મા, ત્રિલોકગુરુ મહાવીર ભગવાને ૧૬ પ્રહરની આપેલ અન્તિમ દેશનામાંનો ઘણો ભાગ અપ્રાપ્ય હોવા છતાં, તે જ અન્તિમ દેશનામાં પ્રભુએ પ્રબોધેલા આ ૩૬ અધ્યયનો આપણી સમક્ષ છે.

આગળ કહ્યું તેમ, આ ગ્રન્થરત્ન પર અનેક વિદ્વદ્ભોગ્ય ટીકાઓ રચાયેલી હોવા છતાં, પ્રસ્તુત ટીકા તેના રચયિતા પૂજ્ય શ્રી **લક્ષ્મીવલ્લભ ગણી** મહારાજે સંસ્કૃત ભાષાના પ્રાથમિક અભ્યાસીઓ માટે બનાવી છે. મન્દ ક્ષયોપશમવાળા સંયમી મહાત્માઓ પણ પવિત્ર, ગંભીર અને સંયમી જીવનની મહત્તા પર ઊંડો પ્રકાશ પાથરતા આ ગ્રન્થના કથયિતવ્યથી અજ્ઞાત ન રહી જાય તે માટે તેમણે આ પ્રયાસ કર્યો છે.

---

(૧) **जे किर भवसिद्धिया, परित्त संसारिया य जे भव्वा; ते किर पढंति एए, छत्तीसं उत्तरज्झाए ॥**

(૨) **उत्तरज्झाए, उत्तरज्झयणाइं, उत्तराध्ययनानि** વગેરે શબ્દો સૂચવે છે તેમ "ઉત્તર-અધ્યયનો" તરીકે બહુવચનાત્મક પ્રયોગ જ આ અધ્યયન સમૂહ માટે થતો આવ્યો છે.

પ્રસ્તુત ટીકા સહિતના આ ગ્રંથનું પ્રથમ પ્રકાશન **રાય ધનપતસિંહ** બાબુએ વિ.સં. ૧૯૩૬માં કરેલ. ત્યારબાદ જામનગરવાળા **પં. હીરાલાલ હંસરાજ** દ્વારા આ ગ્રંથ પુનઃ પ્રસિદ્ધ થયેલો.

પૂજ્યપાદ્ અધ્યાત્મયોગી પંન્યાસ પ્રવર શ્રી **ભદ્રંકરવિજયજી** મહારાજના વિનેય પૂજ્યપાદ્ પંન્યાસ પ્રવર શ્રી **વજ્રસેન વિજય** મહારાજના સૂચનથી, પૂજ્યપાદ્ શાસનપ્રભાવક આચાર્યદેવ શ્રીમદ્ વિજય **ૐકાર સૂરીશ્વરજી** મહારાજાની આજ્ઞાથી આ ગ્રંથની પ્રથમ આવૃત્તિ નું સંપાદન કાર્ય મેં સંભાળેલ. આજ પ્રસ્તુત ગ્રંથની દ્વિતીય આવૃત્તિ પૂજ્યપાદ્ પંન્યાસ પ્રવર શ્રી વજ્રસેન વિજયજી મહારાજ દ્વારા સંપાદિત થઈ બહાર આવી રહી છે. દ્વિતીય આવૃત્તિનો આવિષ્કાર જ આ ગ્રંથનાં થતાં સ્વાધ્યાયનું પ્રતીક છે. સંસ્કૃત ભાષાના પ્રાથમિક અભ્યાસીઓ પણ સરળતાથી શ્રી ઉત્તરાધ્યયન સૂત્રનાં રહસ્યને પામી સાધનાને સપ્રાણવતી બનાવી આધ્યાત્મિકતામાં વિહરી શકે એવો આ ગ્રંથ છે. ૧૯ અધ્યયનાત્મક આ ગ્રંથનો પ્રથમભાગ પૂજનીય સંયમી મહાત્માઓનાં કરકમલમાં મૂકાતાં અપાર આનંદ થાય છે.

ગ્રંથ માહાત્મ્ય, ટીકાકાર મહાત્માનો પરિચય, ટીકાનો રચનાસમય, ટીકાની વિશેષતા, સંપાદનમાં વપરાયેલ હસ્તપ્રતનો પરિચય, આભારદર્શન ઈત્યાદિ દ્વિતીય ભાગના સંપાદકીયમાં આપેલ છે.

વિજય ભદ્ર ચેરીટેબલ ટ્રસ્ટ
પાર્શ્વ ભક્તિનગર, હાઈવે
ભીલડી
તા.૨૬-૫-૨૦૦૧

પૂજ્યપાદ્ આચાર્ય દેવ શ્રીમદ્ વિજય
ૐકાર સૂરીશ્વરજી મહારાજાના શિષ્ય રત્ન તપસ્વી
મુનીરાજ શ્રી **ચન્દ્રયશવિજય** મહારાજાના શિષ્યાણુ
મુનિ ભાગ્યેશ વિજય



સંપાદકીય

પરમકૃપાળુ દેવાધિદેવ ચરમ તીર્થપતિ, શ્રી મહાવીર સ્વામિ ભગવાને અંતિમ સમયે સોળ પ્રહર સુધી જે દેશનાં આપી તેમાં ૫૫ અધ્યયન પુન્યફલનાં અને ૫૫ અધ્યયન પાપફલનાં અને ૩૬ અધ્યયન વગર પૂછાયેલા **વર્ણવેલ. તે ૩૬ અધ્યયન એ જ ઉત્તરાધ્યયન.**

પૂજ્ય સાધુ-સાધ્વીજી ભગવંતો યોગોદ્વહન કરે ત્યારે વડિલો ઉત્તરાધ્યયન ગોખવા અને ટીકાનું વાંચન કરવા માટે પ્રેરણા કરતાં હોય છે.

સંસ્કૃતનો સામાન્ય અભ્યાસ કરનાર પણ **ટીકા**નું વાંચન કરીને આગમ વાંચનમાં પ્રવેશ કરી શકે તે માટે શ્રી **લક્ષ્મીવલ્લભ ગણિ**ની ટીકા ખુબ જ સરલ અને સરસ છે.

તેથી વિદ્વાન મુનિશ્રી **ભાગ્યેશવિજયજી**ને મિત્ર ભાવે આ ટીકાની શુદ્ધિ કરવા જણાવેલ અને તેમણે મારી ભાવનાને સહર્ષ સ્વીકારીને શુદ્ધિ કરી આપેલ, તે પ્રથમ આવૃત્તિ રૂપે પ્રકાશિત થયેલ. ત્યારબાદ આ ગ્રંથની ઉપયોગીતા હોવાથી આવૃત્તિ પૂર્ણ થતા માંગ વધવા લાગી એટલે -

પૂજ્ય મહાત્માઓની વારંવાર સલાહ-પ્રેરણાથી બીજી આવૃત્તિ રૂપે આ ગ્રંથ પ્રકાશિત કરી રહ્યા છીએ. તેમાં હું તો નિમિત્ત માત્ર છું. બાકી તો મારી શારીરિક અસ્વસ્થતામાં પણ બધા મહાત્માઓનો સહકાર જ આ ગ્રંથના પ્રકાશનમાં કારણભૂત છે.

પરમ ઉપકારી આચાર્ય ભગવંતશ્રી **માનતુંગસૂરીશ્વરજી** મહારાજાએ ઉત્તરાધ્યયનના **૩૬ અધ્યયનની થોય** બનાવી છે તે સૌને ૩૬ અધ્યયન મુખપાઠ રાખવામાં ઉપયોગી બને તે હેતુથી ગ્રંથની આદિમાં આપવામાં આવી છે.

ઉત્તરાધ્યયનનાં અધ્યયન દ્વારા આપણે વિનય આદિ ગુણોને પામવા સદ્‌ભાગી બનીએ એ જ.....

પંન્યાસ વજ્રસેન વિજય

સિદ્ધગિરિ.

જેઠ સુદ ૧૫-૨૦૫૭

विषयानुक्रम

अध्ययनक्रमांक	अध्ययनाभिधा	पृष्ठ क्रमांक	अध्ययनक्रमांक	अध्ययनाभिधा	पृष्ठ क्रमांक
१	विनय	१	१०	द्रुमपत्रक	१५९
२	परीषह	२२	११	बहुश्रुतपूजा	१७३
३	चतुरङ्गीय	५९	१२	हरिकेशीय	१८४
४	असंस्कृत	८०	१३	चित्रसम्भूतीय	२०१
५	अकाममरणीय	९७	१४	इषुकारीय	२२८
६	क्षुल्लकनिर्ग्रन्थीय	१०६	१५	भिक्षुलक्षण	२४५
७	औरभ्रीय	११२	१६	ब्रह्मचर्यसमाधिस्थान	२५२
८	कापिलीय	१२०	१७	पापश्रमणीय	२६४
९	नमिप्रव्रज्या	१२७	१८	संयतीय	२६९
			१९	मृगापुत्रीय	३१८

कथानाम् अकारादिक्रमः

क्रमांक	नाम	पृष्ठ	क्रमांक	नाम	पृष्ठ
१	अगडदत्त	८४	१५	इन्द्रदत्त	६५
२	अजापाल	९९	१६	इषुकारराजा	२२८
३	अट्टणमल्ल	८०	१७	उदायनराजर्षि	३०६
४	अरनाथ	२९७	१८	उरभ्र	११२
५	अरहन्नक	२८	१९	कपिलर्षि	१२०
६	अर्जुनमालर्षि	४१	२०	करकण्डू	१२७
७	अविद्यापुरुष	१०६	२१	काकिणी	११५
८	अश्वमित्र (निह्नव)	७०	२२	कालवैशिक	४६
९	आचार्यकुशिष्य	१८	२३	कालिकाचार्य-सागरचन्द्र	५०
१०	आभीरसाधु	५२	२४	काशीराजा	३१३
११	आभीरीवञ्चक	८२	२५	कुन्थुनाथ	२९६
१२	आम्रदृष्टान्त	११५	२६	कुमारनन्दी	३०६
१३	आषाढाचार्यशिष्य	७०	२७	कुरुदत्त	३९
१४	अषाढाभूति	५३	२८	कुलपुत्र	७

क्रमांक	नाम	पृष्ठ
२९	कुलपुत्रशिक्षिताश्व	९४
३०	कुलवालक	३
३१	कृष्ण	४५
३२	गङ्गाचार्य	७१
३३	गोष्ठामाहिल	७२
३४	चण्डरुद्राचार्य	७
३५	चित्रसम्भूत	२०१
३६	चोल्लग	५९
३७	चौरनायक	९
३८	जमालि	६८
३९	जयचक्री	३०३
४०	ढण्ढणर्षि	४५
४१	तिष्यगुप्त	७०
४२	त्रिमान्त्रिक	८
४३	दशार्णभद्र	३०३
४४	द्विमुखनृप	१३०
४५	धनमित्र	२६
४६	नगातिनृप	१५२
४७	नमिराजर्षि	१३२
४८	पुण्डरीक-कण्डरीक	१६१
४९	पुरोहितपुत्र	८३
५०	पुरोहितपुत्र-राजपुत्र	३२
५१	बलदेवमुनि	४४
५२	ब्राह्मणी	९५
५३	भद्रबाहुशिष्य	२७
५४	भद्रर्षि	४७
५५	भरतचक्री	२७८
५६	मघवाचक्री	२८३
५७	मण्डकचौर	९१
५८	महापद्म	२९८
५९	महाबल	३१३
६०	मूलदेव	६४
६१	मृगापुत्र	३१८
६२	यज्ञदत्तद्विजपुत्र	४०
६३	रोहगुप्त	७१
६४	विजयराज	३१३
६५	वणिग् महिला द्रष्टान्त	९५
६६	शान्तिनाथ	२९१
६७	शाल-महाशाल	१५९
६८	शिवभूति	७५
६९	श्रमणभद्र	२९
७०	श्राद्धश्रमण	४९
७१	श्राद्धसुनन्द	४८
७२	संयतराजर्षि	२६९
७३	सगरचक्री	२७९
७४	सङ्गमस्थविर	३८
७५	सनत्कुमारचक्री	२८४
७६	सेचनकहस्ती	११
७७	सोमदेवमुनि आर्यरक्षित	२९
७८	स्कन्दसूरिशिष्य	४२
७९	स्थूलभद्र	५२
८०	स्थूलिभद्र	३४
८१	हरिकेशीबलमुनि	१८४
८२	हरिषेणचक्री	३०२
८३	हस्तिमित्र	२४

ઉત્તરાધ્યયનના ૩૬ અધ્યયનની થોય :

વીર જિનેશ્વર અંતિમ વાણ, ઉત્તરાધ્યયને કહી ગુણખાણ,
પર્વ દીવાળી પ્રમાણ ;
અજજયણ છત્રીસ વખાણ, પહેલે વિનય[૧] સમાધિ જાણ,
પરિષહ[૨] જીપે મુનિ ભાણ ;
ચાર[૩] દુર્લભ અંગ દિલમાં આણ, અસંખ્ય[૪] વૈરાગ્ય સુખાણ,
અકામ[૫] મરણ અજ્ઞાન ;
ખુડ્ડગ[૬]-નિયંઠી સુપ્રમાણ, સાતમે એલગ[૭] વત્સ કહાણ,
પૂજો જિન જગ ભાણ ૧
કપિલ[૮] કેવળી આઠમે ધાર, નમિ[૯] પ્રવજ્યા વર વિસ્તાર,
દ્રુમપત્ર[૧૦] અધિકાર ;
બહુશ્રુત[૧૧] પૂજાથી નિસ્તાર, હરિકેશી[૧૨] તપસી અણગાર,
ચિત્ર[૧૩]-સંભૂતિ વિચાર ;
ઈષુકાર[૧૪]-કમલાવતી ધાર, પંદરમે સભિક્ષુ[૧૫] વિચાર,
બંભ[૧૬] સમાધિ સુધાર ;
પાપ શ્રમણ[૧૭] કીજે પરિહાર, સંયતિ[૧૮] નૃપ સંયમ અધિકાર,
જપીએ જિન જયકાર ૨
ઓગણીસમે મૃગાપુત્ર[૧૯] સંભાર, અનાથી[૨૦] વીસમે અધિકાર,
સમુદ્ર[૨૧] પાલીય શ્રીકાર ;
રાજુલ[૨૨] રહનેમિ બ્રહ્મધાર, કેશી[૨૩]-ગોયમ દોય ગણધાર,
પંચ[૨૪] સમિતિ વિસ્તાર ;
જયઘોષ[૨૫] વિજયઘોષ[૨૬] વિચાર, છવ્વીસમે સમાચારી[૨૭] ઉદાર,
ખલુંકિજજ નિવાર ;
મોક્ષમાર્ગ[૨૮] ગતિ મનોહાર, સમ્યક્ત્વ[૨૯] પરાક્રમ દિલધાર,
વરસે અમીરસ ધાર ૩
બાહ્ય-અભ્યંતર તપ[૩૦] કહ્યા બાર, ચરણવિધિ[૩૧] એકત્રીશમે ધાર,
પ્રમાદ[૩૨] સ્થાન નિવાર ;
કર્મપ્રકૃતિ[૩૩] વિચિત્ર સંસાર, ચોત્રીશ[૩૪] ષટ્લેશ્યા સુવિચાર,
માર્ગ[૩૫] ભલો અણગાર ;
જીવ-અજીવ[૩૬] વિભક્તિ ઉદાર, છત્રીસ અધ્યયન મહા ઉપકાર,
ભણતા ભવોદધિ પાર ;
રામચંદ્રસૂરિ ગચ્છ આધાર, માનતુંગ ચિત્ત આનંદકાર,
સિદ્ધાયિકા સુખકાર ૪

॥ श्री शत्रुञ्जयमण्डनऋषभदेवस्वामिने नमः ॥

श्री शंङ्खेश्वर पार्श्वनाथाय नमः

पूज्यपाद आचार्यदेव श्रीमद्-विजयभद्र-प्रेमसूरीश्वरेभ्यो नमः

लक्ष्मीवल्लभगणिरचितदीपिकावृत्तियुक्तम्

उत्तराध्ययनसूत्रम्

अर्हन्तो ज्ञानभाजः सुरवरमहिताः सिद्धिसौधस्थसिद्धाः ।
पञ्चाचारप्रवीणाः प्रगुणगणधराः पाठकाश्चागमानाम् ॥
लोके लोकेशवन्द्याः सकलयतिवराः साधुधर्माभिलीनाः ।
पञ्चाप्येते सदाप्ता विदधतु कुशलं विघ्ननाशं विधाय ॥१॥

श्रीवीरं क्षीरसीन्धूदकविमलगुणं मन्मथारिप्रघातं ।
श्रीपार्श्वं विघ्नवल्लीवनदलनविधौ विस्फुरत्कान्तिधारम् ॥
सानन्दं चेन्द्रभूत्याद्दतवचनरसं दत्तदृक्कर्णबोधं ।
वन्देऽहं भूरिभक्त्या त्रिभुवनमहितं वाङ्मनःकाययोगैः ॥२॥

उत्तराध्ययनसूत्रवृत्तयः, सन्ति यद्यपि जगत्यनेकशः ।
मुग्धहृत्सदनबोधदीपिकां, दीपिकामिव तनोम्यहं पुनः ॥३॥

प्राप्तचारुविभवो गिरां गिरः, श्रीगुरोश्च विशदप्रभावतः ।
वक्ति लक्ष्म्युपपदस्तु वल्लभः, सज्जना मयि भवन्तु सादराः ॥४॥ युग्मम् ।

श्रेयसे स्ताद् [1]गणभृतां, चतुर्दशशती शताम् ॥
श्रीपुण्डरीकमुख्याणां, या द्विपञ्चाशदुत्तरा ॥ ५॥

१. विनय-अध्ययनं

संजोगा विप्पमुक्कस्स, अणगारस्स भिक्खुणो ।
विणयं पाउकरिस्सामि, आणुपुव्विं सुणेह मे ॥१॥

श्री सुधर्मास्वामी जम्बूस्वामिनं वक्ति, जम्बूस्वामिनमुद्दिश्य अन्यानपि शिष्यान् वदति । भो शिष्याः ! अहम् आनुपूर्व्या-अनुक्रमेण, भिक्षोर्भिक्षया मधुकरवृत्त्याहारं गृहीत्वा शरीरधारकस्य साधोर्विनयं प्रादुःकरिष्यामि-प्रकटीकरिष्यामि 'मे' - मम विनयं प्रकटीकरिष्यतो यूयं मद्वाक्यं शृणुत । यतो जिनशासनस्य मूलं विनयधर्म एव, उक्तं च श्रीदशवैकालिके -

*"विणयाओ नाणं, नाणाउ दंसण" मित्यादि ।

---

१ गुणभृतां मु० ॥ * विनयाज्ज्ञानं ज्ञानाद्दर्शनम् ॥

कथंभूतस्य भिक्षोः ? संयोगात्-बाह्याऽभ्यन्तरभेदेन द्विविधात् विप्रमुक्तस्य-विशेषेण रहितस्य, तत्र बाह्यसंयोगो-धन-धान्य-पुत्र-मित्र-कलत्रादि, अचित्त-सचित्तादिरूपः, अभ्यन्तरसंयोगो-मिथ्यात्व-वेदत्रिक-हास्यादिषट्क-क्रोधादिचतुष्करूपः, एवंविध-द्विविधसंयोगाद्विरतस्य, पुनः कीदृशस्य भिक्षोः? अनगारस्य-न विद्यते अगारं-गृहं यस्य सोऽनगारोऽगृहः, तस्य नियतवासरहितस्य ॥ १ ॥

आणाणिद्देसकरे, गुरूणमुववायकारए ।
इंगियागारसंपण्णे, से विणीएत्ति वुच्चइ ॥ २ ॥

स शिष्यो विनीत इत्युच्यते, स इति कः? यः शिष्य आज्ञायास्तीर्थंकर-प्रणीतसिद्धान्तवाण्या निर्देश-उत्सर्गा-ऽपवादकथनं, तस्य कारको भवति, अथवाऽऽज्ञाया-गुरुवाक्यस्य निर्देशः-प्रामाण्यमाज्ञानिर्देशस्तं करोतीत्याज्ञानिर्देशकरः । पुनर्यः शिष्यो गुरूणां समीपे पातः- [1]स्थितिस्तत्कारक उपपातकारकः, गुरूणां दृग्गोचरे तिष्ठतीत्यर्थः । पुनर्यः शिष्य इङ्गिताकारसंप्रज्ञो भवति, गुरूणामिङ्गितं-मानसिकं चेष्टितं जानाति, पुनर्गुरूणामाकारं-बाह्यं शरीरचेष्टितं च जानाति, इङ्गितं-निपुणमतिगम्यम्, प्रवृत्तिनिवृत्ति-ज्ञापकम्, ईषद्भ्रूशिरःकम्पनादिकम्; आकारः-स्थूलमतिगम्यश्चलनादिसूचको दिशाव-लोकनादिः यदुक्तम् -

"अवलोकनं दिशानां, विजृम्भणं शाटकस्य संवरणम् ।
आसनशिथिलीकरणं, प्रस्थितलिङ्गानि चैतानि" ॥१॥

तस्माद्यः शिष्यो गुरोरिङ्गिताकारौ सम्यक् प्रकर्षेण जानातीतीङ्गिताकारसंप्रज्ञः एतादृशः शिष्यो विनयवान् उच्यते ॥ २ ॥

अथाविनीतस्य लक्षणमाह -

आणाऽणिद्देसकरे, [2]गुरूणमणुववायकारए ॥
पडिणीए असंबुद्धे, अविणीएत्ति वुच्चइ ॥ ३ ॥

स शिष्योऽविनीत इत्युच्यते, य आज्ञायास्तीर्थङ्करवाक्यस्य गुरोर्वाक्यस्य चानिर्देश-करोऽप्रमाणकर्ता आज्ञाविराधकः, पुनर्यो गुरूणामनुपपातकारको भवति-गुरूणां दृग्विषये स्थितिं न करोति, आदेशभयाद् दूरं तिष्ठतीत्यर्थः । पुनर्यः शिष्यो गुरूणां प्रत्यनीको-गुरूणां छलान्वेषी, पुनर्योऽसंबुद्धस्तत्त्वस्यावेत्ता, एतादृशलक्षणोऽविनीतो भवति ।

१ स्थितः L. ॥ २ गुरुणमुववा मु० ॥

अत्र कूलवालकस्य दृष्टान्तः -

यथा एकस्य आचार्यस्य क्षुल्लकोऽविनीतः, तमाचार्यः शिक्षार्थं वाचा ताडयति, स क्षुल्लको रोषं वहति। अन्यदा आचार्यस्तेन क्षुल्लकेन समं सिद्धशैलं वन्दितुं गतः, तत उत्तरत आचार्यस्य वधाय तेन पृष्ठस्थितेन क्षुल्लकेन शिला मुक्ता, आयान्त्याचार्येण दृष्टा, स्वपादौ प्रसारितौ, अन्यथा स आचार्यो मृतोऽभविष्यत्। आचार्येण शापोऽस्मै क्षुल्लकाय दत्तः- "हे दुरात्मन्! त्वं स्त्रीतो विनंक्ष्यसि।" अथ स क्षुल्लक आचार्योऽयं मिथ्यावादी भवत्विति विचिन्त्य पृथग्भूतस्तापसाश्रमे गत्वा तिष्ठति। तत्रासन्ननदीकूले आतापनां कुरुते, मार्गसमीपे सार्थं विलोकयति, यदि शुद्धं प्राप्नोति तदाहारं गृह्णाति, नो चेत्तदा तपः करोति, तस्याऽऽतापनाप्रभावेण नद्यन्यत्र व्यूढा, ततो लोकैरस्य कूलवालक इति नाम कृतम्। इतश्च श्रेणिकपुत्रः कूणिको राजा स्वपत्नीपद्मावतीप्रेरितः स्वभ्रातृहल्लविहल्लपार्श्वे जनकश्रेणिकार्पितदिव्यकुण्डलाऽष्टादशसरिकहार-सेचनकहस्त्यादिकं वस्तु मार्गितवान्। तौ च सर्वं लात्वा मातामहचेटकमहाराजपार्श्वे वैशालीनगर्यां गतौ, कूणिकेन मातामहचेटक-महाराजपार्श्वात् सर्ववस्तुसहितौ तौ भ्रातरौ मार्गितौ, शरणागतवज्रपञ्जरबिरुदं वहता [1]तेन न प्रेषितौ, ततो रुष्टः कूणिकः समाराधितशक्रचमरप्रभावेण स्वजीवितं रक्षन्नमोघबाणमपि चेटकमहाराजं सङ्ग्रामे निर्जित्य वैशालीनगरमध्ये क्षिप्तवान्। सज्जितवप्रां च तां वैशालीं नगरीं स कूणिको रोधयति स्म, नगरीमध्यस्थितश्रीमुनिसुव्रतस्वामि-स्तूपप्रभावात्तां नगरीं ग्रहीतुं न शक्नोति, ततो बहुना कालेन देवतयैवमाकाशे भणितं -

"*समणे जइ कूलवालए, मागहिअं गणिअं रमिस्सए॥
राया य असोगचंदए, वेसालिं नयरीं गहिस्सए" ॥१॥ []

कूणिकेनेमां वाणीं श्रुत्वा स कूलवालकश्रमणो विलोक्यमानस्तत्र स्थितो ज्ञातः, राजगृहादाकारिता मागधिका गणिका, तस्याः सर्वं कथितम्, तयापि प्रतिपन्नं, तं कूलवालकश्रमणमहमत्रानेष्यामीति। सा कपटश्राविका जाता, सार्थेन तत्रागता तं[2] वन्दित्वा भणति-स्थाने स्थाने चैत्यानि साधूंश्च वन्दित्वाहं भोजनं कुर्वे, यूयमत्र श्रुताः ततो वन्दनार्थ-मागता, अनुग्रहं कुरुत, प्रासुकमेषणीयं भक्तं गृह्णीत, इति श्रुत्वा कूलवालक-श्रमणस्तस्या उत्तारके गतः, तया च नेपालगोटकचूर्णसंयोजिता मोदका दत्ताः, तद्भक्षणानन्तरं तस्यातीसारो जातः, तया औषधप्रयोगेण निवर्तितः, प्रक्षालनो-द्वर्तनादिभिस्तया तस्य चित्तं भेदितम्, स कूलवालकश्रमणस्तस्यामासक्तोऽभूत्। तयापि स्ववशीभूतः स साधुः कूणिकसमीपमानीतः, कूणिकेनोक्तं भोः कूलवालकश्रमण! यथेयं वैशालीनगरी गृह्यते तथा क्रियतां, [3]तेनापि तद्वचः प्रतिपद्य नैमित्तिकवेषेण वैशालीनगर्यभ्यन्तरे गत्वा

१ तेन चेटकमहाराजेन मु० ॥

* श्रमणो यदि कुलवालको मागधिकां गणिकां रमिष्यति।
राजा चाशोकचन्द्रो वैशालीं नगरीं ग्रहीष्यति ॥ १ ॥

२ तं कूलवालकं मु० ॥ ३ कूलवालेनापि मु० ॥

मुनिसुव्रतस्वामिस्तूपप्रभावो नगरीरक्षको ज्ञातः नैमित्तिकोऽयं नगरीलोकैः पृष्टः-कदा नगरीरोधोऽपगमिष्यति ? स प्राह यदैनं स्तूपं यूयमपनयत तदा नगरीरोधापगमो भवतीति श्रुत्वा तैर्लोकैस्तथा कृतम् । कूलवालकश्रमणेन बहिर्गत्वा सज्जितः कूणिकस्तेन तदैव स्तूपप्रभावरहिता सा नगरी भग्ना, एवं पतितः कूलवालक-श्रमणोऽविनीतत्वात् इति कूलवालककथा ॥ ३ ॥

अथाविनीतस्य दोषपूर्वं दृष्टान्तमाह -

जहा सूणी पूइकन्नी, निक्कसिज्जइ सव्वसो ॥
एवं दुस्सीलपडिणीए, मुहरी निक्कसिज्जइ ॥ ४ ॥

एवममुना प्रकारेणानेन दृष्टान्तेन दुःशीलो-दुष्टाचारः प्रत्यनीको-गुरूणां द्वेषी, पुनर्मुखरी-वाचालः, एतादृशः कुशिष्यो दुर्विनीतो[1]निष्काश्यते गणात्-सङ्घाटकात् बाह्यः क्रियते, अथवा'मुहरी[2]'मुखम् अरिर्यस्य स मुखारिरसंबद्धभाषी, प्राकृतत्वात् मुहरीतिशब्दः । केन दृष्टान्तेन निष्काश्यते ? यथा पूतिकर्णी-सटितकर्णी शुनी-[3]कुर्कुरी सर्वतः सर्वस्थानकाद् गृहादितः सर्वैर्निष्काश्यते, अत्र शुनीनिर्देशोऽधिकनिन्दासूचकः, सटितकर्णीतिविशेषणेन सर्वाङ्गं [4]कृमिकुलाकुलं सूचितम्, इत्यनेन दुर्विनीतत्वं त्याज्यम् ॥ ४ ॥

अथ पुनस्तदेव दृढयति -

कणकुंडगं चइत्ताणं, विट्ठं भुंजइ सूयरो ॥
एवं सीलं चइत्ताणं, दुस्सीले रमई मिए ॥ ५ ॥

एवममुना प्रकारेणानेन दृष्टान्तेन 'मिए' इति मृगो-मूर्खोऽविवेकी शीलं-सम्यगाचारं त्यक्त्वादुःशीले-दुष्टाचारे रमते, अत्र शीलशब्दो विनयाचारसूचकः । केन दृष्टान्ते तदाह-यथा शूकरः कणकुण्डं -[5]तन्दुलभक्ष्यभृतं भाजनं त्यक्त्वा विष्ठां भुङ्क्ते तथा शीलं त्यक्त्वा मूर्खः कुशीलमादत्ते, दुःशीलस्य विष्ठोपमा, मूर्खस्य शूकरोपमा, शीलस्य तन्दुलभृतभाजनोपमा ॥ ५ ॥

सुणियाऽभावं साणस्स, सूयरस्स नरस्स य ॥
विणए ठविज्ज अप्पाणं, इच्छंतो हियमप्पणो ॥ ६ ॥

आत्मानो हितमिच्छन् पुरुष आत्मानं विनये स्थापयेत्, किं कृत्वा ? शुनः- [6]कुर्कुरस्य, च पुनः शूकरस्य नरस्याभावमशुभं भावं दृष्टान्तं निन्द्यमुपमानं, 'सुणिय' इति श्रुत्वा ।

---

१ निष्कास्यते मु० । एवमग्रेऽपि ॥ २ मुहुरी मु० ॥ ३ कुर्करी D. L. ॥ ४ कृमिकुलं D. ॥ ५ तण्डुल मु० ॥ ६ कुर्करस्य D. L. ॥

पूर्वगाथायां शुनी पूतिकर्णीति स्त्रीलिङ्गनिर्देशः कृतः इदानीं शुभ इति लिङ्गव्यत्ययः प्राकृतत्वात् ॥ ६ ॥

तम्हा विणयमेसिज्जा, सीलं पडिलभेज्जए ॥
बुद्धपुत्ते नियागट्ठी, न निक्कसिज्जइ कण्हुई ॥ ७ ॥

तस्मात्कारणात् बुद्धपुत्रो-बुद्धानामाचार्याणां पुत्र इव पुत्रो बुद्धपुत्रः आचार्याणां शिष्यः, पुनर्नियोगो-मोक्षस्तमर्थयतीति नियोगार्थी, एतादृशः साधु-र्विनयमेषयेद्विनयं कुर्यात्, यतो विनयाच्छीलं-सम्यगाचारं प्रतिलभेत स विनयवान्-शीलवान् 'कण्हुई' इति कस्मादपि स्थानान्न निष्काश्यते[1] सर्वत्राप्यादियते, अयं परमार्थः विनयवान् सर्वत्र सादरो भवति ॥ ७॥

निसंते सियाऽमुहरी, बुद्धाणं अंतिए सया ॥
अट्ठजुत्ताणि सिक्खिज्जा, निरट्ठाणि उ वज्जए ॥ ८ ॥

अथ विनयपरिपाटीं दर्शयति-नितरामतिशयेन शान्तो निशान्तः क्रोधरहितः साधुः, सियाशब्देन स्यात्-भवेत्, साधुना क्षमावता भाव्यम्, पुनः सुशिष्योऽमुखरी अवाचालः स्यात् पुनर्बुद्धानामाचार्याणां ज्ञाततत्वानामन्तिके-समीपे अर्थयुक्तानि हेयोपादेयसूचकानि सिद्धान्तवाक्यानि शिक्षेत । तु पुनर्निरर्थकानि-निष्प्रयोजनानि धर्मरहितानि स्त्रीलक्षणादि-सूचकानि [2]कोकवात्स्यायनादीनि वर्जयेत् ॥ ८ ॥

अणुसासिओ न कुप्पिज्जा, खंतिं सेविज्ज पंडिए ॥
खुद्देहिं सह संसग्गिं, हासं कीडं च वज्जए ॥ ९ ॥

पुनर्विनयी साधुरनुशासितो-गुरुभिः कठोरवचनैस्तर्जितोऽपि हितं मन्यमानः सन्न कुप्येत्-कोपं न कुर्यात्, पण्डितस्तत्त्वज्ञः क्षान्तिं सेवेत-क्षमां कुर्वीत । पुनः सुसाधुः क्षुद्रैर्बालैः सहाऽथवा क्षुद्रैः- पार्श्वस्थादिभिर्भग्नधर्मैः सह संसर्गं-सङ्गतिं वर्जयेत्, पुनर्हास्यं पुनः क्रीडां च वर्जयेत् ॥ ९ ॥

मा य चंडालियं कासी, बहुयं मा य आलवे ॥
कालेण य अहिज्जित्ता, तओ झाइज्ज एगगो ॥ १० ॥

भो शिष्य ! त्वं चण्डालीकं मा कार्षीः चण्डः-क्रोधस्तेनालीकम्, एवं लोभाद्य-लीकम्, कषायवशान्मिथ्याभाषणं मा कार्षीः पुनर्बहुकं-बहु एव बहुकम्, आलजालरूपं

---

१ निष्कास्यते मु० ॥ २ कोकवात्स्यान = रतिशास्त्रनो ग्रंथ

त्वं न आलपेर्मा ब्रूयाः, बहुभाषणात् बहवो दोषा भवन्ति, च पुनः काले प्रथमपौरुषीसमये अधीत्याध्ययनं कृत्वा, तत एकक-एकाकी सन् ध्यायेदधीतमध्ययनं भावान् चिन्तयेत्, एको भावतो द्रव्यतश्च, भावतो-रागद्वेषरहितः, द्रव्यतः पशुपण्डकादिरहितोपाश्रये स्थितः ॥ १० ॥

आहच्च चंडालियं कट्टु, न निण्हुविज्ज कयाइवि ॥
कडं कडित्ति भासिज्जा, अकंड नो कडित्ति य ॥ ११ ॥

आहत्य-कदाचित्क्रोधादिकषायवशादलीकं दुष्कृतं कृत्वा विनीतः साधुर्गुरूणामग्रतो न निह्नुवीत, कृतस्य दुष्कृतस्यापलपन-गोपनं न विधेयम्, कृतं कार्यं कृतमेव भाषेत, अकृतं कार्यं कृतं न भाषेत, अयं परमार्थः-गुरूणां पुरतः सुशिष्येण सत्यवादिना भाव्यम् ॥ ११ ॥

अथ विनीताविनीतयोर्दृष्टान्तमाह -

मा गलियस्सेव कसं, वयणमिच्छे पुणो पुणो ॥
कसं व दट्ठुमाइन्ने, पावगं परिवज्जए ॥ १२ ॥

विनीतः साधुराकीर्ण इव सुविनीताश्व इव गुरोर्वचनं शिक्षारूपं करणयोग्यस्य कार्यस्य प्रवृत्तिसूचकम्, करणायोग्यस्य कार्यस्य निवृत्तिसूचकं च मा इच्छेत्, पुनः पुनर्न इच्छेत् किन्तु एकवारं ज्ञापितं सत्सर्वं स्वकार्यं गुरोश्चित्तं च जानीते, 'कसं' - प्राजनकं दृष्ट्वा, इव-यथा गल्यश्वो-दुर्विनीततुरगोऽश्ववारस्य प्राजनकमिच्छेत्, तथा विनीतो वचनतर्जनं नेच्छेत्तथा सुविनीतशिष्य आचार्यस्याकारमिङ्गितं ज्ञात्वा पापानुष्ठानं वर्जयेदित्यर्थः ॥ १२ ॥

अथ पुनर्विनीताविनीतयोराचारमाह-

अणासवा थूलवया कुसीला, मिउंपि चंडं पकरेंति सीसा ॥
चित्ताणुया लहु दक्खोववेया, पसायए ते हु दुरासयंपि ॥ १३ ॥

पूर्वार्धेन दुर्विनीतशिष्याणामाचारं वदति, एतादृशाः शिष्या मृदुमप्याचार्यं-सरलमपि गुरुं चण्डं-कोपसहितं कुर्वंति, एतादृशाः कीदृशाः ? अनाश्रवा गुरुवचनेऽस्थिताः, 'आश्रव वचने स्थित' [अनेकार्थ सं. ३/६८७] इति हैमः, न आश्रवा अनाश्रवाः, पुनर्ये स्थूलवचसः स्थूलमनिपुणं वचो येषां ते स्थूलवचसोऽविचार्यभाषिणः, पुनः कुशीलाः । अथोत्तरार्द्धेन विनीतस्याचारं वदति-चित्तानुगाः-आचार्यचित्तानुगामिनः, पुनर्लघु-शीघ्रं दाक्ष्यं-चातुर्यं तेनोपपेता लघुदाक्ष्योपपेताः, त्वरितं चातुर्यसहिता एतादृशाः शिष्या दुराशयं-क्रूरमपि सक्रोधमपि गुरुं प्रसादयेयुः- प्रसन्नं कुर्युः ।

अत्र चण्डरुद्राचार्यकथा -

उज्जयिन्यां चण्डरुद्रसूरिः समायातः, स रोषणप्रकृतिः साधुभ्यः पृथगेकान्तस्थाने आसाञ्चक्रे, मा भूत्कोपोत्पत्तिरिति चित्ते विचारयति । इतश्चेभ्यसुतः कोऽपि नवपरिणीतः [१]सुहृत्परिवृतस्तत्रागत्य साधून् वन्दते, कैश्चित्तन्मित्रैर्हास्येन प्रोक्तममुं प्रव्राजयत, साधुभिर्वर-मित्यभिधाय गुरुर्दर्शितः, तेऽपि गुरुसमीपे गताः, तथैव तैरुक्तम्, गुरुभिर्भूतिमानयेति प्रोक्ते तेन नवपरिणीतेन हास्यादेव स्वयं भूतिरानीता, गुरुभिर्बलादेव गृहीत्वा तल्लोचः कृतः सुहृदः खिन्नास्तदा नष्टाः, तस्य तु कृतलोचस्य लघुकर्मतयाऽतः परं मम प्रव्रज्यै-वास्त्विति परिणामः सम्पन्नः, ततस्तेनोक्तं केलिः सत्यीभूतोऽथान्यत्र गम्यते, गुरुराह अहो शिष्य ! साम्प्रतं रात्रिर्जाता, अहं रात्रौ न पश्यामि, तेन[२] स्वस्कन्धे गुरुरारोपितः, उच्चनीच-प्रदेशे मार्गे वहता तेन गुरोः खेद उत्पादितः, खिन्नेन तेन गुरुणाऽस्य शिरसि दण्डप्रहारा दत्ताः, असौ मनस्येवं विचारयत्यहो महात्मायं मयेदृशीमवस्थां प्रापित इति सम्यग्भा-वयतस्तस्य केवलज्ञानमुत्पन्नम्, केवलज्ञानबलेन समप्रदेश एव वहन् गुरुभिरेष उक्तः, 'मारिः सार' इति कीदृशः समो वहन्नसि ? तेनोक्तं 'युष्मत्प्रसादान्मे समं वहनम्' । गुरुभिरुक्तं 'किम् अरे ज्ञानं समुत्पन्नं तव' ? तेनोक्तं 'ज्ञानमेव' गुरुभिरुक्तं 'प्रतिपात्यप्रतिपाति ?' तेनोक्तमप्रतिपाति । गुरवस्तु 'हा ! मया केवली आशातितः', इत्युक्त्वा तच्छिरसि दण्ड-प्रहारोद्भूतं[३] रुधिरप्रवाहं [४]पश्यन्तः पुनः पुनस्तत् क्षामणं कुर्वन्तः केवलज्ञानमापुरिति विनीतशिष्यैरीदृशैर्भाव्यम् । इति चण्डरुद्राचार्यस्यकथा ॥ १३ ॥

नापुट्ठो वागरे किंचि, पुट्ठो वा नालियं वए ॥
कोहं असच्चं कुव्विज्जा, धारिज्जा पियमप्पियं ॥ १४ ॥

सुविनीतशिष्योऽपृष्टः सन्न किञ्चिद्व्याकुर्यात्-व्यागृणीयात्, न किञ्चिदपृष्टो वदेत्, अथवाऽपृष्टः अल्पं पृष्टोऽपृष्टः सन् विनीतः किमपि न व्यागृणीयात्, अपृष्टोऽल्पमपि न ब्रूयादिति भावः । अथवा पृष्टः सन्नलीकं न वदेत् । पुनः क्रोधमसत्यं कुर्यात्, गुरुभिर्नि-र्भर्त्सितः कदाचित्सक्रोधः स्यात्तदापि क्रोधं विफलं कुर्यात्, अप्रियमपि गुरुवचनं प्रियमिवात्मनो हितमिव स्वमनसि धारयेत् ।

अथ क्रोधस्यासत्यकरणे उदाहरणं -

यथा - कस्यचित्कुलपुत्रस्य भ्राता वैरिणा व्यापादितः अन्यदा कुलपुत्रो जनन्या भणितः, 'हे पुत्र ! त्वद्भ्रातृघातकं वैरिणं घातय ।' ततः स वैरी तेन कुलपुत्रेण शीघ्रं निजबलाज्जीवग्राहं गृहीत्वा जननीसमीपे आनीतो भणितश्चारे भ्रातृघातक ! अनेन खड्गेन त्वामहं क्व हन्मि ? तेनाप्युद्गामितं प्रचण्डं खड्गं दृष्ट्वा भयभीतेन भणितम्, 'यत्र शरणागता

१ परिकरतः L. ॥ २ शिष्येण ॥ ३ °भूत L. ॥ ४ पश्यतः L. ॥

हन्यन्ते', एतद्वचः श्रुत्वा कुलपुत्रेण जननीमुखमवलोकितम्, जनन्या च सत्त्वमवलम्ब्योत्पन्नकरुणया भणितम्, 'हे पुत्र शरणागता न हन्यन्ते'। यतः-

*"सरणागयाण विस्संभियाण पणयाण वसणपत्ताणं।
रोगियअजुंगमाणं, सप्पुरिसा नेव पहरंति" ॥ १ ॥

तेन [1]कुलपुत्रकेण भणितं कथं रोषं सफलीकरोमि ? जनन्योक्तं वत्स ! 'सर्वत्र न रोषः सफलीक्रियते,' जननीवचनात् स तेन मुक्तः, तयोश्चरणेषु पतित्वा क्षामयित्वा चापराधं स गतः। एवं क्रोधमसत्यं कुर्यात्। 'धारिज्जा पियमप्पियं'।

एतत्पदकथा -

यथा - वीतभयपत्तने एकदा महदशिवमुत्पन्नम् [2]तन्निशम्य त्रयो मान्त्रिकास्तत्रायाताः, राज्ञः पुरस्तैः कथितं वयमशिवमुपशमयिष्यामः, राज्ञा भणितं-'केन प्रकारेण' ? तेषां मध्ये एकेनोक्तं 'मन्त्रसिद्धं ममैकं भूतमस्ति, तदत्यन्तं रूपवद् गोपुररथ्यादिषु भ्रमद्यः पश्यति स म्रियते, यस्तद्दृष्ट्वाऽधोमुखः स्यात्स सर्वरोगैर्मुच्यते'। राज्ञा भणितमलमनेनातिरोषणेन भूतेन। अथ द्वितीयमान्त्रिकेणोक्तं 'मम भूतं महाकायं लम्बोदरं विस्तीर्णकुक्षि पञ्चशीर्षमेकपादं विकृतरूपमट्टहासं कुर्वद्दृष्ट्वा यो हसति तस्य शिरः सप्तधा स्फुटति, यस्तु तद्भूतं धूप-पुष्प-स्तुत्यादिभिः पूजयति स सर्वरोगैर्मुच्यते'। राज्ञोक्तमनेनापि भूतेन सृतम्। अथ तृतीयेन मान्त्रिकेणोक्तम् 'ममाप्येवंविधंभूतमस्ति, परं प्रियाप्रियकारिणं जनं दर्शनादेव रोगेभ्यो मोचयति'। राज्ञोक्तमेवं भवतु। तथा कृते तन्नगराशिवमुपशान्तम्। ततो नृपादिजनैः स तृतीयमान्त्रिकः पूजितः। एवं साधुरपि पूजां निन्दां प्रियाप्रियं सहेत। उक्तं च-

"लाभालाभे सुखे दुःखे, जीविते मरणे तथा ॥
स्तुतिनिन्दाविधाने च, साधवः समचेतसः" ॥ १ ॥

[3]स्तुतिनिन्दादौ न राग-द्वेषवान् साधुर्भवतीति ॥ १४ ॥

क्रोधाद्यसत्यताकरणं चात्मदमने एव स्यादतस्तदुपदेशं तत्फलं चाह -

अप्पा चेव दमेयव्वो, अप्पा हु खलु दुद्दमो ॥
अप्पा दंतो सुही होइ, अस्सिं लोए परत्थ य ॥ १५ ॥

आत्मा एव दमितव्यो - वशीकर्तव्यः, हु इति निश्चयेन खलु यस्मात्कारणादात्मा दुर्दमो वर्तते, आत्मानं दमन् जीवः सुखीभवति। अस्मिन् लोके च पुनः परत्र-परभवे च सुखीभवति ॥ १५ ॥

---

* शरणागतानां विश्रब्धानां प्रणतानां व्यसनप्राप्तानाम्। रोगिताजङ्गमानां सत्पुरुषा नैव प्रहरन्ति ॥ १ ॥
१ पुत्रेण ॥ २ तन्निशम्य L, नास्ति ॥ ३ स्तुतिनिन्दादावनगारोऽद्वेषवान् मु० ॥

आत्मदमने दृष्टान्तो -

यथा- एकस्यां पल्ल्यां द्वौ भ्रातरौ तस्करनायकौ स्तः, सार्थेन सह गच्छतां साधूनां वर्षाऋतुः [१]प्राप्तः, न च तत्र कोऽपि साधुभक्तोऽस्ति, तेन साधवस्तस्करनायकयोः समीपे गताः, [२]साधुदर्शनेन तौ चोरनायकौ आनन्दितौ, तान् प्रणम्य कथयतः किं प्रयोजनं भवताम् ? साधुभिर्भणितमस्माकं वर्षासु विहर्तुं न कल्पते, ततो वर्षावासप्रायोग्यमुपाश्रयं प्रार्थयामः, ताभ्यां च सहर्षं साधूनामुपाश्रयो दत्तस्तत्र विश्वस्तास्तिष्ठन्ति साधवः, चौरनायकाभ्यां भणितमस्माकं गृहेषु सम्पूर्णं भक्तादि गृहीतव्यम्, साधुभिर्भणितं न कल्पते एकस्मिन् गृहे पिण्डग्रहणं साधूनाम्, ततः सर्वेषूचितगृहेषु विहरिष्यामः, उपाश्रयदानेनैव भवतां महापुण्य-सम्बन्धो जातः, उक्तं च -

"*जो देइ उवस्सयं, मुनिवराण तवनियमजोगजुत्ताणं ।
तेणं दिन्ना वत्थन्नपाणसयणासणविगप्पा ॥ १ ॥
तवसंजमसज्झाओ, नाणब्भासो जणोवयारो य ।
जो साहूणामवगाह - कारी सिज्झायरो तस्स ॥ २ ॥
पावइ सुरनरिद्धी - सुकुलप्पत्ती य भोगसामिद्धी ।
नित्थरइ भवमगारी, सिज्जादाणेण साहूणं ॥ ३ ॥

इदं साधुवचः श्रुत्वा तौ अत्यन्तं परितुष्टौ, तेषां साधूनामुपद्रवं रक्षतो विश्रामणादि-भक्तिं च कुरुतः, सुखेन साधूनां वर्षाकालोऽतिक्रान्तः, गच्छद्भिः साधुभिस्तयोश्चौर-नायकयोरन्यव्रतग्रहणाऽसमर्थयोर्निशाभोजननियमो दत्तस्तयोरेवमुपदिष्टम् ।

+ "मालिति महीयलं जामिणीसु रयणीअरा समंतेण ।
ते विच्छलंति य फुडं, राइए भुंजमाणाओ ॥ १ ॥
मेहं पिवीलिआओ, हणंति वमणं च मच्छिया कुणइ ।
जूआ जलोयरं तह, कोलिओ कुट्ठरोगं च ॥ २ ॥

---

१ प्राप्ता मु० ॥ २ साधुदर्शनेन तौ चौरनायकौ आनन्दितौ मु० नास्ति ॥

* यो ददाति उपाश्रयं, यतिवरेभ्यस्तपोनियमयोगयुक्तेभ्यः ।
तेन दत्ता वस्त्रा-ऽन्न-पान-शयना-ऽऽसन विकल्पाः ॥ १ ॥
तपः- संयम-स्वाध्यायो, ज्ञानाभ्यासो जनोपकारश्च । यः साधूनामुपग्रहकारी शय्यातरस्तस्य ॥ २ ॥
प्राप्नोति सुरनरर्द्धीः सुकुलोत्पत्तिं च भोगसमृद्धिम् । निस्तरति भवमगारी शय्यादानेन साधुभ्यः ॥ ३ ॥

+ मालयन्ति महीतलं यामिनीषु रजनीचराः समन्तात् । ते विट्टालयन्ति स्फुटं रात्रौ भुञ्जानांस्तु ॥ १ ॥
मेधां पिपीलिका घ्नन्ति, वमनञ्च मक्षिका करोति । यूका जलोदरं तथा, लूता कुष्ठरोगञ्च ॥ २ ॥
वालः स्वरस्य भङ्गं कण्टकः लगति गले दारु च । तालौ विध्यति अलिः व्यञ्जनमध्ये भुञ्जयमानः ॥ ३ ॥
जीवानां कुन्थ्वादीनां, घातनं भाजनधौतनादिषु ।
एवमादिरजनीभोजनदोषान्, कः कथयितुं शक्नोति ॥ ४ ॥

वालो सरस्स भंगं, कंटो लगइ गलंमि दारुं च ।
तालुंमि विंधइ अली, वंजणमज्झमि भुज्जंतो ॥ ३ ॥

जीवाण कुंथुमाइण, घायणं भायणधोअणाईसु ।
एमाइ रयणिभोअण - दोसे को साहिउं तरइ[1] ॥ ४ ॥

[सम्बोध प्रकरण गाथा ११९८-९६-९७-९९]

अतोऽस्मिन् व्रते दृढप्रयत्नैर्भवितव्यमिति भणित्वा गताः साधवः । तावपि चौरनायकौ सपरिवारौ कियन्मार्गमनुगम्य निवृत्तौ, मुनिसेवया कृतार्थत्वं मन्यमानौ तिष्ठतः । अन्यदा ताभ्यां धाटीगताभ्यां बहुगोमहिषमानीतम्, अंतरालमार्गे तत्परिवारपुरुषैः कैश्चिन्महिषो व्यापादितस्तद्भोजनाय सपरिवारौ तौ तत्र स्थितौ । केचित्परिवारपुरुषा मद्यानयनार्थं ग्राममध्ये गताः, महिषव्यापादकैः परस्परमिति विमृष्टम्, मांसार्द्धे विषं प्रक्षिप्य मध्ये गतेभ्यो दीयते, तदा बहुगोमहिषं भागे आगच्छति आत्मनामिति विमृश्य तैस्तथैव कृतम् । भवितव्यतावशेन ग्राममध्ये गतैरपि तथैव संचिन्त्य मद्यार्द्धे विषं प्रक्षिप्तम्, तत्रागताः परस्परं मिलिताः कूटचित्ताः सर्वेऽपि, तौ चौरनायकौ तु निःकुटौ स्तः, तावता सूर्योऽस्तं गतः, तौ चौरनायकौ रात्रिभोजननियमभङ्गभयेन न भुक्तौ, अन्ये परस्परदत्तविषसंयुक्तमद्यमांसभक्षणेन मृताः कुगतिं गताः, तौ भ्रातरौ इहलोके परलोके च सुखिनौ जातौ रात्रिभोजनव्रतग्रहणेन जिह्वेन्द्रियदमनात् । इति चौरनायकदृष्टान्तः ॥ १५ ॥

अथ किं चिंतयन्नात्मानं दमयेदित्याह-

वरं मे अप्पादंतो, संजमेण तवेण य ॥
माहं परेहिं दम्मंतो, बंधणेहिं वहेहि य ॥ १६ ॥

संयमेन च पुनस्तपसा मया [2]आत्मा दान्तो-वशीकृतो वरं भव्यः, अत्रात्माशब्देन देह आत्मन आधारभूतत्वात्, दान्तोऽसंयममार्गान्निषिद्धो भव्यः संयमेन सप्तदशविधेन, तथा तपसा द्वादशविधेनात्मा पञ्चेन्द्रियरूपः साधुमार्गे नेतव्यः, यथा दुर्विनीतोऽश्वो वृषभो वोन्मार्गात् प्राजनकेन-नोदनकाष्ठेन मार्गे नीयते, तथायमात्मापीत्यर्थः । पुनर्मनस्येवं चिन्तयेदहं परैरन्यलोकैर्बन्धनैः शृङ्खलादिभिश्च पुनर्बन्धैर्लकुट्यङ्कुशचपेटाप्राजनकादिभिर्दमितो मा भवेयम् यदान्ये मम ताडनातर्जनादिभिर्दमनं करिष्यन्ति तदा मम श्रेयो नास्ति, यदुक्तं-

---

१ इतोऽग्रे मु० प्रतौ एवं श्लोकः-
उलूक-काक-मार्जार-गृध्र-शम्बर-शूकराः । अहि-वृश्चिक-गोधाश्च, जायन्ते रात्रिभोजनात् ॥ १ ॥
[योगशास्त्र ३/६७]

२ स्वात्मा मु० ॥

"सह कलेवर खेदमचिंतयन् । स्ववशता हि पुनस्तव दुर्लभा ॥
बहुतरं च सहिष्यसि जीव रे । [1]परवशे न च तत्र गुणोऽस्ति ते ॥ १ ॥"

इत्यादि शिक्षयात्मा वशीकर्तव्यः

अत्र सेचनकदृष्टान्तः-

एकस्यामटव्यां महत्तरं गजयूथं वसति, यूथाधिपतिर्जातं कलभकं विनाशयति । अन्यदा तत्रैका करिणी सगर्भिणी जाता एवं चिन्तयति, यदा कथमपि मे गजबालको जायते तदानेन विनाश्यते, ततः सा करिणी यूथादपसरति यावता यूथाधिपतिना यूथमवलोक्यते तावता द्वितीये तृतीये दिवसे सा यूथमध्ये गत्वा मिलति । एवं कुर्वत्या तयाऽन्यदा ऋष्याश्रमपदं दृष्टम्, सा तत्रालीना गुप्तस्थाने प्रसूता, गजकलभो जातः, स गजः कुमारैः सहारामान् सिञ्चति, ततस्तापसैस्तस्य सेचनक इति नाम कृतम्, स वयस्थो जातः, भ्रमन्तं यूथाधिपतिं दृष्ट्वा नवोदितबलः स मारितवान्, स्वयं यूथाधिपतिर्जातः, तापसाश्रममपि समूलं विनाशितवान्, [2]मन्मातेवान्या करिण्यत्र प्रच्छन्नं मा तिष्ठत्विति विचारितवांश्च । ततस्ते रुष्टा ऋषयः पुष्पफलपूर्णहस्ताः श्रेणिकस्य राज्ञः पार्श्वे गताः, कथितं च तैः सर्वलक्षणसम्पूर्णो हस्ती सेचनकनामा वने तिष्ठति, ततः श्रेणिकेन स्वयं तद्वने गत्वा महता बलेन गृहीत्वानीय स आलानस्तम्भे बद्धः, ऋषिभिस्तत्रागत्येति निर्भर्त्सितः, हे गजराज ! क्व ते शौण्डीर्यं गतम् ? प्राप्तं त्वयाऽस्मदविनयफलमिति श्रुत्वा स गजः प्रकामं रुष्टः स्तम्भं भङ्क्त्वा तेषां पृष्ठे धावितः, ते सर्वे हतप्रहताः कृताः, प्राप्तोऽटव्यां, भग्नाः पुनरपि तेषामाश्रयाः, पुनः श्रेणिकः तद्गजग्रहणाय गतः, पूर्वभवसङ्गतदेवेन गजस्योक्तम्, 'हे वत्स ! परेभ्यो दमनात्स्वयंदमनं वरमिति', तद्वचः श्रुत्वा स्वयमागत्यालानस्तम्भमाश्रितः, यथा ह्यस्य स्वयं दमनाद् गुणो जातस्तथाऽन्येषामिति ॥१६॥

अथ पुनर्विनयशिक्षामाह -

पडिणीयं च बुद्धाणं, वाया अदुवकम्मुणा ॥
आवी वा जइवा रहस्से, नेव कुज्जा कयाइवि ॥ १७ ॥

च पुनर्बुद्धानामाचार्याणां प्रत्यनीकं-शत्रुभावं वाचा-वचनेन कृत्वा न कुर्यात्, त्वं किं जानासीत्यादिरूपेण निर्भर्त्सनां न कुर्यादथवा कर्मणा-क्रियया संस्तारकोल्लंघनेन चरणादिना संघट्टनेनाविनयं न कुर्यात्तदपि 'आवी' इति लोकसमक्षं यदि वा रहसि-एकान्ते कदापि सुशिष्यो गुरुभिः सह शत्रुभावं न कुर्यादित्यर्थः ।

"शत्रोरपि गुणा ग्राह्या दोषावाच्या गुरोरपि ॥" [ ]

इति कुमतिनिरासार्थं कदापि नैव शब्दस्य ग्रहणं ॥ १७ ॥

---

१ परवशो मु० ॥ २ मन्मातेवान्यायकारिण्यत्र प्रच्छन्नं प्रतिष्ठत्विति मु० ॥

अथासनस्य विधिमाह -

न पक्खओ न पुरओ, नेव किच्चाण पिट्ठओ ॥
न जुंजे ऊरुणा ऊरुं, सयणे नो पडिस्सुणे ॥ १८ ॥

विनीतः साधुः पक्षतो न निषीदेत्यङ्क्तसमावेशात् गुरुणा सह समानत्वं स्यात् । तस्माद् गुरोर्बाहुना सह बाहुं कृत्वा न तिष्ठेत् । पुनर्गुरूणां पुरतोऽग्रतोऽपि न निषीदेत्, वन्दनां कुर्वतः पुरुषस्य गुरूणां मुखावलोकनं न स्यात्, कृत्यानामाचार्याणां पृष्टतोऽपि न स्थातव्यम्, गुरुशिष्ययोरुभयोरपि[1] मुखादर्शने तथाविधरसवत्त्वाभावः स्यात् । न च पुनर्गुरूणामूरुणा-जङ्घया सहोरुं-जङ्घा युञ्जेत्- सङ्घट्टयेदत्यासङ्गादविनयः स्यात् । पुनः शिष्यो गुरूणां वचनं शयने-शय्यायां शयानः सन्नासीनो वा न प्रतिश्रृणुयात्, गुरुभिरुक्ते सति शय्यायां स्थितेनैव शिष्येणैवं कुर्म इति न वक्तव्यम्, किन्तु गुरूणां समीपे आगत्य वचनं श्रोतव्यमित्यर्थः ॥१८॥

पुनरासनविधिमाह -

नेव पल्लत्थियं कुज्जा, पक्खपिंडिं च संजए ॥
पाए पसारिए वावि, न चिट्ठे गुरुणंतिए ॥ १९ ॥

शिष्यो गुरोः समीपे पर्यस्तिकां नैव कुर्यात्, जङ्घोपरि पादमोचनं न विदधीत, च पुनः पक्षपिण्डं जानुजङ्घोपरि वस्त्रवेष्टनात्मिकां योगपट्टाश्रयिकामथवा बाहुद्वयेनैव कायबन्धात्मिकां गुरूणां पार्श्वे न कुर्यात्, वाशब्दः पुनरर्थे, पुनर्गुरूणामन्तिके सन्मुखं वा पादौ प्रसार्य न तिष्ठेत् ॥ १९ ॥

आयरिएहिं वाहित्तो, तुसिणीओ न कयाइवि ।
पसायपेही नियागट्ठी, उवचिट्ठे गुरुणं सया ॥ २० ॥

पुनः सुशिष्य आचार्यैर्गुरुभिर्व्याहृत आहूतः सन् कदाचिदपि तूष्णीको न भवेत्, अत्र [2]कदापिशब्दो ग्लानाद्यवस्थायामपि गुरुभिरामन्त्रितः शक्तौ सत्यां मौनं कृत्वा श्रुतमश्रुतं न कुर्यादित्यर्थः । कथंभूतः सुशिष्यः ? प्रसादप्रेक्षी, प्रसादं-गुरूणां स्नेहं प्रेक्षितुं शीलं यस्य सः प्रसादप्रेक्षी, यतः- अन्येषु शिष्येषु सत्सु गुरवो मां शब्दयन्ति, ततो मम महद्भाग्यमिति मनसि चिन्तयति । पुनः कथंभूतः सुशिष्यः ? 'नियागट्ठी' मोक्षार्थी, विनयस्य मोक्षकारणत्वात् । सुशिष्योऽनेन विधिना गुरुं सदोपतिष्ठेत्सेवेत ॥ २० ॥

---

१ °रपि रसवत्ताभावः D. L. ॥ २ कदापिशब्दात् मु० ॥

पुनर्विनयशिक्षां वदति -

आलवंते लवंते वा, न निसीइज्ज कयाइवि ॥
चइऊण आसणं धीरो, जओ [1]जत्तं पडिस्सुणे ॥ २१ ॥

धीरो-बुद्धिमान् यतो-यत्नवान् सन् शिष्यो यद्विधेयं कार्यं गुरुभिरुपदिष्टं तत्कार्यं प्रतिश्रृणुयादङ्गीकुर्यात्। पूर्वं गुरावालपति सति-इषद्वदति सत्यथवा गुरौ लपति सति-वारंवार कथयति सति सुशिष्यो न निषीदेत्, गुरुणा कार्ये उक्ते सत्यासनं-स्वस्थानं त्यक्त्वा धीरो-धैर्यवान् यत्नेनैकाग्रचित्तेन यद् गुरुणा कार्यमुक्तं भवेत्तत्कार्यमङ्गीकुर्यादित्यर्थः ॥ २१ ॥

आसणगओ न पुच्छिज्जा, नेव सिज्जागओ कया ॥
आगम्मुक्कुडूओ संतो, पुच्छिज्जा पंजलीउडो ॥ २२ ॥

आसने गतः-स्वस्थाने स्थित एव सुशिष्यो गुरुं प्रति सूत्रार्थादिकं न पृच्छेत्तथा पुनः शय्यां गतो रोगाद्युपद्रवं विना कदापि शयानः सूत्रादिकं न पृच्छेत्तर्हि किं कुर्यादित्याह-गुरोः समीपमागत्योत्कुटुको-मुक्तासनः कारणतः पादपुञ्छनादिस्थः सन् शान्तो वा प्राञ्जलिर्बद्धाञ्जलिः सूत्रार्थादिकं पृच्छेत् ॥ २२ ॥

एवं विणयजुत्तस्स, सुत्तं अत्थं च तदुभयं ॥
पुच्छमाणस्स सीसस्स, वागरिज्ज जहा सुयं ॥ २३ ॥

आचार्य एवममुना प्रकारेण विनययुक्तस्य शिष्यस्य सूत्रमर्थं च तदुभयं-सूत्रार्थं पृच्छमानस्योभयं पूर्वोक्तं सूत्रार्थं व्याकुर्याद्-वदेत्, विनयवतः शिष्यस्याग्रे यथाश्रुतं-गुरुपरंपरातो यथाज्ञातं सूत्रार्थं गुरुः कथयेदित्यर्थः ॥ २३ ॥

मुसं परिहरे भिक्खू, न य ओहारिणिं वए ॥
भासादोसं परिहरे, मायं च वज्जए सया ॥ २४ ॥

भिक्षुः साधुर्मृषां भाषां परिहरेत्, च पुनः 'ओहारिणिं' अवधारिणीं-निश्चयात्मिकामेवमेवेतिरूपां भाषां न ब्रुवीत, भाषादोषं-सावद्यानुमोदनादिकं परिहरेत्, च पुनर्मायां वर्जयेत्, एकस्या मायाया [2]ग्रहणेनान्येषामपि क्रोधमानलोभादीनां ग्रहणम्, सर्वान्, कषायान् परिवर्जयेत्, कषायाणां वर्जनान्मृषाभाषाया वर्जनं स्यादेव कारणाभावे कार्याभावः ॥ २४ ॥

न लविज्ज पुट्ठो सावज्जं, न निरट्ठं न मम्मयं ॥
अप्पणट्ठा परट्ठा वा, उभयस्संतरेण वा ॥ २५ ॥

---

१ जुत्तं मु० ॥ २ ग्रहणेनान्येऽपि D. L. ॥

पुनः साधुः पृष्टः सन् सावद्यं-सपापवचनं न लपेन्न भाषेत, निरर्थकं वचनं च [१]नालपेत्, न च मर्मकं-मर्मरूपं वाक्यं साधुर्ब्रूयात्, म्रियतेऽनेनेति मर्म लोक-राजविरुद्धादिकम्, अथवा मर्मणि गच्छतीति मर्मगम्, यस्मिन् कर्मणि प्रकटीभूते सति मनुष्यस्य मरणमेव स्यात्तदपि वाक्यमात्मार्थं वाथवा परार्थं वाथवोभयार्थमन्तरेण प्रयोजनं विनापि च न वदेदित्यर्थः ॥ २५ ॥

स्वगतदोषत्यागमुक्त्वोपाधिकृतदोषत्यागमाह -

समरेसु अगारेसु, संधीसु य महापहे ॥
एगो एगत्थिए सद्धिं, नेव चिट्ठे न संलवे ॥ २६ ॥

एतेषु स्थानेष्वेक-एकाकी सन् साधुरेकाकिन्या स्त्रिया सार्धं न तिष्ठेत्, न चैकाकी साधुरेकया कामिन्या सह संलपेत् । तानि कानि स्थानानि ? समरेषु-गर्दभकुटीरेषु लोहकारशालासु वा, तथाऽगारेषु-शून्यगृहेषु, तथा सन्धिषु-गृहद्वयान्तरालेषु, तथा [२]महापथेषु, राजमार्गेषु अत्रैकस्य-ग्रहणमत्यन्तदुष्टत्वप्रतिपादनार्थम् ॥ २६ ॥ अथ गुरुभिः शिक्षार्थं शिक्षमाणः शिष्यः किं कुर्यादित्याह -

जं मे बुद्धाणुसासंति, सीएण फरुसेण वा ।
मम लाभुत्तिपेहाए, पयओ तं पडिस्सुणे ॥ २७ ॥

बुद्धा-गुरवो यन्मे-मम शीतेन-शीतलवचनेन वाऽथवा परुषेण-कठोर वचनेनाऽनुशासति शिक्षां प्रयच्छन्ति तत् 'मम लाभुत्ति' मम लाभाय अप्राप्तवस्तुप्राप्तये भविष्यतीति प्रेक्षयेति बुद्ध्या प्रयतः- प्रयत्नवान् सन् शिष्यो गुरुवचनं प्रतिश्रृणुयादङ्गीकुर्यात्, न च गुरूणां कठोरवाक्यात् क्रोधं कुर्यात् ॥ २७ ॥

अणुसासणमोवायं, दुक्कडस्स य चोयणं ।
हियं तं मन्नई पन्नो, वेसं होइ असाहुणो ॥ २८ ॥

'पन्नत्ति' प्रज्ञावान्-प्राज्ञः शिष्य उपाये मृदु-परुषभाषणादौ भवमौपायं गुरुशिक्षावाक्यम्, तथा च पुनर्दुष्कृतस्य प्रेरणं हा किमिदं दुष्टं कर्म कृतमित्यादिरूपं तद्वचनं हितमिहलोक-परलोकसुखदं मनुते । 'असाहुणो' असाधोः- कुशिष्यस्य तद् गुरूणां परुषवाक्यं द्वेष्यं-द्वेषोत्पादकं भवति ॥ २८ ॥

इममेवार्थं पुनर्दृढीकरोति -

हियं विगयभया बुद्धा, फरुसं पि अणुसासणं ।
वेसं तं होइ मूढाणं, खंतिसोहिकरं पयं ॥ २९ ॥

---

१ नालपेत मु० ॥ २ महापथे राजमार्गे मु० ॥

विगतभयाः- सप्तभयरहिता, बुद्धा-ज्ञाततत्वाः, एतादृशाः शिष्या आचार्यकृतमनुशासनं परुषमपि-कठोरमपि हितं मन्वते, मूढानां-मूर्खाणां-कुशिष्याणां क्षान्ति-क्षमाकरं शोधिकरमात्मशुद्धेरुत्पादकम् पुनः पदं-ज्ञानादिस्थानमेतादृशं गुरूणां शिक्षावचनं द्वेष्यं-द्वेषहेतुकं भवति ॥ २९ ॥

आसणे उवचिट्ठिज्जा, अणुच्चे अकुए थिरे।
अप्पुट्ठाई निरुट्ठाई, निसीइज्जप्पकुक्कुए ॥ ३० ॥

सुशिष्य एतादृशे आसने उपतिष्ठेत्, कीदृशे आसने ? तदाह-'अनुच्चे' द्रव्येण भावेनानुच्चे गुरोरासनाद्धीने, पुनः [1]अकुच्चे चीत्कारादिशब्दरहिते, तादृशस्यासनस्य शृङ्गाराङ्गत्वात्, पुनः स्थिरे आसने-समपादे तिष्ठेत्। अथ स साधुरीदृशे आसने कीदृशः सन् तिष्ठेत्तदाह अल्पोत्थायी कार्ये सत्यप्यल्पमुत्तिष्ठतीत्येवंशीलोऽल्पोत्थायी मुहुर्मुहुरासनान्नोत्तिष्ठेत्, पुनः कीदृशः ? निरुत्थायी-निमित्तं विना नोत्तिष्ठेत्, स्थिरं तिष्ठेदित्यर्थः। पुनः पुनरुत्थानशीलस्य साधुत्वं न भवेत्, पुनः स साधुः कीदृशो भवेत् ? अल्पकुक्कुचो भवेत्, हस्त-पादशिरःप्रमुखशरीरावयवान्नधुन्वानो निश्चलस्तिष्ठेदित्यर्थः ॥ ३० ॥

चरणे विनयरूपामेषणामाह -

कालेण णिक्खमे भिक्खू, कालेण य पडिक्कमे।
अकालं च विवज्जित्ता, काले कालं समायरे ॥ ३१ ॥

काले-प्रस्तावे भिक्षुः-साधुर्निष्क्रमेद्भिक्षार्थं निर्गच्छेत्, च पुनः काले एव प्रतिक्रमेदाहारं गृहीत्वा स्वस्थानाय पश्चादागच्छेत्। अकालमप्रस्तावं विशेषेण वर्जयित्वा-क्रियाया असमयं त्यक्त्वा, काले-क्रियायोग्यप्रस्तावे एव कालं-तत्समययोग्यक्रियासमूहं समाचरेत्कुर्यात् ॥ ३१ ॥

परिवाडीए न चिट्ठिज्जा, भिक्खू दत्तेसणं चरे।
पडिरूवेण एसित्ता, मियं कालेण भक्खए ॥ ३२ ॥

भिक्षुः-साधुः परिपाट्यां-गृहस्थगृहे जीमनवारादौ भोजनस्थितपुरुषाणां पङ्क्तौ न तिष्ठेत्, तत्र भिक्षोरप्रीति-शंकादिदोषसम्भवात्। पुनर्भिक्षुः-साधुर्दत्ते दाने-गृहस्थेन दीयमाने आहारदाने एषणां चरेदाहारदोषविलोकनं कुर्यात्, न तु जिह्वालौल्येन सदोषाहारं गृह्णीयात्। तच्छुद्धमाहारं प्रतिरूपेण-सुविहितप्राचीनमुनीनां रूपेण, यथा पूर्वाचार्यस्थविरकल्पैः साधुभिः पात्रे आहारं निर्दोषं गृहीतम् तथा गृहीत्वा तदप्याहारं मितं-स्तोकं स्वकुक्षिपूर्तिमात्रं गृहीतव्यम्, अमितभोजने बहुदोषसम्भवात्। एवं विधिनाहारमानीय कालेन नमस्कारपूर्वक-प्रत्याख्यानपारण-समयेन सिद्धान्तोक्तविधिना भक्षयेदाहारं कुर्यादित्यर्थः ॥ ३२ ॥

---

१ पुनरकचे मु० ॥

पुनर्गृहस्थगृहे आहारग्रहणविधिमाह -

नाइदूरमणासन्ने, नन्नेसिं चक्खुफासओ ।
एगो चिट्ठिज्ज भत्तट्ठा, लंघित्ता तं नइक्कमे ॥ ३३ ॥

साधुर्गृहस्थगृहे नातिदूरं तिष्ठेत्, पूर्वसमागतापरभिक्षूणाम् निर्गमननिरोधसम्भवात्, आहारदूषणस्यादर्शनाच्च, पुनस्तथा [1]अनासन्नस्तिष्ठेत्, आसन्ने न तिष्ठेदपरभिक्षूणामप्रीतिसंभवात् । पुनरन्येषां भिक्षुकापेक्षया गृहस्थानां चक्षुःस्पर्शतश्चक्षुःस्पर्शे न तिष्ठेत्, यथाऽन्ये भिक्षवो गृहस्थस्य चक्षुःस्पर्शे तिष्ठन्ति तथा न तिष्ठेदित्यर्थः । कथं तिष्ठेत्तदाह-एकान्तदेशे यथा गृहस्थ एवं न जानाति, अयं साधुरन्यभिक्षुनिर्गमनमिच्छति, एवमेकः पुराऽऽगतभिक्षुकोपरि द्वेषरहितो भक्तार्थमाहारार्थं साधुः *पूर्वमागतं तं भिक्षुं लङ्घयित्वा नातिक्रमेदुल्लङ्घ्य न प्रविशेदित्यर्थः ॥ ३३ ॥

पुनराहारग्रहणविधिमाह -

नाइ उच्चे व नीए वा, नासन्ने नाइ दूरओ ।
फासुअं परकडं पिंडं, पडिगाहिज्ज संजए ॥ ३४ ॥

[2]अत्युच्चैः स्थाने मालादावाहारं न गृह्णीयात्, आहारस्याहारदातुर्वा पतनसम्भवात्, च पुनर्नीचैः स्थानेऽपि भूमिगृहादावाहारं न गृह्णीयात्तत्र चैषणाया असम्भवात् दायकस्य कष्टादिसंभवाद्वा, अथवात्युच्चैः सरसाहारलब्धेरहं लब्धिमानित्यभिमानरहितः, आहारेऽलब्धेऽहं दीनोऽस्मि मह्यं कोऽपि न ददातीति दीनबुद्धिरहित इति भावः । उच्चत्वनीचत्वरहितो नासन्नो-नातिनिकटवर्ती नातिदूरवर्ती, यथायोग्यस्थाने स्थितः प्रासुकं-निर्दूषणं नवकोटिविशुद्धं परकृतं-गृहस्थेनात्मार्थं कृतं पिण्डमाहारं संयतो-जितेन्द्रियः साधुः प्रतिगृह्णीयात् ॥ ३४॥

अथाहारकरणस्थानमाह -

अप्पपाणेऽप्पबीयंमि, पडिच्छन्नंमि संवुडे ।
समयं संजए भुंजे, जयं अप्परिसाडियं ॥ ३५ ॥

संयतः-साधुरेतादृशे स्थाने समकं-साधुभिः समं 'जयं' यतमानः सन् सुरसुरचवचवकसकसकुरडकुरडादिशब्दमकुर्वाणः, अपरिसाटितं-सिक्थुपातनेन रहितमाहारं भुञ्जीत । कीदृशे स्थाने ? अल्पप्राणे-अल्पा अविद्यमाना प्राणा यत्र तत् अल्पप्राणं तस्मिन् द्वीन्द्रियादिजीवरहिते, अवस्थित-आगन्तुकप्राणरहिते, पुनः कीदृशे स्थाने ? अल्पबीजे

---

१ नासन्नं मु० ॥ * पूर्वमागतं भिक्षुं D. । लङ्घयित्वा तं नातिक्रमे° L. ॥ २ उच्चैः मु० ॥

बीजग्रहणोपलक्षणेन सर्वैकेन्द्रियरहिते, पुनः कीदृशे ? प्रतिच्छन्ने- [1]'सम्पातिमजीवरक्षार्थं संवृते पार्श्वतः कटकुट्याद्याच्छादिते, अन्यथा रङ्कादिदीनयाचकादीनां याचने दानाभावे निन्दाया उत्पत्तेः प्रद्वेषसम्भवात्, दाने सति पुण्यबन्धसद्भावात्, तस्मान्निरवद्यस्थाने आहारं कुर्यात् ॥ ३५ ॥

अथाहारकरणप्रस्तावे वाग्यतनामाह -

सुकडित्ति सुपक्किित्ति, सुच्छिन्ने सुहडे मडे ।
सुनिट्ठिए सुलट्ठित्ति, सावज्जं वज्जए मुणी ॥ ३६ ॥

मुनिरेतादृशं सावद्यं-सपापं वचनं वर्जयेन्न ब्रुवीत, एतादृशं कीदृशं ? तदाह- सुकृतमिदमन्नादि, पुनः सुपक्वं घृतपूरादि, सुच्छिन्नमिदं शाकादि, सुहृतम्-कारेल्लकादिस्थं कटुकत्वं सम्यक् हृतम्, अथवा वटकादिना मगदसीरककंसारादिना घृतं सुष्ठु हूतम्, तथा पुनर्मृतं-मुद्गादिके सुष्ठु घृतं मृतम्, एतदाहारं सम्यग्निष्ठां प्राप्तं-सरसत्वं प्राप्तम्, पुनरिदमाहारं सुलष्टमखंडोज्ज्वलतन्दुलहरितमुद्गादिनिष्पन्नमेतत् प्रधानं भोजनमित्यादिकं वचनं वर्जयेत् । निरवद्यं तु भाषेत यथा-क्रमात् सुकृतं धर्मध्यानादि, सुपक्वं वचनविज्ञानादि, सुष्ठु छिन्नं स्नेहपाशादि, सुष्ठु हृतं मिथ्यात्वादि, सुष्ठु मृतं पण्डितमरणेन, सुनिष्ठितं साध्वाचारे, सुलष्टं व्रतग्रहणमित्यादि निरवद्यं वचनं ब्रूयादित्यर्थः ॥ ३६ ॥

विनीताविनीतयोरनुशासने गुरोर्यत् स्यात् तदाह -

रमए पंडिए सासं, हयं भद्दं व वाहए ।
बालं सम्मइ सासंतो, गलियस्सं व वाहए ॥ ३७ ॥

अत्र गुरुरिति कर्तृपदमनुक्तमपि गृहीतव्यम्, गुरुः पण्डितान्-विनीतशिष्यान् शासत् -शिक्षां ददत् पाठयन् रमते रतिमान् स्यात्-प्रसन्नो भवेदित्यर्थः, क इव ? वाहक इव- अश्ववार इव, यथाश्ववारो भद्रं-सुशिक्षितं हयं वाहयन्-खेलयन् रमते-हर्षितो भवेत्, बालं-मूर्खं शिष्यं शासदाचार्यः श्राम्यति-श्रमं प्राप्नोति, कमिव ? गल्यश्वं - दुर्विनीततुरङ्गं वाहक इवाश्ववार इव, यथाश्ववारो दुर्विनीततुरङ्गं वाहयन् खेदं प्राप्नोति, तथा कुशिष्यं पाठयन् गुरुर्दुःखितो भवेदित्यर्थः ॥ ३७ ॥

गुर्वनुशासनेऽविनीताभिप्रायमाह -

खड्डुया मे चवेडा मे, अक्कोसा य वहा य मे ।
कल्लाणमणुसासंतो, पावदिट्ठित्ति मन्नइ ॥ ३८ ॥

---

१ सम्पातिमसत्त्वजीवरक्षार्थं - L. ॥

दुर्विनीतशिष्यः कल्याणमिहलोक-परलोकहितमनुशासन्तं-शिक्षयन्तमाचार्यं पापा दृष्टिरस्येति पापदृष्टिः, अयमाचार्यः पापदृष्टिरस्ति-पापकारी वर्तते 'मे' मह्यं [१]खडुकान्-टक्करान् ददाति, 'मे' मह्यं चपेटान् ददाति, 'मे' मह्यमाक्रोशान्-दुर्वचनानि श्रावयति, पुनः 'मे' मह्यं वधान्- [२]कम्बादिघातान् ददाति, अपरं समीहितं किमपि न दृश्यते, आचार्यः पापः केवलं मह्यं टक्करादीनेव ददातीति मन्यते, न तु हितकारकमाचार्यं मनुते ॥ ३८ ॥

अथ पुनर्विनीतदुर्विनीतयोर्वर्णनमाह -

पुत्तो मे भाय नाइत्ति, साहू कल्लाणमन्नइ ।
पावदिट्ठी उ अप्पाणं, सासं दासं व मन्नइ ॥ ३९ ॥

साधुः सुशिष्यः कल्लाणं-हितकारं गुरुं गुरुवचनं वा कल्याणकारकं मनुते । अयमभिप्रायः-यदा सुशिष्यं प्रत्याचार्यो गुरुरनुशास्ति तदा सुशिष्यो मनस्येवं जानाति, आचार्यो 'मे' मम पुत्रस्येव भ्रातुरिव ज्ञातेः- स्वजनस्य स्वस्येवानुशास्ति स्वकीयस्य बुद्धया 'मे' मह्यं पाठयति । पापदृष्टिः- कुशिष्यो गुरुणा शास्यमानमात्मानं दासमिव मनुते, अयं मां दासमिव तर्जयतीति मनसि दुःखितो भवत्याचार्यं निन्दतीत्यर्थः ॥ ३९ ॥

न कोवए आयरिअं, अप्पाणंपि न कोवए ।
बुद्धोवघाई न सिया, न सिया तुत्तगवेसए ॥ ४० ॥

विनीतशिष्य आचार्यं न कोपयेत्तथाऽपरमपि न कोपयेत्तथात्मानमपि न कोपयेत्, पुनः शिष्यो बुद्धोपघात्याचार्यस्योपघातकारी न स्यात्, युगप्रधानाचार्योपघातिकुशिष्यवन्न स्यात्, पुनस्तोत्रगवेषकोऽपि न स्यात् यथा दुर्विनीततुरगः प्राजनकगवेषको भवेत्तथा सुशिष्यो द्रव्यतो भावतश्च तोत्रस्य-प्राजनकस्य गवेषको न भवेत् । द्रव्यतोत्रं चपेटादि, भावतोत्रं व्यथाकारिवचनं ज्ञेयम् ।

अत्र दृष्टान्तः-

कोऽप्याचार्योऽष्टविधगणिसम्पत्समन्वितो बहुश्रुतः प्रकृत्यापि शान्तः क्षीणजङ्घाबलः क्वापि ग्रामे स्थितः, तत्र कुशिष्याः सततं [३]वैयावृत्यविधिविधानभग्नपरिणामैर्गुरुमारणार्थं सदौषधादिचिन्ताकारकाणामपि श्रावकाणां पुर इति प्रवदन्ति-गुरवोऽनशनं चिकीर्षवः किमप्यौषधादिकं न गृह्णन्ति, इत्युक्त्वान्तप्रान्तमाहारमानीय गुरवे प्रयच्छन्ति वदन्ति [च] नित्यावस्थायित्वेनात्मनां गृहस्था अतिविशिष्टं न किञ्चिद्यच्छन्ति । ततः श्राद्धैः संलेखना-स्वरूपं गुरवः पृष्टाः, शिष्याणां कूटमप्रीतिं च ज्ञात्वा कृतमेवानशनं तैरित्येवमाचार्योपघाती न स्यादितिभावः ॥ ४० ॥

---

१ खडुक = ठोकर । २ कम्बा = यष्टि । ३ वैयावृत्त्यविधान० D.L. ॥

आयरियं कुवियं नच्चा, पत्तिएण पसायए ।
[1]विज्झवेज्ज पंजलिउडो, वइज्ज न पुणोत्ति य ॥ ४१ ॥

सुशिष्य आचार्यं-गुरुं 'पत्तिएण' प्रीतिसमुत्पादकेन वचनेन प्रसादयेत्प्रसन्नं कुर्यात् । किं कृत्वा ? कुपितं ज्ञात्वा-गुरुं सक्रोधं ज्ञात्वा विनीतशिष्यः प्राञ्जलिपुटः सन् क्रुद्धमाचार्यं विध्यापयेच्छान्तं कुर्यात्, क्रुद्धस्य गुरोरग्रे सुशिष्येणेवं वक्तव्यम्, हे स्वामिन् ! पुनरेवं न कुर्यां, ममापराधोऽयं क्षन्तव्यः ॥ ४१ ॥

धम्मज्जियं च ववहारं, बुद्धेहायरियं सया ।
[2]तमायरंतो ववहारं, गरहं नाभिगच्छइ ॥ ४२ ॥

साधुस्तं व्यवहारं-साध्वाचारमाचरन् गर्हां नाभिगच्छति, व्यवह्रियते-अङ्गीक्रियते धर्मार्थिभिरिति व्यवहारस्तं व्यवहारमङ्गीकुर्वन् मुनिर्निन्दां न प्राप्नोति, तं कं व्यवहारं ? यो व्यवहारः सदा-सर्वदा बुद्धैर्ज्ञाततत्त्वैराचरितः, पुनर्यश्च व्यवहारो धर्मार्जितो-धर्मेण-साधुधर्मेणोत्पादितः । कथंभूतं व्यवहारम् ? व्यपहारं-विशेषेणापहरति पापमिति व्यपहारस्तं व्यपहारमनेन प्राणातिपाताद्याश्रवनिवारकः साध्वाचारो दर्शितः ॥ ४२ ॥

मणोगयं वक्कगयं, जाणित्तायरियस्स उ ।
तं परिगिज्झ वायाए, कम्मुणा उववायए ॥ ४३ ॥

सुशिष्य आचार्यस्य मनोगतं-मनसि स्थितं कार्यं पुनर्वाक्यगतं कार्यं पूर्वं ज्ञात्वा पश्चात्तत्कार्यं वाचा परिगृह्याङ्गीकृत्याहमेतत्कार्यं करोमीत्युक्त्वा कर्मणा-क्रियया तत्कार्यमुत्पादयेत्, गुरोर्मनसि स्थितं, गुरूक्तं, गुरुणा क्रियमाणं कार्यं सुशिष्येण त्वरितं विधेयमित्यर्थः ॥ ४३ ॥

वित्तो अचोइए निच्चं, खिप्पं हवइ सुचोइए ।
जहोवइट्ठं सुकयं, किच्चाइं कुव्वइ सया ॥ ४४ ॥

'वित्तो' विनयादिगुणेन प्रसिद्धो विनीतशिष्योऽनोदितोऽप्रेरितोऽपि सर्वेषु कार्येषु नित्यं प्रवर्त्तते, कदाचित्स्वयं कार्यं कुर्वाण आचार्येण प्रेरितश्चेत्तदा क्षिप्रं भवति-शीघ्रं कार्यकृद्भवति, कार्यं कुर्वन्नाचार्यप्रेरितः शिष्य एवं न ब्रूयादहं तु कार्यं करोम्येव, किं भवद्भिर्वृथैव प्रलप्यते ? [3]यथोपदिष्टं सुकृतं-कार्यं सदा कुर्वीत, एकं कार्यं वाऽथवा कृत्यानि बहूनि कार्याणि कुर्वीत, गुर्वादेशेष्वालस्यं न विधेयम्, प्रसन्नतया तदेव कार्यं त्वरितं विधेयमित्यर्थः ॥ ४४ ॥

---

१ विज्झज्झ मु० ॥ २ समायरंतो मु० ॥ ३ यथोपदिष्टं कार्यं D.L. ॥

नच्चा नमइ मेहावी, लोए कित्ती से जायए ।
हवइ किच्चाण सरणं, भूयाणं जगई जहा ॥ ४५ ॥

मेधावी-बुद्धिमान् साधुर्नमति-विनयं करोति, किं कृत्वेति विनयशिक्षां ज्ञात्वा, तस्य नम्रस्य लोके कीर्त्तिर्जायते, पुनः स विनयवान् साधुः कृत्यानामुचितकार्याणां शरणं भवत्याश्रयो भवति । केषां का ? यथा भूतानां-तरूणां जगति-पृथ्वी यथा आश्रयभूता तथा सर्वेषां साधुकार्याणां विनयी साधुराश्रयो भवतीत्यर्थः ॥ ४५ ॥

पुज्जा जस्स पसीयंति, संबुद्धा पुव्वसंथुया ।
पसन्ना लाभइस्संति, विउलं अट्ठियं सुयं ॥ ४६ ॥

पूज्या-आचार्या गुरवो यस्य शिष्यस्य प्रसीदन्ति-प्रसन्ना भवन्ति, ते गुरवः प्रसन्नाः सन्तस्तं शिष्यं प्रति [1]विपुलमर्थितं-विस्तीर्णं वाञ्छितं श्रुतं-श्रुतज्ञानं लाभयिष्यन्ति-प्रापयिष्यन्ति, कथंभूताः पूज्याः ? सम्बुद्धाः- सम्यग्ज्ञाततत्वाः, पुनः कथंभूताः ? पूर्वसंस्तुताः-पूर्वं सम्यक्प्रकारेण स्तुताः पठनकालात्पूर्वमेव संस्तुता विनयेन परिचिता-रञ्जितास्तत्कालविनयस्य कृतिप्रतिक्रियारूपत्वेन तथाविधप्रसादाऽजनकत्वात्, तेन सर्वदा संस्तुताः । अथवा कथंभूतं श्रुतम् ? आर्थिकमर्थो मोक्षः प्रयोजनमस्येति आर्थिक-मर्थान्मोक्षोत्पादकं श्रुतधर्मं प्रापयिष्यन्ति ॥ ४६ ॥

स पुज्जसत्थे सुविणीयसंसए, मणोरुई चिट्ठइ कम्मसंपया ।
तवोसमायारिसमाहिसंवुडे, महज्जुई पंचवयाइं पालिया ॥ ४७ ॥

स सुशिष्य आचार्येभ्यो लब्धश्रुतधर्मे मनोरुचिस्तिष्ठति, मनसो रुचिर्नैर्मल्यं यस्य स मनोरुचिर्निर्मलचित्तः, अथवा मनसो-गुरोश्चित्तस्य रुचिर्यस्य स मनोरुचिः, गुरुचित्तस्थ बुद्धियुक्त इत्यर्थः । पुनः कीदृशः [2]सुशिष्यः ? कर्मसम्पदा दशधा समाचारी करणसम्पदोपलक्षितः, पुनः कीदृशः ? पूज्यशास्त्रः, पूज्यं-सर्वजनश्लाघ्यं शास्त्रं यस्य स पूज्यशास्त्रः, गुरुमुखादधीतं शास्त्रं विनयपूर्वकमधीतं च पूज्यं शास्त्रं भवत्येव यदुक्तम् -

"नहि भवति निर्विगोपक-मनुपासितगुरुकुलस्य विज्ञानम् ।
प्रकटितपश्चिमभागं, पश्यत नृत्यं मयूरस्य ॥ १ ॥"

पुनः कीदृशः सुशिष्यः ? सुविनीतसंशयः सुतरामतिशयेन विनीतो-दूरीकृतः संशयो यस्य स सुविनीतसंशयोऽपगतसंशयो लब्धरहस्य इत्यर्थः । पुनः कीदृशः स ? तपःसमाचारीसमाधिसंवृतस्तपसः समाचारी [3]तपःसमाचारी, तपःसमाचरणं समाधिश्चित्तस्य स्वास्थ्यम्, तपःसमाचारी च समाधिश्च तपःसमाचारीसमाधी, ताभ्यां संवृतो-निरुद्धाश्रवः,

---

१ विपुलमर्थिनं मु० ॥ २ स सुशिष्यः मु० ॥ ३ तपः समाचारी मु० नास्ति ॥

पुनः कीदृशः सुशिष्यः ? महाद्युतिर्महती द्युतिर्यस्य स महाद्युतिः, [1]महातपास्तेजो-लेश्यापुलाकलब्ध्यादिसहितो भवति तादृशः सन् पञ्चमहाव्रतानि पालयित्वा कीदृशो भवति ? ॥ ४७ ॥

तदाह -

स देवगंधव्वमणुस्सपूइए, चइत्तु देहं मलपंकपुव्वयं ।
सिद्धे वा हवइ सासए, देवे वा अप्परए महड्ढिए ॥ ४८ ॥ त्तिबेमि ॥

स पूर्वोक्तलक्षणसहितो मुनिर्विनयी शिष्यो देवैर्द्वादशकल्पवासिभिर्गंधर्वैर्देव-गायनैस्तथा मनुष्यैः पूजितो भवति, ततश्चायुःक्षये देहं त्यक्त्वा सिद्धो भवति । कथंभूतः सिद्धः ? शाश्वतो-जन्ममरणरहितः, कथंभूतं देहं ? मलपङ्कपूर्वकं, मनुष्यशरीरं हि औदारिकं [2]शुक्र-रेतोजनितं* भवति, तादृशं त्यक्त्वा सिद्धिभाक् स्यात्, अथवा देवो भवति, देवः कीदृशः ? अल्परतोऽल्पमविद्यमानं रतं क्रीडितं मोहनीयजनितं कर्म यस्य सोऽल्परतः, अथवाल्परजा रजोरहितः, पुनः कथंभूतो देवः ? महर्द्धिको महती ऋद्धिर्यस्य स महर्द्धिकः, ऋद्धिर्विकुर्वणा तया सहित, इति परिसमाप्तौ । एवममुना प्रकारेण वा एतद्विनयश्रुताध्ययनं ब्रवीमि गणधराद्युपदेशेन, न तु स्वबुद्धया ब्रवीमि ॥ ४८ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणि-शिष्यलक्ष्मीवल्लभगणिविरचितायां प्रथमाध्ययनार्थः सम्पूर्णः ॥ १ ॥

---

१ महातपस्ते° D.L. ॥ २ शुक्ररक्त - मु० ॥ * रेतस् = वीर्य

२. परीषह अध्ययनं

अयं च विनयः परीषहजेतृभिः साधुभिः कर्तव्यस्तस्मात् सुधर्मास्वामी जम्बूस्वामिनं प्रत्याह

सुअं मे आउसं तेणं भगवया एवमक्खायं, इह खलु बावीसं परीसहा समणेणं भगवया महावीरेणं कासवेणं पवेइया, जे भिक्खू सुच्चा नच्चा जिच्चा अभिभूय भिक्खायरियाए परिव्वयंतो पुट्ठो नो विहन्निज्जा ॥

[1]*इत्यालापकम्,*

अस्यार्थ :- 'आउस' इति शिष्यस्यामंत्रणे[2], हे आयुष्मन् ! हे शिष्य ! मे-मया श्रुतम् 'तेणं' इति तेन सद्गुरुणा प्रसिद्धेन भगवता ज्ञानवतैवमाख्यातमेवं समन्तात् कथितम् । 'इह' अस्मिन् जिनशासने हे शिष्य ! हे जम्बू ! श्रमणेण भगवता महावीरेण काश्यपगोत्रेण 'खलु' निश्चयेन द्वाविंशतिपरीषहाः प्रवेदिताः- प्रकर्षेण स्वयं [3]साक्षात्कारित्वेन ज्ञाताः । तीर्थङ्कराणां स्वयं सम्बुद्धत्वादात्मागमः, गणधराणामनन्तरागमः, तीर्थङ्करेभ्यो यादृशमर्थं गणधराः शृण्वन्ति, तादृशमनन्तरं धारयन्ति तस्मादृणधराणामनन्तरागमो, गणधरशिष्याणां हि परम्परागमः, तस्मात् श्रीमहावीरस्वामिना स्वयमेव ज्ञाताः, परि समन्तात् सह्यन्ते साधुभिरिति परीषहा द्वाविंशतिर्यान् द्वाविंशतिपरीषहान् भिक्षुः साधुः श्रुत्वा गुरुमुखात्, कर्णे धृत्वा, [4]ज्ञात्वा यथास्वरूपेणावबुद्ध्य, यान् परीषहान् जित्वा पुनः पुनरभ्यासेन परिचितान् कृत्वा, पुनर्यान् परीषहानभिभूय धैर्येण तिरस्कृत्य भिक्षाचर्यायां परिव्रजन् साधुस्तैर्द्वाविंशतिपरीषहैः स्पृष्ट आश्लिष्टः सन्न विहन्येत संयमरूपशरीरपातेन न म्रियेत ।

इति सुधर्मस्वामिना प्रोक्ते सति जम्बूस्वामी गुरुं प्रति पृच्छति -

कयरे खलु [5]ते बावीसं परीसहा समणेणं भगवया महावीरेणं कासवेणं पवेइया ? जे भिक्खू सुच्चा नच्चा जिच्चा अभिभूय भिक्खायरियाए परिव्वयंतो पुट्ठो नो विहन्निज्जा ॥

हे स्वामिन् ! कतरे- के ते किंनामानः, खलु-निश्चयेन, खलु शब्दो वाक्यालङ्कारे वा, द्वाविंशतिपरीषहा यान् श्रुत्वा ज्ञात्वा जित्वाऽभिभूय भिक्षाचर्यायां परिव्रजन् साधुर्यैर्द्वाविंशतिपरीषहैः स्पृष्टः सन्न [6]विहन्येत ।

---

१ इत्याद्यालापकं मु० ॥ २ °णं - मु० ॥ ३ साक्षाद् ज्ञाताः मु० ॥ ४ ज्ञात्वा D. नास्ति ॥ ५ ते मु० नास्ति ॥ ६ विहन्यते D. ॥

तदा श्रीसुधर्मास्वामी जम्बूस्वामिनम् प्रति वदति -

इमे खलु ते बावीसं परीसहा समणेणं भगवया महावीरेणं कासवेणं पवेइया, जे भिक्खू सुच्चा नच्चा जिच्चा अभिभूय भिक्खायरियाए परिव्वयंतो पुट्ठो नो विहन्निज्जा ॥

हे जम्बू ! इमे वक्ष्यमाणा हृदि वर्तमानत्वात् प्रत्यक्षा ये त्वया सोढास्ते द्वाविंशतिपरीषहाः श्रमणेन भगवता महावीरेण काश्यपेन प्रवेदिता, यान् परीषहान् श्रुत्वा ज्ञात्वा जित्वाभिभूय भिक्षाचर्यायां परिव्रजन् साधुः परीषहैः स्पृष्टः सन्न [1]विहन्येत ।

[2]*तद्यथा-तेषां परीषहाणां नामान्युच्यन्ते ।*

तं जहा - दिगंछापरीसहे० १, पिवासापरीसहे० २, सीयप० ३, [3]उसिणप० ४, [4]दंसमसयप० ५, अचेलप० ६, अरतिप० ७, इत्थीप० ८, चरियाप० ९, निसीहियाप० १०, सिज्जाप० ११, अक्कोसप० १२, वहप० १३, जायणाप० १४, अलाभप० १५, रोगप० १६, तणफासप० १७, जल्लप० १८, सक्कारपुरक्कारप० १९, पन्नाप० २०, अन्नाणप० २१, दंसणप० २२ ॥

नामानि सुगमान्येव । नवरं दिगंछाशब्देन देशीभाषया क्षुधोच्यते, सा क्षुधैव षट्कायमर्दनपातकभयेनाहारपाकादिनिवर्तनेन, शुद्धाहारालाभेन वा, परि समंतात् सह्यते इति परीषहो दिगञ्छापरीषहः, एवमपरेष्वपि व्युत्पत्तिः कार्या ।

परीषहाणां नामान्युक्त्वा स्वरूपेण वक्तुकामः सम्बन्धार्थमाह -

परीसहाणं पविभत्ती, कासवेणं पवेइया ।
तं भे उदाहरिस्सामि, आणुपुव्विं सुणेह मे ॥ १ ॥

हे शिष्याः परीषहाणां प्रविभक्तिः- प्रकर्षेण विभजनं प्रविभक्तिः, पृथक्पृथग्विभागः-प्रविभक्तिः, काश्यपेन-काश्यपगोत्रीयेण श्रीमहावीरदेवेन प्रवेदिता 'विद् ज्ञाने' प्रकर्षेण ज्ञाता इत्यर्थः । तां परीषहाणां प्रविभक्तिमहमानु[5]पूर्व्याऽनुक्रमेण 'भे' भवतामुदाहरिष्यामि, 'मे' मम कथयिष्यतस्तां परीषहप्रविभक्तिं यूयं श्रृणुत ॥ १ ॥ अत्र सर्वेषु परीषहेषु पूर्वं क्षुधाया निर्देशः, सर्वेषु परीषहेषु क्षुधाया दुस्सहत्वात्, यदुक्तं - '[6]खुहासमा वेयणा नत्थि' इति ।

---

१ विहन्यते D. ॥ २ तद्यथा मु० नास्ति ॥ ३ उसणप० मु० ॥ ४ दंसमसपरि° मु० ॥ ५ °पूर्व्यामनु° मु० ॥ ६ क्षुधासमा वेदना नास्ति ॥

अथ द्वाभ्यां गाथाभ्यां क्षुधापरीषहजयं वदति -

दिगंछपरिगए देहे, तवस्सी भिक्खू थामवं ।
न छिंदे न छिंदावए, न पए न पयावए ॥ २ ॥

कालीपव्वंगसंकासे, किसे धमणिसंतए ।
मायन्ने असणपाणस्स, अदीणमणसो चरे ॥ ३ ॥

तपस्वी साधुर्दिगञ्छा-क्षुधा, तया परिगते-व्याप्ते देहे सति न छिंद्यात्, तरूणां फलादिकं स्वयं न त्रोटयेत्, न चापरेण छेदयेत्, न च स्वयमन्नादिकं शाकादिकं च पचेत्, न च परेण पाचयेत्, नवकोटिशुद्धिबाधां न कुर्यात्, [1]कथंभूतस्तपस्वी ? स्थामवान् मनोबलयुक्तः, पुनः कीदृशः ? कालीपर्वाङ्गसङ्काशः, काली-काकजङ्घा, तस्याः पर्वाणि मध्ये तनूनि भवन्ति, अन्त्ये स्थूलानि भवन्ति । तदाकाराणि बाहुजङ्घाद्यङ्गानि भवन्ति यस्य तपस्विनो जानुकूर्परादयोऽवयवाः काकजङ्घासदृशा दृश्यन्ते इत्यर्थः । कालीपर्व-सङ्काशाङ्ग इति पाठो युज्यते, कालीपर्वांगसङ्काशः इति पाठस्त्वार्षत्वात्, प्राकृतत्वात् सङ्काशशब्दस्य परनिपातः, अङ्गशब्दस्य पूर्वनिपातः, पुनः कथंभूतस्तपस्वी ? कृशः, पुनः कथंभूत-स्तपस्वी ? धमनीसंततः धमनीभिर्नाडीभिः संततो-व्याप्तो यस्य शरीरं नसाभिर्व्याप्तं दृश्यत इत्यर्थः । पुनः कीदृशस्तपस्वी ? अशनपानस्य [2]'मायन्ने' मात्रज्ञो मात्रमन्नपाने स्वस्योदर-पूर्तिप्रमाणं जानाति, यावताऽऽहारेण स्वकीयोदरपूर्तिः स्यात्तावत्प्रमाणमेवाहारं गृह्णीयात्, न तु यस्तपस्वी रसादिलौल्यादधिकं गृह्णातीत्यर्थः, इति मात्रज्ञः । पुनर्यस्तपस्वी अदीनमनाः, अदीनं मनो यस्य सोऽदीनमनाः, तपसः पारणादावाहारस्याप्राप्तावप्यदीनचित्तः सन् चरेत्, संयममार्गे प्रवर्तेत, अलब्धे तपसो वृद्धिर्लब्धे [3]देहस्य धारणा इति बुद्धिं चित्ते दधानस्तिष्ठेदित्यर्थः ॥ २ ॥ ३ ॥

तत्र दृष्टान्तो -

यथा उज्जयिन्यां हस्तिमित्रश्रेष्ठी वर्तते, तस्य हस्तिभूतनाम बालकोऽस्ति, अन्यदा हस्तिमित्रश्रेष्ठिनः प्रिया मृता, दुःखगर्भवैराग्येण हस्तिमित्रश्रेष्ठी हस्तिभूतदारकेण समं प्रव्रजितः । अन्यदा दुर्भिक्षे साधुभिः समं विहरन्नसौ हस्तिमित्रसाधुर्भोजकटनगरमार्गाटव्यां कण्टकेन विद्धपादोऽग्रे विहर्त्तुमक्षमोऽटव्यामेव स्थितः, तमक्षमं दृष्ट्वा साधुभिर्भणितं वारकेण त्वां मार्गे वहिष्यामः, मा विषादं कृथाः, तेन भणितं मदायुः स्तोकमेवास्ति, अतोऽहमत्रैव भक्तं प्रत्याख्यामि, यूयं यात । मदर्थमत्र [4]स्थितस्यान्यस्य कस्यापि साधोर्माभूद्विनाश इत्युक्तवन्तं क्षमयित्वा भक्त-पानप्रत्याखानं कारयित्वा तत्रैव मुक्त्वा

---

१ क कथंभूत° मु० ॥ २ मायन्नत्ति मु० ॥ ३ देहधारणा मु० ॥ ४ स्थितस्यान्यस्यापि L. ॥

चानिच्छन्तमपि क्षुल्लकं गृहीत्वा ते साधवश्चेलुः । क्षुल्लकोऽर्धमार्गात्तान् विप्रतार्य पितृमोहेन तत्रायातः, तावता गृहीताऽनशनः स मृतो देवोऽभूत, क्षुल्लको मौग्ध्यात्तं मृतं न जानाति, सुप्तस्य तत्कलेवरस्य पार्श्व एव भ्रमति, क्षुधार्त्तोऽपि फलादिकं न गृह्णाति, ततः स देवः क्षुल्लकमोहेन निजदेहमधिष्ठायावदद्वत्स ! गच्छ भिक्षायां । क्षुल्लकेन भणितं कुत्र व्रजामि ? तेन भणितमेषु [1]ध[2]वनिकुञ्जेषु व्रज, तन्निवासिनो जना भिक्षां दास्यन्ति, ततस्तथेति भणित्वा क्षुल्लकस्तत्र गतो धर्मलाभमुच्चचार, स देवो नरनारीरूपं विधाय करं प्रसार्य दिव्यशक्त्या तस्मै भक्तपानादि ददौ, तावद्यावद् दुर्भिक्षे निवृत्ते भोजकटनगरात् पश्चाद्वलिताः साधवस्तेनैव मार्गेण तत्रागताः, जीर्णशबं दृष्ट्वा ज्ञातदिव्यप्रयोगास्तं क्षुल्लकं गृहीत्वा विजहुः । यथा ताभ्यां पितृपुत्राभ्यां क्षुत्परीषहः सोढस्तथा साम्प्रतिकमुनिभिरपि सोढव्यः ।

अथ भिक्षार्थमटतस्तृषाया उदयः स्यात्तदा तत्परीषहोऽपि सोढव्यः, इममेवार्थं गाथाद्वयेनाह -

तओ पुट्ठो पिवासाए, दुगंच्छी लज्जसंजए ।
सीओदगं न सेविज्जा, वियडस्सेसणं चरे ॥ ४ ॥

छिन्नावाएसु पंथेसु, आउरे सुपिवासिए ।
परिसुक्कमुहेऽदीणे, तं तितिक्खे परीसहं ॥ ५ ॥

ग्रामनगरादौ भिक्षार्थं भ्रमन् दुगञ्छी-अनाचाराद्भीतः, एतादृशो लज्जसंयतो लज्जायां सं-सम्यक् यतते-यत्नं कुरुते इति लज्जसंयतो लज्जावान् साधुर्न हि निर्लज्जो धर्मार्हः, तस्माल्लज्जसंयतस्तपस्वी । ततः क्षुधापरीषहानन्तर एव पिपासया-तृषया स्पृष्टः सन् शीतोदकमप्रासुकजलं न सेवेत न पिबेदित्यर्थः । 'वियडस्स' प्रासुकजलस्य शस्त्रपरिणतस्य रसान्तरं वर्णान्तरं च प्राप्तस्य वह्न्यादिना शुद्धस्यैषणाय ग्रहणाय चरेत्, प्रासुकपानीयग्रहणाय गृहस्थगृहे व्रजेदित्यर्थः ॥ ४ ॥

अथ ग्रामनगरादिभ्यो बहिर्वनाटव्यादिमार्गे व्रजन् साधुश्चेत्तृषया पीडितः स्यात्तदापि तृषापरीषहं सहेत्र तु तत्र साधुनैवं ज्ञातव्यमत्र कोऽपि गृहस्थो दाता न दृश्यतेऽहं स्वयमेव जलं गृहीत्वा पिबामि । तदेव मार्गवैषम्यमाह - 'छिन्नेति' एतादृशेषु पथिषु-मार्गेषु पूर्वोक्तस्तपस्वी पिपासापरीषहं तितिक्षेत-सहेत, कीदृशेषु पथिषु ? छिन्नो गत-आपातो लोकानां गमनागमनं येभ्यस्ते छिन्नापातास्तेषु, कीदृशः ? स्वयं तपस्व्यातुरस्तृषया आकुलतनुः, पुनः कीदृशः ? सुपिपासितः, सुतरामतिशयेन पिपासितोऽत्यन्तं तृषितः, पुनः कीदृशः ? परिशुष्कमुखो गतनिष्ठीवनत्वेन शुष्कतालुजिह्वोष्ठः, पुनः कीदृशः ? एतादृशोऽप्यदीनः ॥ ५ ॥

---

१ धवनिकुंजेषु त्वं व्रज मु० ॥ २ धव = वृक्षविशेष ।

अत्र धनमित्रकथा -

उज्जयिन्यां धनमित्रो वणिक्, धनशर्मनाम्ना स्वसुतेन समं प्रव्रजितः। अन्यदा मार्गे क्षुल्लकस्तृट्पीडितो नदीं दृष्ट्वा पित्राऽवादि वत्स ! पिब जलं पश्चादालोचनया दोषशुद्धिर्भाविनी, इत्युक्ते क्षुल्लो नेच्छति, ततः पिता साधुः स्वशङ्कानिरासार्थं शीघ्रं नदीमुत्तीर्यान्ये गतः, क्षुल्लो नद्यां प्रविष्टो जलाञ्जलिमुत्क्षिप्य चिंतितवान्, कथं जलं पिबामि ? यतः-

*"एगंमि उदगबिंदुंमि । जे जीवा जिणवरेहिं पन्नत्ता ॥
ते[१] पारेवयमित्ता । जंबूद्दीवे न मायंति ॥ १ ॥

[संबोधसित्तरि गाथा ९५]

जत्थ जलं तत्थ वणं । जत्थ वणं तत्थ निच्चिओ अग्गी ।
तेऊ वाऊसहगया । तसा य पच्चक्खया चेव ॥ २ ॥

हंतूण परप्पाणे । अप्पाणं जे कुणंति सप्पाणं ।
अप्पाणं दिवसाणं । [२]कएण नासेइ अप्पाणं ॥ ३ ॥

इति संवेगेन जलमञ्जलितः पश्चाद्यत्नेन मुक्तम्, ततस्तृषया मृत्वा स देवो जातः, अवधिज्ञानावगतपूर्वभववृत्तान्तेन तेन साधूनामनुकंपया पथि गोकुलं कृतम्, तत्र तक्रादि शुद्धमिति गृहीत्वा साधवः सुखिनो जाताः, अग्रे चलिताः, तेन देवेन स्वस्वरूपज्ञापनार्थमेकस्य साधोर्विंटिका गोकुले स्थापिता, विंटिकाग्रहणार्थं पश्चाद्वयावृत्तमुनिवचसा सर्वैरपि साधुभिर्ज्ञातगोकुलाभावैस्तत्र दिव्यमाया ज्ञाता, तत्पिण्डभोजनविषयं मिथ्यादुष्कृतं दत्तम्। ततस्तत्रायातेन देवेन पितरं मुक्त्वा सर्वे साधवो वन्दिताः, पित्राऽवंदनकारणं पृष्टः सर्वं स्ववृत्तान्तं पितुर्जलपा[३]नानुमतिं च प्रोच्य गतो देवः स्वस्थानम्, एवं क्षुल्लकवत्तृट्परीषहः सोढव्यः ॥ २ ॥

अथ क्षुधापिपासापीडितस्य कृशस्य शीतमपि शरीरे लगति, तदपि सोढव्यम्, तदपि गाथाद्वयेनाह -

चरंतं विरयं लूहं, सीयं फुसइ एगया ।
नाइवेलं मुणी गच्छे, सुच्चा णं जिणसासणं ॥ ६ ॥

न मे निवारणं अत्थि, छवित्ताणं न विज्जई ।
अहं तु अग्गिं सेवामि, इइ भिक्खू न चिंतए ॥ ७ ॥

---

* एकस्मिन्नुदकबिन्दौ, ये जीवा जिनवरैः प्रज्ञप्ताः ॥ ते पारापतमात्रा, जम्बूद्वीपे न मान्ति ॥ १ ॥ यत्र जलं तत्र वनं, यत्र वनं तत्र निश्चितोऽग्निः ॥ तेजः वायुसहगतं, त्रसाश्च प्रत्यक्षका चैव ॥ २ ॥ हत्वा परप्राणान्, आत्मानं ये कुर्वन्ति सप्राणम् ॥ अल्पानां दिवसानां कृते नाशयति आत्मानम् ॥ ३ ॥

१ 'ते सरसवमित्ता' इति पाठः ॥ २ कए य नासेइ मु० ॥ ३ °नानुमतिं L. ॥

एकदा महाशीतकालादौ प्रतिमावहनादौ कायोत्सर्गे स्थितं तपस्विनं शीतं स्पृशेच्छरीरे लगेत्तदा स मुनिस्तपस्व्यतिवेलं स्वाध्यायकरणप्रस्तावमतिक्रम्य शीतभीतः सन् स्थानांतरं न गच्छेत्, किं कृत्वा ? जिनशासनं श्रुत्वा, जिनशासने हि जीवोऽन्यो देहश्चान्यः, कीदृशं मुनिं ? ग्रामानुग्रामं चरन्तं-विहरन्तम्, अथवा मुक्तिनगरानुकूले साधुमार्गे विचरन्तम्, पुनः कीदृशं ? लूहं-रुक्षं स्निग्धभोजनतैलाभ्यङ्गादित्यागेन रुक्षाङ्गम्, पुनः कीदृशं ? विरतमग्नि-प्रज्ज्वालनाद्विरतं, तदा पुनः शीतपीडितो भिक्षुरिति न चिन्तयेदिति-न विचारयेत्, इतीति किं ? 'मे' मम 'छवित्ताणं' देहचर्माच्छादनं शीतनिवारणं किमपि न विद्यते-नास्ति, तेनाहमग्निं सेवामीति चिन्तनमपि न कुर्यात्, तदाग्निसेवनं दूरमेव त्यक्तम् ॥ ६-७ ॥

अत्र भद्रबाहुशिष्याणां कथा -

राजगृहे चत्वारो वयस्या वणिजः श्रीभद्रबाहुगुर्वन्तिके प्रव्रज्य श्रुतं चाधी-[1]त्यैकाकिप्रतिमया विहरन्तस्तत्रैवेयुः, तदा हेमन्त आसीत् । ते च भिक्षाभोजनमादाय तृतीयापौरुष्यां [2]न्यवर्तत, रात्रौ पृथक् पृथगवसन्, तेषामेकस्य चरमपौरुषी वैभारादि-गुहाद्वारेऽवगाढा, तत्रैव सोऽस्थात्, द्वितीयः पुरोद्याने, तृतीयस्तूद्यानसमीपे, चतुर्थस्तु पुराभ्यर्णे । तत्र यो वैभारादिगुहासन्नः स महाशीतव्यथितो रजन्याद्ययामे मृतः, उद्यानस्थो द्वितीययामे मृतः, उद्यानासन्नस्तृतीये यामे मृतः, पुरासन्नस्तु पुरोष्मणाल्पशीतत्वेन चतुर्थे प्रहरे मृतः, सर्वेऽप्येते साधवो [3]विपद्य दिवं जग्मुः । एवं शीतपरीषहः सोढव्यः ॥ ३ ॥

शीतकालानन्तरं ग्रीष्मकालस्यागमनं स्यात्, तत्परीषहोऽपि सोढव्यः ।

उसिणाप्परियावेणं, परिदाहेण तज्जिए ।
घिंसु वा परितावेणं, सायं नो परिदेवए ॥ ८ ॥

उण्हाहितत्तो मेहावी, सिणाणं नो वि पत्थए ।
गायं नो परिसिंचिज्जा, न वीइज्जा य अप्पयं ॥ ९ ॥

मेधावी-स्थिरबुद्धिमान् साधुर्ग्रीष्मे-उष्णकाले, वा शब्दाच्छरदि ऋतावपि सातं-सुखहेतुं [4]प्रति न परिदेवेत, कदा मम शरीरे शीतलत्वं स्यादिति न प्रलापं कुर्वीत । कीदृशः साधुः ? उष्णपरितापेन यः परिदाघस्तेन तर्जितः, ग्रीष्मकाले सूर्यस्यातपेन भूमिशिलादयः परितप्ताः सन्ति, तत्र साधुरातापनां कुर्वंस्तप्तभूमेः शिलातो लोहकारशालासमीपत्वाद्वा परिदाघेन बहिः-प्रस्वेदमलाभ्यां वह्निना वा, अन्तश्च तृष्णारूपेण तर्जितोऽतिपीडितः । पुनरप्युक्तमर्थमेव दृढयति-मेधावी साधुरुष्णाभितप्तः स्नानं नैव प्रार्थयेत्-नाभिलषेत्, पुनर्गात्रं-शरीरं नो परिसिञ्चेत्, न च प्रस्वेदादिसद्भावे आत्मानं-स्वदेहं वीजयेत्, वीजनेन शरीरस्य न वातप्रक्षेपं कुर्यादित्यर्थः ।

---

१ °त्यैकाकित्वं प्रतिमया° D.L. ॥ २ न्यवर्तन्ते, पुरात् पृथग् पृथग् तेषामे° D.L. ॥ ३ विपद्य मु० नास्ति ॥ ४ प्रति मु० नास्ति ॥ ५ न वा न प्रक्षेपं मु० ॥

अत्रारहन्नककथा -

यथा तगरानगर्यामर्हन्मित्राचार्यपार्श्वे दत्तनामा वणिग्भद्राभार्यारहन्नकपुत्रेण समं प्रव्रजितः, पित्रा सर्ववैयावृत्यकरणेनेतस्ततः परिभ्रम्य भव्यभिक्षाभोजनसम्पादनेन स बालोऽत्यन्तं सुखी कृतः, उपविष्ट एव भुङक्ते, कदापि भिक्षायै न भ्रमति, तद्भिक्षार्थं स्वभिक्षार्थं च पितुरेव भ्रमणात् । अन्यदा पितरि मृते साधुभिः प्रेरितः स बालो ग्रीष्मे मासे भिक्षार्थं गतः, तापाभिभूतः प्रोत्तुंगगृहच्छायायामुपविशति, पुनस्तत उत्तिष्ठति, शनैः शनैर्याति । एवं कुर्वन्तमतिसुकुमारं तमरहन्नककुमारं रूपेण कन्दर्पावतारं दृष्ट्वा काचित्प्रोषितवणिग्भार्याऽऽकार्य गृहे स्थापितवती तया [१]सहासौ विषयासक्तोऽभूत् । अथ तन्माता साध्वी पुत्रमोहेन ग्रथिलीभूत्वा अरे अरहन्नक ! अरे अरहन्नक ! इति निर्घोषयन्ती चतुष्पथादिषु भ्रमति । एकदा गवाक्षस्थेनारहन्नकेन तादृशावस्था माता दृष्टा, संजातात्यन्तसंवेगः स गवाक्षादुत्तीर्य पादयोः पतित्वा मातरमेवाह हे मातः ! सोऽहमरहन्नकः, इति तद्वचः श्रवणात्स्वस्थचित्ता माता तमेवमाह वत्स ! भव्यकुलजातस्य तव केयमवस्था ? स प्राह मातश्चारित्रं पालयितुमहं न शक्नोमि, सा प्राह तर्ह्यनशनं कुरु, मातृवचसा स तप्तशिलायां सुप्त्वा पादपोपगमनं चकार । सम्यगुष्णपरीषहं विसह्य समाधिभाग्देवत्वं प्राप्तवान् । एवमन्यैरपि साधुभिरुष्णपरीषहः सोढव्यः ॥ ४ ॥ ८ ॥ ९ ॥

ततो ग्रीष्मकालादनन्तरं वर्षाकालः समागच्छति, वर्षाकाले दंशमशकादय उत्पद्यन्ते, तैश्च [२]पीडितेन सता तत्परीषहः सोढव्यः -

पुट्ठो य दंसमसएहिं, समरेव महामुणी ।
नागो संगामसीसे वा, सूरो अभिहणे परं ॥ १० ॥

न संतसे न वारिज्जा, मणंपि न पओसए ।
उवेहे न हणे पाणे, भुंजन्ते मंससोणियं ॥ ११ ॥

महामुनिर्महातपस्वी दंशमशकैर्जन्तुभिः स्पृष्टो भक्षितः सन्न संत्रसेत्, त्रासं न प्राप्नुयात्, *बहुवचनग्रहणात् यूकामत्कुण-[४]सुलसुलकादयोऽपि गृह्यन्ते । कीदृशो महामुनिः ? सम एव समत्वेन युक्तः अत्र समरे रकारः प्राकृतत्वात्, क इव ? सङ्ग्रामशीर्षे-रणशिरसि नागो इव हस्तीव, कीदृशो हस्ती ? शूरः, यथाशूरोऽभङ्गो हस्ती युद्धे स्थितः परं-शत्रुं हन्यात् एवं महामुनिरपि क्रोधादिकमन्तरङ्गं शत्रुं जयेत् दंशादिभिरुपद्रूयमाणः क्रोधं न कुर्यादित्यर्थः, च पुनस्तैः पीडितश्च न सन्त्रसेत् उद्वेगं न प्राप्नुयात्*, पुनस्तान् दंशादीन् न निवारयेत् । तेषां वारणे ह्याहारांतरायः स्यात्, मनोऽपि न प्रदूषयेत्, मनोऽपि कलुषं न कुर्यात्, निवारणं तु दूरे एव [३]त्यक्तं, तेषु मनस्यपि क्रोधं न कुर्यात्, किन्तु तेषु दंशमशकादिषु

१ सह स मु० ॥ २ पीडितः सन् L. ॥ * * चिह्नद्वयमध्यवर्त्तिपाठः मु० नास्ति ॥ ३ व्यक्तं मु० ॥ ४ सुलसुलक - प्राणीविशेष ॥

दुष्टजीवेषु मांसशोणितं-पललरुधिरं भुञ्जानेषूपेक्षेत, उदासीनभावे वर्तेत, रागद्वेषरहितो भवेत्, प्राणांस्तान् दंशमशकादीन् मांसरुधिरं भुञ्जानान्न हन्यात् ॥ १०-११ ॥

अत्र श्रमणभद्रकथा -

यथा चम्पायां जितशत्रुनृपस्य पुत्रः श्रमणभद्रो युवराजा श्रीधर्मघोषान्ते प्रव्रज्यैकाकित्वविहारेण विहरन्नन्यदा शरदि [1]रात्रावटव्यां प्रतिमास्थितो दंशमशकैः पीड्यमानोऽपि निश्चलः स्वयमनन्तशो भुक्तनरकवेदनास्वरूपं चिन्तयन् समाधिना मृत्वा दिवं गतः । एवं दंशमशकपरीषहः सोढव्यः ॥ ५ ॥

अथ च दंशमशकादिभिः पीड्यमानो वस्त्राशाकरो न स्यादतोऽचेलपरीषहमाह -

परिजुन्नेहिं वत्थेहिं, होक्खामित्ति अचेलए ।
अदुवा सचेलए होक्खं, इइ भिक्खू न चिंतए ॥ १२ ॥

एगया अचेलए होइ, सचेलए आवि एगया ।
एयं धम्मं हियं नच्चा, नाणी नो परिदेवए ॥ १३ ॥

भिक्षुः साधुर्वस्त्रेषु [2]परिजीर्णेषु सत्सु इति न चिन्तयेत्, मनसि न विचारयेत् । इतीति किं ? अहं वस्त्राभावेऽचेलको निर्वस्त्रो भविष्यामि, न विद्यते चेलं-वस्त्रं यस्य सोऽचेलक इति दैन्यं न कुर्यात् । अथवैतादृशं जीर्णं स्फुटितवस्त्रं मां दृष्ट्वा कश्चिद्धर्मात्मा दाता मह्यं वस्त्रं दास्यति तदाहं सचेलको-वस्त्रसहितो भविष्यामीति प्रमोदभागपि न स्यात्, एतावता वस्त्रस्याप्राप्तौ वस्त्रस्य प्राप्तौ वा विषादो वा हर्षो वा साधुना न विधेयः, प्राप्ताप्राप्तयोः सदृशेन भाव्यमित्यर्थः ॥ १२ ॥

पुनः साधुरेवं चिन्तयेत् एकदा जिनकल्पावस्थायां साधुरचेलकः स्यात्, इयमपि साधोरेवावस्था, स्थविरकल्पेऽपि दुर्लभवस्त्रत्वेन पूर्ववस्त्रस्य जीर्णत्वान्नाशे जाते सत्यपरवस्त्रप्राप्त्यभावेन निमित्तं विनापि निर्वस्त्रः स्यात्, तदा मनसि साधुनेति चिन्तनीयम् - इदानीमहं जिनकल्पावस्थां भजामि, जिनकल्पी मुनिरचेलक एव तिष्ठति । पुनरेकदा *स्थविरकल्पावस्थायां वस्त्रस्य धरणेन सचेलकः अपि भवेत्, एवं अमुना प्रकारेण वस्त्राभावे जिनकल्पावस्थाचिन्तनेन वस्त्रसद्भावे* स्थविरकल्पावस्थाचिन्तनेनोभयं धर्मं ज्ञात्वा ज्ञानी साधुर्नो परिदेवेत, नो विलापं कुर्वीत । कीदृशं धर्मं ? हितं-हितकारकम् ॥ १३ ॥

अत्र दृष्टान्तो -

यथा - दशपुरे नगरे सोमदेवो द्विजोऽस्ति, तस्य भार्या रुद्रसोमा नाम्नी वर्तते, तयोः पुत्रावार्यरक्षित-फल्गुरक्षितौ स्तः, आर्यरक्षितेन पितुर्विद्या पूर्णा गृहीता, पश्चात्पाटलिपुत्रे

---

१ ऋतावं° मु० ॥ २ परिजीर्णेष्विति मु० ॥ ** चिह्नद्वयमध्यवर्त्तिपाठः मु० नास्ति ॥

नगरेऽधिकविद्यापठनाय कस्यचिदुपाध्यायपार्श्वे गतः, तत्र तेन साङ्गोपाङ्गाश्चत्वारो वेदाः पठिताश्चतुर्दश विद्यास्थानानि गृहीतानि । ततो दशपुरं नगरं प्राप्तः नृपादिसकललोकैः प्रवेशोत्सवं कृत्वा पूजितश्च स्वगृहे गत्वा मातरपितरौ प्रणतः । पितातीव हर्षवान् जातः, माता तु नैव हर्षं मनाग्दर्शयति । आर्यरक्षितः प्राह-'हे मातस्त्वं मदध्ययनेन किं न हृष्टा ?' सा प्राह-'किमनेन जीवघातादिनिमित्तेन बहुशास्त्राध्ययनेन; किं त्वया दृष्टिवादोऽधीतः ? येन मम हर्षः स्यात्' ततस्तेन पृष्टं-'दृष्टिवादः क्वास्ति ?' मात्रोक्तम् - 'ईक्षुवाटके स्थितानां तोसलिपुत्राचार्याणां समीपेऽस्ति ।' ततस्तेन भणितं - 'हे मातः ! कल्ये तत्र यास्यामि दृष्टिवादभणनार्थम् ।' रात्रौ सुप्तः सन्नेवं चिन्तयति दृष्टीनां वादो दृष्टिवाद इति नामाप्यस्य शास्त्रस्य सुन्दरमिति । प्रभाते तद्भणनार्थं तत्र चलितः, मार्गे प्रथमत एव दशपुरनगरप्रत्यासन्नग्रामवासी पितृमित्रं सार्धनवेक्षुयष्टियुतहस्तो ब्राह्मणो मिलितः, कथितं च तेनाहं तव मिलनार्थमागतोऽस्मि । ततः स्वागतं परस्परं पृष्टम्, पश्चादार्यरक्षितेनोक्तमहं क्वचित्कार्याय गच्छन्नस्मि, इदं सार्धनवेक्षुयष्टिप्राभृतं मातुर्हस्तेऽर्पणीयम्, कथनीयं चाहं पूर्वमार्यरक्षिताय मिलितः । अथ तेन तथैव कृतम् । ततो माता तुष्टा सती चिन्तयति मम पुत्रेण सुन्दरं मङ्गलं दृष्टम्, सार्धनवपूर्वाण्यध्येष्यति पुत्रः, आर्यरक्षितोऽपि शुभं शकुनं चिन्तयन् गत ईक्षुवाटकम् । तत्रैकस्मिन् पार्श्वे स्थित्वा ढड्ढरश्राद्धवन्दनविधिं दृष्ट्वोपाश्रयमध्ये प्रविष्टः, वन्दितास्तोसलिपुत्राचार्याः, तैः पृष्टं स्वरूपं प्रयोजनं च सर्वमप्युक्त्वा मम दृष्टिवादमध्यापयन्त्विति वदन्तं तं सूरयः प्रोचुर्यद्यस्मदन्तिके प्रव्रज्यां गृह्णासि तदा तमध्यापयामः, तेनोक्तमेवमप्यस्तु । ततः स प्रव्रजितः कथयति भगवन्नत्र सकललोकव्याक्षिप्तस्य मम विद्याग्रहणं स्वल्पमेव भावि, तेन क्वाप्यन्यत्र गम्यते, गुरुभिस्तथा कृतम् । भाणितोऽसौ सोपाङ्गान्येकादशाङ्गानि । अथ पूर्वपठनार्थं तोसलिपुत्राचार्यैरसावार्यरक्षितः श्रीवज्रस्वाम्यन्तिके प्रेषितः, पथि गच्छन्नवन्त्यां श्रीभद्रगुप्तसूरीणां निर्यापनां कृतवान्, तैश्चान्त्यसमये प्रोक्तं पठता त्वया वज्रस्वामिमण्डल्यां न स्थेयम्, यतस्तन्मण्डलीस्थाता तेनैव सह म्रियते । एवं तच्छिक्षां श्रुत्वा ततो गतः श्रीवज्रस्वामिपार्श्वे, तैश्च रात्रौ क्षीरभृतं पात्रमागन्तुकेन शिष्येण किञ्चिदूनं पीतमिति स्वप्नो दृष्टः । ततस्तेन पृथग्मण्डलीं कृत्वाऽधीतानि श्रीवज्रस्वामिपार्श्वे नव पूर्वाणि । वज्रस्वामी तु पृथग्मण्डलीकारणं ज्ञात्वा न किञ्चित्तस्योक्तवान् । दशमपूर्वाधिकाराः केचन यावत्तेन पठितास्तावद्दशपुराच्चिरकालविरहार्दितमातृपितृप्रमुखकुटुम्बप्रेरितः फल्गुरक्षितो भ्राता तस्याकारणाय समायातः । आर्यरक्षितेन तत्रैव प्रतिबोध्य प्रव्राजितः । एकदार्यरक्षितः श्रीवज्रस्वामिनं पृच्छति भगवन्नतः परं पूर्वपाठः कियानवशिष्टोऽस्ति ? वज्रस्वाम्याह वत्स ! त्वया बिन्दुमात्रं पठितम् समुद्रोपमं दशमं पूर्वमस्ति, ततोऽसौ थक्कपरिणामः प्राह-नाहमतः परं पूर्वपाठं कर्तुं शक्नोमि, गुरुवस्तु दशमपूर्वार्धस्य स्वस्मिन्नेव व्युच्छेदं ज्ञात्वा मौनेन स्थिताः । असौ गुरूननुज्ञाप्य स्वसांसारिकवन्दापनार्थं दशपुरनगरे

---

१ °स्थितो मु० ॥

प्राप्तः, गच्छतस्तस्य गुरुणा सूरिपदं दत्तम् । अथार्यरक्षितसूरिस्तत्र स्वमातृभगिनी-प्रमुखसर्वसांसारिकवर्गं दीक्षां ग्राहितः, पिता तु प्रतिबोधितोऽपि साधुलिङ्गं न गृह्णाति, स्वज्ञातीयजनानां लज्जां च वहति । आचार्या दीक्षाग्रहणाय तस्य बहु कथयन्ति । ततः स कथयति पृथुलवस्त्रयुगल १ यज्ञोपवीत २ कमंडलु ३ छत्रिका ४ उपानद्भिः समं चेद्दीक्षां ददासि तदा लामि । ततो लाभं दृष्ट्वा तादृशमेव तं गुरुः प्रव्राजितवान्, ग्राहितश्चरण-करणस्वाध्यायम् । अन्यदा चैत्यवन्दनार्थं गता आचार्याः, तत्र साधुशिक्षिता गृहस्थडिम्भका वदन्ति एनं छात्रिणं मुक्त्वा सर्वान् साधून् वन्दामहे, ततः स वृद्धो वक्ति मम पुत्रा नप्त्रादय एते वन्दिताः, अहं कस्मान्न वन्दितः ? किं मया दीक्षा न गृहीता ? ते आहुः किं दीक्षितस्य छत्रकमण्डल्वादीनि स्युः ? ततो गुरुष्वागतेषु स वृद्धो वक्ति पुत्र ! मम डिम्भका अपि हसन्ति ततो न कार्यं छत्रेण । एवं प्रयोगेण क्रमतो धौतिकवस्त्रं मुक्त्वा सर्वं त्याजितः, बहुशस्तथा प्रयोगकरणेऽपि धौतिकं न मुञ्चति ।

अन्यदैकः साधुर्गृहीतानशनः स्वर्गं गतः, तत आचार्यैर्वृद्धस्य धौतिकत्याजनाय साधून् प्रत्येवमुक्तं य एनं [1]मृतसाधुं व्यत्सृष्टं स्कन्धेन वहति तस्य महत्पुण्यम् । ततः स स्थविरो वक्ति-पुत्र ! अत्र किं बहुनिर्जरा ? आचार्या आहुर्बाढम्, ततः स वक्त्यहं वहामि, आचार्या वदन्त्यत्रोपसर्गा जायन्ते, चेटकरूपाणि लग्यन्ते, यदि शक्यतेऽधिसोढुं तदा वरम्, यदि क्षोभो भविष्यति, तदाशुभमस्माकं भविष्यति एवं स्थिरीकृत्य स तत्र नियुञ्जितः, साधुसाध्वीसमुदायः पृष्ठौ स्थितः, यावत्तेन साधुशबं स्कन्धे समारोप्य वोढुमारब्धं तावत्तस्य धौतिकं गुरुशिक्षितडिम्भकैराकर्षितम्, स लज्जया यावत्तत्साधुशबं स्कन्धान्मुञ्चति तावदन्यैरुक्तं मा मुञ्च । मा मुञ्च । एकेन चोलपट्टको दवरकेण कृत्वा कटौ बद्धः, स तु लज्जया तत्साधुशबं द्वारभूमिं यावदुदूह्य तत्र व्युत्सृज्य पश्चादागतो वक्ति-'हे पुत्राद्य महानुपसर्गो जातः ।' आहुराचार्या-'आनीयतां धौतिकं परिधाप्यतां', ततः स वक्त्यथालं धौतिकेन, यद् दृष्टव्यं तद् दृष्टमेव, अथ चोलपट्ट एवास्तु । पूर्वं तेनाचेलपरीषहो न सोढः, पश्चात्सोढः ॥ ६ ॥

अथाचेलकस्य शीतादिभिररतिः स्यात्, अतस्तत्परीषहमाह -

गामाणुगामं रीअंतं अणगारं अकिंचणं ।
अरई अणुप्पवेसे, तं तितिक्खे परीसहं ॥ १४ ॥

अरइं पिट्ठओ किच्चा, विरए आयरक्खिए ।
धम्मारामे निरारंभे, उवसंते मुणी चरे ॥ १५ ॥

अरतिः- संयमेऽधैर्यं यदाऽनगारमनुप्रविशदरतिपरीषहो मुनिं स्पृशेत्तदा साधुस्तं परीषहं तितिक्षेत-सहेत । किं कुर्वन्तमनगारं ? ग्रामानुग्रामं रीयन्तं, ग्रामं ग्राममन्वित्यनुग्रामम्,

१ वृद्धसाधुं मु० ॥

एकं ग्रामं व्रजतो मुनेरन्तराले आगतं ग्राममनुग्रामम्, तत्र विचरन्तम्, [१]कीदृशमनगारम् ? अकिञ्चनं-न विद्यते किञ्चनं यस्य सोऽकिञ्चनस्तं परिग्रहरहितम् ॥ १४ ॥

पुनरुक्तमर्थं दृढयति -

मुनिररतिपरीषहे उत्पन्ने सत्यरतिं पृष्टतः कृत्वा-दूरे कृत्वा धर्मारामः सन् संयममार्गे चरेद्विचरेत् । धर्मे आरमते- रतिं करोतीति धर्मारामः, पुनः कीदृशः साधुः ? विरत आश्रवाद्रहितः । पुनः कीदृशः ? *आत्मरक्षितः-दुर्गतिहेतोरपध्यानादेरनेनात्मरक्षितः, पुनः कीदृशः ?* निरारम्भ आरम्भरहितः, पुनः कीदृशः ? उपशान्तो निष्कषायः ॥ १५ ॥

अत्र पुरोहितपुत्रराजपुत्रयोः कथा -

यथा अचलपुरे जितशत्रुनृपपुत्रोऽपराजितनामा रोहाचार्यपार्श्वे दीक्षितः, अन्यदा विहरंस्तगरां नगरीं गतः, तावतोज्जयिन्या आर्यरोहाचार्यशिष्यास्तत्रागताः, पृष्टं साधुना तेनोज्जयिन्याः स्वरूपम्, तैरुक्तं सर्वं तत्र वरम्, परं नृपपुत्राऽमात्य [पुरोहित] पुत्रौ साधूनुद्वेजयतः । ततो गुरूनापृच्छ्य स्वभ्रातृव्यबोधार्थं शीघ्रमुज्जयिन्यां गतः । तत्र भिक्षावेलायां लोकैर्वार्यमाणोऽपि बाढस्वरेण धर्मलाभ इति पठन् राजकुले प्रविष्टः । राजपुत्राऽमात्य [पुरोहित] पुत्राभ्यां सोपहासमाकारितो-ऽत्रागच्छत, वन्द्यते, ततः स तत्र गतः, ताभ्यामुक्तं वेत्सि [२]नर्तितुं ? तेनोक्तं बाढम्, परं युवां वादयताम्, तौ तादृशं वादयितुं न जानीतः । ततस्तेन तथा तौ कुट्टितौ-पृथक्कृतहस्तपादादिसंधिबंधिनौ यथात्यंतमारार्टिं कुरुतः, तौ तादृशावेव मुक्त्वा साधुरुपाश्रये समायातः । ततो राजा सर्वबलेन तत्रायात-स्तमुपलक्ष्य प्रसादनाय तस्य पादयोः [३]पतितः, उवाच च स्वामिन् ! सापराधावपीमौ सज्जीकार्यौ, अतःपरमपराधं न करिष्यतः, साधुनोक्तं यदीमौ प्रव्रजतस्तदा मुञ्चामि । राज्ञोक्तमेवमप्यस्तु । ततस्तौ प्रथमं लोचं कृत्वा प्रव्राजितौ, तत्र राजपुत्रो निःशङ्कितो धर्मं करोति, इतरस्त्वमर्षं वहति, अहं बलेन [४]प्रव्राजितः चेतसि उद्वेगं वहति, परं पालयतो द्वावपि चारित्रं शुद्धं मृत्वा तौ दिवं गतौ । अस्मिन्नवसरे कौशाम्ब्यां तापसश्रेष्ठी मृत्वा स्वगृहे शूकरो जातस्तत्र जातिस्मरणं प्राप्तवान्, सर्वं स्वसुतादिकुटुम्बं प्रत्यभिजानाति, परं वक्तुं न किञ्चिच्छक्नोति । अन्यदा सुतैरेष शूकरो मारितः, स्वगृहे एव सर्पो जातः तत्रापि जातिस्मरणवांस्तैरेव मारितः, पुत्रपुत्रो जातः, तत्रापि जातिस्मरणमाप । स एवं चिन्तयति कथमेतां पूर्वभववधूं मातरमहमुल्लपामि ? कथं चेमं पूर्वभवपुत्रं पितरमहमुल्लपामीति विचार्य मौनमाश्रितः, मूकव्रतभाग्जातः । अन्यदा केनचिच्चतुर्ज्ञानिना तद्बोधं ज्ञात्वा स्वशिष्य-योर्मुखे गाथा प्रेषिता, यथा -

---

१ कीदृशं ? मु० ॥ ** चिह्नद्वयमध्यवर्त्तिपाठः मु० नास्ति ॥ २ नर्त्तितं L. ॥ ३ पपात D.L. ॥ ४ पराजित इत्युद्वेगं चेतसि - मु० ॥

*'तावस किमिणा मूअव्वएण पडिवज्ज जाणिअं धम्मं ।
मरिऊण सूअरोरग, जाओ पुत्तस्स पुत्तत्ति ॥ १ ॥'

[उपदेशपद गाथा ३०५]

एतां गाथां श्रुत्वा प्रतिबुद्धो गुरूणां सुश्रावकोऽभूत् ।

एतस्मिन्नवसरे सोऽमात्य [पुरोहित] पुत्रजीवदेवो महाविदेहे तीर्थङ्करसमीपे पृच्छति किमहं सुलभबोधिर्दुर्लभबोधिर्वा ? इति प्रश्ने प्रोक्तं तीर्थङ्करेण त्वं दुर्लभबोधिः कौशाम्ब्यां मूकभ्राता भावीति लब्धोत्तरः स सुरो गतो मूकपार्श्वे तस्य बहु द्रव्यं दत्वा प्रोक्तवान् यदाहं त्वन्मातुरुदरे उत्पत्स्ये तदा तस्या आम्रदोहदो भविष्यति, स दोहदः साम्प्रतं मद्दर्शितसदा-फलाम्रफलैस्त्वया तदानीं तस्याः पूर्णीकार्यः, पुनस्त्वया तथा विधेयं यथा तदानीं मम धर्मप्राप्तिः स्यात् । एवमुक्त्वा गतो देवः । अन्यदा देवलोकाच्च्युत्वा स देवस्तस्या गर्भे समुत्पन्नस्तस्याश्चाम्रदोहदः समुत्पन्नः, मूकेन पूर्वोक्तरीत्या पूरितः, पुत्रो जातः, मूकस्तु तं बालं लघुमपि करे कृत्वा देवान् साधूंश्च वन्दापयति, परं स दुर्लभबोधित्वेन तान् दृष्ट्वा रटति । एवमाबालकालादपि भृशं प्रतिबोधितोऽपि स न बुद्धयति । ततो मूकः प्रव्रजितः, गतः स्वर्गम् ।

अथ देवीभूतेन मूकजीवेन स दुर्लभबोधिर्बालः प्रतिबोधकृते जलोदरव्यथावान् कृतः, वैद्यरूपं कृत्वा देवेनोक्तमहं सर्वरोगोपशमं करोमि, जलोदरी वक्ति मम जलोदरोपशान्तिं कुरु। वैद्येनोक्तं तवासाध्योऽयं रोगः, तथाप्यहं प्रतीकारं करोमि यदि मम पृष्ठावौषधकोत्थलकं समुत्पाट्य मयैव सहागमिष्यसि । तेनोक्तमेवं भवतु । ततो वैद्येन स जलोदरी सज्जीकृतः समाधिभाग्जातः, तस्योत्पाटनायौषधकोत्थलकस्तेन दत्तः, स तत्पृष्ठौ भ्रमंस्तं कोत्थलकमुत्पाटयति, देवमायया स [1]कोत्थलकोऽतीवभारवान् जातः, तमतिभारं वहन् स खिद्यति, परं तमुत्सृज्य पश्चाद् गन्तुं न शक्नोति । मा भूत्पश्चाद्गतस्य मे पुनर्जलोदरव्यथेति विमर्शं कुर्वन् वैद्यस्यैव पृष्ठौ कोत्थलकं वहन् भ्रमति ।

एकदैकदेशे स्वाध्यायं कुर्वन्तः साधवो दृष्टास्तत्र तौ गतौ । वैद्येनोक्तं त्वं दीक्षां गृहीष्यसि यथा त्वां मुञ्चामि, स भारभग्नो वक्ति गृहीष्याम्येव, ततो वैद्येनाप्यस्य दीक्षा दापिता, देवे च स्वस्थानं गते तेन दीक्षा परित्यक्ता, देवेन पुनरपि तथैव जलोदरं कृत्वा वैद्यरूपधरेण पुनरसौ दीक्षां ग्राहितः, पुनर्गते च देवे तेन दीक्षा त्यक्ता, तृतीयवारं दीक्षां दापयित्वा वैद्यरूपो देवः सार्धम् तिष्ठति स्थिरीकरणाय ।

एकदा तृणभारं गृहीत्वा स देवः प्रज्जवलद्ग्रामे प्रविशति । ततस्तेन साधुनोक्तं ज्वलति ग्रामे कथं प्रविशसि ? देवेनोक्तं त्वमपि क्रोधमानमायालोभैः प्रज्जवलिते गृहवासे वारंवारं वार्यमाणोऽपि पुनः कथं प्रविशसि ? वैद्यरूपेण देवेनैवमुक्तोऽपि स न बुद्धयते ।

---

* हे तापस ! किमनेन मूकव्रतेन प्रतिपद्यस्व ज्ञात्वा धर्मम् ।
मृत्वा शूकरोरगः, जातः पुत्रस्य पुत्र इति ॥ १ ॥

१ कोत्थलकोऽतिभारवान् - D. ॥

अन्यदा तावटव्यां गतौ, देवः कण्टकाकुले मार्गे चरति, स प्राह कस्मादुन्मार्गेण यासि ? देवेनोक्तं त्वमपि विशुद्धं संयममार्गं परित्यज्याधिव्याधिरूपे कण्टकाकीर्णे संसारमार्गे कस्माद्यासि ? एवं देवेनोक्तेऽपि स न बुद्ध्यते । पुनरेकस्मिन् देवकुले तौ गतौ, तत्र यक्ष ईप्सितपूजापूज्यमानोऽपि पुनः पुनरधोमुखः पतति, स कथयत्यहो यक्षस्याधमत्वं ! यत्पूज्यमानोऽप्ययमधोमुखः पतति, देवेनोक्तं त्वमप्येतादृशोऽधमः, यद् वन्द्यमानः पूज्यमानोऽपि त्वं पुनः पुनः पतसि, ततः स साधुर्वक्ति कस्त्वं ? देवेन मूकरूपं दर्शितम्, पूर्वभवसम्बन्धश्च कथितः, स वक्त्यत्र कः प्रत्ययः ? ततो वैताढ्ये चैत्यवन्दापनार्थं देवेनाऽसौ प्रापितः, तत्रैकस्मिन् सिद्धायतनकोणे दुर्लभबोधिदेवेन स्वबोधाय मूकविदितं स्वकुण्डलयुगलं स्थापितमभूत्, तत्तदानीं दर्शितम्, ततस्तस्य जातिस्मरणं जातम्, तेनाऽस्य चारित्रदृढताऽभूत्, अस्य पूर्वमरतिः पश्चाद्रतिः ॥ ७ ॥

अथ संयमेऽरतिसद्भावे सति स्त्रीष्वीहा स्यात्, स च परीषहोऽपि सोढव्यः । अतस्तत्परीषहमाह -

संगो एस मणुस्साणं, जाओ लोगंमि इत्थीओ ।
जस्स एसा परिण्णाया, सुकडं तस्स सामण्णं ॥ १६ ॥

एवमादाय मेहावी, पंकभूया उ इत्थिओ ।
नो ताहिं विहन्निज्जा, चरिज्जत्तगवेसए ॥ १७ ॥

लोकेऽस्मिन् संसारे मनुष्याणामेताः स्त्रियः सङ्गो जातोऽस्ति, नराणां स्त्रियो बन्धनं वर्त्तते यथा मृगाणां बन्धनं वागुरादि विद्यते, सङ्गच्छते-वशीभवति जीवो यस्मात्स सङ्गो बन्धनमित्यर्थः । अत्र मनुष्यग्रहणं तेषामेव मैथुनसंज्ञाया आधिक्यात् यथा मक्षिकाणां श्लेष्मसङ्गो बन्धनम्, तथा पुरुषाणां स्त्रियो बन्धनमित्यर्थः, यस्य साधोरेताः स्त्रियः परिसमन्ताद् ज्ञपरिज्ञया ज्ञाताः प्रत्याख्यानपरिज्ञया प्रत्याख्याताः-परित्यक्ताः, अनर्थहेतुरूपा ज्ञाताः, अत्र प्राकृतत्वात्तृतीयास्थाने षष्ठी, येन साधुना स्त्रिय एतादृश्यो ज्ञातास्तस्य साधोः श्रामण्यं सुकृतं-साध्वाचारः सफलः ॥ १६ ॥

मेधावी धर्ममर्यादावांस्ताभिः स्त्रीभिर्न विहन्यात्, संयमजीवितघातेनात्मानं न विनाशयेत्, किन्त्वात्मगवेषकः सन् चरेत्, आत्मानं गवेषयतीत्यात्मगवेषकः, किं कृत्वा ? एवमादायैतत् ज्ञात्वा, एतदिति किं ? स्त्रियः पङ्कभूताः-मुक्तिमार्गे कर्दमभूताः, मुक्तिपथप्रवृत्तानां बन्धकत्वेन मालिन्यकारणं स्त्रियः सन्तीति ज्ञात्वा, तस्मात् स्त्रीणां सङ्गं विहाय मया संसारादात्मा निस्तारणीयः, इति बुद्धिमान् ॥ १७ ॥

अत्र स्थूलिभद्रकथा

यथा - पाटलिपुत्रनगरे नवमो नन्दराजा, तस्य राज्यचिन्ताकारकः शकटालनामा मन्त्री वर्तते, तेन स्ववृद्धपुत्रः स्थूलभद्रनामा लीलाविलासार्थं तन्नगराधिवासिन्याः

कोशावेश्याया गृहे मुक्तस्तत्र तस्या मार्गितं सुवर्णादि यथेष्टं प्रेषयति, द्वितीयपुत्रः श्रीयकनामा राजाङ्गपार्श्ववर्त्ती विहितः। अस्मिन्नवसरे तन्नगरवास्तव्यो वररुचिनामा भट्टो नवीनकृतैरष्टोत्तर-शतकाव्यैर्नन्दभूपालं प्रत्यहं स्तौति, राजा च तस्मै द्रव्यदित्सुः शकटालमन्त्रिमुखं विलोकते, शकटालमन्त्री तु मिथ्यात्ववृद्धिभीरुर्न तत्काव्यानि स्तौति, मन्त्रिप्रशंसां विना राजा न तस्मै किञ्चिद्दत्ते, वररुचिना तु मन्त्रिभार्या स्ववचनामृतेन तोषिता स्वभर्तारं शकटालमन्त्रिणं प्रत्याह वररुचेः काव्यानि त्वया नृपपर्षदि व्याख्येयानि, यथास्थितवस्तुप्ररूपणे सम्यक्त्वस्य भूषणं न तु दूषणमित्यादि स्ववनितावचोयुक्त्या तत्काव्यप्रशंसनं प्रतिपन्नम्। प्रभाते पर्षदि भूपतेः पुरो वररुचिप्रोक्तानि काव्यानि मन्त्रिणा प्रशंसितानि, तत्प्रशंसाऽनन्तरमेव राज्ञा वररुचिभट्टाय दीनाराणामष्टोत्तरशतं दत्तम्। ततः प्रतिदिनं विप्रो भूपतेः पुरोऽष्टोत्तर-शतकाव्यानि नवानि वक्ति, स्तुतिप्रान्ते भूपप्रदत्तं दीनाराष्टशतं गृह्णाति, ततो वृद्धिमान् वररुचिनामा भट्टः शतसहस्रवित्तव्ययेन यागहोमादि करोति।

मन्त्री तु कथा वर्धमानं मिथ्यात्वं दृष्ट्वा तद्दाननिषेधाय राज्ञः पुर एवमुवाच-हे राजन्नस्य ब्राह्मणस्यैतावद्धनं दत्वा कथं कोशक्षयो विधीयते ? अयं तु परकाव्यहरणात्कवितस्क-रोऽस्ति, राज्ञोक्तं किमसौ पुरातनकविकृतानि काव्यानि मत्पुरो वक्ति ? मंत्रिणोक्तमेतदुक्तानि काव्यानि सप्ता अपि मत्पुत्र्यः पठन्ति, राज्ञोक्तं प्रातरेतदुक्तानि काव्यानि तव सप्तपुत्रीपार्श्वे पाठनीयानि। ततो मन्त्रिणा सर्वं शिक्षयित्वा सप्ता अपि पुत्र्यः प्रभाते भूपपर्षदि यवन्यंतरिताः स्थापिताः, ताश्च क्रमात्प्रथमा पुत्र्येकवारश्रुतसर्वग्रन्थधारिका, द्वितीया तु द्विर्वारश्रुतसर्व-ग्रन्थधारिका, एवं सर्वा अपि यावत्सप्तमी पुत्री [1]सप्तवारश्रुतसर्वग्रन्थधारिका, एतादृशधारणा-न्विताः सन्ति।

अथ तत्र समायातो वररुचिः स्वकृतकाव्यानि नृपतेः पुरो वक्तुमारेभे स्तुत्यन्ते भूपतिनोक्तमहो भट्टैतानि काव्यानि त्वत्कृतानि परकृतानि वा ? सोऽवाक् मत्कृतान्येव। राज्ञोक्तमेतानि काव्यानि मन्त्रिणः सप्तपुत्रीणां मुखे समायान्ति, स वक्ति यदि ता वक्ष्यन्ति तदाहमसत्यः, एवं तेनोक्ते यवन्यंतराद्यक्षानाम्नी प्रथमा पुत्री भूपतेः पुरः समागत्य सर्वाणि तानि काव्यानि पपाठ। एवं क्रमात्सर्वा अपि तानि काव्यानि पेठुः, तथाप्रज्ञासद्भावात्ततो निष्कासितो राजकुलाद्वररुचिर्भूपेन, सभाजनेन च तिरस्कृतः सर्वत्रापमानं प्राप्तः। अथ तेनेत्थं कपटं प्रारब्धम्, सन्ध्यायां गङ्गाजलान्तर्यन्त्रं कृत्वा दीनारपञ्चशतीं मुक्त्वा प्रभाते तत्र गत्वा गङ्गां स्तौति, स्तुत्यन्ते लोकसमक्षं जलयन्त्रग्रन्थिं पादेनाक्रम्य हस्ते गृहीत्वा जनेभ्यो दर्शयति मत्स्तुतिरञ्जिता गङ्गा मह्यमेवं दत्ते, राज्ञा तु कार्पण्यान्ममासत्कल-ङ्कमारोप्य तिरस्कारः कृत इति च वदति, तद्वार्ताश्रवणाल्लज्जितो राजा तद्वृत्तान्तं शकटालमन्त्रिणोऽग्रे कथयामास, मन्त्रिणा तत्र चरप्रेषणेन तज्जालयन्त्रं ज्ञात्वा दीनारपञ्च-शतग्रन्थिमानाय्य स्वकरे धृतः, प्रभाते तत्र भूपतिः सनगरलोकस्तत्रायातः, वररुचिरपि

---

१ सप्तवारश्रुतग्रन्थधारिका मु० ॥

गङ्गां स्तौति, स्तुत्यन्ते पादाक्रमेण हस्ताभ्यां च जलमालोडयन्नपि न ग्रन्थिमाप्नोति, विखिन्नो वररुचिः, मन्त्रिणैवमुक्तं भो वररुचे ! तव कल्ये किं गन्थिक्षेपो विस्मृतः ? किं वा क्षिप्तोऽपि दीनारग्रन्थिरन्येनापहृतः ? यद्वा नन्दराज्ये परद्रव्यापहारी कोऽपि नास्तीत्युक्त्वा स ग्रन्थिः सर्वजनानां भूपतेर्वररुचेश्च दर्शितः चरप्रेषणवृत्तान्तश्च प्रकटितः । ततो लोकैर्धिक्कृतः खिन्नो वररुचिर्मुखमाच्छाद्य मन्त्रिदत्तं च ग्रन्थि लात्वा स्वगृहे गतः, ततः परं मन्त्रिच्छिद्राणि [1]विलोकयति, परं न पश्यति, ततो मन्त्रिगृहदास्या सह स्नेहं चकार, तद्गृहवार्तां च पृच्छति, सापि तत्स्नेहलुब्धा सर्वं कथयति । अन्यदा तस्याग्रे तया प्रोक्तमधुना श्रीयकविवाहः समायातोऽस्ति । राजा गृहे आकारयिष्यते, तत्सत्काराय नवीनच्छत्र-चामर-सिंहासनशस्त्रादिसामग्री जायमानास्ति । ततो वररुचिश्छिद्रं मनसि कृत्वा नागरिकडिम्भान् मोदकदानेनेदं पाठयति -

*'नंदराय नवि जाणई, जं सगडाल करेसि ।
नंदरायं मारेउ करी, सिरिय उ राज ठवेसि ॥ १ ॥'

पठन्ति ते तथैव मार्गे मार्गे, तद्राजवाटिकां गच्छता राज्ञा श्रुतम्, मन्त्रिगृहे चराः प्रेषिताः, तैस्तत्र छत्रादिसामग्री जायमाना दृष्टा, राज्ञोऽग्रे कथिता, राजा रुष्टः, प्रभाते प्रणामार्थं गतेन मन्त्रिणा क्रोधवह्निज्वालामालाकुलो दृष्टः, ज्ञातं च स्वकीयसकलकुटुम्ब-क्षयकारि-राजकोपस्वरूपम्, त्वरितमेव पश्चात्स्वगृहे गतः, श्रीयकस्याग्रे राजकोपस्वरू-पमुवाच, एवं च सचिवेन तस्य शिक्षा दत्ता हे वत्स ! कल्ये यदाहं नृपस्य प्रणामं करोमि तदा त्वया खड्गेन मच्छिरश्छेदः कार्यः, अन्यथा सर्वकुटुम्बक्षयमसौ करिष्यति, मुखक्षिप्ततालपुट-विषस्य मम शिरश्छेदे तव न कोऽपि दोष इति पैत्रवचस्तेन महता कष्टेन प्रतिपन्नम् । प्रभाते राज्ञोऽग्रे तथैव कृतम्, राजपर्षदि हाहाकारो जातः, राज्ञोक्तं हे श्रीयक ! किमिदं त्वया कृतं ? श्रीयकः प्राह हे राजन् ! मम पित्रा न प्रयोजनम्, किन्तु तवाज्ञायां (ज्ञया) प्रयोजनम्, यत्तवानिष्टं तन्ममाप्यनिष्टमेवेत्यसौ मया हतः, तुष्टो भूपतिः श्रीयकस्य कथयति त्वं मन्त्रिमुद्रां गृहाण । तेनोक्तं मम वृद्धभ्राता स्थूलभद्रः कोशागृहे तिष्ठति । ततः स्थूलभद्रो नृपेणाकारित-स्तत्रायातः, नृपेणोक्तं मन्त्रिमुद्रां गृहाण, तेनोक्तमालोच्य गृहीष्ये । ततोऽशोकवाटिकायां गत्वा आलोचयति संसारस्यानित्यताम्, पितृविनाशकारिण्या मुद्रायाः शाकिन्या इव [2]त्यागार्हतामालोच्य लोचोऽनेन कृतः, गृहीता स्वयं तपस्या, राजसभायां समायातस्यास्य नृपेणोक्तं भोः स्थूलभद्र ! आलोचितं ? स्थूलभद्रः प्राह-लोचितं शिरो मयेत्युक्त्वा गतः स्थूलभद्रः, क्वचिन्नगरे संभूतिविजयसूरेः शिष्यो जातः ।

---

१ विलोक्यते मु० ॥

* नन्दराजा नापि जानाति, यत् शकटालः करिष्यति ।
नन्दराजानं मारयित्वा श्रीयकं राज्ये स्थापयिष्यति ॥ १ ॥

२ त्यागार्हता च आलोच्य D. L. ॥

अथ भ्रातृमोहेन श्रीयकः कोशागृहे आलापनाय गच्छति वदति च हे कोशे ! त्वत्पतिर्मद्भ्राता स्थूलभद्रो यतिर्जातः, त्वत्पतिपिता शकडालश्च क्षयं गतस्तत्कारणमसौ वररुचिर्भट्टो ज्ञेयः, स च त्वद्भगिन्यामुपकोशायां [1]रतोऽस्ति, यथेयममुं मद्यपानरतं करोति तथा विधीयतामित्युक्त्वा श्रीयकः स्वगृहे गतः ।

अथ कोशावचनादुपकोशा तं वररुचिं मद्यपानरतं चकार । ज्ञाततद्वृत्तान्ता च कोशा मद्यपानमसौ कुर्वन्नस्तीति श्रीयकायाचख्यौ । अन्यदा राज्ञा शकटालः स्मारितोऽहो गुणवान् शक्तो भक्तो महामन्त्री ममाभूत्, ईदृशोऽप्यसौ यदित्थं मृतस्तन्मे मनसि दूयते, इति राज्ञोक्तमाकर्ण्य श्रीयकः प्राह यन्मे पितेत्थं मृतस्तत्र मद्यपानकार्ययं वररुचिरेव कारणम्, श्लोकशिक्षणं डिम्भानां तेनैव कृतमित्यादि वार्तां चकार । राजा पप्रच्छ वररुचिः किं मद्यपानं करोति ? श्रीयकः प्राह श्वो दर्शयिष्यामीत्युक्त्वा स्वगृहे श्रीयकः गतः । अथ प्रभाते नृपपर्षद्युपविष्टानां सर्वेषां नराणां करेषु सङ्केतितपुरुषेण कमलानि श्रीयको दापितवान्, मदनफलचूर्णमिश्रितं कमलं च वररुचये दापितवान् । तद् गन्धमात्राद्वररुचिना पीतं मद्यं तत्रैव वान्तम्, राज्ञा तस्य धिक्कारपूर्वं नागरिकविप्रवृन्दवचसा तप्तत्रपुपानं कारितम्, स मृतः ।

अथ क्रमाद्विहरन्तः स्थूलभद्रादिशिष्यसहिताः श्रीसंभूतिविजयाचार्याः पाटलिपुरे चतुर्मासिकस्थित्यै समायाताः । तत्रैकः शिष्यः कृतचतुर्मासकोपवासः सिंहगुहायां गुर्वाज्ञया स्थितः । एकश्च दृष्टिविषसर्पबिले स्थितः, एकः पुनः कूपदारुणि तथैव स्थितः । स्थूलभद्रस्तु नित्याहारकारी कोशावेश्यागृहे गुर्वाज्ञया स्थितः । कोशया त्वस्य पुरस्तादृशा हावभावा विहिता यथा परमयोगीश्वरोऽपि द्रवति, परमेतस्य मनो न [2]मनागपि क्षुभितम्, प्रत्युत सा सुशीला श्राविका विहिता, शेषं [3]चरित्रं तु प्रसिद्धमेव । एवं यथा स्थूलभद्रेण स्त्रीपरीषहः सोढस्तथापरैरपि साधुभिः सोढव्यः ॥ ८ ॥

अथैकत्र स्थितस्य मुनेः स्त्रीप्रसङ्गः स्यात्, अतश्चर्या कार्येति हेतोश्चर्यापरीषहः सोढव्यः, अतस्तमाह -

एग एव चरे लाढे, अभिभूय परीसहे ।
गामे वा नगरे वावि, निगमे रायहाणिए ॥ १८ ॥

असमाणो चरे भिक्खू, नेव कुज्जा परिग्गहं ।
असंसत्तो गिहत्थेहिं, अणिकेउ परिव्वए ॥ १९ ॥

लाढः साधुरेक एव चरेत्, लाढयति-यापयति आत्मानमेषणीयाहारेण निर्वाहयतीति लाढः, कुत्र कुत्र विचरेत् ? ग्रामे वाथवा नगरेऽपि, अथवा निगमे अथवा राजधान्यामपि

---

१ रक्तो मु० ॥ २ मनाक् D. L. ॥ ३ चारित्रं मु० ॥

द्रव्येण भावेन चैकाक्येव विचरेत् । तत्र ग्रामः-कण्टकादिवेष्टितः, नगरं-प्राकारादियुक्तम्, निगमो-वणिग्जनस्थानम्, राजधानी-राजस्थानमेतेषु विहारं कुर्यात् । परं कीदृशः सन् भिक्षुर्विचरेत् ? असमानः सन्, न विद्यते समानो यस्य सोऽसमानः, गृहस्थोऽन्यतीर्थिलोकेभ्योऽधिकः सर्वोत्कृष्टः, पुनः कीदृशः ? गृहस्थैरसंसक्तो गृहस्थैः सह असम्मिलितः, पुनः कीदृशः ? [1]अनिकेतः, न विद्यते निकेतो-गृहं यस्य सोऽनिकेतोऽनगारः, एतादृशः सन् परिव्रजेत् - सर्वतो विहरेत् ॥ १९ ॥

अत्र सङ्गमस्थविरदृष्टान्तः-

कोल्लागपुरे सङ्गमस्थविरा बहुश्रुता यथास्थितोत्सर्गा-ऽपवादनिपुणा दुर्भिक्षे गणं देशान्तरे प्रेष्य स्वयं नगरं नवभागीकृत्य व्यवस्थिताः, नगरदेवता च तेषां गुणै रञ्जिता । अन्यदा तत्र गुरुवन्दनार्थं दत्तनामा शिष्यः समायातः, तद्भक्त्यर्थं गुरवः सपात्रं तं सार्धं लात्वा भिक्षायां गताः, एकस्येभ्यस्य भद्रकप्रकृतेर्गृहे बालो व्यन्तरेण गृहीतः सदा रोदिति, उपायशतसहस्रकरणेऽपि व्यन्तरदोषोपशान्तिर्न जाता, गुरवस्तद्गृहे गताः, चप्पुटिकाकरणपूर्वं मा रुद बालेत्युक्तम्, आचार्यतपस्तेजसा व्यन्तरो नष्टः, तुष्टास्तन्मातृपितृप्रभृतिस्वजनास्तेभ्यो मोदकादिकमाहारं गाढाग्रहेण दत्तवन्तः, ते मोदकास्तस्यैव शिष्यस्य गुरुभिर्दत्ता, स्वयं त्वन्तप्रान्तमाहारं विहृत्य भुक्तवन्तः, प्रतिक्रमणावसरे तस्य शिष्यस्य पिण्डदोषमालोचयेति गुरुभिरुक्तम्, शिष्यश्चिन्तयत्यसौ धात्रीपिण्डं सदा भुङ्क्ते, मम त्वेवं कथयतीति चिन्तनसमय एव तद्भापनार्थं देवतयान्धकारं विकुर्वितम्, स भृशं बिभेति, गुरुं प्रति च वक्ति अहमत्र दूरस्थो बिभेमि, गुरवः प्राहुरेहि मत्समीपे, स वक्त्यस्मिन् घोरांधकारे नाहमागन्तुं शक्नोमि, गुरुभिस्थूत्कृतलिप्सा स्वाङ्गुली दर्शिता, तदुद्योतेन सोऽत्रायातः, परं चिन्तयति गुरवो दीपकं रक्षयन्ति । एवं चिन्तयन्नेवासौ देवतया चपेटाभिस्तर्जितः, ज्ञातस्वरूपैर्गुरुभिस्तस्य नवभागीकरणादिकं स्वरूपं प्रकाशितम्, यथा सङ्गमस्थविरैर्विहारक्रमापरपर्यायश्चर्यापरीषहोऽध्यासितस्तथा ग्लानत्वावस्थायामपि क्षेत्रनवभागीकरणेनापि चर्यापरीषहोऽन्यैरध्यासितव्यः ॥ ९ ॥

अथ यथा ग्रामादिष्वप्रतिबद्धेन चर्या सह्यते, तथा शरीरादिष्वप्यप्रतिबद्धेन नैषेधिकीपरीषहोऽपि सहनीयः, अतस्तं परीषहमाह-

सुसाणे सुन्नगारे वा, रुक्खमूले व एगओ ।
अकुक्कुओ निसीइज्जा, न य वित्तासए परं ॥ २० ॥

तत्थ से चिट्ठमाणस्स, उवसग्गाभिधारए ।
संकाभीओ न गच्छिज्जा, उट्ठित्ता अन्नमासणं ॥ २१ ॥

---

१ अनिकेतनः D. L. ॥

साधुरेकक-एकाकी सन् श्मशानेऽथवा शून्यागारे-शून्यगृहेऽथवा वृक्षमूले निषीदेदुपविशेत् । परं तत्र कीदृशः सन् ? अकौकुच्यः, नास्ति कौकुच्यं यस्य सोऽकौकुच्यः, कौकुच्यं हि भण्डविद्चेष्टोच्यते, तया रहितः सम्यक् साधुमुदायुक्त इत्यर्थः । पुनः साधुस्तत्र निषण्णः सन् परमन्यं जीवं न वित्रासयेत्, तत्रस्थं जीवं स्थानभ्रष्टं न कुर्यादित्यर्थः ॥ २० ॥

पुनस्तदेव दृढयति - 'तत्थेति' पुनस्तत्र श्मशानादावास्थीयमानस्य भिक्षोर्यदोपसर्गा भवेयुस्तदा तानुपसर्गान् साधुरभिधारयेत् । किमेते उपसर्गा वराका मम करिष्यन्ति ? स्वयमेवोपशाम्य यास्यन्तीति मतिः कर्तव्येत्यर्थः । परं शङ्काभीतः सन् तत आसनादातापनास्थानादुत्थायान्यदासनं न गच्छेत्, आस्यते उपविश्यतेऽस्मिन्नित्यासनम्-आतापनास्थानमुच्यते, अत्र नैषेधिकीपरीषह कोऽर्थः ? यथा ग्रामादिष्वप्रतिबद्धेन चर्यापरीषहः सहनीयस्तथा शरीरेऽप्रतिबद्धेन नैषेधिकीपरीषहः सहनीयः नैषेधिकीनाम शरीरमित्यर्थः ॥ २१ ॥

अत्र कुरुदत्तसाधुकथा-

हस्तिनागपुरे इभ्यपुत्रः कुरुदत्तनामा प्रव्रजितो विहरन् क्रमात्साकेतपुरदूरप्रदेशे प्रतिमायां स्थितः, तत्र चरमपौरुष्यां गोधनापहारिणश्चौराः समायाताः, तत्पृष्ठौ त्वरितं गताः, पश्चाद्गोस्वामिनः समायातास्तैश्चौरमार्गस्वरूपे पृष्टे स यतिर्न किञ्चिद् ब्रूते । ततः सञ्जातकोपैस्तैः शिरसि मृत्पालिं कृत्वाङ्गाराः क्षिप्ताः, स यतिर्मनाग्नापसृतः, तां वेदनामधिसहमानः सिद्धिं गतः । एवं नैषेधिकीपरीषहः सोढव्यः ॥ १० ॥

अथ नैषेधिक्यामातापनादिस्थाने स्वाध्यायादिकं कृत्वा शय्यायामुपाश्रये आगच्छेत्, अतस्तत्परीषहमाह-

उच्चावयाहिं सिज्जाहिं, तवस्सी भिक्खु थामवं ।
नाइवेलं विहन्नेज्जा, पावदिट्ठी विहन्नई ॥ २२ ॥

पइरिक्कुवस्सयं लध्धुं, कल्लाणं अदु पावगं ।
किमेगराइं करिस्सइ, एवं तत्थऽहियासए ॥ २३ ॥

तपस्वी भिक्षुरुच्चावचाभिः शय्याभिरुपाश्रयैः कृत्वा स्थामवान् भवेत्, धैर्ययुक्तो भवेत्, कीदृशीभिः शय्याभिः ? उच्चाश्च अवचाश्च उच्चावचास्ताभिरुच्चावचाभिः, उच्चाः शीतादिरक्षणगुणैर्युक्ताः, अवचास्तद्विपरीताः, तादृशीभिः शय्यते यासु ताः शय्या उपाश्रया उच्यन्ते । तत्रोपाश्रयेषु स्थितः साधुरतिवेलां-साधुर्मर्यादां न विहन्यात्, हर्ष-विषादाभ्यां साधुर्मर्यादायां तिष्ठेत्, सद्गुणयुक्तां शय्यां लब्ध्वा हर्षभाग् न भवेत्, गुणैर्हीनां शय्यां लब्ध्वा विषादभाग् न स्यात् । पापदृष्टिराचारहीनः, उच्चावचाभिः शय्याभिरतिवेलांसाधुर्मर्यादां विहन्यात्, हर्षविषादयुक्तः स्यात् ॥ २२ ॥

साधुः प्रतिरिक्तं-पशुपण्डकस्त्र्यादिरहितमुपाश्रयं लब्ध्वा तत्रैवमध्यासीतैवं विचारयेत्, कीदृशमुपाश्रयं ? कल्याणं शुभं सुखदायकम् । अथवा पापकं दुःखदायकमेतादृशमुपाश्रयं प्राप्यैवं चिन्तयेत्, एवमिति किं ? मे ममानयैकरात्रिस्थितियोग्यया स्थित्या किं कार्यम् ? एकरात्रं ममात्र निवासः करणीयः, किं करिष्यति कल्याणमुपाश्रयं प्राप्येति चिन्तयेत् पुण्यवन्तो जना एतादृशेषु स्थानेषु तिष्ठन्ति, अन्ये पामरास्तृणमय-मृत्तिकामयेषु नित्यं वसन्ति, मम त्वस्यां स्थितौ न ममत्वं विधेयम्, सुखदुःखं वा सहेत, जिनकल्पापेक्षयैकरात्रम्, एकरात्रिर्यत्र तदेकरात्रम् उपाश्रयं वसेत्, जिनकल्पो ह्येकरात्रमुपाश्रयं शुभं वाऽशुभं वा सेवेत । स्थविरकल्पो मुनिः कतिपयाहोरात्रवासी भवेत् ? स्थविरकल्पः पञ्चरात्रं नगरे वसति ॥ २३ ॥

अत्र यज्ञदत्तद्विजपुत्रयोः कथा -

यथा कौशाम्ब्यां यज्ञदत्तद्विजपुत्रौ सोमदत्तसोमदेवनामानौ प्रव्रजितौ गीतार्थौ जातौ । अन्यदा तत्पितरावुज्जयिन्यां गतौ, तावपि साधू विहरन्तौ तत्र गतौ । तत्र तदा देशरीत्या स्वगृहे क्रियमाणं विविधौषधिमिश्रं मद्यापरपर्यायं विकटं (उष्णजलं) तयोः स्वजनैर्दत्तं तौ तत्स्वरूपमजानन्तौ जलविशेषबुद्ध्या पीतवन्तौ, परिणते च तस्मिन् ज्ञातमद्यस्वरूपौ तौ कृतपश्चात्तापौ तद्वैराग्यादेवानशनं पादपोपगमनामकं नदीतटस्थकाष्ठोपरि प्रपन्नौ । ततोऽकालवृष्ट्या नदीपूरेण प्लावितौ समुद्रान्तः प्रविष्टौ, तत्र जलचरोपसर्गं विषह्य दिवं गतौ । इमौ हि नीरपूरागमेऽपि शय्यातो न पृथग्भूतौ । एवं शय्यापरीषहः सोढव्यः ॥ ११ ॥

अथ शय्यास्थितस्य तत्रोपद्रवे जाते सति रागद्वेषरहितस्य साधोर्यदा कश्चिच्छय्यातरो वा शय्यातरादन्यो वा वचनैराक्रोशेदिति हेतोराक्रोशपरीषहोऽपि सोढव्यः, अतस्तत्परीषहमाह-

अक्कोसिज्ज परो भिक्खुं, न तेसिं पडिसंजले ।
सरिसो होइ बालाणं, तम्हा भिक्खू न संजले ॥ २४ ॥

सुच्चाणं फरुसा भासा, दारुणा गामकंटया ।
तुसिणीओ उवेहिज्जा, न ताओ मणसीकरे ॥ २५ ॥

परोऽन्यः कश्चिद्यदि भिक्षुं - साधुमाक्रोशेत दुर्वचनैस्तर्जयेत् । तदा तस्मै न प्रतिसञ्ज्वलेत्, तस्योपरि क्रोधं न कुर्यादित्यर्थः । यदि तस्योपरि साधुरपि क्रोधं कुर्यात्तदा सोऽपि बालानां-मूर्खाणां सदृशो भवेत्, तस्माद्भिक्षुर्न सञ्ज्वलेद् गालीं श्रुत्वा प्रतिगालीं न दद्यात् । तदा किं कुर्यादित्याह 'सुच्चाणं' इति साधुस्तूष्णीको-मौनी सन्नुपेक्षेत, औदासीन्येन तिष्ठेत्, रागद्वेषरहितो भवेत्, ता भाषा मनसि न कुर्यात्, किं कृत्वा ? परुषाः कठोरा भाषाः श्रुत्वा, कीदृशीः भाषाः ? दारुणाः, दारयन्ति संयमधैर्यं विदारयन्तीति

दारुणाः पुनः कीदृशीः ? ग्रामकण्टकाः, ग्राम इन्द्रियगणस्तस्य कण्टका इव कण्टका ग्रामकण्टका दुःखोत्पादकाः यदुक्तम् -

चाण्डालः किमयं द्विजातिरथवा शूद्रोऽथवा तापसः,
किं वा तत्त्वनिवेशपेशलमतिर्योगीश्वरः कोऽपि वा ।

इत्यस्वल्पविकल्पजल्पमुखरैः संभाष्यमाणो जनै-
र्नो रूष्टो न हि चैव हृष्टहृदयो योगीश्वरो गच्छति ॥ १ ॥

[तुला भर्तृ० वैरा ५४]

पुनर्गालीं श्रुत्वेति चिन्तयेत्-

ददतु ददतु गालीर्गालिमन्तो भवन्तो, वयमपि तदभावाद्गालिदानेप्यऽशक्ताः ।
जगति विदितमेतद्दीयते विद्यमानं, ददतु शशविषाणं ये महात्यागिनोऽपि ॥ १ ॥

इति विचार्य शमत्वेन तिष्ठेत् ॥ २५ ॥

अत्रार्जुनमालाकारर्षिकथा -

यथा - अथ राजगृहे नगरेऽर्जुननामा मालिकोऽस्ति, तस्य प्रिया स्कन्दश्रीनाम्नी वर्तते, स स्ववाटिकामार्गस्थं पुराद्बहिर्मुद्गरपाणियक्षं निरन्तरं स्वगोत्रदेवत्वेनार्चति । अन्यदा वाटिकागतस्यार्जुनमालिकस्य समीपे सा भोज्यं गृहीत्वा वाटिकायां यान्ती यक्षभवनस्थैः षट्पुरुषैर्दृष्टा, भोगार्थं यक्षभवनान्तः प्रवेशिता । तदानीमेव तत्र यक्षपूजार्थं मालिकः समायातः, तं बद्ध्वा षडपि पुरुषास्तस्या भोगे प्रवृत्ताः । स पश्यत्येवं च चिन्तयति मयैष यक्षो मुधैवार्चितः, यदेतस्य पुर इत्थं पराभूयते । ततो यक्षस्तच्छरीरमनुप्रविश्य तान् षडपि पुरुषान् स्त्रीसप्तमान् मारयति स्म । एवं प्रत्यहं मारयति । ततो लोकोऽपि तस्मिन् मार्गे राजगृहपुरात्तावन्न निर्गच्छति यावत्सप्त मारिता न स्युः । अन्यदा श्रीवीरस्तत्र समवसृतः, न कोऽपि तद्भयेन वन्दनार्थं गच्छति । सुदर्शनश्रेष्ठी तु यद्भवति तद्भवतु, मया त्ववश्यं श्रीवीरस्तत्र गत्वा वन्दनीय एवेति विचिन्त्य तन्मार्गे चलितः, तं दृष्ट्वा मालिकशरीरप्रविष्टो मुद्गरपाणिर्यक्षो धावितः । ततः सुदर्शनश्रेष्ठिनार्हत्सिद्ध-साधु-शुद्धधर्मशरणं प्रपन्नम्, सागारिकमनशनमपि गृहीतम्, कायोत्सर्गेण स्थितम्, ततो धर्मप्रभावात्स यक्षस्तमाक्रमितुं न शक्नोति । पश्चाद्यक्षो मालिकशरीरं मुक्त्वा गतः, स्वस्थीभूतो मालिकः श्रेष्ठिमुखाद्वीरागमनं श्रुत्वा श्रेष्ठिना सह वन्दनार्थं गतः, वीरवचसा प्रतिबुद्धो दीक्षां गृहीतवान्, राजगृहनगरमध्य एव गृहे गृहे भिक्षार्थं भ्रमति, लोकास्तु स्वजनमारकोऽयमित्याक्रोशान् ददति, स मनो-वचन-कायशुद्ध्या तानाक्रोशान् विषह्योत्पन्नकेवलज्ञानः शिवमगात् । एवमन्यैरप्याक्रोशपरीषहः सोढव्यः ॥ १२ ॥

अथ कश्चिदाक्रोशको दुर्वचनवादी साधोर्वधमपि कुर्यात्, तदा तमपि सहेत अतस्तत्परीषहमाह-

हओ न संजले भिक्खू, मणं पि न पओसए ।
तितिक्खं परमं नच्चा, भिक्खू धम्मं विचिंतए ॥ २६ ॥

समणं संजयं दंतं, हणिज्जा कोइ कत्थई ।
नत्थि जीवस्स नासोत्ति, एवं पेहिज्ज संजए ॥ २७ ॥

भिक्षुः साधुर्हतो यष्ट्यादिभिस्ताडितो न सञ्ज्वलेन्न क्रोधाध्मातः स्यात्, मनोऽपि न प्रद्वेषयेत्, चित्तं सद्वेषं न कुर्यादित्यर्थः । किं कृत्वा ? तितिक्षां-क्षमां परमामुत्कृष्टां ज्ञात्वा दशविधसाधुधर्मे क्षान्तिमुत्कृष्टां विचार्य भिक्षुर्धर्मं विचिन्तयेत् मम धर्म एव रक्षणीय इति विचिन्तयेदित्यर्थः ॥ २६ ॥

कश्चिद् दुष्टः कुत्रचिदनार्यदेशे श्रमणं साधुं हन्यात्, प्राणापहारमपि कुर्यात्तदा संयतः साधुरेवं सम्प्रेक्षेत-विचारयेत्, एवमिति किं ? जीवस्य नाशो नास्ति, शरीरस्य नाशो विद्यते, न च शरीरनाशे जीवनाशः, कीदृशं साधुं ? संयतं-जितेन्द्रियम्, पुनः कीदृशं ? दान्तं क्रोधादिरहितम् साधुना मनस्येवं चिन्तनीयम् कदाचिदहमस्मिन् शरीरनाशावसरे क्रोधं करिष्यामि तदा मम धर्मरूपजीवितव्यनाशो भविष्यति, न चास्मिन्नित्यदेहे नष्टे ममात्मनो धर्मस्य च नाशो भावीति ॥ २७ ॥ यदुक्तम् ॥

दोषो मेऽस्तीति युक्तं शपति शपति वा तं विनाज्ञः परोक्षे ।
दृष्ट्याः साक्षान्न साक्षादिति शपति न मां ताडयेत्ताडयेद्वा ॥

नासून् मुष्णाति तान् वा हरति सुगतिदं नैष धर्मं ममाहो ।
इत्थं यः कोऽपि हेतौ सति विशदयति स्याद्धि तस्येष्टसिद्धिः ॥

अत्र स्कन्दकशिष्याणां कथा -

यथा श्रावस्त्यां जितशत्रुनृपः, धारिणी प्रिया, तयोः पुत्रः स्कन्दकः, पुरन्दरयशा पुत्री कुम्भकारकटके पुरे दण्डकिनृपस्य दत्ता । तस्य पुरोहितः पालको मिथ्यादृक् । अन्यदा श्रावस्त्यां मुनिसुव्रतस्वामी समवसृतः, तस्य देशनां श्रुत्वा स्कन्दकः श्रावको जातः । एकदा पालकपुरोहितो दूतत्वेन श्रावस्त्यां प्राप्तः, राजसभायां जैनसाधुनामवर्णवादं वदन् स्कन्दकेन निरुत्तरीकृत्य निर्घाटितः सन् स्कन्दकुमारोपरिष्टश्छिद्राणि पश्यति । अन्यदा स्कन्दककुमारः श्रीमुनिसुव्रतस्वामिपार्श्वे पञ्चशतकुमारैः सह प्रव्रजितो गीतार्थो जातः, स्वामिना ते कुमारशिष्यास्तस्यैव दत्ताः । अन्यदा स स्कन्दकः स्वामिनं पृच्छति हे भगवन् ! भगिनीं वन्दापनार्थं गच्छामि ? स्वामिना भणितं तत्र मरणान्तिकोपसर्गोऽस्ति, स्कन्दकेनोक्तं भगवन् ! वयमाराधका विराधका वा ? स्वामिना भणितं त्वां मुक्त्वा सर्वेऽप्याराधकाः, स्वामिनैवमुक्तेऽपि भवितव्यतावशेन पञ्चशतशिष्यपरिवृत्तः स कुम्भकारकटकपुरे गतः । पालकेन तमागच्छन्तं ज्ञात्वा पूर्ववैरं स्मरता साधुस्थितियोग्योद्याने षट्त्रिंशदायुधानि भूमौ

स्थापितानि, स्कन्दकाचार्यस्तु तत्रैव समवसृतः । ततः पालकेन नृपस्याग्रे कथितम्, महाराज ! अयं स्कन्दकः पञ्चशतसाधवोऽपि च सहस्रयोधिनः परीषहभग्नास्तव राज्यं गृहीतुकामाः समायातास्त्वां हनिष्यन्ति, राज्यं च गृहीष्यन्ति, यदि न प्रत्ययस्तदोद्यानं विलोकय ? एभिरायुधानि भूमौ गोपितानि सन्ति । नृपेणोद्यानं विलोकितम्, आयुधानि दृष्टानि, क्रोधात्तेन ते साधवस्तस्यैव दत्ताः, तेन सर्वेऽपि ते यन्त्रेण पीलिताः, वधपरीषहस्य सम्यगधिसहनादुत्पन्नकेवल[1]ज्ञानाः सिद्धाः, स्कन्दकाचार्यस्तु सर्वेषां शिष्याणां तथाविधमरणं दृष्ट्वोत्पन्नक्रोधः सर्वस्याप्यस्य दाहकोऽहं स्यामिति कृतनिदानोऽग्निकुमारेषूत्पन्नः ।

अथाचार्यस्य रजोहरणं रुधिरलिप्तं गृध्रैः पुरुषहस्तं ज्ञात्वा चञ्चुपुटेनोत्पाट्य पुरन्दरयशापुरः पातितम्, सापि महतीमधृतिं चकार, साधवो गवेषिताः, [2]किन्तु न दृष्टाः, प्रत्यभिज्ञातानि कम्बलाद्युपकरणानि, ज्ञातं च तया साधवो मारिता इति । ततो धिक्कृतस्तया नृपतिः, अहं तव मुखं न पश्यामि, प्रव्रजिष्याम्येवेति वदन्तीं तां स्कन्दकभगिनीं देवाः श्रीमुनिसुव्रतस्वामिसमीपे मुक्तवन्तः, स्वामिना सा दीक्षिता । ततोऽग्निकुमारदेवेन सनगरो देशो दग्धः । ततो दण्डकारण्यं जातम्, अद्यापि तथैव तज्जनैर्भण्यते ।

एभिः साधुभिर्वधपरीषहः सोढस्तथापैरपि सोढव्यः । न तु स्कन्दकाचार्यवत्कर्तव्यम् ।

अथ परैरभिहतस्यौषधादिकयाञ्चा स्यात्तस्माद्याञ्चापरीषहोऽपि सोढव्यः, अतस्तत्परीषहमाह-

दुक्करं खलु भो निच्चं, अणगारस्स भिक्खुणो ।
सव्वं से जाइयं होइ, नत्थि किंचि अजाइयं ॥ २८ ॥

गोयरग्गपविट्ठस्स, पाणी नो सुप्पसारए ।
सेओ अगारवासुत्ति, इइ भिक्खू न चिंतए ॥ २९ ॥

खल्विति निश्चयेन भोः स्वामिन्ननगारस्य भिक्षोर्नित्यं कष्टम्, अपरस्य च कदाचित्कष्टमुत्पद्यते । भिक्षोस्तु नित्यमेव कष्टम्, यदुक्तम् -

गात्रभङ्गः स्वरे दैन्यं प्रस्वेदो वेपथुस्तथा ।
मरणे यानि चिह्नानि, तानि चिह्नानि याचने ॥ १ ॥

इत्युक्तत्वाद्भिक्षोर्नित्यं महत्कष्टं, तत्किं कष्टमित्याह-से इति तस्य भिक्षोः सर्वं वस्तु याचितं सद्भवति, अयाचितं-गृहस्थादमार्गितं किञ्चिदपि नास्ति, तस्माद्धि कष्टं भिक्षुजीवितमिति ॥ २८ ॥

---

१ 'ज्ञानास्ते - मु० ॥ २ किन्तु - D. L. मु० १ नास्ति ॥

पुनस्तदेव दृढयति-'गोयरेति' गोचराग्रप्रविष्टस्य-भिक्षार्थं प्रविष्टस्य साधोः पाणिर्हस्तः पिण्डग्रहणार्थं न सुप्रसार्यः-सुखेन न प्रसार्यः, गौरिव चरति यस्मिन् स गोचरः, गोचरेऽग्रं-प्रधानपिण्डग्रहणं गोचराग्रं, तन्निमित्तं प्रविष्टस्य-गृहस्थगृहे प्रस्थितस्य भिक्षार्थं करप्रसारणं दुष्करं भिक्षामार्गणं दुष्करम्, को नित्यं सम्यग्वपुष्मान्नरः भिक्षां मार्गयति ? तस्मादागार-वासो-गृहवासः श्रेयानिति भिक्षुर्मनसि न चिन्तयेत् । यथाऽरण्ये याञ्चापरीषहो दुस्सहो, न तथा श्रीमद्गृहाकीर्णे पुरे । अतः स्त्रीणां निजरूपकृतमनर्थं दृष्ट्वा बलदेवर्षिः पुरप्रवेशं निषेध्य, यत एव याञ्चापरीषहं सोढवान् ॥ २९ ॥

तत्कथा यथा-द्वारिकानगर्यामेकदा श्रीनेमिः समवसृतः, कृष्णेन द्वारिकाक्षय-स्वमरणकारणं पृष्टम्, नेमिना मद्यपानविकली-भूतत्वत्कुमारोपसर्गसमुद्भूतक्रोधाद् द्वीपायनाद् द्वारिकाक्षयस्त्वन्मरणं च त्वद्भ्रातृव्यज-राकुमारादेवेति प्रोक्तम् । वासुदेवेन द्वारिकायां निषिद्धमपि मद्यपानं भवितव्यतावशेन कृष्णपुत्रैः कृतम्, विकलीभूतैश्च तैः क्रीडार्थं नगरबहिर्गतैस्तत्रातापनां कुर्वन् द्वीपायनर्षि-र्दृष्टः, अरे ! त्वं द्वारिकाक्षयकारी भविष्यसीत्युक्त्वा यष्टि-मुष्ट्यादिभिरुपसर्गितः कोपाद् द्वारिकाक्षयनिदानं चकार, स तन्मारणेनैव मृतोऽग्निकुमारेषूत्पन्नः, तेन च द्वारिकाक्षयः कृतः, कृष्णबलदेवावेव निर्गतौ, अटव्यां तृषाक्रान्तेन वासुदेवेनोक्तं नाहमतःपरं चलितुं शक्नोमि, पानीयमानीय मे देहि ततो बलदेवेन पानीयार्थं दूरङ्गते पादोपरि पादं कृत्वा कृष्णः सुप्तः ।

अथ प्रागेव श्रीनेमिनाथवचनश्रवणसञ्जातभयेन जराकुमारेण वनवासं प्रपन्नेन तदानीमितस्ततो भ्रमता तत्रैवायातेन मृगभ्रान्त्या मुक्तबाणेन विद्धपादः कृष्णः पञ्चत्वमाप । तथापि तत्रायातेन बलदेवेन न मे भ्राता मृतः, किन्तु मद्विलम्बागमनोत्थरोषादेष मौनमाश्रि-तोऽस्तीति बुद्ध्या तच्छवं स्वस्कन्धे समुत्पाटितम्, पूर्वसङ्गतिकदेवेन प्रतिबोधे कृते बलदेवेन दीक्षा गृहीता । एकदा कस्मिंश्चिद् ग्रामे भिक्षार्थमायातस्य बलदेवस्य रूपं दृष्ट्वा व्यामोहं गतया कूपकण्ठस्थया कयाचिन्नार्या घटभ्रान्त्या स्वबालकण्ठ एव पाशितस्ततो बलदेवमुनिना प्रतिबोधिता सा बालगलात्पाशं दूरीचकार । ततो भिक्षार्थं ग्रामप्रवेशनियमो गृहीतः, वन एव तृणकाष्ठहारकेभ्यो भिक्षां गृह्णाति, यदि तेभ्यो न प्राप्नोति तदा तप एव करोतीति । यथा बलदेवेन तुच्छलोकेभ्योऽपि भिक्षा मार्गिता, ततो याञ्चापरीषहः सोढस्तथापरैरपि सोढव्यः । एवं याञ्चापरीषहे बलदेवकथा ॥ १४ ॥ अथ याञ्चायां न लभेत तदाऽलाभपरीषहोऽपि सोढव्यः, अतोऽलाभपरीषहमाह-

परेसु गासमेसिज्जा, भोयणे परिनिट्ठिए ।
लद्धेवि पिंडे अलद्धे वा, नाणुतप्पिज्ज पंडिए ॥ ३० ॥

अज्जेवाहं न लब्भामि, अवि लाभो सुए सिया ।
जो एवं पडिसंचिक्खे, अलाभो तं न तज्जए ॥ ३१ ॥

साधुः परेषु गृहस्थेषु ग्रासं कवलमेषयेत्, तत्र च भोजने ओदनादौ परिनिष्ठिते-सम्पूर्णे सिद्धे वा लब्धे प्राप्ते सति वाथवाऽलब्धेऽल्पे लब्धेऽनिष्टे लब्धे वा पण्डितो मुनिर्नानुतृप्येत्, लब्धिमानहं यतो मया सम्पूर्णमिष्टं वाऽऽहारं लब्धम्, अनिष्टेऽल्पे वा लब्धे तथा न दूयेतेत्यनुक्तोऽप्यर्थो गृह्यते ॥ ३० ॥

तदा किं कुर्यादित्याह-अद्यैवाहमाहारं न लभे, अपीति सम्भावनायां सम्भा-वयामि, अद्यैवाऽऽहारं न प्राप्तम्, परं 'सुए' इति श्वः प्रभाते-आगामिदिने लाभः स्यादाहारस्य प्राप्तिर्भवेत् । उपलक्षणत्वादन्येद्युरपरेद्युरन्यतरेद्युर्वा मा भूत्, यः साधुरेवं प्रतिसमीक्षते-इति चिन्तयति तं साधुमलाभपरीषहो न तर्जयेत्-नाभिभवेत् ॥ ३१ ॥ अत्र अलाभपरीषहे कथाद्वयम्; लौकिकं लोकोत्तरं च । तत्र प्रथमं लौकिकं कथानकं कथ्यते-

एकदा कृष्णो बलदेवः सत्यकिर्दारुक एते चत्वारोऽप्यश्वाहृता अटव्यां वटवृक्षाधो रात्रौ सुप्ताः, आद्ये प्रहरे दारुको यामिको जातः, अन्ये त्रयः सुप्ताः, तदानीं क्रोधपिशाचस्त-त्राऽऽयातः, दारुकं प्रत्याह-अहमेतान् सुप्तान् साम्प्रतं भक्षयामि, यदि तवैषां रक्षणे शक्तिरस्ति तदा युद्धं कुरु ? दारुकेणोक्तं-बाढम्, ततो लग्नं युद्धम्, यथा यथा दारुकस्तं पिशाचं हन्तुं न शक्नोति तथा तथा तस्य क्रोधो वर्द्धते । तथा च दारुकस्य न युद्धलाभो जातः, पराभूत एव दारुकः सुप्तः । द्वितीये प्रहरे सत्यकिरुत्थित क्रोधपिशाचेन तथैव जितः, तृतीये प्रहरे बलदेवः सोऽपि तथैव जितः, तुर्ये प्रहरे उत्थितं कृष्णं क्रोधपिशाचस्तथैव प्रोक्तवान् । कृष्णः प्राह - मां जित्वा मत्सहायान् भक्षय, ततो यथा क्रोधपिशाचो युध्यति तथा तथा कृष्णोऽहो बलवानेष मल्लः इति तुष्यति, यथा कृष्णस्तोषवान् भवति तथा तथा पिशाचः क्षीयति, एवं कृष्णेन पिशाचः सर्वथा क्षीणः स्ववस्त्रमध्ये क्षिप्तः, प्रभाते तान् अङ्गान् दृष्ट्वा कृष्णेनोक्तं-किमेतद्भवतां जातम् ? ते सर्वेऽपि रात्रिवृत्तान्तं प्राहुः, कृष्णेन स्ववस्त्रमध्यादाकृष्य दर्शितः, एवं कृष्णवद् यस्तोषवान् भवति सोऽलाभपरीषहं जेतुं शक्नोति । अथ द्वितीयं लोकोत्तरं ढण्ढणकुमारकथानकं कथ्यते -

कस्मिंश्चिद् ग्रामे कोऽपि कृशशरीरी कुटुम्बी वसति, अन्येऽपि बहवस्तत्र कुटुम्बिनो वसन्ति, वारकेण ते राजवेष्टिं कुर्वन्ति, राजसत्कपञ्चशतहलानि वाहयन्ति । एकदा तस्य कृशशरीरिणः पञ्चशतहलवाहनवारकः समायातः, तेन च वाहिता वृषभाः, भक्तपानवेला-यामप्येकोऽधिकश्चाषो दापितस्तदान्तरायं कर्म बद्धम् ततो मृत्वासौ बहुकालमितस्ततः संसारे परिभ्रम्य कस्मिंश्चिद्भवे कृतसुकृतवशेन द्वारिकायां कृष्णवासुदेवस्य पुत्रत्वेन समुत्पन्नः, ढण्ढणेति तस्य नाम प्रतिष्ठितम् । स ढण्ढणकुमारः श्रीनेमिपार्श्वेऽन्यदा प्रव्रजितः, लाभान्तरायवशान्महत्यामपि द्वारिकायां हिण्डमानो न किञ्चिदन्नादि लभते, यदि कदाचिल्लभते तदा सर्वथासारमेव । ततस्तेन स्वामी पृष्टः, स्वामिना तु सकलः पूर्वभववृत्तान्तस्तस्य कथितः, तेन चाऽयमभिग्रहो गृहीतः, परलाभो मया न ग्राह्यः । अन्यदा वासुदेवेन स्वामिनः इति पृष्टम्, भगवन्नेतावत्सु श्रमणसहस्रेषु को दुष्करकारकः ?

स्वामिना ढण्ढणर्षिरेव दुष्करकारक इत्युक्तम् । कृष्णेनोक्तं स इदानीं क्वास्ति ? स्वामी प्राह-त्वं नगरं प्रविशंस्तं द्रक्ष्यसि, हृष्टः कृष्णः श्रीनेमिजिनं प्रणम्योत्थितः, पुरद्वारे प्रविशंस्तं साधुं दृष्टवान्, हस्तिस्कन्धादुत्तीर्य कृष्णस्तं ववन्दे, तेन वन्द्यमानोऽयं साधुरेकेनेभ्येन दृष्टः, चिन्तितं च तेनाहो एष महात्मा कृष्णेन वन्द्यते । एवं चिन्तयत एव तस्य गृहे ढण्ढणर्षिः प्रविष्टस्तेन मोदकैः प्रतिलाभितः, ततः स स्वामिसमीपे गत्वा पृच्छति मम लाभान्तरायः क्षीणः किं ? स्वामिनोक्तमेष वासुदेवलाभः, मम परलाभो न कल्पते इत्युक्त्वा नगराद्बहिर्गत्वोचितस्थण्डिले मोदकान् विधिना परिष्ठापयन् शुभध्यानारोहेण केवली जातः । एवमन्यैरप्यलाभपरीषहः सोढव्यः ।

अलाभादनिष्टाहारलाभादन्त्याहार-प्रान्त्याहारभोजनाच्छरीरे रोगा उत्पद्यन्ते, अतो रोगपरीषहोऽपि सोढव्यः । ततो रोगपरीषहमाह-

नच्चा उप्पइयं दुक्खं, वेयणाए दुहट्ठिए ।
अदीणो ठावए पन्नं, पुट्ठो तत्थऽहियासए ॥ ३२ ॥

तेगिच्छं नाभिनंदिज्जा, संचिक्खत्तगवेसए ।
एयं खु तस्स सामन्नं, जं न कुज्जा न कारए ॥ ३३ ॥

वेदनया दुःखार्त्तितो मुनिरदीनः सन् प्रज्ञां स्थापयेत्-बुद्धिं स्थिरां कुर्यात्, किं कृत्वा ? दुःखमुत्पतितमुद्भूतं ज्ञात्वा, तत्र वेदनायां दुःखे वा रोगपरीषहमध्यासेत-सहेत, कीदृशो मुनिः ? 'पुट्ठो' स्पृष्टो-रोगैर्व्याप्तः, दुःखयतीति दुःखं-रोगस्तेनार्तः-पीडितः क्रियते इति दुःखार्तितः, तादृशोऽपि प्रज्ञां स्थापयेत्, रोगार्त्तस्य हि प्रज्ञा चञ्चला स्यात्, साधुस्तु रोगसद्भावेऽपि प्रज्ञां स्थिरामेव विदधीतेत्यर्थः ॥ ३२ ॥

तदा रोगार्त्तः किं कुर्यादित्याह-'तेगिच्छ'मिति साधुः रोगार्त्तश्चिकित्सां-रोगप्रतीकारं नाभिनन्देत्-नानुमन्येत, तदा चिकित्साया: करणं कारणं दूरत एव त्यक्तम्, यदा मनस्यपि चिकित्साचिन्तनं साधुर्न कुर्यात्, कीदृशः साधुः ? आत्मगवेषकः, आत्मानं-संयमजीवं गवेषयतीत्यात्मगवेषकः, एतादृशः सन् 'संचिक्खे' समाधिना तिष्ठेत् पीडया पीडितो न क्रन्देदित्यर्थः । खु यस्मात्कारणाच्छ्रामण्यं साधुत्वम्, 'एयं' एतदेव, 'जं' इति यस्मात्कारणाद्रोगे समुत्पन्ने स्वयं चिकित्सां न कुर्यात्, अन्येनापि न कारयेत्, जिनकल्पिकापेक्षयायमाचारः, स्थविरकल्पिकाः पुनः कारयन्त्यपीति वृद्धसम्प्रदायः ॥ ३३ ॥

अत्र कालवैशिककथा -

यथा - मथुरायां जितशत्रुनृपोऽतिसुरूपां कालाख्यां वेश्यामन्तःपुरेऽक्षिपत्, तस्या पुत्रः कालवैश्यकस्तस्य भगिनी मुद्गशैलनगरस्वामिना परिणीता । अन्यदा स कुमारः शृगालशब्दं श्रुत्वा स्वभृत्यानपृच्छत् कस्याऽयं स्वरः ? तैरूचे फेरुकस्वरोऽयम्, कुमारेणोक्तं

फेरुकोऽत्रानीयतां, तैरानीतः, शृगालः कुमारेण हन्यमानः खीखीति कुर्वाणो मृतः, अकामनिर्जरया व्यन्तरो जातः । अन्यदा कुमारः स्थविरान्तिके प्रव्रजितः गीतार्थो जातः, एकाकी विहरन् प्रतिमां प्रतिपन्नः, तस्यार्शोरोगो बभूव, न चिकित्सां कारयति, नाप्यौषधं करोति तथाविधप्रत्याख्यानात् । अन्यदा विहरन्नसौ मुद्गशैलपुरे गतः, तत्र तन्नगरस्वामिपरिणीतया तद्भगिन्यार्शोघ्नौषधमिश्रा भिक्षा दत्ता, तेन चाजानतार्शोघ्नौषधिमिश्र आहारो गृहीतः, औषधप्रयोगे च ज्ञाते भग्नं मे प्रत्याख्यानमित्यधिकरणदोषशङ्क्या भक्तं प्रत्याख्यातं पुराद्बहिः, तत्र च तेन शृगालजीवेन व्यन्तरीभूतेनोपयोगदानेनासावुपलक्षितः, स तूत्पन्नवैरेण च नवप्रसूत-शिवारूपेण खीखीकुर्वता खाद्यमानः शिवोपसर्गमर्शोरोगं च सोढवान् । एवमन्यैरपि रोगः [परीषहः] सोढव्यः ॥ १६ ॥

अथ रोगादियुक्तस्य शयनादौ दुस्सहतृणस्पर्शः स्यात्, अतस्तत्परीषहमाह-

अचेलगस्स लूहस्स, संजयस्स तवस्सिणो ।
तणेसु सुयमाणस्स, हुज्जा गायविराहणा ॥ ३४ ॥

आयवस्स निवाएणं, अउला हवइ वेयणा ।
एवं नच्चा न सेवंति, तंतुजं तणतज्जिया ॥ ३५ ॥

तपस्विनः संयतस्य तृणेषु शयमानस्य, तृणैर्गात्रविराधना भवेत्, कीदृशस्य संयतस्य ? अचेलकस्य-वस्त्ररहितस्य, पुनः कीदृशस्य ? रूक्षस्य-तैलाभ्यङ्गादिरहितस्य, यदा शरीरे तृणैः कृत्वा पीडा स्यात्तदा किं कुर्यादित्याह-आयवस्सेति तृणतर्जितास्तृणस्पर्शपीडिताः साधवः तंतुजं वस्त्रं- [1]सूत्रवस्त्रं कम्बलादिवस्त्रं वा न सेवन्ति-नाचरन्ति, किं कृत्वा ? एवं ज्ञात्वा, एवमिति किम् ? आतपस्य निपातेन-घर्मस्य संयोगेनाऽतुला वेदना भवति, ताप-शीत-वर्षा-वातादिपीडा अस्माभिः सोढुं न शक्यते । अथवा आतप्येत-पीड्यते शरीरमनेनेत्यातपः, तृण-पाषाणादिरप्युच्यते, तस्य सङ्गेनाऽस्मच्छरीरे महती वेदना भवति, यदि वस्त्रादीनां प्रस्तरणं स्यात्तदास्मच्छरीरे तृणादिभिः पीडा न स्यादिति विचिन्त्य वस्त्रकम्बलादिकं न परिगृह्णन्ति, इति जिनकल्पापेक्षयेदमुक्तं वर्तते ॥ ३४-३५ ॥

अत्र भद्रर्षिकथा -

यथा - श्रावस्त्यां जितशत्रुपुत्रो भद्रः प्रव्रजितः, विरुद्धराज्ये विहरन् हेरकोऽयमिति भ्रान्त्या नृपनरैर्धृतः, पृष्टोऽप्यब्रुवन् क्रुद्धैस्तैः क्षुरेण तक्षितो दर्भैश्च वेष्टयित्वा मुक्तः । ततः स तद्वेदनामधिसेहे । एवं तृणस्पर्शपरीषहः शेषसाधुभिरप्यधिसह्यः ॥ १७ ॥

अथ तृणादिस्पर्शाच्छरीरे प्रस्वेदाद्रजःस्पर्शान्मलोपचयः स्यात् तदा मलपरीषहोऽपि सोढव्यः, अतस्तमाह-

---

१ सूत्रवस्त्रं मु० १ नास्ति ॥

किलिन्नगाये मेहावी, पंकेण वा रयेण वा ।
धिंसु वा परियावेणं, सायं नो परिदेवए ॥ ३६ ॥

वेइज्ज निज्जरापेही, आरियं धम्ममणुत्तरं ।
जाव सरीरभेउत्ति, जल्लं काएण धारए ॥ ३७ ॥

मेधावी साधुः 'धिंसु' ग्रीष्मकाले वाशब्दाच्छरद्यपि परितापेन-गाढोष्मणा, पङ्केन प्रस्वेदादार्द्रीभूतमलेन अथवा रजसार्द्रमलेन परिशुष्य काठिन्यं प्राप्तेन धूल्या वा क्लिन्नगात्रः सन्-बाधितशरीरः सन् सातं-सुखं न परिदेवेत, मलापहारात्सुखं न वाञ्छेत् । सातार्थं विलापं न कुर्यादित्यथः ॥ ३६ ॥

तदा किं कुर्यादित्याह - 'वेयज्जति' निर्जरापेक्षी-कर्मक्षयमीप्सुः साधुस्तावत्कायेन जल्लं धारयेत्, देहेन मलं धारयेत्, पुनः 'वेइज्ज' मलपरीषहं वेदयेत-सहेत, तावत्कथं ? यावच्छरीरस्य भेदः-शरीरस्य पातः स्यात्, साधुः कीदृशः सन् ? आर्यं श्रुतचारित्ररूपं धर्मं प्रपन्नः सन्नित्यध्याहारः, कीदृशं धर्मम् ? अनुत्तरं-सर्वोत्कृष्टम् ॥ ३७ ॥

श्राद्धसुनंदहट्टे भेषजार्थी साधुस्तत्कथा यथा - चम्पायां सुनन्दो वणिग्दानवान् । अन्यदा मलाविलं साधुं दृष्ट्वा मलधारिणं मुक्त्वा शेषं सर्वसाधूनां भव्यमिति जुगुप्सां कृतवान्, मृत्वा चाऽसौ कौशाम्ब्यामिभ्यपुत्रोऽभूत्, स प्रस्तावे दीक्षां गृहीतवान् । तदानीं तत्कर्मोदयेन देहे दुर्गन्धोऽभूत्, स यतिर्यत्र यत्र याति तत्र तत्रोड्डाहो भवति ।

ततो गुरुभिस्तस्य भ्रमणं निषिद्धम् तेन रात्रौ जिनदेवताऽऽराधनार्थं कायोत्सर्गः कृतः, तुष्टदेवतया सुगन्धीकृतः, तथाप्युड्डाहभवने पुनरप्याराधितया देवतया सर्वसमानगन्धः कृतः । अनेन हि साधुना जल्लपरीषहो देवताराधनेन न सोढः । एवमन्यैः साधुभिर्न कार्यम् ॥ १८ ॥

अथ समलः साधुः शुचीन् सत्क्रियमाणान् दृष्ट्वा सत्कारादि न स्पृहयेत्, अतस्तत्परीषहमाह-

अभिवायणमब्भुट्ठाणं, सामी कुज्जा निमंतणं ।
जे ताइं पडिसेवंति, न तेसिं पीहए मुणी ॥ ३८ ॥

अणुक्कसाई अपिच्छे, अन्नाएसी अलोलुए ।
रसेसु नाणुगिज्झिज्जा, नाणुतप्पिज्ज पण्णवं ॥ ३९ ॥

मुनिस्ते इति तेभ्यो न स्पृहयेत्, यत एते धन्या इति न चिन्तयेदित्यर्थः, तेभ्यः केभ्यः ? ये तानि प्रतिसेवन्ते, तानी कानि ? स्वामी राजादिः, अभिवादनं-नमस्कारमस्मभ्यं कुर्यात्, अथवा स्वाम्यभ्युत्थानमस्मभ्यं कुर्यादशनादिसन्मानं कुर्यात्, पुनरस्माकं निमन्त्रणं कुर्यात् ।

एतावता राज्ञा निमन्त्रितानाहारादिभ्यः प्रार्थितान् द्रव्यलिङ्गिनः साधून् न कीर्तयेदित्यर्थः ॥ ३८ ॥ पुनः साधुः कीदृशो भवेत्तदाह-

अनुत्कशायी- सत्कारादिना हर्षरहितस्तादृशो भवेत्, नोत्कोऽनुत्कः शेते इत्येवंशीलोऽनुत्कशायीति शब्दार्थः । यत्र कश्चिदासनदानाभ्युत्थान-निमन्त्रणादिकं करोति तत्र गमनायोत्को न भवति-उत्कण्ठितो न भवति । अथवाणुकषायी, सत्कारादिकं यो न करोति तस्मै क्रोधमकुर्वाणोऽक्रोधः, पुनः कीदृशः ? अल्पेच्छो धर्मोपकरणमात्रधारी, अनेन निर्लोभत्वमुक्तम्, पुनः कीदृशः ?'अन्नाएसी' अज्ञातैषी जाति-कुल-सद्रव्य-निर्द्रव्यादिनाऽपरीक्षितोऽज्ञातस्तादृशं गृहस्थमाहाराद्यर्थमेषयतीत्येवंशीलमज्ञातैषी । पुनः कीदृशो भवेत् ? अलोलुपः सरसाहारे लाम्पट्यरहितः, पुनः साधुरन्यान् सरसाहारभक्षणासक्तान् वीक्ष्य रसेषु नानुगृध्येत् - सरसाहारभिक्षां नाभिकाङ्क्षेदित्यर्थः ॥

पुनः 'पन्नवं' इति प्रज्ञावान् साधुर्नानुतप्येत, अन्येषां सत्कारं दृष्ट्वा 'हा मम कोऽपि सत्कारं न करोति किमर्थमहं प्रव्रजित' इति चिन्तापरो न भवेत् ॥ ३९ ॥

अत्र श्राद्धश्रमणयोः कथा -

यथा मथुरायामिन्ददत्तः पुरोहितोऽस्ति स जिनशासनप्रत्यनीकः स्वगवाक्षस्थः सन्नधो निर्गच्छतो जैनयतेर्मस्तकोपरि निजचरणं वितनं करोति एवं निरन्तरं कुर्वाणं तं दृष्ट्वा साधुर्न कोऽपि कुप्यति, परमेकः श्रावकः कुपितस्तत्पादच्छेदप्रतिज्ञामकरोत्, अन्यानि तच्छिद्राण्यलभमानेन तेन श्रावकेण तत्स्वरूपं गुरोः पुरः कथितम्, गुरुणोक्तं सह्यते सत्कार-पुरस्कारपरीषहः साधुनेति । तेन स्वप्रतिज्ञा कथिता, गुरुभिरुक्तमस्य गृहे किं जायमानमस्ति ? तेनोक्तं नवीनप्रासादे राजा निमन्त्र्यमाणोऽस्ति पुरोहितेन, गुरुभिरुक्तं तर्हि त्वं तत्प्रासादे प्रविशन्तं राजानं करे धृत्वा प्रासादोऽयं पतिष्यतीति कथयेः, अहं च प्रासादं विद्यया पातयिष्यामि । ततस्तेन तथा कृते प्रासादः पतितः । राज्ञोक्तं किमिदं जातं ? श्रेष्ठिनोक्तं हे महाराज ! अनेन तव मारणाय कपटं मण्डितमभूत् । ततो रुष्टेन राज्ञा स पुरोहितस्तस्य श्रेष्ठिनोऽर्पितः, तेन श्रेष्ठिनेन्द्रकीलके तस्य पादं क्षिप्त्वा प्रतिज्ञा पूरणार्थं च पिष्टमयं पादं कृत्वा छिन्नवानुक्तवांश्च सर्वं तत्स्वरूपम्, पुरोहितेनोक्तमतः परं नैवेदृशं करिष्यामीति जातानुकम्पेन श्रावकेण स मुक्तः । अत्र सत्कार-पुरस्कारपरीषहः सोढव्यः साधुभिः, श्रावकेण तु न सोढव्य इति ॥ १६ ॥

अथ सत्कारे सति प्रज्ञाप्रकर्षाऽपकर्षविह्वलत्वं न विधेयं, अतः प्रज्ञापरीषहोऽपि सोढव्यः ।

से नूणं मए पुव्विं, कम्माऽनाणफला कडा ।
जेणाहं नाभिजाणामि, पुट्ठो केणइ कण्हुई ॥ ४० ॥

अह पच्छा उइज्जंति, कम्मा नाणफला कडा ।
एवमस्सासि अप्पाणं, नच्चा कम्मविवागयं ॥ ४१ ॥

प्रज्ञापरीषहोऽपि द्विधा षोढव्यः । प्रज्ञाऽपकर्षपक्षे प्रज्ञाहीनत्वेऽर्थं वदति, येन केनचित्पुरुषेण 'कण्हुई' कस्मिंश्चित्सुगमेऽपि जीवादिप्रश्ने पृष्टः सन्नहं नाभिजानामि । 'से नूनं' इति तन्नूनं मया पूर्वं - पूर्वभवेऽज्ञानफलानि धर्माचार्यगुरुश्रुतनिन्दारुपाणि कृतानि, ततोऽहं प्रज्ञाहीनः सञ्जातोऽस्मि । अथाऽज्ञानफलानि कृतानि कर्माण्यपि पश्चादग्रेतनजन्मनि उदयं प्राप्स्यन्तीति कर्मवपाकं ज्ञात्वैवमात्मानमाश्वासय, उदयप्राप्तानां ज्ञानावरणकर्मणां विघाताय यत्नः कार्य इत्यात्मानमनुशासयेत्यर्थः ।

अथ प्रज्ञाप्रकर्षे सत्येवं चिन्तनीयम् । येन कारणेन केनापि पुरुषेण कुत्रचित्प्रश्ने पृष्टः सन् अहं (सन्नहं) पुरुषप्रश्नोत्तरं जानामि, तत्प्रश्नस्योत्तरं ददामि । तन्नूनं मया पूर्वजन्मनि ज्ञानफलानि कर्माणि कृतानि, ज्ञानं फलं येषां तानि ज्ञानफलानि श्रुतज्ञानाराधनादीनि । अथेदानीं ज्ञानफलानि कर्माणि कृतानि पश्चादग्रेतनजन्मनि 'उइज्जंति' उदयं प्राप्स्यन्ति । 'कर्मविपाकं' कर्मणां विपाकं ज्ञात्वैवमात्मानं त्वमाश्वासय. भो शिष्य ! न तु प्रज्ञाप्रकर्षे गर्वं कुर्या इत्यर्थः प्रज्ञाप्रकर्षेऽयमर्थः कार्यः ।

अतो हि प्रज्ञोदये हर्षो न विधेयः, प्रज्ञाऽभावे विषादे कृते ह्यार्तध्यानपरत्वं न स्यात् ॥ ४०-४१॥

प्रज्ञाप्रकर्षोपरि कालिकाचार्यसागरचन्द्रयोः कथा -

यथा-उज्जयिनीतः कालिकाचार्याः प्रमादिनः स्वशिष्यान् मुक्त्वा सुवर्णकुले स्वशिष्यसागरचन्द्रस्य समीपे प्राप्ताः । सागरचन्द्रस्तु तानेकाकिनः समायातान् नोपलक्षयति, कालिकाचार्या अपि न किञ्चित्स्वरूपोपलक्षणं दर्शयन्ति । अन्यदा सागरचन्द्रेण पर्षदि सिद्धान्तव्याख्यानं प्रारब्धम्, चमत्कृता लोकाः, सिद्धान्तव्याख्यानं प्रशंसन्ति, कालिकाचार्याणां सागरचन्द्रेण पृष्टं मद्व्याख्यानं कीदृशं ? तैरुक्तं भव्यम्, तेन चाचार्यैः समं तर्कवादः प्रारब्धः, परं तुल्यतया वक्तुं न शक्नोति भृशं स चमत्कृतः । अथ शिष्यास्ततः शय्यातरेण तिरस्कृतास्त्रपां प्राप्ताः, स्वगुरुं गवेषयन्तश्चलिताः, कालिकाचार्याः समायान्तीति प्रसिद्धिं कुर्वाणाः सुवर्णभूमौ प्राप्ताः, सागरचन्द्रः कालिकाचार्याः समायान्तीति वृद्धस्य पुरः प्रोक्तवान्, वृद्धः प्राह मयापि श्रुतमस्ति, सागरचन्द्रस्तेषां सन्मुखमायातः, तस्य तैः पृष्टं किमत्र कालिकाचार्याः समायाताः सन्ति न वा ? तेनोक्तमेकोऽत्र वृद्धः समायातोऽस्ति, नापरः कोऽपीति ।

तेऽप्युपाश्रयान्तः समायाताः उपलक्षिताः कालिकाचार्याः, प्रणतास्तैः, सागरचन्द्रेण पश्चादुपलक्ष्य तेषां मिथ्यादुष्कृतं दत्तम्, हा मया श्रुतलवगर्वाध्मातेन श्रुतनिधयो यूयमाशातिता इति च कथितम् । कालिकाचार्यैरुक्तं हे वत्स ! श्रुतगर्वो न कार्यः । यथा सागरचन्द्रेण श्रुतमदः कृतस्तथाऽपरैर्न श्रुतमदः कार्यः । अथ प्रज्ञाप्रकर्षे गर्वः, प्रज्ञाऽभावे दैन्यचिन्तनम्, इत्युभयथाऽज्ञानम् ।

अतस्तत्परीषहोऽपि सोढव्यः, इति कारणादज्ञानपरीषहमाह -

निरट्ठगंमि विरओ, मेहुणाओ सुसंवुडो ।
जो सक्खं नाभिजाणामि, धम्मं कल्लाणपावगं ॥ ४२ ॥

तवोवहाणमादाय, पडिमं पडिवज्जओ ।
एवं पि विहरओ मे, छउमं न नियट्टई ॥ ४३ ॥

अहं निरर्थकेऽर्थाभावे सति मैथुनात्कामसुखाद्विरतो-निवृत्तः मैथुनग्रहणं दुस्त्यजत्वात्, यतोऽहं दुष्करं कार्यं कृतवान्, योऽहं सुसंवृतो जितेन्द्रियोऽपि साक्षात्स्फुटं धर्मवस्तुस्वभावं कल्याणं-शुभं पापकर्ममशुभं नाभिजानामि, यदि मैथुनान्निवृत्तौ जितेन्द्रियत्वेऽपि काचिदर्थसिद्धिर्ज्ञानसिद्धिर्भवेत्तदा मम ज्ञानमुत्पद्येत, मम तु ज्ञानं नोत्पन्नं तदा वृथाहं मैथुनमत्यजम्, वृथैव चेन्द्रियजयमकरवम् पुनरित्थमपि न चिन्तयेत् ।

तपो-भद्र-महाभद्र-सर्वतोभद्रादिः, उपधानं-सिद्धान्तपठनोपचाररूपम्, एकभक्तनिर्विकृत्याऽऽचाम्लोपवासादिकमादायांगीकृत्य, पुनः प्रतिमां-भिक्षोरभिग्रहविशेषक्रियां द्वादशविद्यां प्रतिपद्यमानस्य ममैवं विहरतः साधुमार्गे विहारं कुर्वतोऽपि छद्मस्थज्ञानावरणादिकर्म न निवर्तते, अहं तपः करोम्युपधानं वहामि प्रतिमां च धरामि साधुमार्गे विहरामि तथापि केवली न भवामीति न विचारणीयम्, अयमज्ञानपरीषहः ॥ ४२-४३ ॥

अत्राऽज्ञानपरीषहे कथा -

गङ्गातीरे द्वौ भ्रातरौ वैराग्याद्दीक्षां गृहीतवन्तौ, तत्रैको विद्वान् जातः, द्वितीयस्तु मूर्खः, यो विद्वान्, सोऽनेकशिष्याऽध्यापनादिना खिन्न एवं चिन्तयत्यहो धन्योऽयं मे भ्राता यः सुखेन तिष्ठति, निद्रादिकमवसरे कुर्वन्नस्ति, अहं तु शिष्याऽध्यापनादिकष्टे पतितोऽस्मीति चिन्तयन् काव्यमिदं चकार -

"मूर्खत्वं हि सखे ममापि रुचितं यस्मिन् यदष्टौ गुणा,
[१]निश्चिंतो [२]बहुभोजनोऽत्रपमना[३] नक्तं दिवा [४]शायकः ।
[५]कार्याकार्यविचारणांधबधिरौ मानापमाने [६]समः,
[७]प्रायेणामयवर्जितो [८]दृढवपुर्मूर्खः सुखं जीवति ॥ १ ॥"

परं नैवं चिन्तयति -

"नानाशास्त्रसुभाषितामृतरसैः श्रोत्रोत्सवं कुर्वतां,
येषां यान्ति दिनानि पण्डितजनव्यायामखिन्नात्मनाम् ।
तेषां जन्म च जीवितं च सफलं तैरेव भूर्भूषिता,
शेषैः किं पशुवद्विवेकरहितैर्भूभारभूतैर्नरैः ॥ २ ॥"

एवं पण्डितगुणानचिन्तयन् मूर्खगुणांश्चासतोऽपि चिन्तयन् ज्ञानावरणीयं कर्म बद्ध्वा दिवं गतः, ततश्च्युतो भरतक्षेत्रे आभीरपुत्रो जातः, क्रमेण परिणीतः तस्य पुत्रिका जाता, सा रूपवती । अन्यदाऽनेकाऽऽभीरा घृतभृतशकटाः किञ्चिन्नगरं प्रति गच्छन्ति, असावपि तत्सार्थे घृतभृतं शकटं गृहीत्वा चलितः, मार्गे सा पुत्री शकटखेटनं करोति । ततस्तद्रूपव्यामोहितैराभीरपुत्रैरपथे खेटितानि शकटानि, तानि सर्वाणि भग्नानि, तादृशं संसारस्वरूपं दृष्ट्वा सञ्जातवैराग्यः स आभीरस्तां पुत्रीमुद्वाह्य दीक्षां जग्राह, उत्तराध्ययनयोगोद्वहनावसरेऽसङ्ख्याऽध्ययनोद्देशे कृते तस्याऽऽभीरभिक्षोर्ज्ञानावरणोदयो जातः, न तदध्ययनमायाति । आचाम्लान्येव करोति, उच्चैःस्वरेण तदध्ययननिर्घोषं करोति । एवं च कुर्वतस्तस्य द्वादशवर्षप्रान्तेऽज्ञानपरीषहं सम्यगधिसहमानस्य केवलज्ञानं समुत्पन्नम्, एवमज्ञानपरीषहे आभीरसाधुकथा । यस्य च ज्ञानाजीर्णं स्यात्तेनापि ज्ञानपरीषहो न सोढः ।

तत्रार्थे स्थूलभद्रकथा

यथा स्थूलभद्रस्वामी विहरन् बालमित्रद्विजगृहे गतः, तत्र [1]तमदृष्ट्वा तद्भार्यां पृष्टवान् क्व ते पतिर्गतः ? सा प्राह परदेशे धनार्जनार्थं गतोऽस्ति । ततः स्वामी तद्गृहस्तम्भमूलस्थितं निधिं पश्यन् स्तम्भाभिमुखं हस्तं कृत्वा 'इदमीदृशं स च तादृशः' इति भणित्वा गतः । ततः कालान्तरे गृहागतस्य विप्रस्य तद्भार्यया स्थूलभद्रस्वामिवचो ज्ञापितम्, तेन पण्डितेन ज्ञातमत्रावश्यं किञ्चिदस्ति । ततः खानितः स्तम्भः, लब्धो निधिः । एवं स्थूलभद्रेण ज्ञानपरीषहो न सोढः, शेषसाधुभिरपीदृशं न कार्यम् ॥ २१ ॥

अथाज्ञानादर्शनेऽपि कश्चित्संशयः स्यादतस्तत्परिषहः कथ्यते -

नत्थि नूणं परे लोए, इड्ढी वावि तवस्सिणो ।
अहवा वंचिओमित्ति, इइ भिक्खू न चिंतए ॥ ४४ ॥

अभू जिणा अत्थि जिणा, अदुवावि भविस्सई ।
मुसं ते एवमाहंसु, इइ भिक्खू न चिंतए ॥ ४५ ॥

नूनमिति सम्भावनायां परलोको नास्ति, परलोके गतः कोऽपि नात्रागत्य वदति, तस्मात्प्रत्यक्षस्याभावान्नास्ति परलोकः, वाऽथवा तपस्विनोऽपि साधोरपि काचिद्ऋद्धिरामर्षौषधि-विप्रुडौषधि-खेलौषधिप्रमुखा काचिन्नास्ति न दृश्यते, अथवा किं बहुना ? अहं वञ्चितोऽस्मि, ऋषिभिष्ठगितोऽस्मीति भिक्षुर्न चिन्तयेन्न विचारयेत् । ते जिनाः केवलिन एवमाहुः-कथयन्ति स्म तन्मृषा-तदसत्यम्, एवं तत् किं ? जिनास्तीर्थकराः केवलिनो वाऽभूवन्, पुनर्जिनाः सन्ति, साम्प्रतं-वर्तमानकाले महाविदेहक्षेत्रादौ सन्ति, अथवाऽग्रे भविष्यन्तीति यदूचुस्तदसत्यम्, प्रत्यक्षमदृश्यमानत्वात् । इति विचारे क्रियमाणेऽसम्यक्त्वसङ्गः स्यात्, तस्मादिति न विचारणीयम्, सम्यक्त्वपरीषहः सोढव्यः ॥ ४४-४५ ॥

---

१ न तं दृष्ट्वा - L. ॥

अत्रार्याषाढसूरिकथा -

वत्साभूम्यामाषाढभूतिसूरयस्तत्र गच्छे यो यः कालं करोति तं तं निर्जरयामासुः, अन्त्यसमये तेषामेवं कथयन्ति युष्माभिः स्वर्गे सुरीभूय मम दर्शनं देयम्, ते च स्वर्गे गच्छन्ति, परमाचार्याणां दर्शनं न ददति । तथा च सूरीणां परलोकशङ्का जायते । एकदैको विनेयः प्रकामं स्वभक्तः समाधिमरणसमये सूरिभिरेवमुक्तस्त्वया स्वर्गे देवीभूयाऽवश्यं मम दर्शनं देयम्, न प्रमाद्यम्, सोऽपि मृत्वा देवो जातः, परं विचित्ररचनानाट्यादिदर्शनेन व्यग्रत्वान्नात्रायातः । तावता सूरिभिरेवं चिन्तितं-नास्त्येव परलोकस्ततः कोऽपि नात्रागच्छति, यदि परलोकः स्यात्तदा मच्छिष्याः कृतप्रतिज्ञा अपि कथं न दर्शनं दद्युः ? ततो मयाद्य यावद् व्रतानि पालितानि, तपांसि तप्तानि, कष्टानि कृतानि, सर्वाण्यप्यनुष्ठानानि मुधा जातानि, मुधा मया भोगास्त्यक्ताः, वञ्चितोऽहमिति मिथ्यात्वं प्रतिपन्नाः, गच्छं मुक्त्वैकाकिन एव लिङ्गमात्रधरा निर्गताः । अत्रान्तरे तेन भक्तशिष्येण देवीभूतेन कियाद्दिनानि यावन्नाट्यादि विलोक्य गुरुप्रेम्णाऽत्रायातम्, मिथ्यात्वं गता गुरवो दृष्टा, तत्प्रतिबोधार्थं कस्यचिद् ग्रामस्य सीम्नि नाट्यं विचक्रे, तत्राचार्याः षण्मासान् यावन्नाट्यं पश्यन्तः क्षुधादिकं नानुभूतवन्तः नाट्यं च देवेन विसृष्टम्, आचार्या अग्रतश्चलिताः । ततस्तेनैव सुरेण तेषामाचार्याणां संयमपरीक्षार्थं षट्कायनामानः षट् दारकाः सर्वालङ्कारविभूषिता विकुर्विताः ।

प्रथमं पृथ्वीकायिकः कुमारस्तेषामाचार्याणां दृष्टौ पतितः, आचार्या आहुः, भो बाल ! भूषणानि ममार्पय । स नार्पयति । तदनु सूरिभिरसौ गले गृहीतः ततश्च भयभ्रान्तो बालः प्राह-प्रभोऽहं पृथिवीकायिकः कुमारः, अस्यां रौद्राटव्यां त्वां शरणं श्रितः, भवादृशानामेवं कर्तुं न युक्तम् । हे स्वामिन् मदुक्तैका कथा श्रूयताम्, तथाहि -

एकः कुलालः खानौ मृदं खनन् मृदाक्रान्तः एवं भणति -

"[1]जेण भिक्खं बलिं देमि, जेण पोसेमि नाइओ ।
सा मे मही अक्कमइ, जायं सरणओ भयं ॥ १ ॥"

[उत्त. निर्युक्तिः गा. १२४]

एतन्न्यायेन शरणागतस्यापि कथमेवं पराभवं करोषि ? सूरिभिरुक्तमतिपण्डितोऽसि बालेत्युक्त्वा तदङ्गाभरणानि गृहीतानि, पात्रे क्षिप्तानि, गतः पृथिवीकायिकः । स्तोकान्तरे गच्छद्भिराचार्यैर्द्वितीयोऽप्कायिकनामा बालको दृष्टः सोऽपि तथैवोवाच, तत्कथिता कथा चेयम् -

एकः पाटलनामा तालाचरः प्रकामं वाग्मी, सोऽन्यदा गङ्गाश्रोतसि प्रविष्टः तेन च ह्रियमाणोऽसौ तटस्थजनेनाऽभाषि, हे पाटल ! प्राज्ञ ! किञ्चित् सूक्तं पठ ? सोऽवादीत्-

---

१ "यया भिक्षां बलिं ददामि, यया पोषयामि ज्ञातिन् । सा मां मही आक्रामति, जातं शरणतो भयम् ॥ १ ॥"

"[१]जेण रोहंति बीआणि, जेण जीवंति कासवा ।
तस्स मज्झे मरिस्सामि, जायं सरणओ भयं ॥ १ ॥"

[उत्त० निर्युक्तिः गा० १२६]

एवमप्कायिककुमारेण कथोक्ता, तथापि तस्याभरणानि तेनाचार्येणातिपण्डितोऽसि हे कुमारेत्युक्त्वा गृहीतानि, सोऽपि तथैव गतः । अग्रेऽग्निकायिकः कुमारस्तस्यापि तथैवोक्ति-प्रत्युक्तिः, तत्कथिता कथा चैषा -

एकस्य तापसस्याऽग्निनोटजो दग्धः स वक्ति -

"[२]जमहं दिवा य राओ य, तप्पेमि महुसप्पिणा [सा]
तेण मे उडओ दड्ढो, जायं सरणओ भयं ॥ १ ॥"

[उत्त० निर्युक्तिः गा० १२७]

अस्मिन्नेवार्थे द्वितीया कथा-कश्चित्पथिकः पथि व्याघ्रभीत्याऽग्निशरणं श्रितः, तेनैव तस्याङ्गं दग्धम्, स प्राह-

"[३]मए वग्घस्स भीएणं, पावओ सरणीकओ ।
तेण दड्ढं मम अंगं, जायं सरणओ भयं ॥ २ ॥"

[उत्त० निर्युक्तिः गा० १२८]

एवं कथाद्वयं कथयतस्तस्य कुमारस्य तेनाचार्येण तथैवोक्त्वाऽऽभरणानि गृहीतानि । अग्रे वायुकुमारो मिलितस्तस्य तथैवोक्तिः, तत्कथिता कथा चेयम् -

एको घननिचितशरीरो वायुजातिः, स चान्यदा वायुभग्नाङ्गो दण्डधारी मार्गे गच्छन् केनाप्युक्तो-हंहो दृढाङ्गः त्वम् कथमीदृग्जातः ? स आह -

"[४]जिट्ठासाढेसु मासेसु, जो सुहो होइ मारुओ ।
तेण मे भज्जए अंगं, जायं सरणओ भयं ॥ १ ॥"

[उत्त० निर्युक्तिः गा० १३०]

एवं कथां कथयतोऽपि तस्य कुमारस्याऽऽभरणानि तेनाचार्येण गृहीतानि । अग्रे च वनस्पतिकायिकः कुमारः, सोऽपि तथैवाख्यत्, तदुक्ता कथा चेयम् -

एकस्मिन् वृक्षे केषाञ्चित्पक्षिणामावासोऽस्ति, तत्र बहूनि तेषामपत्यानि जातानि । अन्यदा वृक्षस्य मूलादुत्थिता वल्ली समन्ताद्वेष्टयन्ती वृक्षशिखरमारूढा । एकदा तामारुह्य-सर्पस्तच्छिखां प्राप्तो नीडस्थानि पक्ष्यपत्यानि भक्षितवान् मातृ-पितृपक्षिभिरुक्तम् -

---

१ "येन रोहन्ति बीजानि, येन जीवन्ति कर्षकाः । [कृषीवलाः]
तस्य मध्ये मरिष्यामि, जातं शरणतो भयम् ॥ २ ॥"

२ "यमहं दिवा च रात्रौ च, तर्पयामि मधुसर्पिषा । तेन ममोटजो दग्धो, जातं शरणतो भयम् ॥ ३ ॥"

३ "मया व्याघ्रात् भीतेन, पावकः शरणीकृतः । तेन दग्धं ममाङ्गं, जातं शरणतो भयम् ॥ ४ ॥"

४ ज्येष्ठा-ऽऽषाढयोर्मासयो र्यः शुभो भवति मारुतः । तेन मम भज्यतेऽङ्गं, जातं शरणतो भयम् ॥ १ ॥

"[1]जाव वुच्छं सुहं वुच्छं, पायवे निरुवद्दवे ।
मूलाओ उट्ठीआ वल्ली, जायं सरणओ भयं ॥ १ ॥"

[उत्त० निर्युक्तिः गा. १३२]

एवमुक्तेऽपि वनस्पतिकायिकस्याभरणानि तेनाचार्येण गृहीतानि । अथ त्रसकायिकः कुमारः कथामाह-

एकस्मिन्नगरे परचक्रागमे पुरं प्रविशतश्चाण्डालानशौचभीत्या जनैर्निष्कास्यमानान् दृष्ट्वा मध्यस्थजनाः केचिदाहुः-

"[2]अब्भितरिआ भीआ, पिल्लंति बाहिरे जणे ।
दिसं भयह मायंगा, जायं सरणओ भयं ॥ १ ॥"

[उत्त० निर्युक्तिः गा. १३३]

त्रसकायिको द्वितीयां कथामाह-एकस्मिन्नगरे राजा स्वयं चौरः, पुरोहितो भाण्डीवहः, तयोरन्यायं दृष्ट्वा लोकाः परस्परं वदन्ति-

"[3]जत्थ राया सयं चोरो, भंडिओ य पुरोहिओ ।
दिसं भयह नागरगा, जायं सरणओ भयं ॥ १ ॥"

[उत्त० निर्युक्तिः गा. १३४]

अथाऽसौ तृतीयां कथामाह -

एकस्मिन् ग्रामे एकस्य ब्राह्मणस्य पुत्री यौवनस्थाऽतीवदर्शनीयास्ति, तस्या पितुर्भोगेच्छाभूत्, परं लज्जातः कस्याप्यग्रे न कथयति, दुर्बलो जातः, पत्न्या दुर्बलत्वकारणं पृष्टम्, स स्वसुताभोगेच्छां प्राह, तया प्रोक्तम्, मा विषीद तवेच्छामहं पूरयिष्यामीत्युक्त्वा मातैकान्ते पुत्रीं प्राह-हे वत्सेऽस्माकं पूर्वं पुत्रीं यक्षा भुञ्जन्ति, पश्चाद्वरस्य दीयते । ततो यक्षः कृष्णचतुर्दश्यां त्वदावासे समायास्यति, त्वया तस्यापमानं न कार्यम्, रात्रौ त्वयोद्योतो न कार्यः ।

एवं मात्रोक्ते सा पुत्री रात्रिप्रस्तावे स्वगृहे सुप्ता, यक्षं साक्षात्पश्यामीति कौतुकेन दीपकः कृतः परं शरावसम्पुटे रक्षितस्तेन तद्गृहान्तरुद्योतो न दृश्यते, रात्रौ तत्र पिता यक्षरूपः प्रविष्टः, तेनेयं भुक्ता, रतक्लान्तश्च तत्रैव सुप्तो निद्राणश्च, अनया च कौतुकेन शरावसम्पुटं दूरीकृत्य दीपोद्योते दृष्टो जनकः, ज्ञातं मातृकपटम्, तया चिन्तितं यद्भवति तद्भवतु, मयानेनैव सह विलासः कार्यः, इति चिन्तयित्वा जागरितेन तेन समं पुनर्भोगान् भुक्त्वा सा सुप्ता सोऽपि सुप्तः द्वावपि निद्राणौ, प्रभातेऽपि न जाग्रतः, प्रातर्ब्राह्मणी तत्रागत्य तौ तथा सुप्तौ दृष्ट्वेमां मागधिकां पठति -

---

१ यावदुषितं सुखमुषितं पादपे निरुपद्रवे । मूलादुत्थिता वल्ली, जातं शरणतो भयम् ॥ १ ॥
२ आभ्यन्तरका भीताः, प्रेरयन्ति बाह्या जनाः । दिशं भजत मातङ्गा, जातं शरणतो भयम् ॥ १ ॥
३ यत्र राजा स्वयं चौरो, भण्डकश्च पुरोहितः । दिशं भजत नागरकाः, जातं शरणतो भयम् ॥ १ ॥

"अइरुग्गइएवि सूरिए, चेइए अ थूभगएवि वायसे ।
भित्तीगए वि आयवे, सहि सुहिए हु जणो न बुज्झइ ॥ १ ॥"

[उत्त० निर्युक्तिः गा. १३५]

अस्या व्याख्या-अचिरोद्गतकेऽपि च सूर्ये, कोऽर्थः ? प्रथमोदिते रवौ चैत्यस्तूपगते च वायसे अनेनोच्चविवस्वतीत्याह, भित्तिगते चातपे, अनेनौच्चतर इत्यर्थः, हे सखि ! सुखितो हुर्वाक्यालङ्कारे, जनो न बुध्यते, न निद्रां जहाति, अनेनात्मनो दुःखितत्वं प्रकटयति, सा हि भर्तृविरहदुःखिता न रात्रौ निद्रां लब्धवतीति मागधिकार्थः । जननीप्रोक्तामिमां मागधिकां श्रुत्वा पुत्री विनिद्रा प्राह -

"तुमेव ह अंब मालवे, मा हु विमाणय जक्खमागयं ।
जक्खो अ न हु एह तायए, अन्नं माय गवेस तातयं ॥ १ ॥"

[उत्त० निर्युक्तिः गा. १३६]

अस्या व्याख्या-त्वमेवाम्ब मातः ! ह इत्यामन्त्रणे अलापीः-उक्तवती शिक्षासमये, यथा 'माहु' त्ति मैव 'विमाणय' त्ति यक्षमागतं विमुखं मा कृथाः, 'जक्खोयति' अयं यक्षः, न त्वयं तातकः-पिता, हे मातरन्यं तातं गवेषयेति मागधिकार्थः ॥ १ ॥ पुनर्माता भणति -

"नव मासह कुच्छि धारिया, जस्सा पस्सपुरीसमद्दियं ।
धुयाए तए मि गेहिओ, हरिओ सरणासरणयं ॥ १ ॥"

[तुला. उत्त० निर्युक्तिः गा. १६७]

अस्या व्याख्या-नवमासान् यावत् या कुक्षौ धारिता, यस्याः प्रश्रवणं पुरीषं च मर्दितम्, 'धुयाए तएत्ति' तया दुहित्रा 'मे' त्ति मम गेहिको-भर्ता हृतश्चौरितस्ततो हेतोः शरणमशरणं मम जातमिति गम्यम् हितं कुर्वत्या ममाहितं जातमिति मागधिकार्थः ॥ १ ॥ यथा तस्याः पुत्र्या मातृ [ता]-पितृभ्यां विनाशः कृतस्तथा मातृ [ता]-पितृतुल्येन भवता मद्विनाशः क्रियमाणोऽस्ति । एवं त्रसकायिकेनोक्तेऽपि स आचार्यो न निवर्तते । अथ त्रसकायिकश्चतुर्थीं कथामाह-

एकस्मिन् ग्रामे एकेन ब्राह्मणेन यज्ञार्थं सरोऽकारि, सरःसमीपे वनमपि च कारितम्, तत्रानेकान् पशुन् जुह्वन् द्विजो मृतस्तत्रैव ग्रामेऽजोऽजनि, स चरणार्थं बहिर्याति, सरो वनं च पश्यति, ततो जातिस्मरणवान् जातः । अन्यदा तत्सुतेन यज्ञः कर्तुमारेभे, तदर्थमसावे-वाजस्तेन सुतेन तत्रैव सरोवरे नीयमानो गाढस्वरेण पूत्कारं कुर्वन् केनचिन्मुनिना सातिशय-ज्ञानेन दृष्टो भणितश्च-

"[१]वियड खणावी तइं छगल, तइआरोविअरुक्ख ।
जन्नपवत्तण तइं कीयओ, काइं बूबू मुरक्ख ॥ १ ॥"

---

१ "तटागिका खानिता त्वया अज, त्वयाऽऽरोपिता वृक्षाः ।
यज्ञ प्रवर्त्तनं त्वया कृतं कथं 'बे बे ति' (ब्रवीषि) मूर्खः ! ॥ १ ॥"

'वियडत्ति' देशीवचनस्तटाकिकेत्यर्थः । यतिप्रणीतामिमां मागधिकां श्रुत्वाऽजो जातिस्मरणधरो मौनवान् जातः, तत्पुत्रेण साधुः पृष्टः कथमसौ मौनी जातः ? साधुः प्राह- अयं त्वत्पिताऽजयागकरणादज एव जातः, तत्पुत्रेणोक्तमत्रार्थेऽभिज्ञानं किं ? साधुः प्राह तव गृहाङ्गणभूनिहितं निधिमसौ पादाग्रेण दर्शयिष्यति । ततस्तथैव तेनाऽजेन कृतम्, पुत्रस्याजस्य च धर्मप्राप्तिर्द्वयोरपि देवलोकगतिर्जाता । एवं तेन ब्राह्मणेन शरणं मे भविष्यतीति कृत्वा तटाकसमीपे यज्ञारामो विहितः, स एवाऽस्य वधस्थानतया भवनेन शरणाद्भयमुत्थितमिति शब्दपदं जातम् । एवं भवन्तोऽपि शरणागतानामस्माकमनर्थकारिणो जाताः । एवमुक्तेऽपि त्रसकायिक-कुमारस्याभरणानि गृहीतानि । एवं षण्णामपि कुमारकाणां पण्डितवादिनो यूयमित्युक्त्वाभरणान्यादायाग्रे चलितः सूरिः । पुनस्तेन देवेन सम्यक्त्वपरीक्षार्थं हारकङ्कणाद्यलङ्कृता साध्व्येका दर्शिता । तां दृष्ट्वा सूरिरेवमाख्यत्, हे प्रवचनोड्डाहकारिके ! दूरतो व्रज, मुखं मा दर्शय, रुष्टया तयोक्तम् -

[1]राइसरिसवमित्ताइं, परच्छिद्दाइं पाससि ।
अप्पणो बिल्लमित्ताइं, अपि छिद्दाइं न पाससि ॥ १ ॥

[उत्त० निर्युक्तिः गा. १४०]

तव पतद्गृहे किमस्तीति तया प्रत्युतोपालब्धस्तथाप्यसौ न प्रतिबुद्धः । अग्रे चलता तेनाचार्येण स्कन्धावारगतो राजा दृष्टः, तेन राज्ञाचार्यो वन्दितः, प्रोक्तं च हे प्रभो ! पात्रकं धर प्रासुकमोदकान् गृहाण ततः स पात्रक्षिप्ताभरणदर्शनभीत्याऽवददहमद्याहारं न करिष्ये, राज्ञा च हठाज्झोलिकातः पात्रं कर्षितम्, आभरणानि दृष्टानि ।

राज्ञोक्तं हे अनार्य ! किं त्वया मत्पुत्रा व्यापादिताः ? इत्यादिवचनैस्तर्जितः स सूरिर्भयभ्रान्तो न किञ्चिद्वक्ति, पश्चान्मायाजालं संहृत्य स शिष्यदेवः प्रकटीभूतः, स्ववृत्तान्तं चाचकथत्, एवं चोपदिष्टवान् हे प्रभो ! यथा त्वया नाट्यं पश्यता षण्मासान् यावत्क्षुत्तृषा न ज्ञाता, एवं देवा अपि दिव्यनाट्यं पश्यन्तो न किञ्चित्स्मरन्ति, नाप्यात्रागमनोत्साहं कुर्वन्ति, यतः सिद्धान्तेऽप्युक्तम्-

*"संकंतदिव्वपेमा, विसयपसत्ताऽसम्मत्तकत्तव्वा ।
अणहीणमणुअकज्जा, नरभवमसुहं न इंति सुरा ॥ १ ॥"

[बृ. सं. २३०]

इत्यादि शिष्यदेववाक्यैः स प्रतिबुद्धः, सिद्धान्तवचनास्थां कृत्वा पुनः संयमे लीनः, पूर्वं तेन दर्शनपरीषहो न सोढः, पश्चात् सोढः ॥ २२ ॥

---

१ "राजिका-सर्षपमात्राणि, परच्छिद्राणि पश्यसि । आत्मनो बिल्वमात्राण्यपि छिद्राणि न पश्यसि ॥ १ ॥"

* "सङ्क्रान्तदिव्यप्रेमाणो, विषयप्रसक्ताऽसमाप्तकर्त्तव्याः ।
अनधीनमनुजकार्याः नरभवमशुभं न यान्ति सुराः ॥ १ ॥"

अथ कस्य कर्मण उदये कः परीषहोदयः स्यादित्याह -

दर्शनमोहनीयोदयाद्दर्शनपरीषहः स्यात्, ज्ञानावरणीयोदये प्रज्ञापरीषहः स्यात्, तस्यैवोदयेऽज्ञानपरीषहोऽपि स्यात्, अन्तरायकर्मोदयेऽलाभपरीषहः स्यात्, चारित्रमोहनीयकर्मोदये आक्रोश १, अरति २, स्त्री ३, नैषेधिकी ४, अचेल ५, याञ्चा ६, सत्काराः ७, एते सप्तपरीषहा उत्पद्यन्ते, शेषा एकादश वेदनीय-कर्मोदये उत्पद्यन्ते ॥ ४५ ॥

अथ सर्वोपसंहारगाथामाह -

एए परीसहा सव्वे, कासवेणं पवेईया ।
जे भिक्खू न विहन्निज्जा, पुट्ठो केणइ कण्हुई ॥ ४६ ॥ त्तिबेमि

एते द्वाविंशतिः सर्वे परीषहाः काश्यपेन श्रीमहावीरेण प्रवेदिताः-प्रकर्षेण ज्ञाताः, यान् ज्ञात्वा भिक्षुः- साधुः केनापि परीषहेण स्पृष्टः सन् कुत्रचित्कस्मिंश्चित्प्रदेशे कस्मिंश्चित्काले वा न विहन्येत संयमान्न पात्येत ॥ ४६ ॥

इदं हि कर्मप्रवादनामाष्टमो हि पूर्वस्तस्य सप्तदशं प्राभृतम्, तस्योद्धारलेशं द्वितीयमध्ययनमुत्तराध्ययनस्य ।

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यश्रीलक्ष्मीवल्लभगणिविरचितायां द्वितीयमध्ययनं सम्पूर्णम् ॥

३. चतुरङ्गीयमध्ययनं

अथ द्वितीयाध्ययनेन सह तृतीयाध्ययनस्य सम्बन्धमाह-किमालम्बनं कृत्वैते परीषहाः सोढव्याः ? इति प्रश्न, उत्तरं चतुरङ्गदुर्लभत्वालम्बनेन सम्बन्धमाह-

चत्तारी परमंगाणि, दुल्लहाणीह जंतुणो ।
माणुसत्तं सुई सद्धा, संयमंमि य वीरियं ॥ १ ॥

एतानि चत्वारि परमाङ्गानि, परमाण्युत्कृष्टानि, अङ्गानि-मोक्षसाधनोपायानि, परमत्वं ह्येतेषां प्राप्तिं विना मुक्तिप्राप्तेरभावात्, कथंभूतानि परमाङ्गानि ? जन्तोर्जीवस्य दुर्लभानि, एतानि कानि ? मनुष्यत्वं-मनुष्यजन्म, पुनः श्रुतिः-धर्मस्य श्रवणम्, पुनः श्रद्धा-धर्मे रुचिः, पुनः 'संजमंमि' संयमे-साध्वाचारपालने वीर्यं-सामर्थ्यं, बलस्य स्फोरणम् ॥ १ ॥ अत्र-

"चुल्लगपासकधण्णे, जूए रयणए य सुमिणचक्के अ ।
चम्मयुगे परमाणू, दस दिट्ठंता मणुअलंभे ॥ १ ॥"

[उप. पद गा. ५]

दशदृष्टान्तवन्मनुष्यत्वं दुर्लभमुक्तं तत्र चोल्लगदृष्टान्तो -

यथा - चोल्लगं-परिपाटीभोजनम्, तदर्थं कथा - काम्पिल्यनगरे ब्रह्मराजा, चुलनी भार्या, तयोः पुत्रो ब्रह्मदत्तः । एकदा मृतः पिता, ब्रह्मपुत्रो बाल इति कृत्वा मित्रद्वयप्रहितो दीर्घपृष्ठनामा राजा तद्राज्यं रक्षति, स चुलन्यामासक्तो जातः, ब्रह्मदत्तेन तयोरनाचारो ज्ञातः, शूलाप्रोतपिष्टमय-कुर्कुट-कुर्कुट्यादिसम्बन्धफलदर्शनेन ताभ्यां स्वानाचारभीताभ्यां कन्या ब्रह्मदत्तस्य परिणायिता, जतुगृहं च कारितम्, तावता धनुमन्त्रिणा तयोः कपटं ज्ञातम्, जतुगृहात्सुरङ्गा खानिता, सुरङ्गाद्वारेऽश्वद्वयं स्थापितम्, स्वपुत्रस्य वरधनुनाम्नस्तत्स्वरूपं ज्ञापितम्, सुरङ्गामार्गश्च दर्शितः । ब्रह्मदत्तस्य वरधनुरनुचरः कृतः, अन्यदा मातृप्रेरितो ब्रह्मदत्तः कन्यासहितो जतुगृहे सुप्तः, वरधनुः प्रत्यासन्न एव सुप्तः, मध्यरात्रौ मात्रा ज्वालितं गृहम्, उत्थितो ब्रह्मदत्तस्तस्य च वरधनुना सुरङ्गामार्गो दर्शितः । ततो निर्गत्य वरधनुमित्रेण सह ब्रह्मदत्तोऽश्वद्वयमधिरुह्य दुरदेशे गतः, । अत्यन्तपथश्रमादश्वद्वयं मृतं पादचारेण मित्रेण सह ब्रह्मदत्तः पृथिव्यां भ्रमति । एकदा दीर्घपृष्ठप्रेषितं सुभटवृन्दं दृष्ट्वा वरधनुः पृथग्गतः, कुमारस्त्वेक एव भ्रमन् केनचिद्विप्रेण दृष्टः, तेन सहाटवीमुत्तीर्णः, पृथग्व्रजन्तं विप्रं प्राह कुमारः, भो ! यदा मम राज्यप्राप्तिः स्यात्तदा त्वयागन्तव्यमिति ।

अथ कुमारो महाराजा जातः, चक्रवर्तिपदवीं प्राप्तः तदानीमागतः स ब्राह्मणः, उपानद्ध्वजप्रयोगेण मिलितः, चक्रवर्तिनोपलक्षितः, कुशलं पृष्टम्, प्रोक्तं च मनोऽभीष्टं मार्गय, स प्राह ब्राह्मणीं पृष्ट्वा मार्गयिष्यामि, गतस्तस्याः समीपम्, कथितवानेवं चक्रवर्ती मम तुष्टोऽस्ति, किं मार्गयामि ? तया विमृष्टम् -

"प्रवर्धमानः पुरुष — स्त्रयाणामुपघातकः ।
पूर्वोपार्जितमित्राणां, दाराणामथ वेश्मनाम्" ॥ १ ॥

इति विमृश्योक्तं किं सन्तापकारिणा बहुपरिग्रहेण ? प्रार्थय भरतक्षेत्रे प्रतिगृहं भोजनं दीनारयुगलं च । ततो विप्र आगत्य तथैव चक्रिणं प्रार्थयामास । चक्री हसित्वोवाच भो किमनया विडम्बनया ? देश-ग्राम-भाण्डारादि प्रार्थय, स तदेव प्रार्थयति नान्यत्किमपीति । चक्रिणा विचारितम् -

"[१]जो जत्तिअस्स अत्थस्स, भायणं तस्स तत्तीअं होइ ।
वुट्ठेवि दोणमेहे, न डुंगरे पाणियं ठाइ" ॥ १ ॥

इति विचिन्त्य प्रतिपन्नं तच्चक्रिणा, प्रथमदिने स्वगृहे सकुटुम्बस्य तस्य भोजनं कारितं दीनारयुगलं च दत्तम् । एवं स ब्राह्मणो भरतक्षेत्रसम्बन्धि-समस्तगृहेषु भोजनं गृहीत्वा पुनश्चक्रिणो गृहे भोजनं कर्तुमायाति किं ? कदाचिद्दिव्यानुभावादायात्यपि, परं मनुष्यावतारादभ्रष्टः पुनर्मनुष्यावतारे नायातुं शक्नोतीति मनुष्यत्वदुर्लभतायां चोल्लग दृष्टान्तः प्रथमः ।

अथ पाशकदृष्टान्तो यथा -

गोल्लदेशे चणकग्रामोऽस्ति, तत्र चणकब्राह्मणः श्राद्धः, एकदा तस्य गृहे साधवः स्थिताः, तदानीं सदंष्ट्रस्तस्य पुत्रो जातः, दर्शितः साधूनाम्, साधुभिरुक्तं सदंष्ट्रत्वेनाऽसौ राजा भविष्यतीति । पित्रा विमृष्टमसौ राजा भूत्वा नरकं गमिष्यतीति भीत्या तस्य दंष्ट्रा घर्षिता, पुनस्तादृशो गुरुणां दर्शितः तैरुक्तमेकपुरुषान्तरितो राजा भविष्यति । तस्य बालस्य चाणिक्य इति नाम दत्तम् । अथाऽसौ वर्धमानश्चतुर्दश विद्यास्थानानि पठितवान् कालान्तरेण परिणीतः । अन्यदा चाणिक्यभार्या भ्रातृविवाहे गता, तत्रान्या अपि सद्व्यपतिकास्तद्भगिन्यो बह्वयः समायाताः, ताश्च मातृ-पितृ-भ्रातृभिर्बहुमानिताः, इयं चोपेक्षितप्राया खिन्नैवमचिन्तयन्मम पत्युर्निर्धनत्वेनैते पित्रादयोऽपि मां न मन्यन्ते, खिन्ना सती सा पश्चादायाता, चाणिक्येन तस्याः खेदस्वरूपं पृष्टम्, पितृगृहे सर्वासां भगिनीनां मानं स्वापमानं चोक्तम् । चाणिक्यश्चिन्तयति -

"[२]अलियंपि जणो धणड्ढयस्स सयणत्तणं पयासेइ ।
परमत्थबंधवेणवि लज्जिज्जइ हिणविहवेण ॥ १ ॥"

तथा

"[३]कज्जविहूणाण नेहो, अत्थविहूणाण गउरवं लोए ।
पडिवन्ने निव्वहणं, कुणंति जे ते जए विरला ॥ २ ॥"

---

१ "यो यावन्मात्रस्यार्थस्य, भाजनं तस्य तावन्मात्रं भवति ।
वृष्टेऽपि द्रोणमेघे, न पर्वते पानीयं तिष्ठति ॥ १ ॥"

२ "अलीकमपि जनो धनाढ्यस्य स्वजनत्वं प्रकाशयति । परमार्थबान्धवेनापि लज्ज्यते हीनविभवेन ॥ १ ॥"

३ कार्यविहीनानां स्नेहो-ऽर्थविहीनानां गौरवं लोके ।
प्रतिपन्ने निर्वहणं, कुर्वन्ति ये ते जगति विरलाः ॥ २ ॥"

इति चिन्तयित्वा द्रव्योपार्जनार्थं नन्दराजाधिष्ठिते पाटलीपुरे गतः ।

तत्सभायां पूर्वदिग्न्यस्ते आसने निषण्णः, तत्र नन्देन समं कश्चित्रैमित्तिकस्तत्रायातः, तेनोक्तमेष ब्राह्मणो नन्दवंशस्य छायामतिक्रम्य स्थितोऽस्तीति; तद्वाक्यश्रवणाद् भृत्यैरुत्थापितो द्वितीये आसने उपविष्टः प्रथमे करवर्तीं स्थापयति, तृतीये दण्डकम्, चतुर्थे जपमालाम्, पञ्चमे यज्ञोपवीतमेवं चेष्टां कुर्वन्नसौ नन्दभृत्यैः शठ इति कृत्वा यष्ट्यादिभिराच्छोटितो द्वेषमापन्नस्तदानीमेवमुवाच-

"कोशेन भृत्यैश्च निबद्धमूलं, पुत्रैश्च [1]मित्रैश्च विवृद्धशाखम् ।
उत्पाट्य नन्दं परिवर्तयामि, महाद्रुमं वायुरिवोग्रवेगः ॥ १ ॥"

ततो बिम्बान्तरितो राजा भविष्यामीति स साधुवचः स्मरन् भाग्यवन्तं पुरुषं विलोकयन् मेदिन्यां भ्रमति । अन्यदा नन्दस्य मयूरपालकाणां ग्रामे गतः परिव्राजकवेषेण चाणिक्यः, तत्र मयूरपालकवृद्धस्य गर्भिण्याः स्त्रियश्चन्द्रपानदोहदो जातः । तया पित्रादीनामुक्तम्, पित्रादिभिर्गृहागतस्य चाणिक्यस्योक्तम्, चाणिक्येनोक्तमहं बुद्ध्या दोहदमस्याः पूरयिष्यामि, यद्यस्याः पुत्रमष्टवार्षिकं मे ददत ? तैस्तथेतिप्रतिपन्नम्, चाणिक्येन सा सच्छिद्रमण्डपे शायिता, तन्मुखाभिमुखोच्चैस्तरप्रदेशे शर्करामिश्रदुग्धभृतस्थालप्रयोगो विहितः तद्विन्दवस्तस्या मुखे पतिताः ।

ततस्तद्दोहदपूर्तिर्जाता, कालक्रमेण पुत्रो जातस्तस्य चन्द्रगुप्त इति नाम दत्तम्, यावच्चन्द्रगुप्तस्तत्र वर्धते, तावच्चाणिक्योऽपि देशान्तरे धातुवादादिकं शिक्षित्वा पुनस्तत्रागतः । स चन्द्रगुप्तो दारकैः समं राजनीत्या क्रीडां कुर्वन् दृष्टः, तत्र समागत्य स बालश्चाणिक्येन याचितः, बालकेनोक्तं मां गृहाण, चाणिक्येनोक्तं गोस्वामी त्वां ताडयिष्यति, तेनोक्तं वीरभोग्या वसुन्धरा । चाणिक्येन ज्ञातमयं महानुदारचरित इति ज्ञात्वा कस्यचित्प्रत्यासन्नपुरुषस्य पृष्टमयं कस्य सुतः ? तेन मातुर्दोहदपूरकं चाणिक्यमुपलक्ष्य तव पुत्रोऽयमित्युक्तम्, चाणिक्य उवाच हे बाल ! त्वं चल मया समं त्वामहं राजानं करोमि, चलितश्चाणिक्येन समं बालः, परदेशशिक्षितधातुवाददव्यबलेन लोको घनो मेलितः, गत्वा पाटलीपुरं रुद्धम्, नन्दो बहिर्निर्गत्य तेन समं युद्धं चकार, भग्नश्चाणिक्यः, मेलितो लोकः सर्वोऽपीतस्ततो जगाम, चन्द्रगुप्तं लात्वा चाणिक्यो नष्टः ।

नन्दपुरुषा अश्वारूढास्तं विलोकयन्ति एते त्वागताः, अहं तु सबालः पादचारी, अश्वारूढानामेतेषां पुरः क्व यास्यामीति ध्यात्वा सरस्तीरस्थितं रजकं दृष्ट्वा चाणिक्यः प्राह-भो रजक ! मारणाय नन्दभट्टाः समायान्ति, तद्वचः श्रुत्वा रजको नष्टः, चाणिक्यः स्वयं रजको जातः । चन्द्रगुप्तस्तु सरसि प्रवेशितः, एको नन्दाश्ववारस्तत्रायातः, तेन पृष्टम्, भो रजक ! चन्द्रगुप्तः क्व गतः इति ? रजकः प्राह-अस्मिन् सरसि प्रविष्टः, अश्ववारेण स्वघोटकस्तस्यार्पितः, खड्गमपि तस्यार्पितम् स्वयं तु सरःप्रवेशाय यावत्सज्जो भवति,

१ दारैश्च-उप. पद १३९ वृत्त्यां प. १०९ B ॥

तावता तेनैव खड्गेन स चाणिक्येन द्विधा कृतः । पश्चात्सरसो निष्कासितश्चाणिक्येन चन्द्रगुप्तः, अश्वमधिरोहितः पथि गच्छता चाणिक्येन चन्द्रगुप्तः पृष्टो-भो यस्यां वेलायां त्वं मयाश्ववारस्य दर्शितस्तदा तव मनसि किमभूत् ? चन्द्रगुप्तेनोक्तं मयैवं ज्ञातं मम हितायैव भवताहं दर्शितः । चाणिक्येन ज्ञातं योग्योऽयमेव, पश्चाच्चन्द्रगुप्तः क्षुधार्तो जातः, ततश्चाणिक्येन क्वापि स्थाने सद्यो भुक्तस्य बटुकस्य जठरं द्विधाकृत्य दधिकूरं गृहीतम्, भोजितश्चन्द्रगुप्तः । ततो ग्रामे ग्रामे भिक्षां कुर्वंश्चाणिक्यो भ्रमति । एकदा कस्मिंश्चिद् ग्रामे चाणिक्य एकस्या वृद्धाया गृहे भिक्षार्थं गतः । तत्र तया बालकानां भोजनाय भाजने क्षौरेयी क्षिप्ता, एकेन बालेन मध्ये हस्तः क्षिप्तः, दग्धः स रोदिति, तयोक्तं - रे मूढ ! त्वमपि चाणिक्यवन्न जानासि, चाणिक्येनोक्तं हे मातश्चाणिक्यः कस्मान्मूढः ? तयोक्तं पूर्वं पार्श्वानि गृह्यन्ते ततो मध्ये हस्तः पात्यते भोजने राज्यग्रहणे च ।

तत् श्रुत्वा गतश्चाणिक्यो हिमवत्पार्श्वे, तत्र पर्वतनामा परिव्राजको राजा, तेन सह मैत्री कृता चाणिक्येन, तस्य प्रस्तावे उक्तम्, नन्दराज्यं लात्वार्धमर्धं त्वया चन्द्रगुप्तेन च भुज्यते, प्रतिपन्नं परिव्राजकराजेन । ततः सैन्येन सह द्वावपि चलितौ, मार्गस्थग्रामनगराणि स्वायत्तीकुरुतः, एकदा मार्गे महदेकं नगरमागतम्, तद् गृहीतुं न शक्यते, परिव्राजकवेषेण चाणिक्यो नगरमध्ये प्रविष्टः, तदन्तर्देवदेवीमूर्तयः सप्रभावा दृष्टाः, विचित्रया मायया पौरान् विप्रतार्य ताः सर्वा दूरीकृताः, ततो नगरं गृहीतम् । क्रमेण ससैन्यौ तौ पाटलीपुत्र-परिसरे गतौ, रुद्धं तन्नगरम्, नन्दो धर्मद्वारेण निर्गममार्गयत्, ताभ्यामुक्तमेकरथे यावन्माति तावत्प्रमाणं वित्त-दारा-सुतादिकं लात्वा निर्गच्छ, नन्देन तथैव कृतम् । एका नन्दपुत्री रथस्थिता निर्गच्छन्ती पुनः पुनश्चन्द्रगुप्तं पश्यति, नन्देन भणितं याहीति । सा रथादुत्तीर्य चन्द्रगुप्तरथे गत्वा यावदारोहति तावत्तद्रथे नवारका भग्नाः, अमङ्गलमिति ज्ञात्वा चन्द्रगुप्तेन सा निषिद्धा, चाणिक्येनोक्तमिमां मा निवारय, नवपुरुषयुगानि यावत्तव वंशो भावीति, प्रतिपन्नं तेन ।

अथ परिव्राजकराज-चन्द्रगुप्त-चाणिक्याः, पाटलिपुरमध्ये प्रविष्टाः, गता राजगृहे, राज्यं द्विधा विभज्य गृहीतम्, तत्रैका विषकन्याऽस्ति, तां दृष्ट्वा परिव्राजकराजः काम-विह्वलो जातः, चाणिक्येन सा तस्यैव दत्ता, तस्याः प्रथमपरिष्वङ्गेनैव स विषार्त्तो जातः, यावता चन्द्रगुप्तो विषप्रतिकारं करोति तावता चाणिक्येन भृकुटिः कृता, कर्णे चेमं श्लोकं पठितवान् -

"तुल्यार्थं तुल्यसामर्थ्यं, मर्मज्ञं व्यवसायिनम् ।
अर्धराज्यहरं मित्रं, यो न हन्यात्स हन्यते ॥ १ ॥"

ततश्चन्द्रगुप्तस्तत्प्रतीकाराद् दूरीभूतः परिव्राजकराजस्तु मृतः । ततश्चन्द्रगुप्तः सम्पूर्णं राज्यं करोति, परं नन्दमनुष्याश्चौर्येण देशोपद्रवं कुर्वन्ति । एकदा चाणिक्यश्चौरदमनोपायं चिन्तयन्नगराद्बहिर्गतः तत्र नलदामकुविन्दः स्वपुत्रं मत्कोटकैरुच्चाटितं दृष्ट्वा कोपात्तेषां

बिलं खनित्वा प्रज्ज्वालयन् दृष्टः । चाणिक्येन चिन्तितं योग्योऽयमिति तस्यैव तलारत्वं दत्तम्, पश्चात्स चौरनिग्रहं करोति, प्रत्युत किञ्चिदुपकारादि न करोति, तेन सर्वेऽपि चौराः प्रकटीकृता व्यापादिताश्च, जातं निष्कण्टकं राज्यम् ।

अथ कोशार्थं चाणिक्य उपायं करोति, एकदा पाटलिपुत्रसम्बन्धिनो व्यवहारिणो भोजनार्थमाकारिताः, भोजनान्ते तेषां चन्द्रहासमदिरा दत्ता, ते विह्वलीभूतास्तावता चाणिक्यः समुत्थाय नृत्यन्नेवं पठति -

"[1]दो मज्झ धाउरत्ताइं, कंचणमयकुंडिआ तिदंडं च ।
रायावि अ मे वसवत्ती, इत्थ वि ता मे होलं वाएहि ॥ १ ॥"

इदं श्रुत्वाऽपरः कश्चित्समुत्थायाजन्मतोऽपि यत्र प्रकटितं तद्वदति, इतः सहस्रयोजने हस्तिपददेशे टङ्ककानां लक्षमस्ति, अत्रार्थे ममापि *होलं वादय, अपरः पठति मया तिलाढक उप्तोऽस्ति, ततो मम ते तिला बहुलक्षाणां निष्पत्स्यन्ते, अत्रार्थे ममापि होलं वादय, अन्यः पठति तावन्त्यो मे गावः सन्ति, यासां नवनीतेन महागिरिनदीप्रवाहो रुद्ध्यते । अपरः प्राह तावन्त्यो मे वडवाः सन्ति, यासामेकदिनजातैः किशोरपुच्छकेशैः पाटलिपुरनभोमण्डलं छादयामि, अन्यः प्राह तादृशा मे शालयः सन्ति, यद्बीजैः प्रत्यहं शालयो नवीना भवन्ति, अत्रार्थे ममापि होलं वादय, एवं सर्वेषां वित्तमर्यादां श्रुत्वा चाणिक्येन यथायोग्यं वित्तं गृहीतम् ।

अथ चाणिक्यः सुवर्णोपार्जनोपायं चिन्तयन् देवमाराध, तुष्टेन देवेन तस्य जयिनः पाशका दत्ताः । चाणिक्येन तैः पाशकैः कश्चिन्नरः शिक्षितो द्यूतार्थं प्रेरितः, स गृहीतसुवर्ण-टङ्ककस्थालः पुराभ्यन्तरे भ्रमन्नेवं वक्ति, अहं यदि जयामि तदा सुवर्णटङ्ककमेकं गृह्णामि, मां यद्यन्यो जयति तदा तस्य सुवर्णटङ्ककस्थालमिदं ददामीति श्रुत्वा बहवो जनास्तेन समं द्यूतक्रीडां कुर्वन्ति, परं हारिता इव जना न किञ्चिदाप्नुवन्ति, स तु सर्वत्र जयति । एवं पाशकयु-क्तस्य तत्पुरुषस्य पराजयो दुर्लभस्तथा मनुष्यत्वप्राप्तिर्दुर्लभेति पाशकदृष्टान्तः । (२)

'धन्नेत्ति' भरतसत्कानि सर्वाण्यपि धान्यान्येकत्र सम्मील्य मध्ये सर्षपप्रस्थप्रक्षेपः केनचिद्देवेनाभिधीयते, तत्सर्वमेकीकृत्य कस्याश्चिदतिवृद्धाया दीयते, तस्या यथा सर्वधा-न्यानां प्रत्येकं पृथक्करणं दुष्करम्, तथा मनुष्यत्वमपि दुर्लभम् । (३)

'जूएत्ति' एको राजा तस्याष्टोत्तरशतस्तम्भालङ्कृता सभाऽस्ति, स्तम्भे स्तम्भे च १०८ कोणाः सन्ति । एकदा तस्य राज्ञः पुत्रो राजानं मारयित्वा स्वयं भोक्तुमीहते, तस्याध्यवसायो मन्त्रिणा ज्ञातः, कथितश्च राज्ञे, राज्ञापि पुत्रायोक्तं हे पुत्र ! योऽस्माकमनुक्रमं न सहते, स द्यूतं खेलयति, यदि जयति तदा तस्य राज्यं दीयते । द्यूतक्रीडनविधिरयं वर्तते,

---

१ "द्वे मम धातुरक्तके, काञ्चनमयकुण्डिका (कमण्डलु) - त्रिदण्डं च ।
राजा अपि मम वशवर्ती, अत्राऽपि तस्मान्मम होलं वादय ॥ १ ॥"
अत्र तुलनार्थं - उपदेशपदे चाणिक्यद्वारे गा. १३९ वृत्यां श्लोक ९३ तः द्रष्टव्यः ॥

* वाद्य विशेषं

कुमारस्यैकवारं दायो भवति, राज्ञो यथेच्छदाया भवन्ति । एवमष्टोत्तरशतस्तम्भानामेकैकं कोणमष्टोत्तरशतवारं जयति, तदा तस्य राज्यं दीयते, त्वमप्येवं कुर्विति राज्ञोक्तं कुमारस्य, यथास्य कुमारस्यैतत्करणं दुष्करम्, तथा मनुष्यत्वमपि दुर्लभम् । (४)

'रयणत्ति' एकस्मिन्नगरे कस्यचिद्व्यवहारिणो नानारत्नानि सन्ति, स लोभान्न व्यापारयति, अन्यदा पितरि देशान्तरं गते पुत्रैः कोटिध्वजत्वार्थं दूरदेशान्तरीयपुरुषाणां हस्ते तानि दत्तानि, जाताः पुत्राः कोटिध्वजाः, कियता कालेन पिता गृहमागतः, ज्ञातवान् रत्नविक्रीणनम्, रोषं विधाय पुत्रानेवमूचे मम रत्नानि पश्चाद्दापयन्तु । यथा तत् पश्चाद्दालनं दुष्करम्, तथा मनुष्यत्वमपि दुर्लभम् । (५)

'सुविणेत्ति' पाटलिपुरात्कलाकुशलो मूलदेवो राजपुत्रो द्यूतव्यसनात्पित्रा पराभूतो निर्गतो गुटिकाकृतवामनरूप उज्जयिनीं गतः, तत्र तादृशा रूपेणैव तेन वीणाकला जनानां दर्शिता, विस्मिता जनाः, वीणाकलावार्ता सर्वत्र प्रसृता, श्रुता च देवदत्तया वेश्यया, ततस्तया तस्याकारणाय चेटी प्रहिता, तया चागत्यैवमुक्तं भो वामन ! त्वां मत्स्वामिन्याकारयति तेनोक्तम् -

"या विचित्रविटकोटिनिधृष्टा, मद्यमांसनिरतातिनिकृष्टा ।
कोमल वचसि चेतसि दुष्टा, तां भजन्ति गणिकां न विशिष्टाः" ॥ १ ॥

वामनेनैवमुक्तेऽपि तया चेट्या विचित्रैः सामवचनैर्गृहमानीतः, देवदत्तया च तेन समं वीणावादो विहितः, वामनेन वीणाकलादिभिर्देवदत्ता जिता, पादयोर्निपत्यैवमूचे-भो पुरुष ! स्वरूपं प्रकटय, अनया कलया ज्ञायते त्वमीदृग् वामनरूपवान्नासि, मूलरूपं ते पृथग्भविष्यतीति तव रूपं प्रकटय, वामनेन वेश्यावचरञ्जितेन स्वरूपं प्रकटितम्, सापि भृशं तद्रूपचमत्कृता प्रकाममागृह्य स्वगृहे तं स्वभोगासक्तं चकार, अतीव तत्प्रीतिपात्रं बभूव । अन्यदा पूर्वं तस्यामासक्तवान् व्यवहारिपुत्रोऽचलनामा गृहे समायातः, अक्कयोक्तं वत्से ! इभ्यपुत्रं भज, मुञ्चैनं निःस्वं मूलदेवम् तयोक्तं मूलदेवो गुणवानयमचलो निर्गुणः, अक्कयोक्तमुभयोः परीक्षा क्रियते, ताभ्यामुभयोः पार्श्वे ईक्षव आनायिताः, मूलदेवेन निस्त्वचः कर्पूरवासिताः सुसंस्कृता आनीताः, अचलेन शकटं भृत्वेक्षव आनीताः, तथाप्यक्कावचसेभ्यपुत्रेण पराभूतो मूलदेवो बेन्नातटं प्रस्थितः, अटव्यां गच्छतो मूलदेवस्योपवासत्रयं जातम् ।

चतुर्थदिवसे क्वापि ग्रामे भिक्षायां राद्धा माषा लब्धाः, मूलदेवेन तद्भक्षणार्थं सरसि गच्छता कश्चिन्महातपस्वी दृष्टः, तदभिमुखं गत्वा निस्तारय मां विस्तारय पात्रं द्रव्यादिशुद्धानिमान् माषान् गृहाणेत्युक्त्वा ते माषास्तस्मै दत्ताः, तदा तत्साहससन्तुष्टा देवी गगनमार्गेऽवदद्धोः पथिक ! मार्गय यथेच्छं पदद्वयेन, ततो मूलदेवोऽवदत्-

"*[१]धन्नाणं खु नराणं, कुम्मासा हुं ति साहुपारणए।
गणिअं च देवदत्तं, रज्जं सहस्सं च हत्थीणं" ॥ १ ॥

तया चोक्तं द्वयमपि ते सद्यः सम्भविष्यति, तस्यामेव रात्रौ देवकुट्यां मूलदेवेन सुप्तेन स्ववदनप्रविष्टश्चन्द्रः स्वप्ने दृष्टः, तदानीमेव तत्रैव सुप्तेनैकेन कार्पटिकेन तादृश एव स्वप्नो दृष्टः। मूलदेवः स्वस्त्रस्तरादुत्थितो यावत्स्वप्नं विचारयति, तावत्सोऽपि स्वस्त्रस्तरादुत्थाय स्वगुरोः पुरस्तं स्वप्नमाचख्यौ, गुरुरपि त्वमद्य घृतगुडसहितमण्डकं प्राप्स्यसीति बभाषे, मूलदेवस्तत उत्थाय नगरान्तः स्वप्नपाठकगृहे गत्वा घनं विनयं कृत्वा स्वप्नपाठकाय स्वस्वप्नमाचख्यौ, तेनोक्तं सप्तमदिवसे तव राज्यं भविष्यतीत्युक्त्वा स्वपुत्री तेन मूलदेवाय परिणायिता। अपुत्रस्तन्नगरस्वामी मृतः, पञ्चदिव्यैर्मूलदेवस्य राज्यं दत्तम्, देवदत्तां च गणिकां तत्रानाय्य मूलदेवराजा स्वराज्ञीं चकार। अन्यदा तत्र व्यापारार्थमागतोऽचलव्यवहारी, राज्ञा मूलदेवेनोपलक्षितः, शुल्कमिषेण भृशं पराभूतः, स्वतेजो मूलदेवेन दर्शितम्, अचलः स्वापराधं क्षमयामास, राज्ञीवचसा मूलदेवेन मुक्तः। अथ स कार्पटिकः स्वस्वप्नानुसारिस्वप्नदर्शिनं मूलदेवकुमारं राजानं जातं श्रुत्वा पुनस्तादृशस्वप्नार्थी तस्यामेव देवकुट्यां सुप्तः, परं तादृशं स्वप्नं न प्राप। एवं यथाऽस्य कार्पटिकस्य तादृशस्वप्नप्राप्तिदुष्प्राप्या, तथा मनुष्यत्वाद्भ्रष्टस्य जीवस्य मनुष्यत्वप्राप्तिदुष्प्रापेति। (६)

'चक्केत्ति' इन्द्रपुरे इन्द्रदत्तराजा, तस्य २२ पुत्राः। अन्यदा तेन राज्ञैका मन्त्रिपुत्र्यूढा, सा वणिक्पुत्रीति परिणीयोपेक्षिता, कदापि न भुक्ता। एकदा सा ऋतुस्नानं कुर्वती राजा दृष्टा, पृष्टं च सेवकानां कस्येयं पत्नी, तैरुक्तं युष्माकं पत्नी मन्त्रिपुत्री, राज्ञा तदावासे गत्वा सा भुक्ता, तस्याः पुत्रो जातः, स राजसदृश एव, यत उक्तम्-

'ऋतुस्नानसमये यं पश्यति नारी तत्सदृशं जनयति गर्भमिति।'

तया स्वपितुर्मन्त्रिणो राजभोगसम्भवगर्भप्रस्तावः प्रोक्तः, मन्त्रिणा तु तद्दिनं राजोल्लापाभिज्ञानादिकं स्ववहिकायां लिखितम्, तस्याः पुत्रो जातः, क्रमाद् वृद्धिं गतः, स मन्त्रिणैव पालितः कदापि राज्ञो नैव दर्शितः, मन्त्रिणा कलाचार्यपार्श्वे ७२ कलाः पाठिताः, २२ पुत्रास्त्वविनीता न पठन्ति।

अथ मथुरायां पुरि जितशत्रुपुत्री निवृत्तिनाम्नी कृतराधावेधवरप्रतिज्ञा स्वयंवरमण्डपे तिष्ठति, तत्र २२ पुत्रपरिकरित इन्द्रदत्तराजा गतः, मन्त्र्यपि स्वपुत्रीपुत्रं सार्धं लात्वा तेनैव सह तत्र गतः, अनेकदेशायातराजपुत्रेषूपविष्टेषु सत्स्विन्द्रदत्तराज्ञा २२ स्वपुत्रा राधावेधसाधनायोत्थापितास्तैर्यथाक्रमं बाणावली मुक्ता, परं नैकेनापि राधावेधः साधितः, बाणपात इतस्ततो बभूव, सर्वेऽप्यन्ये राजपुत्रा परस्परं दत्ततालाः हसिताः, इन्द्रदत्तस्य राज्ञो महान् खेदो जातः।

---

* "धन्यानां खलु नराणां, कुल्माषा भवन्ति साधुपारणके।
गणिकां च देवदत्तां, राज्यं सहस्रं च हस्तिनाम् ॥ १ ॥"

१ "धण्णाणं खु नराणं कुम्मासा हुंति साहुपारणए। इय भणइ मूलदेवो जा परितुट्ठो तओ गयणे ॥६१॥ मुणिभत्तदेवयाए मग्ग वरं पभणिओ वरेइ तओ। गणियं च देवदत्तं दंतिसहस्सं च रज्जं च ॥ ६२ ॥"
उपदेशपद गा. ११ वृत्यां प. २६ A ॥

मन्त्रिणोक्तं राजन् ! कथं खेदो विधीयते ? मत्पुत्रीजातस्त्वत्पुत्रो वर्तते, सोऽवश्यं राधावेधं साधयिष्यतीति प्रोच्य राज्ञः पुरः स पुत्र आनीतः, वहिकालिखितं साभिज्ञानम्; तद्दिनवर्णा दर्शिताः, तेन पुत्रेण स्वपितरं राजानं प्रणम्य राधावेधस्थानेऽधस्तैलभृतकटाहिकासङ्क्रान्तोर्द्ध्वभ्रमच्चक्रारपुत्रिकामध्यस्थित - पूत्रिकानिवेशितदृष्टिरधोवदनेनोर्द्ध्वबाहुनोर्द्ध्वस्था पुत्तलिकैकेनैव बाणेन विद्धा, साधितो राधावेधः, कन्या च परिणीता, पितुः परमो हर्षो बभूव । २२ पुत्राणां महाविषादः समभूत् । अथ यथा राधावेध-चक्रं दुर्भेद्यम्, तथा मनुष्यत्वमपि दुष्प्राप्यमिति । (७)

'चम्मेत्ति' कच्छपस्तदुदाहरणं यथा-एको द्रहः सहस्रयोजनप्रमाणः सर्वत्र शैवालव्याप्तः, क्वापि स्थाने एकं छिद्रं कच्छपग्रीवाप्रमाणम्, एकेन कच्छपेन ग्रीवा प्रसारिता, दृष्टं सचन्द्रनक्षत्रचक्रम्, दृष्ट्वा स स्वकुटुम्बाकारणाय मध्ये प्रविष्टः, स्वकुटुम्ब-सहित इतस्ततस्तच्छिद्रं गवेषयति, परं न पश्यति, यथा तस्य तच्छिद्रं दुष्प्राप्यम्, तथा मनुष्यत्वमपि दुष्प्रापमिति । (८)

'जुगेत्ति' युगसमिलादृष्टान्तस्तथाहि-केनचिद्देवेन युगं समुद्रस्य पूर्वान्ते मुक्तम्, तच्छिद्रान्निष्कास्य समिला समुद्रस्य पश्चिमान्ते मुक्ता, सा समिला सागरसलिलेनेतस्ततः प्रेर्यमाणा कदाचिद्दैवयोगेन पुनस्तच्छिद्रं प्रविशेन्न पुनर्मनुष्यजन्म लभेतेति । (९)

'परमाणुत्ति' केनचिद्देवेन कश्चित्स्तम्भश्चूर्णीकृतः, तस्य परमाणवो नलिकायां भृताः, सा नलिका तेनैव देवेन मेरुमारुह्य फूत्कृता, उड्डीताश्चेतस्ततस्तत्परमाणवः, तानेकत्र संमील्य पुनस्तत्स्तम्भस्य करणं यथा दुष्करम्, तथेदं मनुष्यत्वं भ्रष्टं सत्पुनरपि प्राप्तुं दुष्करमिति दश दृष्टान्ताः ।

समावण्णा णं संसारे, नाणागोत्तासु जाइसु ।
कम्मा नाणाविहा कट्टु, पुढो विस्संभिया पया ॥ २ ॥

संसारे समापन्नाः, अत्र 'णं' शब्दो वाक्यालङ्कारे, प्राप्ताः प्रजा-जन्तुसमूहा विश्वभृतो भवन्ति, जगत्पुरका भवन्ति, किं कृत्वा ? नानाविधासु पृथग्जातिष्वेकेन्द्रियादिषु नानाविधानि कर्माणि कृत्वा, कीदृशीषु जातिषु ? नानागोत्रासु नाना-बहुप्रकारेण गोत्रं नाम यासां ता नानागोत्रास्तासु नानागोत्रासु, बह्वभिधानासु ॥ २ ॥

एगया देवलोएसु, नरएसु वि एगया ।
एगया आसुरं कायं, आहाकम्मेहिं गच्छई ॥ ३ ॥

एकदैकस्मिन् काले देवलोकेषु देव उत्पद्यते, पुनः स एव जीव एकदा नरकेषु नारक उत्पद्यते, एकदा आसुरं कायम्-असुरकुमारभावं प्राप्नोति । एवं जीवो यथाकर्मभिर्गच्छति, यस्मिन् समये जीवो यादृशानि-यादृग्गति दायकानि कर्माणि बध्नाति तादृशीं गतिं जीवो व्रजतीत्यर्थः ॥ ३ ॥

एगया खत्तिओ होइ, तओ चंडाल बोक्कसो ।
तओ कीडपयंगो य, तओ कुंथु पिवीलिआ ॥ ४ ॥

जीव एकदा क्षत्रियो भवति, ततोऽनन्तरं स जीवश्चाण्डालो भवति, ततश्च बोक्कसोऽपि जीवो भवति, यस्य शूद्रः पिता भवति माता च ब्राह्मणी भवति, तत्पुत्रो बोक्कस उच्यते, ततस्तत्र जातौ धर्मस्य दुर्लभत्वात्कीटो भवति, च पुनः पतङ्गो भवति, ततश्च कुन्थुर्भवति, पिपीलिका-कीटिका भवति, ग्रन्थान्तरे एतेऽपि जातिकुलभेदा उक्ताः सन्ति, यस्य ब्राह्मणः पिता शूद्री माता भवति स निषाद उच्यते, यस्य ब्राह्मणः पिता वैश्या माता भवति स चाम्बोष्ट उच्यते, यस्य च निषादः पिताम्बुष्टा च माता भवति स बोक्कस इत्युच्यते ॥ ४ ॥

एवमावट्टजोणीसु, पाणिणो कम्मकिव्विसा ।
न निव्विज्जंति संसारे, सव्वट्ठेसु व खत्तिया ॥ ५ ॥

प्राणिनो-जीवाः संसारे, एवममुना प्रकारेणावर्तयोनिषु न निर्विजन्ते-नोद्विजन्ते-नोद्विग्ना भवन्ति, आवर्तेन-पुनः पुनः परिभ्रमणेन स्पृष्टा योनय आवर्तयोनयस्तेषु चतुरशीतिलक्षप्रकारेषु, कीदृशाः प्राणिनः ? कर्मकिल्बिषाः, कर्मभिः किल्बिषा मलिना अधमा वा, केषु के इव नोद्विजन्ते ? सर्वार्थेषु क्षत्रिया इव, सर्वे च तेऽर्थाश्च सर्वार्थास्तेषु धन-कनक-भूमि-वनिता-गजा-ऽश्वादि-पदार्थेषु क्षत्रिया राजान इव, तथा प्राणिनोऽपीत्यर्थः ॥ ५ ॥

कम्मसंगेहि संमूढा, दुक्खिया बहुवेयणा ।
अमाणुसासु जोणीसु, विणिहम्मंति पाणिणो ॥ ६ ॥

प्राणिनो-जीवा अमानुषीषु योनिषु-मनुष्यवर्जितयोनिषु 'विणिहम्मंति' विशेषेण निहन्यन्ते-विशेषेण निपात्यन्ते, अर्थादेकेन्द्रिय-द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रियेषु वारंवारमुत्पद्यन्त इत्यर्थः, कीदृशाः प्राणिनः ? कर्मसङ्गैः-कर्मसंयोगैः संमूढाः- संव्याप्ताः, पुनः कीदृशाः ? दुःखिताः, पुनः कीदृशाः ? बहुवेदनाः ॥ ६ ॥

कम्माणं तु पहाणीए, आणुपुव्वी कयाइ ओ ।
जीवा सोहिमणुप्पत्ता, आययंति मणुस्सयं ॥ ७ ॥

तु पुनर्जीवाः शोधिं दुष्टकर्मनाशस्वरूपां लघुकर्मतामनुप्राप्ताः सन्तो मनुष्यत्वमाददते -नृजन्म प्राप्नुवन्तीत्यर्थः, कयानुपूर्व्या-अनुक्रमेणशनैः शनैः कदाचित्कर्मणां मनुष्यगति-विघ्नकराणां प्रकर्षेण हानिः प्रहानिस्तया प्रहाण्या-प्रकर्षेण हीनतया ॥ ७ ॥

माणुस्सं विग्गहं लद्धा, सुई धम्मस्स दुल्लहा ।
जं सुच्चा पडिवज्जंति, तव खंतिमहिंसयं ॥ ८ ॥

मानुष्यं विग्रहं लब्ध्वा-मानुष्यं शरीरं प्राप्य तस्य धर्मस्य श्रुतिर्दुर्लभा, धर्मश्रवणं दुष्प्राप्यमित्यर्थः, यं धर्मं श्रुत्वा जीवास्तप उपवासादिकं क्षान्तिं क्षमामहिंस्रतां-सदयत्वं प्रतिपद्यन्तेऽङ्गीकुर्वन्ति, यस्य धर्मस्य श्रवणाज्जीवास्तपस्विनो भवन्ति, क्षमावन्तो भवन्ति, दयालवश्च भवन्तीत्युक्तेन बौद्धादीनां धर्मनिषेधः कृतः ॥ ८ ॥

आहच्च सवणं लद्धुं, सद्धा परमदुल्लहा ।
सुच्चा नेयाउअं मग्गं, बहवे परिभस्सई ॥ ९ ॥

'आहच्चेति' कदाचित् श्रवणं-धर्मश्रवणं लब्धं प्राप्तम्, तदा धर्मश्रवणं लब्ध्वापि श्रद्धा-धर्मे रुचिः परमदुर्लभात्यन्तदुष्प्राप्या, श्रद्धाया दुर्लभे हेतुमाह-बहवो मनुष्या नैयायिकम्, न्यायमार्गं जैनमार्गं श्रुत्वा परिभ्रस्यन्ति, न्यायमार्गात्स्खलन्ते, न्याये पञ्चसमवायकारणे भवं नैयायिकम्, पञ्चसमवायकारणवादकं जैनं दर्शनम् ॥ ९ ॥

अत्र निह्नवानां दृष्टान्ताः, तत्र प्रथमनिह्नवोदाहरणं

यथा - कुण्डलपुरे श्रीवीरस्वसा सुदर्शना तस्याः पुत्रो जमालिः, वीरपुत्री प्रियदर्शना तस्य पत्नी, तया सह जमालिवीरपादान्ते दीक्षां जग्राह, जमालिना सह पञ्चशतक्षत्रियाः प्रव्रज्यां जगृहुः, प्रियदर्शनया सह सहस्रस्त्रियः प्रव्रज्यां जगृहुः, स्वामिना स्थविराणामर्पितः, स्थविरैश्चास्यैकादशाङ्गान्यध्यापितानि, अर्पितश्च पञ्चशतसाधु-सहस्रसाध्वीपरिवारः । अथ जमालिर्भगवताऽनुज्ञातः क्रमेण विहारं कुर्वन् श्रावस्तिं गतः, तिन्दुकोद्याने कोष्टकचैत्ये समवसृतः अन्तप्रान्ताहारैस्तत्र तस्योत्पन्नो रोगः, तेन न शक्नोत्युपविष्टुम्, वदति च जमालिः शिष्यान् प्रति मदर्थं संस्तारकं कुरुत, शिष्येण संस्तारकः कर्तुमारब्धः, उपविष्टुमशक्नुवता जमालिना भणितम्-हे शिष्य ! कृतः संस्तारकः ? तेनोक्तं न कृतः, किन्तु क्रियमाणोस्ति ।

ततस्तेन चिन्तितं यद्भगवान् महावीर आख्याति क्रियमाणं कृतमिति तन्मिथ्या प्रत्यक्षमिदं दृश्यते, क्रियमाणेऽपि संस्तारके कात्स्न्येनाऽनिष्पत्त्या कृतत्वाभावात्, एवं स्वमनसि विचार्य सर्वान् स्वशिष्यानाकार्यैवमाचष्टे भो शिष्या ! यद्भगवानेवमाचष्टे [1]किज्जमाणे कडे, चलमाणे चलिए, उदीरिज्जमाणे उदीरिए'[ ]इत्यादि, तत्सर्वं मिथ्या ।

क्रियमाणेऽपि संस्तारके शयनरूपार्थसाधकत्वाभावेन कृतत्वाभावादिति जमालिना प्रोक्ते सति केचिन्निर्ग्रन्था एनमर्थं श्रद्दधति केचिन्न श्रद्दधते, ये च श्रद्दधति ते जमालिमेवोपसम्पद्य विचरन्ति ।

ये च न श्रद्दधति त एवमाहुर्हे जमाले ! श्रीमन्महावीरस्यायमाशयः-यत्क्रियमाणं स्यात्तदेव कृतं भवति, क्रियमाणत्वपर्यायविशिष्टकृतत्वम्, क्रियमाणत्व-कृतत्वपर्यायाभ्यां पूर्वोत्तरावस्थाभ्यामेकस्मिन्नेवार्थे सम्भवति, न तु तयोः पृथक्पदार्थान्तरसंक्रमो भवतीति वीरवाक्यसत्यतास्तीति प्रतिपद्यस्व । 'कडेमाणे कडे, चलिज्जमाणे चलिए' इत्यादि ।

---

१ 'जन्नं समणे भगवं महावीरे एवं आइक्खइ जाव एवं परूवेइ-एवं खलु चलमाणे चलिए उदीरिज्जमाणे उदीरिए जाव निज्जरिज्जमाणे णिज्जिन्ने तं णं मिच्छा...' इति

भगवत्यां - ९/३३ सू. ३८६ ॥

एवं तैः शिष्यैरुक्तोऽपि तन्न प्रतिपद्यते, स्ववाक्यदाग्रहं न मुञ्चति जमालिः, तदा ते मुक्त्वा जमालिं श्रीमहावीरं प्रतिपन्नाः, शनैः शनैरपरेऽपि महावीरं प्रतिपन्नाः, सहस्रसाध्वीपरिवृता प्रियदर्शना जमालिवाक्यं सत्यं मन्यमाना पृथिव्यां विचरति। एकदा सा ढङ्ककुम्भकारशालायामुत्तीर्णा, ढङ्केन तस्याः प्रतिबोधनाय वस्त्रान्तेऽङ्गारः क्षिप्तस्तया च दह्यमानं स्ववस्त्रं दृष्ट्वा दग्धं मम वस्त्रमिति प्रोक्तम्।

कुम्भकारेणोक्तं हे साध्वि ! भवन्मते 'डज्झमाणं डड्ढं' इति नोच्यते, तत्कथमिदं प्रोक्तं भवत्या ? इत्यादि कुम्भकारयुक्तिभिः सा प्रतिबुद्धा जमालि प्रति वीरवाक्यसत्यतायुक्तीराख्यत्, जमालिस्तु नैव प्रतिपद्यते, तया सहस्रसाध्वी-परिवृतया जमालिर्मुक्तः, श्रीवीरः प्रतिपन्नः।

एकदा श्रीवीरश्चम्पानगर्यां समवसृतः, जमालिस्तत्समवसरणे समागतः श्रीमहावीरं प्रत्याह-'हे भगवंस्तव शिष्याश्छद्मस्था एव विपत्स्यन्ते, अहं तु केवली जातः।' अथ तं गौतमः प्राह-हे जमाले ! यदि त्वं केवल्यसि तदा त्वं मत्प्रश्नद्वयव्याख्यानं कुरु ? केवलिनां हि ज्ञानदर्शने न क्वचित्स्खलतः, प्रश्नद्वयं चेदम्-

लोकः शाश्वतो वाऽशाश्वतो वा ? जीवः शाश्वतो वाऽशाश्वतो वा ? इति गौतमेन पृष्टे जमालिर्मौनभागेव स्थित :। तदानीं श्रीमहावीरः प्राह हे जमाले ! सन्ति मम शिष्या एके केचिद्ये प्रश्नद्वयमिदं व्याख्यान्ति, तथाहि-हे जमालेऽयं लोकः पूर्वं नाभूत्, अग्रे न भविष्यति, सांप्रतं नास्तीति वक्तुं न शक्यते, तस्मादयं लोकस्त्रिकालस्थायित्वेन शाश्वतः, उत्सर्पिणीविषयो भूत्वावसर्पिणीविषयो भवति, इत्यादिपर्यायैरशाश्वत इति, जीवोऽपि त्रिकालविषयित्वेन शाश्वतः, देवत्व-मनुष्यत्व-पर्यायैरशाश्वत इति। एवमाख्यातं भगवतो वाक्यं जमालिर्न श्रद्दधे ततो निष्क्रान्तः, स आत्मानं परांश्च व्युद्ग्राहयन् बहून् वर्षान् यावत् श्रामण्यपर्यायं पालयित्वा बहुभिः षष्ठाऽष्टमादिभिरात्मानं भावयित्वाऽर्धमासिक्या संलेखनयाऽनशनमाराध्य 'कडेमाणे कडेत्ति' उत्सूत्रमनालोच्य कालमासे कालं कृत्वा लान्तककल्पे त्रयोदशसागरोपमस्थित्या किल्बिषदेवत्वेनोत्पन्नः, तदुत्सूत्रप्ररूपणेन चानन्तं संसारं समुपार्जितवान्।

यदुक्तं भगवत्याम् -

चत्तारि पंचतिरिक्खजोणियमणुस्सदेवभवग्गहणाइं संसारमणुपरियट्टित्ता।
तओ पच्छा सिज्झिस्सइ, बुज्झिस्सइ, सव्वदुक्खाणमंतं च करिस्सइ॥

[९/३३ सू. ३९०] इति प्रथम निह्नवजमाल्युदाहरणम्। (१)

अथ द्वितीयनिह्नवोदाहरणं कथ्यते -

राजगृहे नगरे गुणशिलके चैत्ये चतुर्दश-पूर्वपाठी वसुनामाचार्यः समवसृतः, तच्छिष्यस्तिष्यगुप्तोऽस्ति। सोऽन्यदा सर्वात्मप्रवाद - पूर्वस्येदमालापकं पठति, यथा -

"एगे भंते जीवप्पएसे जीवेत्ति वत्तव्वं सिया, णो इणट्ठे समट्ठे, एवं दो जीवप्पएसे, तिन्नि, संखिज्जा, असंखिज्जा वा, जाव एगपएसेण वि अणंतो जीवत्ति वत्तव्वं सिया, णो

इणट्ठे समट्ठे, एवं दो जीवपएसे तिन्नि संखिज्जा असंखिज्जा वा, तम्हा किसणे पडिपुन्ने लोगागासपएस तुल्लपएसे जीवेत्ति वत्तवं सिआ," इत्यादि ।

अत्र स विप्रतिपन्नः, यदि सर्वे जीवप्रदेशा एकप्रदेशहीना जीवव्यपदेशं न लभन्ते, स चैकैकः सर्वान्तिमो जीव इति वक्तव्यः स्यात्तद्भावनाभावितत्वात्, इति तस्यान्तप्रदेशे जीवभ्रान्तिः ।

ततः स आमलकप्यानगर्यां गतः, तत्र मित्रश्रीनाम्ना श्रावकेण स्वगृहे निमन्त्रितः, लड्डुकान्तिमप्रदेश एकः, सेवनिकाखाद्यान्तिमप्रदेश एक एव, भृतहिण्डिकामध्यादेक एव कूरादिकणम्, भृतघृतपात्रमध्यादेक एव बिन्दुः, एवं सर्ववस्तुसम्बन्ध्येकैकप्रदेशो दत्तः, पुनः श्राद्धेनोक्तं भगवन् यूयं प्रतिलाभिताः, वयं कृतार्थाः कृताः, तेनोक्तं भोः श्राद्ध ! किं त्वया दत्तम् ?

श्राद्धेनोक्तं तव सिद्धान्तानुसारेण मया पूर्णं दत्तम्, अन्तिमेऽवयवे दत्ते पूर्णोऽवयवी दत्तः, अन्तिमे प्रदेशे यथा जीवस्तथा सर्वोऽवयवी अन्त्यावासे वक्तव्य इति वीरसिद्धान्तानुसारेण न किञ्चिन्मया दत्तमस्तीत्यादियुक्तिभिर्मित्रश्रीश्राद्धेन स प्रबोधितः । इति श्री द्वितीयनिह्नवतिष्यगुप्तोदाहरणम् । (२) एतौ द्वौ निह्नवौ श्रीवीरे जीवत्येवाभूताम् ।

अथ तृतीयनिह्नवोदाहरणं कथ्यते -

श्रीवीरनिर्वाणात् २१४ वर्षेषु गतेषु श्वेताम्बिकायां पोलासोद्याने आषाढाचार्याः स्वशिष्यानागाढयोगानुद्वाहयन्तो हृदयशूलेन रात्रावकस्मान्मृताः स्वर्गं जग्मुः । तत्रोपयोगे दत्ते स्नेहात्स्वदेहमधिष्ठाय शिष्याणामागाढयोगक्रियाः पूर्णाश्चकुः, अन्यं च नवीनमाचार्यं संस्थाप्य सर्वेषां स्ववृत्तान्तं निवेद्य स्वस्थानं ययुः, तच्छिष्यास्तत्स्वरूपं दृष्ट्वाऽव्यक्तमतं प्रतिपन्नाः, न ज्ञायते को देवः ? कः श्रमण ? इति चिन्तयन्ति वदन्ति च, न कोऽपि किञ्चिद्वन्दते, सर्वोऽपि व्यवहारस्तैर्लुप्तः । एकदा ते सर्वेऽपि राजगृहं गताः, तत्र परमश्रावकेण [1]मौर्यवंशोत्पन्नेन बलभद्रनृपेण तत्प्रतिबोधाय चौरा एते इति कृत्वा धृताः, यष्टिमुष्ट्यादिभिर्मारिताः, ते कथयन्ति, भो महाराज ! त्वं श्रमणोपासकः, वयं श्रमणाः, कस्मादस्माकमनर्थं कारयसि ? राज्ञोक्तमेवं मा वदन्तु, युष्माकमव्यक्तं मतम् तदनुसारेण न विद्मो वयं यद्भवन्तः श्रमणा भवन्मतापेक्षया वयं न श्रमणोपासकाः, इत्यादि वाग्युक्तिभिः ते प्रतिबुद्धाः । इति तृतीयनिह्नवाव्यक्तमतसाधूदाहरणम् । (३)

अथ चतुर्थनिह्नवोदाहरणं यथा -

वीरात् २२० वर्षेषु गतेषु मिथिलायाः लक्ष्मीगृहोद्याने महागिरिशिष्यः कोडिन्यनामास्ति, तस्यापि शिष्योऽश्वमित्रः, अन्यदाऽनुप्रवादपूर्वस्य नैपुणिकनामकं वस्तु पठन्निदमालापकं पठितवान्, यथा-

"सव्वे पडुपन्ननेरइया वुच्छिज्जिस्संति, एवं जाव वेमाणियंति ।" एतदालापकार्थमसावित्थं विचारितवान्-सर्वे नैरयिका देवाश्च यदि व्युच्छेदं प्राप्स्यन्तीत्यत्र रहस्यमुक्तम्, तदावश्यं सर्वनैरयिकादयः क्षणविनश्वराः सन्तीति क्षणक्षयवादं प्ररूपयन्नसावेकदा राजगृहे

१ सूर्यवंशो° मु० १ ॥

गतः, तत्र शौल्किकैः श्रावकैः तं कुट्टयितुमारेभे । स प्राह यूयं श्राद्धाः वयं साधवः कथं कुट्यते ? श्रावका ऊचुर्भवन्मतेन वयं श्राद्धा भवद्भिर्दृष्टास्ते विनष्टाः, वयं तु नवीना एवोत्पन्नाः, ये भवन्तो यतयः पूर्वमस्माभिर्दृष्टास्ते विनष्टाः, यूयं तु नवीना एव क्षणक्षयवादित्वाद्भवन्मतस्येति तैः श्रावकैः स शिक्षितः प्रतिबुद्धः । इति चतुर्थनिह्नवोदाहरणम् । (४)

अथ पञ्चमनिह्नवोदाहरणम्

वीराद् द्विशताष्टाविंशतिवर्षेषु [२२८] गतेषु उल्लकानदीतीरे एकस्मिन् खेटवनपुरे उल्लकातीताभिधानं वनमस्ति, तत्र महागिरिशिष्यो धनगुप्त उल्लकातीतपरत्रतीरे तिष्ठति, तस्य शिष्यो गङ्गाचार्यः पूर्वतीरे तिष्ठति, स स्वगुरुवन्दनार्थं परत्र तीरे जिगमिषुर्नद्यामुत्तरन् खल्वाटमस्तकत्वेनाधः शीतमुपरि चातप इति क्रियाद्वयं युगपदेवानुभवन् 'जुगवं दो नत्थि उवओगा' इति भगद्वचनमन्यथा मन्यमानो निह्नवो जातः, आचार्यैर्बहुयुक्तिभिर्बोधितोऽपि न मन्यते ।

एकदा स राजगृहे वीरप्रभोद्याने मणिनायकस्य यक्षभवने उत्तीर्णः, तत्र व्याख्यानाऽऽगतलोकानां पुरः क्रियाद्वयस्य युगपदनुभवो भवतीति स्वमतं प्ररूपयन् यक्षेण मुद्गरमुत्पाट्य कोपं च दर्शयित्वा तर्जितोऽरे ! मयात्रैव समवसृतवीरमुखात् श्रुतं यत्क्रियाद्वयस्यानुभवो युगपन्न भवति, समयसूक्ष्मत्वेन युगपदनुभवाभिमानो भ्रम एवेति, त्वं किं वीरादप्यधिक एवेति यक्षेणैव स प्रतिबोधितः । इति पञ्चमनिह्नवकथा । (५)

अथ षष्ठ निह्नवोदाहरणं कथ्यते

वीरात्पञ्चशतचतुश्चत्वारिंशद्वर्षेषु [५४४] गतेष्वंत-रञ्जिकापुर्यां भूतगृहं चैत्यम् तत्र श्रीगुप्तनामाचार्याः समवसृताः, तद्वन्दनार्थं प्रत्यासन्नाद् ग्रामाद्रोहगुप्तः शिष्यः समायातः, स एकमुदरबद्धलोहपट्टं जम्बूवृक्ष-शाखाकरं च परिव्राजकं दृष्ट्वा पप्रच्छ किमिदमिति ? स प्राह ज्ञानेन ममोदरं स्फुटति, तेनात्र लोहपट्टो बद्धोऽस्ति, जम्बूद्वीपे च मत्तुल्यः कोऽपि नास्तीति जम्बूशाखा करे बद्धाऽस्तीति, परिव्राजकेन तदानीमेव पटहो वादितो नास्ति विश्वे कश्चिद्यो मया सह वादं करोतीति, रोहगुप्तेन कथितोऽहं वादं करिष्यामीति वदता पटहो वारितः । स परिव्राजकस्ततो राजद्वारे गतः, रोहगुप्तस्तु गुरुसमीपे समायातः, पटहक्षोभकरणवृत्तान्तः कथितः, गुरव ऊचुर्वरं न कृतम्, स विविधविद्या-बलवान्, यदि त्वं स्याद्वादयुक्तिभिस्तं वादे पराजेष्यसि, तदासौ कुविद्याभिस्तवोपद्रवं करिष्यति । रोहगुप्तः प्राह-गुरुभिस्तथा मम प्रसादः कार्यो यथा मम वादे जयः स्यादुपद्रवश्च क्षयः स्यात् । गुरुभिस्तस्य मयूरी-नकुलीप्रमुखा विद्या दत्ताः, रजोहरणं चाभिमन्त्रय दत्तम्, यदेमाभिर्विद्याभिस्तव तस्य पराभवो न तिष्ठति, तदा तत्कुविद्याभिमुखमिदं रजोहरणं भ्रामणीयम्, गुरुं वन्दित्वा स राजसभायां गतः, तत्र मिलितौ वादि-प्रतिवादिनौ, रोहगुप्तेनोक्तं वराकोऽयं परिव्राजकः किं जानाति ? पूर्वपक्षो मयास्यैव दत्तः, यथेष्टमसौ मे प्रश्नयतु, परिव्राजकेन चिन्तितमसौ पूर्णविद्यावान् मया केनापि प्रकारेण जेतुमशक्यस्ततोऽस्यैव सिद्धान्तपक्षमहं गृह्णामि, न ह्यसौ स्वसिद्धान्तपक्षमुत्थापयिष्यतीति । ममैव जयो भविष्यतीति विचिन्त्य

परिव्राजकेनोक्तमहं राशिद्वयमङ्गीकुर्वे, जीवराशिरजीवराशिश्च, पुण्यराशिः पापराशिश्चेत्यादि, बुद्धिमता रोहगुप्तेन तदानीं जीवोऽजीवो नोजीवश्चेति राशित्रयमुक्तम्, जीवास्त्रसादयः, अजीवा घटादयः, नोजीवा गृहकोकिला छिन्नपुच्छाऽस्ति, यथा ह्येकस्य दण्डस्यादिर्मध्यमग्रं चेति प्रकारत्रयम् । एवं सर्वत्रेत्यादिवचोभिः स परिव्राजको निर्लोठितो रोहगुप्तस्याभिमुखं वृश्चिकान् मुमोच, रोहगुप्तस्तु मयूरानमुचत्, मयूरैस्तु ते सर्वे भक्षिताः । ततः परिव्राजकः सर्पानमुञ्चत्, रोहगुप्तस्तु नकुलान् मुमोच, नकुलैस्तु निर्नाशिताः सर्पाः । ततः स परिव्राजक उन्दरान् मुमोच, रोहगुप्तस्तु मार्जारान् मुमोच, माजारैस्तु ते भक्षिताः । ततः परिव्राजकेन मृगा मुक्ताः, रोहगुप्तेन तु व्याघ्रा मुक्ताः व्याघ्रैर्मृगा भक्षिताः । ततः परिव्राजकेन शूकरा मुक्ताः रोहगुप्तेन तु सिंहा मुक्ताः सिंहैः शूकरा भक्षिताः । एवं परिव्राजकेन ये ये जीवा मुक्तास्तत्प्रतिमल्ला रोहगुप्तेन मुक्तास्तैश्च ते विनाशिताः । अथात्यन्तखिन्नेन परिव्राजकेन गर्दभी मुक्ता, रोहगुप्तेन सा रजोहरणेन हता परिव्राजकस्यैवोपरि विष्टां कृत्वा गता । ततः स परिव्राजको राजादिभिर्हीलितो राजद्वारादूले गृहीत्वा बहिष्कृतः ।

अथ रोहगुप्तः परिव्राजकं जित्वा गुरुसमीपे समागतः, सर्वं वादस्वरूपं जगौ । गुरुणोक्तं वरं कृतम्, परं त्वया साम्प्रतं राजसभायां गत्वा राशित्रयस्थापनाविषयं मिथ्या-दुष्कृतं देयम्, जिनशासने राशिद्वयस्यैव व्यवस्थापनात्, रोहगुप्तोऽवदन्मया तादृशायां राजसभायां गत्वा मिथ्यादुष्कृतं दत्वा, स्ववचनमप्रमाणीं कर्तुमशक्यम् । गुरुणोक्तं नात्र त्रपा कार्या, अवश्यं तत्र गत्वा मिथ्यादुष्कृतं देहि, एवं वारंवारं गुरुणाऽयमुक्तः खिन्नः प्रकामं धृष्टो भूत्वावदद्राशित्रयमेवास्ति, नात्र कश्चिद्दोषः । ततो गुरुशिष्ययोरेव वादो लग्नः, आचार्या राजद्वारं गताः, शिष्येण समं वादं कर्तुमारेभिरे, वादं कुर्वतोस्तयोः षण्मासा गताः । राज्ञोक्तं मम राजकार्यं सीदति, भवतां वादसमाप्तिर्न जाता, ततो यान्तु स्वस्थाने भवन्तः । गुरुभिरुक्तम्, कल्यदिवसे वादनिर्णयं करिष्यामि । ततः प्रभाते राजादिजनपरिवृता गुरवः कुत्रिकापणे समागताः, तद्धनिकं जगुर्देहि जीवानिति गुरुभिरुक्ते तेन कुमार-कुमारी-हस्त्यश्वाद्यनेके जीवा दर्शिताः, देह्यजीवानिति गुरुभिरुक्ते तेन घटपटादयोऽर्था दर्शिताः, देहि नोजीवानिति गुरुभिरुक्ते कुत्रिकापणधनिकः प्राह न सन्ति लोकत्रये नोजीवाः, यल्लोकत्रये भवति तदेव कुत्रिकापणे भवति नान्यत् । एवं चतुश्चत्वारिंशच्छतप्रश्नकरणेन निर्लोठितो रोहगुप्तो निर्विषयीकृतः, स गणान्निह्नव इति कृत्वा निष्कासितः, तेन वैशेषिकमतं प्रकटीकृतम्, षट् पदार्थास्तेनैव प्ररूपिताः, इति ''छलूओ' स पठ्यते । इति षष्ठनिह्नवकथा । (६)

अथ सप्तमनिह्नवकथा -

यथा - वीरात्पञ्चशतचतुरशीतिवर्षेषु [५८४] गतेषु दशपुरे ईक्षुगृहोद्याने आर्यरक्षितसूरिः समायातः, तस्य गोष्ठामाहिलः १, फल्गुरक्षितः २, दुर्बलिकापुष्पश्चेति ३

---

१ षट्लूक ।

शिष्यत्रयं वर्तते, इतश्च मथुरायामक्रियावाद्युत्थितः, तत्र प्रतिवादी कोऽपि नास्तीति तत्रत्यसङ्घेनार्यरक्षितसूरेर्ज्ञापितम्, तैश्च तत्र गोष्ठामाहिलो वादलब्धिमानिति प्रेषितः, तेन तत्र गत्वा राजसभायां स पराजितः, मथुराश्राद्धैश्च गोष्ठामाहिलो वर्षाचतुर्मासकं रक्षितः, तावता दशपुरे श्रीआर्यरक्षितसूरिः स्वमरणमासन्नं ज्ञात्वा स्वपट्टस्थापनायामेवं चिन्तयति -

[1]"वुढो गणहरसद्दो गोअमाईहिं धीरपुरिसेहिं ।
जो तं ठवेइ,अपत्ते जाणंतो सो महापावो" ॥ १ ॥

एवं चिन्तयित्वा सर्वोऽपि सङ्घ आकारितः, तस्याग्रे सूरिणोक्तमहं गोष्ठामाहिलं प्रति घृतघटसदृशो जातः, यथा घृतघटाद् घृतमपनीयते, तदा बहवो घृतबिन्दवस्तल्लग्नास्तिष्ठन्ति, तथा मया यदा गोष्ठामाहिलः पाठितस्तदा मया स्वकोष्ठे बहवो विद्यांशा रक्षिताः फल्गुरक्षितं प्रत्यहं तैलघटसदृशो जातः, यथा तैलघटात्तैलमपनीयते, तदा तत्र तैलबिन्दवः स्तोका एव तिष्ठन्ति, तथा मया यदा फल्गुरक्षितः पाठितस्तदास्य कोष्ठे मया घना विद्याः क्षिप्ताः, स्तोका एव रक्षिताः । दुर्बलिकापुष्पं प्रत्यहं [2]निष्पावघटसदृशो जातः, यथा निष्पाव-घटान्निष्पावा अपनीयन्ते, तदा नैकोऽपि तत्र तिष्ठति, तथा यदा मया दुर्बलिकापुष्पः पाठितस्तदास्य कोष्ठे सर्वा विद्याः क्षिप्ताः, नैकापि विद्या रक्षितास्तीत्यार्यरक्षितसूरिणोक्ते सङ्घः प्राह-भगवन् ! दुर्बलिकापुष्प एवाचार्यः क्रियताम्, तस्यैव सर्वविद्यास्पदत्वेन योग्यत्वात् ।

तदा सङ्घवचः श्रुत्वार्यरक्षितसूरिभिः स्वपट्टे दुर्बलिकापुष्पसूरिः कृतः, उक्तं च दुर्बलिकापुष्पस्य गुरुणा, हे वत्स ! यथाहं फल्गुरक्षित-गोष्ठामाहिलादीनां लालन-पालनविधौ प्रवृत्तस्तथा त्वयापि प्रवर्तितव्यम्, फल्गुरक्षितादीनामपि गुरुणोक्तम्, यथा भवन्तो मत्सेवाविधौ प्रवृत्तास्तथा दुर्बलिकापुष्पस्यापि प्रवर्तितव्यम्, अपि चाहं सेवाविधौ कृतेऽप्यकृतेऽपि न रोषं गतः, असौ तु न क्षमिष्यतीति सम्यक् प्रवर्तितव्यम् द्वयोरपि पक्षयोरेवमुक्त्वाऽनशनं कृत्वा श्रीआर्यरक्षितसूरिदेवलोकं गतः । गोष्ठामाहिलेन श्रुतं गुरोर्देवलोकगमनम्; त्वरितं तत्र समायातो जनान् पृच्छति को गणधरः स्थापितः ? जनैस्तु घृतघटादिदृष्टान्तप्रतिपादनपूर्वं दुर्बलिकापुष्पो गणधरः कृत इति प्रोक्तम् । गोष्ठामाहिलः पृथगुपाश्रये कियत्कालं स्थित्वा वस्त्रादि मुक्त्वा दुर्बलिकापुष्पोपाश्रये समागतः सर्वैरपि साधुभिरस्याभ्युत्थानं कृतम्, आचार्येणालापिताः कथं पृथगुपाश्रये स्थिताः ? अत्रैव तिष्ठन्तु, किन्तु स नेच्छति, आचार्योपाश्रयान्निर्गत्य स्वोपाश्रये गतः ।

अथ गोष्ठामाहिलो पृथक् स्थितो जनान् व्युद्ग्राहयति, परं न कोऽपि तद्वचः प्रतिपद्यते । अन्यदा दुर्बलिकापुष्पसूरयोऽर्थपौरुषीं कुर्वन्ति, सर्वे साधवः शृण्वन्ति । साधुभिराकारितोऽपि गोष्ठामाहिलस्तत्र नायाति, न शृणोति च । यूयमेव निष्पावघटसमीपेऽर्थपौरुषीं कुरुत, अर्थपौरुषीं कृत्वाचार्येषूत्थितेषु विज्ञनाम शिष्योऽनुभाषते ।

---

१ "व्यूढो गणधरशब्दो, गौतमादिभिर्धीरपुरुषैः । यस्तं स्थापयति अपात्रे जानन् स महापापी ॥ १ ॥"
२ वाल

अष्टमे कर्मप्रवादे पूर्वे कर्म प्ररूप्यते, तत्र जीवस्य कर्मणां कथं बन्धः ? आचार्या भणन्ति-बद्ध १ स्पृष्ट २ निकाचित ३ भेदैरात्मकर्मणोर्बन्धः, तत्रात्मप्रदेशैः सहामतन्तु-बद्धसूचिकलापवद्बद्धं कर्म भवति, निकाचितं तु नापितकुट्टित-सूचिकलापवद्भवति, प्रथमं हि जीवो रागद्वेषपरिणामैः कर्म बध्नाति, पश्चात्परिणाममुञ्चंस्तत्कर्म स्पृष्टं करोति, तेनैवात्यन्तसंक्लिष्टपरिणामेन निकाचितं-निरुपक्रमं करोति, तद्धि उदयगतमेव वेद्यते, इति विज्झनामशिष्यकृतप्रश्नस्योत्तरं दुर्बलिकापुष्पाचार्यैः कृतम्, आसन्नोपाश्रयस्थेन गोष्ठामाहिल्लेन श्रुतम्, तत्रैव स्थितेन तेनोक्तमीदृक्षमस्माभिर्गुरोः समीपे न श्रुतम्, यद्येवं कर्म बद्धं स्पृष्टं निकाचितं स्यात्तदा मोक्षो न स्यात्। तदा विज्झनामशिष्यो वक्ति, कथं तर्हि कर्म बद्धं स्पृष्टं निकाचितं भवति ? स आह यथा कञ्चुकः कञ्चुकिशरीरं स्पृशति, तथा कर्मात्मप्रदेशान् स्पृशति, न पुनः क्षीर-नीरन्यायेन तत्कर्मात्मप्रदेशैः सह बद्ध-स्पृष्ट-निकाचितत्वभावेन क्षीर-नीरवदेकीभावमापद्यते, तथात्वे हि कर्मव्युच्छेद एव न स्यादिति गोष्ठामाहिल्लवचः श्रुत्वा विज्झशिष्यः प्राह भो गोष्ठामाहिल्ल ! दुर्बलिकापुष्पाचार्याः पूर्वोक्तमेवादिशन्ति, गोष्ठामाहिल्लः प्राहेमं ते न जानन्ति, पुनर्विज्झशिष्यः सूरीन् प्रश्नयति, सूरिभिरुक्तं गोष्ठामाहिल्ल-वचनमसत्यमेव, यथास्माभिरुक्तं तथैव श्रीगुरुभिरुक्तम्।

तत्र दृष्टान्तः- यथाऽयःपिण्डे वह्निः सर्वात्मना सम्बध्यते वियुज्यते च, तथात्मप्रदेशैः सह कर्म सम्बध्यते वियुज्यते चेत्यादि दृष्टान्त-युक्त्यादिभिर्बद्ध-स्पृष्ट-निकाचितकर्मस्थापना कृता, परं गोष्ठामाहिल्लो न मन्यते। अन्यदा नवमे पूर्वे प्रत्याख्यानाधिकारं गुरवः साधूनामेवं पाठयन्ति - "साहूणं जावज्जीवाए तिविहं तिविहेण पाणाइवायं पच्चक्खामि, एयं पच्चक्खाणं वन्निज्जइ," इत्याद्याचार्येणोक्ते गोष्ठामाहिल्लः प्राह- 'जावज्जीवाएत्ति' न वक्तव्यम्।

एवमुक्तप्रत्याख्यानस्य सावधिकत्वेन परलोकाशंसाभवनेन भङ्गसम्भवात्, प्रत्याख्यानं निरवधिकं कार्यम्, तथाहि - "सव्वं पाणाइवायं पच्चक्खामि, अपरिमाणाए तिविहं तिविहेणं," एवं प्रत्याख्यानं कार्यम्, गोष्ठामाहिल्लेनैवमुक्तं विज्झादिशिष्याः सूरीन् प्रश्नयन्ति, सूरयः प्राहुः प्रत्याख्यानस्य कालावधिकत्वमवश्यं कार्यम्। अन्यथा मर्यादापत्त्याऽकार्यत्वमेव स्यात्, परलोकाशंसासम्भवेन भङ्गो नैव स्यात्, जीवन्नहं सावद्यं न सेविष्ये, मृतस्य त्ववश्यंभाविन्यविरतिरिति यथोक्तनिर्वाहित्वेन न प्रत्याख्यानभङ्गः। एवं श्रीदुर्बलिकापुष्पोक्तं सर्वैरप्यङ्गीकृतम्, अन्ये फल्गुरक्षितादयः स्थविरा एवमेव भणन्ति, गोष्ठामाहिल्लस्तु सर्वेऽप्येते न किञ्चज्जानन्तीति वदति। स्वोक्तमेव तीर्थङ्करोक्तमिति स्थापयति। आचार्योक्तं स्थविरोक्तं च न मन्यते, तदा समस्तसङ्घेन शासनदेव्याः कायोत्सर्गः कृतः, सा समागता भणति, किं देशयति सङ्घः ? सङ्घेनोक्तं व्रज श्रीसीमन्धर-तीर्थङ्करपार्श्वे, एवं च पृच्छ 'यद्गोष्ठामाहिल्लो भणति तत्सत्यमुत यद्दुर्बलिकापुष्पादयो भणन्ति तत्सत्यं ?' मम पुनः कायोत्सर्गबलं ददत। सङ्घेन पुनः कायोत्सर्गः कृतः, सा गता भगवत्समीपे, भगवान् पृष्टः सङ्घोक्तम्, भगवान् प्राह-दुर्बलिकापुष्पादयः सम्यग्वादिनः, गोष्ठामाहिल्लस्तु

मिथ्यावादी निह्नवः सप्तम इति भगवदुक्तमाकर्ण्यागता शासनदेवता, भगवदुक्तमाचख्यौ, गोष्ठामाहिल्लः प्राहैषाल्पर्धिका तत्र गन्तुमेव न शक्नोति, तदा गोष्ठामाहिल्लस्यैकान्ते दुर्बलिका-पुष्याचार्यैरेवमुक्तम्- हे आर्य ! प्रतिपद्यस्व भगवदुक्तमन्यथा सङ्घेन त्वं बहिः करिष्यसे । स न प्रतिपद्यते तदा सङ्घेन सप्तमोऽयं निह्नव इति कृत्वा द्वादशविधसम्भोगाद्बहिष्कृतः । द्वादशविधसम्भोगश्चायं पञ्चकल्पे-

"उवहि १, सुअ २, भत्तपाणे ३, अंजलिपग्गहे ४, दायणा ५, य णिक्काए अ ६, अब्भुट्ठाणे ७, किइकम्म-करणे ८, वेयावच्चकरणे य ९, ॥ १॥ समोसरणे सन्निसेज्जा १०, कहाए अ ११, निमंतणे १२ ॥

इति सप्तमनिह्नवकथा प्रतिपादिता (७) सप्ताप्येते देशविसंवादिनो निह्नवाः,

सम्प्रति प्रसङ्गत एव बहुतरविसंवादिबोटिका उच्यन्ते-

"छव्वासएहिं नव्वुत्तरेहिं तइया सिद्धिं गयस्स वीरस्स ।
तो बोडिआण दिट्ठी, रहवीरपुरे समुप्पना" ॥ १ ॥

[आव. मू.भा.गा. १४५]

वीरात् षट्शतनववर्षेषु गतेषु रथवीरपुरे दीपकोद्याने समवसृता आर्यकृष्णाचार्याः, तत्र नगरे एकः शिवभूतिनामा सहस्रमल्लो राज्ञः समीपे समागत्य वक्ति तव सेवां करोमि । राज्ञोक्तं परीक्षां कृत्वा तव सेवावसरो दास्यते । अन्यदा कृष्णचतुर्दश्यां राज्ञासावाकारितः, उक्तं च गच्छाऽस्यां रात्रौ श्मशाने; इदं मद्यमयं पशुः स्वबलिर्देयः, तद् द्वयं गृहीत्वा स तत्र गतः, अन्ये पुरुषास्तद्धापनार्थं प्रच्छन्नवृत्या पश्चात् प्रेषिताः, सहस्रमल्लेन क्षुधार्तेन पशुं निहत्य तन्मासं भक्षितम्, मद्यं च पीतम्, तैः पुरुषैः शिवाफेत्कारशब्दैर्भापितो न बिभेति, पश्चादागत्य सहस्रमल्लेन राज्ञे उक्तम्, मया बलिर्दत्तः, सेवकैरपि तद्वीरत्वमुक्तम्, राज्ञा स्वसेवायां रक्षितः । अन्यदा राज्ञा मथुराग्रहणार्थं स्वसेवकाः प्रेषिताः, तैः समं सहस्रमल्लोऽपि प्रेषितः । मार्गे गच्छद्भिस्तैः परस्परमुक्तं भोऽस्माभिः सम्यग् राज्ञो न पृष्टम्, का मथुरा ग्राह्येति । सहस्रमल्लेनोक्तं द्वे अपि मथुरे ग्राह्ये, यत्र दुष्करं तत्राहं यास्यामि, एवमुक्त्वा स गतः पाण्डुमथुरायाम्, गृहीता च सा बलेन । उक्तं च -

शूरे त्यागिनि विदुषि च, वसति जनः स च जनाद्गुणी भवति ।
गुणवति धनं धनाच्छ्रीः, श्रीमत्या जायते राज्यम् ॥ १ ॥

नगरीं गृहीत्वा स पश्चादायातः, राज्ञा तुष्टेन भणितं, भो तुष्टोऽहं मार्गय मनोऽभीष्टं ? ततस्तेनोक्तं मम देहि सर्वत्र स्वेच्छाभ्रमणं, दत्तं राज्ञा । अथासौ निरन्तरं स्वेच्छया सर्वत्र

---

१ उपधिः श्रुतं भक्तपाने, अञ्जलिप्रग्रहे दानं च निकाचना च ।
अभ्युत्थाने कृतिकर्मकरणे, वैयावृत्त्यकरणे च ॥ १ ॥ समवसरणे सन्निषद्या, कथा च निमन्त्रणा ॥

२ "षट्सु वर्षशतेषु नवोत्तरेषु सिद्धिं गतात् वीरात् ।
तदा बोटिकानां दृष्टी रथवीरपुरे समुत्पन्ना ॥ १ ॥"

भ्रमन् रात्रौ मध्यान्हेऽन्त्यप्रहरे वा समायाति, कदाचिन्नायात्यपि स्वगृहे, दिवसे यावद् गृहे नायाति तावत्तस्य भार्या न भुङ्क्ते, रात्रौ यावन्नायाति तावन्न स्वपिति। अन्यदा सा प्रकामं खिन्ना श्वश्रूः प्रत्याह हे मातस्त्वत्पुत्रोऽर्धरात्रे कदाचिदायाति, कदाचिदन्त्यप्रहरे समायाति, कदाचिन्नायात्यपि, दिवसेऽपि रात्रावपि चायमकाल एव समायाति, अहं निद्रार्ता क्षुधार्ता च तिष्ठामि, तदा श्वश्रा भणितमद्य त्वया द्वारं दत्वा शयनीयम्, अहं जाग्रती स्थास्यामि तद्दिवसे रात्रौ तथैव कृतम्।

स मध्यरात्रौ समायातः, द्वारमुद्घाटयेत्युक्तवान् मात्रा भणितं, यत्रास्यां वेलायां द्वाराण्युद्घाटानि भवन्ति तत्र व्रज स रोषान्निर्गतः, कृष्णाचार्योपाश्रय एवोद्घाटितो दृष्टः, मध्ये प्रविष्टः, वन्दित्वा भणति मां प्रव्राजयत ? आचार्या नेच्छन्ति, तेन स्वयमेव लोचः कृतः, ततस्तस्याचार्यैर्लिङ्गं दत्तम्, आचार्यास्तमादाय ततो विहृताः, कालान्तरेण तत्रैव पुनरायाताः, राजा तद्वन्दनार्थमायातः, गुरूननुज्ञाप्य सहस्रमल्लः स्वगृहे आकारितः, तस्य स्वगृहागतस्य रत्नकम्बलं राज्ञा दत्तम्, सोऽपि गुरुसमीपे समायातः, गुरुभिस्तद्रत्नकम्बलमनापृच्छ्य गृहीतं ज्ञात्वा सहस्रमल्ल उपाश्रयाद्बहिर्निर्गते सति रत्नकम्बलं खण्डशः कृत्वा यतीनां पाद-प्रोञ्छनानि कृत्वा दत्तानि, स आगतः, तत्स्वरूपं ज्ञातम्, सकषाय एव स्थितः। अन्यदा गुरुभिर्व्याख्यायां जिनकल्पिका वर्ण्यन्ते, जिनकल्पिका द्विविधाः पाणिपात्राः पतद्ग्रहधराश्च, सप्रावरणा अप्रावरणाश्चेत्यादिजिनकल्पिमार्गो वर्णितः, सहस्रमल्लेन पृष्टं किमसौ मार्गः साम्प्रतं न क्रियते ? गुरुभिरुक्तं स मार्गः साम्प्रतं व्युच्छिन्नोऽस्ति, तेनोक्तं यद्येष मार्गोऽनुष्ठीयते, तदा नास्त्यस्य व्युच्छेदः, परलोकार्थिनैष एव मार्गोऽनुष्ठेयः, सर्वथा निष्परिग्रहत्वमेव श्रेयः, सूरिभिरुक्तं धर्मोपकरणमेवेति न तु परिग्रहः तथाहि -

जन्तवो बहवः सन्ति, दुर्दृश्या (शा) मांसचक्षुषाम्।
तेभ्यः स्मृतं दयार्थं तु रजोहरणधारणम् ॥ १ ॥
आसने शयने स्थाने, निक्षेपे ग्रहणे तथा।
गात्रसङ्कुचने चेष्टं, तेन पूर्वं प्रमार्जनम् ॥ २ ॥
तथा सम्पातिमाः सत्त्वाः सूक्ष्माश्च व्यापिनोऽपरे।
तेषां रक्षानिमित्तं च, विज्ञेया मुखवस्त्रिका ॥ ३ ॥
भवन्ति जन्तवो यस्मा - दन्नपानेषु कुत्रचित्।
तस्मात्तेषां परीक्षार्थं, पात्रग्रहणमिष्यते ॥ ४ ॥

अपरं च - सम्यक्त्वज्ञानशीलानि, तपश्चेतीह सिद्धये।
तेषामुपग्रहार्थाय, स्मृतं चीवरधारणम् ॥ ५ ॥
शीत-वाता-ऽऽतपैर्दंशै-र्मशकैश्चापि खेदितः।
मा सम्यक्त्वादिषु ध्यानं न सम्यक् संविधास्यति ॥ ६ ॥

तस्य त्वग्रहणे यस्मात् क्षुद्रप्राणिविनाशनं ।
ज्ञानध्यानोपघातो वा, महान् दोषस्तदैव तु ॥ ७ ॥
य एतान्, वर्जयेद्दोषान् धर्मोपकरणादृते ।
तस्य त्वग्रहणं युक्तं, यः स्याज्जिन इव प्रभुः ॥ ८ ॥

जिनकल्पिकस्तु प्रथमसंहनन एव भवति, इदानीं प्रथमसंहननाभावाज्जिनकल्पिकमार्गो नानुष्ठीयते, इत्यादियुक्तिभिर्गुरुणा प्रतिबोधितोऽपि नासौ प्रतिबुद्धः, प्रत्युतामर्षात् स्वप्रावरणं त्यक्त्वैकाक्येव वने गतः, तस्योद्याने स्थितस्योत्तरा नाम भगिनी वन्दनार्थमागता ।

तं तथाविधं दृष्ट्वा तयापि चिवराणि त्यक्तानि । अन्यदा भ्रात्रा समं सा नगर्यां भिक्षार्थं प्रविष्टा, आवासोपरिस्थयैकया गणिकया दृष्ट्वास्मज्जातेर्लोको मा विरक्तो भवत्विति मत्वास्या उरसि शाटिका व्युत्सृष्टा, सा नेच्छति, भ्रात्रा उक्तं-एषा देवतया दत्तेति भ्रातृवचसा तया शाटिका परिधृता ।

अथ शिवभूतिना कोडिन्नः कोट्टवीरश्चेति शिष्यद्वयं प्रतिबोध्य दीक्षितम्, ततो बोटिकमतं मिथ्यादर्शनं प्रवृत्तम् ।

'सुच्चा नेआऊयं मग्गं, बहवे परिभस्सइ' ।
एतत्पदद्वयोपरि सप्तनिह्नवोदाहरणानि ॥ ६ ॥

सुइं च लध्धुं सद्धं च, वीरियं पुण दुल्लहं ।
बहवे रोयमाणावि, नो एणं पडिवज्जए ॥ १० ॥

च पुनः श्रुतिं लब्ध्वा, च पुनः श्रद्धां लब्ध्वा, वीर्यं पुनर्दुर्लभम्, चारित्रपालने बलस्फोरणं दुर्लभम्, बलस्फोरणदुर्लभत्वे हेतुमाह, यतो बहवो जना रोचमाना अपि धर्मे रुचिं कुर्वाणा अप्येतद्वीर्यं प्रति नो प्रतिपद्यन्ते वीर्यं नो अङ्गीकुर्वते, श्रेणिकादिवत् ॥१०॥

माणुसत्तंमि आयाओ, जो धम्मं सुच्च सद्दहे ।
तवस्सी वीरियं लद्धुं, संवुडे निद्धुणे रयं ॥ ११ ॥

मनुष्यत्वे आगतः सन् यो धर्मं श्रुत्वा श्रद्धत्ते स तपस्वी वीर्यं लब्ध्वा संवृतः सन्-निरुद्धाश्रवः सन् रजः कर्ममलं निर्धुनोति, निश्चयेन धुनोति-दूरीकरोति, मुक्तिं प्राप्नोतीत्यर्थः ॥ ११ ॥

चतुरङ्गीयस्य इहैव फलमाह -

सोही उज्जुयभूयस्स, धम्मो सुद्धस्स चिट्ठई ।
निव्वाणं परमं जायइ, घयसित्ति व्व पावए ॥ १२ ॥

ऋजुभूतस्य चतुरङ्गीं प्राप्य मोक्षगमनार्थं सरलीभूतस्य शुद्धिर्भवति, कषायकालुष्यरहितः स्यात्, शुद्धस्य कषायकालुष्यरहितस्य धर्मस्तिष्ठति, क्षमादिदशविधधर्मः स्थिरो

भवति, धर्मयुक्तस्य परमुत्कृष्टं निर्वाणं-मोक्षो जायते, स जीवन्मुक्तो भवतीत्यर्थः, तपस्तेजसा जाज्वल्यमानो भवति, क इव ? घृतसिक्तः पावक इव, घृतेन हुतोऽग्निरिव ॥ १२ ॥

विगिंच कम्मुणो हेउं, जसं संचिणु खंतिए ।
पाढवं सरीरं हिच्चा, उड्ढं पक्कमई दिसं ॥ १३ ॥

शिष्यं प्रति गुरुर्वदति-हे साधो ! त्वं कर्मणो हेतुं मिथ्यात्वा-ऽविरति-कषाय-योगादिकं 'विगिंच' विवेगिध-विवेकं कुरु-पृथक्कुरु । पुनः क्षान्त्या क्षमया कृत्वा यशः संयमं विनयं वा सञ्चिनु-संचय, पुनरेवं कुर्वन् पार्थिवं-शरीरं हित्वोद्ध्वां दिशं मोक्षं प्रति प्रक्रामति-भवान् व्रजति-त्वं प्रयासीत्यर्थः, पृथिव्या भवं पार्थिवं-पृथ्वीविकारम् ॥ १३ ॥

विसालिसेहिं सीलेहिं, जक्खा उत्तरउत्तरा ।
महासुक्का व दिप्पंता, मन्नंता अपुणच्चवं ॥ १४ ॥

साधवो विसदृशैरत्युत्कृष्टैः शीलैः साधुव्रतैर्यक्षा-देवा उत्तरोत्तराः सौधर्मादिष्वच्युतान्तेषु तिष्ठन्तीति क्रियासम्बन्धः । कीदृशास्ते देवाः ? महाशुक्ला इव चन्द्रा-ऽऽदित्यादय इव देदीप्यमानाः, पुनस्ते किं कुर्वाणाः ? अपुनश्च्यवं मन्यमाना अतिसौख्यभाक्तयाऽपुनर्भवं मन्यमानाः ॥ १४ ॥

अप्पिया देवकामाणं, कामरूवविउव्विणो ।
उड्ढं कप्पेसु चिट्ठंति, पुव्वा वाससया बहु ॥ १५ ॥

पुनः कीदृशास्ते यक्षाः ? देवकामान् प्रति पूर्वभवाचीर्णैर्व्रतैर्देवकामान्-देवसौख्यानि प्रत्यर्पिताः, पुनः कीदृशाः ? कामरूपविकुर्विणः, कामरूपं-स्वेच्छया रूपं विकुर्वन्ति-विरचयन्तीत्येवंशीलाः कामरूपविकुर्विणः । अथ तत्र देवलोकेषु कथं यावत्तिष्ठन्ति ? बहूनि पूर्ववर्षशतानि यावत्तिष्ठन्ति, बहुनीतिशब्देनासङ्ख्येयानि वर्षशतानि यावद्देवसुखानि भुञ्जन्ति, पूर्ववर्षशतायुषामेव चरणयोग्यत्वेन विशेषतो देशनौचित्यज्ञापनार्थमित्थमुपन्यासः. बहुभिः पूर्वैर्जघन्येनैकं पल्योपमं भवति, बहुभिर्वर्षशतैः पूर्वः, बहुभिः पूर्वशतैः सागरोपमं भवति ॥ १५ ॥

तत्थ ठिच्चा जहाठाणं, जक्खा आउक्खये चुआ ।
उवेंति माणुसं जोणिं, से दसंगेऽभिजायए ॥ १६ ॥

तत्र देवलोकेषु यथास्थानं स्थित्वा यक्षा-देवा आयुःक्षये च्युताः सन्तो मानुषीं योनिमुत्पद्यन्ते-प्राप्नुवन्ति, तत्र दशाङ्गा अभिजायन्ते, अत्र प्राकृतत्वादेकवचनम्, दशभिरङ्गैः सह वर्तन्त इति सदशाङ्गाः, अथवा स इति ते इत्यर्थः, दश अङ्गानि येषां ते दशाङ्गा इति पृथक् पदम्, एकवचनेन कश्चिन्नवाङ्गादेरपीति ज्ञानपनार्थम् ॥ १६ ॥

कानि दशाङ्गानि ? -

खित्तं वत्थुं हिरण्णं च, पसवो दासपोरुसं ।
चत्तारि कामखंधाणि, तत्थ से उववज्जइ ॥ १७ ॥

ते देवास्तत्रोत्पद्यन्ते, तत्र कुत्र ? यत्र चत्वार एते कामस्कन्धा भवन्ति, तत्र कुत्र ? यत्र क्षेत्रं सम्यग्भवति ग्रामा-ऽऽरामादिकम्, अथवा सेतु-केतूभयात्मकम् १, यत्र वास्तुगृहं सम्यग्भवति २, यत्र हिरण्यं सुवर्णं रुप्यं वा ३, यत्र पशवो घोटक-हस्त्यादयः 'दासपोरुसं' चेटक-चेटी-पत्तिप्रमुखादिकं ४, चत्वार एते स्कन्धा वर्तन्ते । काममनोज्ञशब्दादयास्तेषां हेतवः स्कन्धास्तत्पुद्गलसमूहाः, अनेनैकमङ्गमुक्तम् ॥ १७ ॥

मित्तवं नायवं होइ, उच्चागोए य वण्णवं ।
अप्पायंके महापन्ने, अभिजाए जसोबले ॥ १८ ॥

मित्राणि विद्यन्ते यस्य स मित्रवान् १, ज्ञातिर्विद्यते यस्य स ज्ञातिमान्-स्वजनवान् २, पुनरुच्चैर्गोत्रं यस्य स उच्चैर्गोत्रः ३, पुनर्वर्णवान् शरीरे सद्वर्ण-युक्तः ४, पुनरल्पातङ्कोऽल्प आतङ्को यस्य सोऽल्पातङ्कः ५, पुनः कीदृशः ? महाप्रज्ञो महती प्रज्ञा यस्य स महाप्रज्ञो-महाबुद्धिः ६, अभिजातो विनीतः ७, पुनर्यशस्वी ८, पुनर्बली - बलवान् ९, 'जसो बले' इत्युभयत्र मत्त्वर्थीय-यलोपः अङ्गनवकमिहोक्तम् ॥ १८ ॥

भुच्चा माणुस्सए भोए, अप्पडिरूवे अहाउयं ।
पुव्वं विसुद्धसद्धम्मे, केवलं बोहिबुज्झिया ॥ १९ ॥

चउरंगं दुल्लहं नच्चा, संजमं पडिवज्जिया ।
तवसा धुयकम्मंसे, सिद्धहवइ सासए ॥ २० ॥ त्तिबेमि ॥

तत्र स मनुष्योऽप्रतिरूपः सर्वोत्कृष्टरूपधारी सन् यथायुषं मनुष्यायुषं यावन्मनुष्य-भोगान् भुक्त्वा पुनर्यथावसरे केवलां निष्कलङ्कां बोधिं-सम्यक्त्वं बुद्ध्वा-प्राप्य, पुनश्चतुरङ्गीं दुर्लभां ज्ञात्वा संयमं प्रतिपद्य शाश्वतः सिद्धो भवति । कीदृशः स पुरुषः ? पूर्वं विशुद्धसद्धर्मः पूर्वं-पूर्वजन्मनि विशुद्धो-निदानरहित सद्धर्मो यस्य स विशुद्धसद्धर्मः, पुनः कीदृशः सः ? तपसा धुतकर्मांशः, तपसा दूरीकृतकर्मलेश इति सुधर्मास्वामी जम्बूस्वामिनं प्रत्याह-हे जम्बू ! अहमिति ब्रवीमि ॥ २० ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्य-
लक्ष्मीवल्लभगणिविरचितायां तृतीयाध्ययनस्यार्थः सम्पूर्णः ॥

॥ अथ चतुर्थमसंस्कृताख्यमध्ययनं प्रारभ्यते ॥

अथ तृतीयाध्ययने चतुरङ्गी दुर्लभोक्ता, चतुर्थाध्ययने तां प्राप्य प्रमादस्त्याज्य इत्युच्यते, इति तृतीयचतुर्थाध्ययनयोः सम्बन्धः ।

असंखयं जीविय मा पमायए, जरोवणीयस्स हु नत्थि ताणं ।
एवं वियाणाहि जणे पमत्ते, कन्नू विहिंसा अजिया गहिंति ॥ १ ॥

हे भव्या जीवितमायुरसंस्कृतं वर्तते, यत्नशतैरप्यसतो वर्धयितुं त्रुटितस्य वा, [1]कर्णवत्सन्धानं कर्तुमशक्यत्वात्, जीवितं हि केनापि प्रकारेण सन्धातुं न शक्यत इत्यर्थः । ततो मा प्रमादीर्मा प्रमादं कृथाः, 'हु' इति निश्चयेन जरयोपनीतो जरोपनीतः, तस्य वृद्धत्वेन मरणसमीपं प्रापितस्य पुरुषस्य त्राणं-शरणं नास्ति । हे भव्य ! पुनरेवं विशेषेण जानीहि । एवमिति किं ? विहिंस्रा विहिंसनशीला अतिशयेन पापाः, कं शरणं ग्रहीष्यन्ति ? 'नु' इति वितर्के, कीदृशा विहिंस्राः ? अजिता-अजितेन्द्रियाः, पुनः कीदृशाः ? प्रमत्ताः-प्रमादिनः, इन्द्रियवशवर्तिनां प्रमादिनां पापानां जरा-मरणाद्युपद्रवे कश्चिच्छरण्यो नास्ति, 'जणे पमत्ते' इति प्रथमाबहुवचनस्थाने प्राकृतत्वात्सप्तम्येकवचनम् ॥ १ ॥

जे पावकम्मेहिं धणं मणूस्सा, समाययंती अमइं गहाय ।
पहाय ते पासपयट्टिए नरे, वेराणुबद्धा नरयं उविंति ॥ २ ॥

'जे' इति ये मनुष्याः पापकर्मभिर्धनमर्जयन्ति-धनमुत्पादयन्ति, ते मनुष्या वैरानुबद्धाः, पूर्वोपार्जितद्वेषबन्धनबद्धाः, नरकं व्रजन्ति, किं कृत्वा धनमुपार्जयन्ति ? अमतिं गृहीत्वा, न मतिरमतिस्तामममतिं-कुमतिमङ्गीकृत्य, अथवाऽमृतमानन्दम्, आनन्दहेतुं गृहीत्वैहिकसुख-हेतुकं धनं विचार्य, किं कृत्वा नरकं व्रजन्ति ? पापकर्मभिरुपार्जितं धनं प्रहाय त्यक्त्वा, कीदृशास्ते मनुष्याः ? पाशप्रवर्तिताः, पाशेषु पुत्र-कलत्र-धनप्रमुखबन्धनेषु प्रवर्तिताः पाशप्रवर्तिताः, धनं हि नरके व्रजतो जीवस्य सार्थे नायाति, एकाक्येव महारम्भमहा-परिग्रहवशान्नरकं यातीत्यर्थः ॥ २ ॥

'जरोवणीयस्स हु नत्थि ताणं' अत्र अट्टणमल्ल कथा -

उज्जयिन्यां जितशत्रुनृपस्याट्टणमल्लो वर्तते, स च प्रतिवर्षं सोपारके गत्वा सिंहगिरिराज्ञः सभायां मल्लान् विजित्य जयपताकां लाति । अन्यदा राज्ञैवं चिन्तितं परदेश्योऽयमट्टणमल्लो मत्सभायां जित्वा बहु द्रव्यं प्राप्नोति, मदीयः कोऽपि मल्लो न जीयते (जयति), नैतद्वरम्, एवं हि ममैव महत्त्वक्षतिर्जायते, इति मत्वा कञ्चिद्बलवन्तं [2]मत्सीनरं दृष्ट्वा स्वमल्लं चकार,

---

१ कार्मुकवत् - मु० ॥ २ मच्छीमार

तस्य त्वरितमेव मल्लविद्याः समायाताः, मत्सीमल्ल इति नाम कृतम्। अन्यदाट्टणमल्लः सोपारके समायातस्तेन समं राज्ञा मत्सीमल्लस्य युद्धं कारितम्, जितो मत्सीमल्लः, अट्टणः पराजितः, स्वनगरे गत एवं चिन्तयति, मत्सीमल्लस्य तारुण्येन बलवृद्धिर्मम तु वार्धक्येन बलहानिः, ततोऽन्यं स्वपक्षपातिनं मल्लं करोमि।

ततोऽसौ बलवन्तं पुरुषं विलोकयन् भृगुकच्छदेशे समागतः। तत्र हिरणीग्रामे एकः कर्षक एकेन करेण हलं वाहयन् द्वितीयेन फलहीयमुत्पाटयन् दृष्टः, स भोजनाय स्वस्थानके सार्धं नीतः, तस्य बहु भोजनं दृष्टम्, उत्सर्गसमये च सुदृढमल्पं पुरीषं दृष्ट्वा मल्लविद्या ग्राहिता, फलहीमल्ल इति नाम कृतम्, अट्टणः सोपारके फलहीमल्लं गृहीत्वा गतः, राज्ञा मत्सीमल्लेन समं फलहीमल्लस्य युद्धं कारितम्, प्रथमे दिवसे द्वयोः समतैव जाता, अट्टणेन स्वोत्तारके फलहीमल्लः पृष्टो हे पुत्र ! तवाङ्गे क्व प्रहारा लग्नास्तेन स्वाङ्गप्रहारस्थानानि दर्शितानि, अट्टणेनौषधीरसेन तानि स्थानानि तथा मर्दितानि, यथासौ पुनर्नवीभूतः। मत्सीमल्लस्यापि राज्ञा पृष्टं क्व तवाङ्गे प्रहारा लग्नास्तत्स्थानं दर्शय ? फलहीमल्लः पुनर्नवीभूतः श्रूयते, मत्सीमल्लोऽभिमानान्न स्वस्थानं दर्शयति, वक्ति चाहं पुनर्नवीभूतः फलहीपितरं जयामि। द्वितीयदिवसे पुनर्युद्धावसरे द्वयोरपिसाम्यमेव जातम्, तृतीयदिवसे मत्सीमल्लो जितः, फलहीमल्लेनाट्टणेन च स्वपराभवः स्मारितः, ततो मत्सीमल्लेनान्याययुद्धाचरणेन फलहीमल्लस्य मस्तकं छिन्नम्, खिन्नोऽट्टणमल्लो गत उज्जयिनीम्, तत्र विमुक्तयुद्धव्यापारः स्वगृहे तिष्ठति, परं जराक्रान्त इति न कस्मैचित्कार्याय क्षम इति स्वजनैः पराभूयते।

अन्यदा स्वजनापमानं दृष्ट्वा तदनापृच्छ्यैव कौशाम्बीं नगरीं गतः, तत्र वर्षमेकं यावद्रसायनं भक्षितवान्, ततः सोऽत्यन्तं बलवान् जातः। उज्जयिन्यां राजपर्षदि मल्लमहे प्रवर्तमाने पुनर्नवागतयौवनेनाट्टणमल्लेन समागत्य राज्ञो नीरङ्गणनाम महामल्लो जितः, राज्ञा तु मदीयोऽयं मल्ल आगन्तुकेनानेन मल्लेन जित इति कृत्वा न प्रशंसितः, लोकोऽपि राजप्रशंसामन्तरेण मौनभागजातः, अट्टणस्तु स्वस्वरूपज्ञापनार्थं सभापक्षिणः प्रत्याह भो भो पक्षिणो ब्रुवन्तु ? अट्टणेन नीरङ्गणो जितः। ततो राज्ञोपलक्षितो मदीय एवायमट्टणमल्ल इति कृत्वा सत्कृतः, बहुद्रव्यं चास्मै राज्ञा दत्तम्, स्वजनस्तं तथाभूतं श्रुत्वा तत्सन्मुखमागत्य मिलितः, सत्कारादि च चकार। अट्टणेन चिन्तितं द्रव्यलोभादेते मम साम्प्रतं सत्कारं कुर्वन्ति, पश्चान्निर्द्रव्यं मामपमानयिष्यन्ति, जरापरिगतस्य मे न कश्चित् त्राणाय भविष्यति, यावदहं सावधानबलोऽस्मि तावत्प्रव्रजामीति विचार्य गुरोः समीपेऽट्टणेन दीक्षा गृहीता इति 'जरोवणीयस्स हु नत्थि ताणं' अत्राट्टणमल्लकथा समाप्ता।

तेणे जहा संधिमुहे गहीए, सकम्मुणा किच्चइ पावकारी ।
एवं पया पिच्च इहं च लोए, कडाण कम्माण न मुक्खु अत्थि ॥ ३ ॥

यथा स्तेनश्चौरः सन्धिमुखे-खात्रद्वारे गृहीतः स्वकर्मणा, स्वकीयकृतखात्रचातुर्येण कृत्वा कृत्यते-शरीरे छिद्यते, काष्ठफलके कपिशीर्षाकार उत्कीर्णखात्रसङ्कीर्णद्वारेण शरीरे विदार्यत इत्यर्थः। कीदृशश्चौरः ? पापकारी, अत्र दृष्टान्तः-

क्वचिन्नगरे कस्यचिद्व्यवहारिणः फलकरचिते गृहे केनचिच्चौरेण प्राकारकपिशीर्षाकृतिक्षात्रं दत्तम्, तत्र प्रविशन्नन्तःस्थजागरूकगृहस्वामिना बहिःस्थचौरेण चाकृष्यमाणो विलपन्नेव मृतः। एवममुना दृष्टान्तेन प्रजा-लोकः प्रेत्य-परलोके, च पुनरिहेहलोके कृत्यते-पीड्यत इत्यर्थः। इह लोके च धनार्जनार्थं क्षुत्तृषा-शीता-ऽऽतपसहन-पर्वतारोहण-जलधितरण-नृपसेवन-सङ्ग्रामे प्रहारसहनादिक्लेशेन, परभवे च विविधनरकक्षेत्रवेदना-परमाधार्मिकविनिर्मितव्यथया कृत्यत इत्यर्थः। कथं हि परलोके पीड्यते तत्र हेतुमाह - कृतानामुपार्जितानां कर्मणां मोक्षो नास्ति ॥ ३ ॥

अत्र पुनश्चौरकथा -

क्वापि ग्रामे कोऽपि चौरो दुरारोहे मन्दिरे क्षात्रं दत्वा द्रव्यं लात्वा स्वगृहं गतः, प्रत्यूषे कः किं वदतीति वार्ताश्रवणाय क्षात्रासन्नलोकमध्ये गतः, लोकास्तु तत्रेत्थं वदन्ति कथमत्र लघीयसि क्षात्रे चौरः प्रविष्टो निर्गतो वेति लोकवाक्यं श्रुत्वा स्वकटीं विलोकयन् भूपनरैर्धृतो व्यापादितश्च ॥ ३ ॥

संसारमावन्न परस्स अट्ठा, साहारणं जं च करेइ कम्मं ।
कम्मस्स ते तस्स उ वेयकाले, न बंधवा बंधवयं उविंति ॥ ४ ॥

संसारं समापन्न संसारी जीवः परस्यार्थं परार्थं-परनिमित्तं पुत्र-मित्र-कलत्रस्व-बान्धवाद्यर्थं यत्साधारणमुभयार्थमात्म-परनिमित्तं यत्कर्म करोति, ते मित्र-पुत्र-कलत्रादयः स्वबान्धवास्तस्य पापकर्मकारिणः पुरुषस्य पापकर्मफलवेदकाले विपाककाले बान्धवतां -बन्धुभावं दुःखवण्टनभावं नोपयान्ति ॥ ४ ॥

अत्राभीरीवञ्चककथा -

यथा - क्वापि ग्रामे कोऽपि वणिग्हट्टे क्रयविक्रयं करोति, अन्यदैकाभीरी तद्धट्टे आगता, तया भणितं भो रूपकद्वयस्य मे रुतं देहि ? तेनोक्तमर्पयामि, अर्पितं तया रूपकद्वयम्, तेन वणिजैकस्यैव रूपकस्य रुतं वारद्वयं तोलयित्वार्पितम्, सा जानाति मम रूपकद्वयस्य रुतं दत्तम्, वञ्चिता च सा, तस्यां गतायां स चिन्तयत्येष रूपको मया मुधा लब्धः ततोऽहमेवमुपभुञ्जामि, तस्य रूपकस्य घृतखण्डादि लात्वा स्वगृहे विसर्जितम्, भार्यायाः कथापितमद्य घृतपूरान् कुर्याः ? तया घृतपूराः कृताः तावता तद्गृहे समित्रो जामाता समायतः, तस्यैव तया घृतपूराः परिवेषिताः, समित्रेण तेन भक्षिताः, गतः समित्रो जामाता, वणिग् गृहे समायातः, स्नानं कृत्वा भोजनार्थमुपविष्टः, तया स्वाभाविकमेव भोजनं परिवेषितम्, वणिग्भणति कथं न कृता घृतपूराः ? तयोक्तं कृताः, परमागन्तुकेन समित्रेण जामात्रा भक्षिताः, स चिन्तयति मया सा वराक्याभीरी वञ्चिता, परार्थमेवायमात्मा पापेन संयोजितः, एवं चिन्तयन्नेवासौ शरीरचिन्तार्थं बहिर्गतः, तदानीं ग्रीष्मो वर्तते, स मध्याह्नवेलायां कृतशरीरचिन्त एकस्य वृक्षस्याधस्ताद्विश्रमार्थमुपविष्टः, तेन मार्गेण गच्छन्तं

साधुं दृष्टवान्, वणिगुवाच भो साधो ! विश्राम्यतां ? साधुनोक्तं शीघ्रं मया स्वकार्ये गन्तव्यम्, वणिजोक्तं भगवान् कोऽपि परकार्ये गच्छति ? साधुः प्राह-यथा त्वं स्वजनार्थं क्लिश्यसि, अनेनैकेनैव वचनेन स बुद्धः, प्राह-भगवान् ! यूयं क्व तिष्ठथ ? साधुना भणितमुद्याने, स साधुना समं तत्र गतः, तन्मुखाद्धर्ममाकर्ण्य भणति भगवन्नहं प्रव्रजिष्यामि, नवरं स्वजनमापृच्छामि, गतो निजगृहे, बान्धवान् भार्यां च भणति, अत्रापणे व्यवहारतो मम तुच्छलाभोऽस्ति, देशान्तरं यास्यामि, सार्थवाहद्वयमत्रायातमस्ति, एकः सार्थवाहो मूलद्रव्यमर्पयति, इष्टपुरं नयति, न च लाभं गृह्णाति, द्वितीयो मूलद्रव्यमर्पयति, सह गमनाल्लाभं च गृह्णाति, तत्केन सह गमनं युज्यते ? तैरुक्तं प्रथमेन सह व्रज । अथ स वणिक् स्वजनैः समं वने गत्वोवाचायं मुनिः परलोकसार्थवाहः, स्वकीयमूलद्रव्येण व्यवहारं कारयति, मोक्षपुरं च नयतीति दृष्टान्तदर्शनपूर्वकं स्वजनानापृच्छ्य स वणिक्तस्य गुरोः समीपे दीक्षां जग्राहेति ॥ ४ ॥

वित्तेण ताणं न लभे पमत्ते, इमंमि लोए अदुवा परत्थ ।
दीवप्पणट्ठेव अणंतमोहे, नेयाउयं दट्ठुमदट्ठुमेव ॥ ५ ॥

प्रमत्तः- प्रमादी मनुष्यो वित्तेन-द्रव्येण कृत्वा 'इमंमि लोए' अस्मिन् लोकेऽथवा परलोके त्राणं-स्वकृतकर्मतो रक्षणं न लभेत-न प्राप्नुयात् ।

वेश्यागृहस्थपुरोहितपुत्रवत्-

कस्मिंश्चिन्नगरे कोऽपि राजा इन्द्रमहोत्सवे सान्तःपुरो निर्गच्छन् निर्घोषं कारयामास, सर्वे पुरुषा नगराद्बहिरायान्तु, योऽत्र स्थास्यति तस्य महादण्डो भविष्यति, तत्र राजवल्लभः पुरोहितपुत्रो वेश्यागृहे प्रविष्टो राजपुरुषघोषणां श्रुत्वापि ततो न निर्गतः, राजपुरुषैर्गृहीतोऽप्यसौ राजवल्लभत्वेन दर्पं कुर्वन्न तेभ्यः किञ्चिद्ददौ, तैस्तु राजसमीपे नीतः, राज्ञा त्वाज्ञाभङ्गकत्वेनास्य शूलादण्डः कथितः, पुरोहितेन तत्पित्रा सर्वस्वमहं ददामीत्युक्तं तथापि राज्ञा नायं मुक्तः, शूलायामारोपित एवेति ।

दीपप्रणष्टः-प्रणष्टदीपः पुरुषो भावोद्योतरहितः पुरुषो यथा नैयायिकं सम्यग्दर्शनादितत्त्वं दृष्ट्वाऽदृष्टमिव करोति, कीदृशः प्रणष्टदीपः पुरुषः ? अनन्तमोहः, अनन्तोऽविनाशी मोहो दर्शनावरणमोहनीयात्मको यस्य सोऽनन्तमोहः, एतादृशोऽज्ञानीत्यर्थः, अत्र प्राकृतत्वात् षष्ठ्यर्थे प्रथमापि, प्रणष्टदीपस्य-प्रणष्टसम्यक्त्वस्य, अनन्तमोहस्योदितमिथ्यात्वस्य नैयायिकं सम्यग्दर्शनतत्त्वं लब्धमलब्धमिव स्यात्, प्राप्तं सम्यक्त्वमप्राप्तमिव स्यात्, तद्दर्शनफलस्याभावात् । लब्धस्य सम्यक्त्वस्य हानितोऽलब्धमेव, न केवलं प्रमादी पुमान् वित्तेन त्राणं न लभेत, किन्तु प्रमादी त्राणकारणं नरकादिभयनिवारणहेतुं सम्यग्ज्ञानादिरत्नत्रयमपि हन्तीत्यर्थः ।

अत्र खनिप्रविष्टधातुर्वादी पुरुषो यथा प्रणष्टदीपो जातः, तस्य दृष्टपूर्वोऽपि मार्गोऽदृष्टवज्जातः, अत्र तत्कथा ।

केचिद्धातुवादिनः सदीपाः [1]सैन्धवा बिलं प्रविष्टाः, तत्प्रमादाद्दीपे विध्याते महातमोमोहिता इतस्ततो भ्रमन्तः प्रचण्डेन विषधरेण दष्टा गर्तायां पतिता मृताः, एवं प्राप्तसम्यक्त्वा अपि जीवा महामोहवशात्पुनर्मिथ्यात्वं गच्छन्तीति परमार्थः ॥ ५ ॥

सुत्तेसु यावी पडिबुद्धजीवी, न वीससे पंडिए आसुपन्ने ।
घोरा मुहुत्ता अबलं सरीरं, भारंडपक्खीव चरप्पमत्तो ॥ ६ ॥

प्रतिबुद्धजीव्यनिद्रोऽप्रमादी पुमानन्येषु सुप्तेष्वप्यविवेकिनरेषु निद्रायुक्तेषु सत्स्वपि न विश्वसेद्विश्वासं नैव कुर्यात्, कीदृशः सः ? आशुप्रज्ञः, तत्कालयोग्यबुद्धिमान्, आशु-शीघ्रं कार्याऽकार्येषु प्रवृत्ति-निवृत्तिरूपा प्रज्ञा मतिर्यस्य स आशुप्रज्ञः, यतो मुहूर्ताः-कालविशेषा घोराः प्राणापहारित्वाद्दौद्दाः शरीरमबलं बलरहितं भवति, मृत्युदायिमुहूर्तान् ज्ञात्वाऽप्रमत्तः सन् भारण्डपक्षीव चर ।

एकोदराः पृथग्ग्रीवा, अन्योन्यफलभक्षिणः ।
प्रमादात्ते विनश्यन्ति, यथा भारण्डपक्षिणः ॥ १ ॥

हे साधो ! तथा तवापि प्रमादात्संयमजीवितस्य भ्रंशो भविष्यति ।

अत्रागडदत्तराजपुत्रकथा -

उज्जयिन्यां जितशत्रुराज्ञोऽमोघरथो नाम रथिकोऽस्ति, तस्य यशोमती नाम भार्यास्ति, तयोः पुत्रोऽगडदत्तो नाम्ना वर्तते । अन्यदा तस्य बालभावेऽपि पिता मृतः, सोऽभीक्ष्णं रुदन्तीं मातरं दृष्ट्वा पृच्छति हे मातर्वारंवारं किं रोदिषि ? सा प्राह-तव पितुः पदं विभूतिं चैषोऽमोघप्रहारी रथिको भुङ्क्ते, त्वं कलास्वकुशलस्तेन तव हस्ते पितुः पदं विभूतिश्च नायात्यतोऽहमत्यन्तं खिन्ना निरन्तरं रोदिमि, बालेन भणितं स कोऽप्यस्ति यो मम कलाः शिक्षयति ? माता प्राहास्ति कौशाम्ब्यां दृढप्रहारी नाम कलाचार्यस्तत्र स त्वामवश्यं कलाकुशलं करिष्यति, अगडदत्तो गतः कौशाम्ब्याम्, दृष्टो दृढप्रहारीनामा कलाचार्यः, कथितं तेन तस्य मातुः खेदकारणम्, कलाचार्येण पुत्र इवासौ स्वपार्श्वे रक्षितः, स्तोक-कालेनैव कलासु कुशलः कृतः ।

अन्यदा राजकुले प्रेषितः तेन सभायां दर्शिताः कलाः, चमत्कृतः सकलोऽपि लोकः पुनः पुनः साधुवादमवदत्, राजा तु नास्ति किञ्चिदाश्चर्यमिति वदन्न किंचिदधिकमुवाच, उचिताचारपालनायेदं पुनरुवाच-कुमार ! तुभ्यं किं ददामि ? कुमार आह-हे राजंस्त्वं साधुकारमपि न दत्से ? किमन्येन दानेनेति । अस्मिन्नेवावसरे राजा पौरैरेवं विज्ञप्तः, हे राजन् ! भवत्पुरेऽश्रुतपूर्वं चौरेण द्रव्यापहरणं वारंवारं क्रियमाणमस्ति, एवं च राजलज्जा न तिष्ठति, ततो नगररक्षायत्नः क्रियताम् ।

तदैव राज्ञा तलारक्ष आज्ञप्तः सप्ताहोरात्रमध्ये यथा चौरो गृह्यते तथा कर्तव्यम्, तदानीं तत्रस्थोऽगडदत्तः प्राह-राजन् ! अहं सप्ताहोरात्रमध्ये चौरं तव चरणमूलमुपनेष्यामि, राज्ञा तद्वचोऽङ्गीकृतम्, एवं कुर्विति वारंवारमुक्तम् ।

---

१ सिन्धु नद्यां गताः ।

ततो हृष्टोऽगडदत्तो राजकुलान्निर्गत्य चिन्तयति दुष्टपुरुषाश्च तस्कारश्च प्रायः पानीयस्थाने नानाविधलिङ्गधारिणो भ्रमन्तीत्यहं तच्छुद्धये तटाकोपवनेषु यामीति चिन्तयित्वा नगराद्बहिरेक एवैकस्य शीतलच्छायस्य सहकारपादपस्य तले मलिनाम्बर उपविष्टः, चौरग्रहणोपायं च चिन्तयन्नस्ति, तस्यैवसहकारस्य छायायामायात एकः परिव्राजकः स्थूलजानुर्दीर्घजङ्घः, कुमारेण दृष्टश्चिन्तितं च नूनमेभिर्लक्षणैरयं चौर एवेति, भणितं च तेन परिव्राजकेन वत्स ! कुतस्त्वमायातः ? किं निमित्तं च भ्रमसि ? कुमारेण भणितं भगवन्नहमुज्जयिनीतोऽत्रागतः, क्षीणविभवो भ्रमामि, तेन भणितं पुत्र तवाहं विपुलमर्थं ददामि, अगडदत्तेन भणितं तर्ह्ययमनुग्रहीतः । सन्तो हि निष्कारणमुपकारिणः स्युः । एवं तयोरभिलापं कुर्वतोरेव सूर्योऽस्तं गतः ।

रात्रौ तेन त्रिदण्डाच्छस्त्रं कर्षितम्, बद्धः कच्छः, नगरीं याम इति वदन्नेव समुत्थितः, सोऽगडदत्तोऽपि सशङ्कितस्तमनुगच्छति, चिन्तयति चैष एव स तस्कर इति द्वावपि प्रविष्टौ नगरीम्, तत्रातिप्रेक्षणीयमतीवोन्नतं कस्यापीभ्यस्य गृहं दृष्टम्, तत्र क्षात्रं दत्तम्, परिव्राजकस्तन्मध्ये प्रविष्टः, अगडदत्तो बहिःस्थश्चिन्तयति चौरस्तु मया ज्ञातः, परमस्य स्वरूपं सर्वं तावत्पश्यामीति परिव्राजकेनानेकभाण्डभृताः पेट्य एव कर्षिताः, अगडदत्त-समीपे ताः स्थापयित्वा गतो देवकुले, ततोऽनेके भारवाहिन आनीतास्तेषां शिरसि ताः स्थापिता, सर्वेऽपि गताः पुराद्बहिः ।

तापसः कुमारं प्रत्याह हे पुत्रात्र जीर्णोद्याने निद्रासुखमनुभवामः, इत्युक्त्वा सर्वेऽपि सुप्ता निद्राणाश्च । परिव्राजकश्च कपटनिद्रया सुप्तः, अगडदत्तस्तु नैतादृशानां विश्वासः कार्य इत्यवधार्य क्षणं कपटनिद्रया सुप्त्वा तत उत्थाय वृक्षान्तरितः स्थितः, तान् पुरुषान् निद्रावशगतान् ज्ञात्वा स परिव्राजकः [1]कङ्कपत्र्या मारितवान्, अगडदत्तस्त्वस्तरे च समागत्य तं तत्रापश्यन् पश्चाद्बलितस्तावतागडदत्तेन तदन्तिके समागत्य खड्गप्रहारेण प्रकामं हतः, पतितः पृथिव्याम् । अगडदतं प्रत्याहवत्स ! गृहाणेमं मम खड्गं, व्रज श्मशानस्य पश्चिमे भागे, तत्र भूमिगृहे भित्तौ स्थित्वा शब्दं कुर्याः, तत्र मम भगिनी वसति, तस्या इमं मम खड्गं दर्शयेः, ततः संकेतकथनात्सा ते भार्या भविष्यति, सर्वद्रव्यस्वामी त्वं भविष्यसि, अहं तु गाढप्रहारान्मृत एवेति, मत्स्वरूपं च तां कथयेः ।

ततोऽगडदत्तः खड्गमादाय तत्र गतः, शब्दिता सा आयाता, तेन दृष्टातीवरूपवत्यवदत् कुतस्त्वमायातः ? स प्राह-गृहाणेमं खड्गं, तद्दर्शनमात्रेणैव तया सर्वं तस्य स्वभ्रातृस्वरूपं ज्ञातम्, मनस्येव शोकनिगूहनं कृतम्, अगडदत्तस्तद्गृहाभ्यन्तरं नीतः, दत्तमासनम्, तत्र स उपविष्टः, तथा विशिष्टादरेण शय्या रचिता, भणितं च स्वामिन्नत्र विश्राम्यतां, तयेत्युक्ते सुप्तस्तत्रागडदत्तः, सा गृहाद्बहिर्निर्गता, तावतागडदत्तेन चिन्तितमस्या अपि विश्वासो नैव कार्य इति शय्यात उत्थाय अन्यत्र गृहकोणे स्थितः सः, तया तु तच्छय्योपरिष्टात्पूर्वं यन्त्रचालनेनैव मुक्ता शिला, पतन्त्या तया शय्या चूर्णिता, सात्यन्तं हर्षवती दत्तालैवं वदति हतो मया भ्रातृघातकः, ततोऽगडदत्तेन त्वरितं सा केशेषु गृहीता भणिता च हा

---

१ बाणविशेष ।

दासि ! केयं ते धीस्त्वं मां हनिष्यसि ? सा तत्पादयोः पतिता, तव चरणौ मे शरणमिति बभाण । अथ तेन सा मा भयं कुर्वीत्याश्वासिता, स्वकरे गृहीता, राजकुले नीता, कथितश्च समस्तवृत्तान्तः राज्ञा सोऽगडदत्तः पूजितः विप्रशंसितश्च । एवमप्रमत्ता इहैव कल्याणभाजो भवन्ति । उक्तो द्रव्यसुप्तेषु प्रतिबुद्धजीवदृष्टान्तः ।

एतावदुत्तराध्ययनबृहद्वृत्तिगतमगडदत्तव्याख्यानं लिखितम् अथ कथाग्रन्थलिखितमगडदत्ताख्यानं लिख्यते-

शङ्खपुरे सुंदरनृपः, तस्य सुलसा प्रिया, तत्सुतोऽगडदत्तः, स च सप्तव्यसनानि सेवते, लोकानां गृहेष्वप्यन्यायं करोति, लोकैस्तदुपालम्भा राज्ञो दत्ताः, राज्ञा स निर्वासितो गतो वाराणस्याम्, पठन् चण्डोपाध्यायगृहे स्थितः, द्विसप्ततिकलावान् जातः, गृहोद्याने कलाभ्यासं कुर्वन् प्रत्यासन्नगृहगवाक्षस्थया प्रधानश्रेष्ठिसुतया मदनमञ्जर्या तद्रूपमोहितया च प्रक्षिप्त-पुष्पस्तबकतः सञ्जातप्रीतस्तन्मय एव जातः, अन्यदा तुरगारूढः स नगरमध्ये गच्छन्नस्ति, तावतेदृशो लोककोलाहलः श्रुतो यथा-

"[1]किं चलिओव्व समुद्दो, किं वा जलिओ हुआसणो घोरो ।
किं पत्तं रिउसेण्णं, तडिदंडो निवडिओ किं वा ॥ १ ॥

मिंठेणवि परिचत्तो, मारंतो सुंडि गोपुरं पत्तो ।
सवडं मुहं चलंतो, कालुव्व अकारणे कुद्धो ॥ २ ॥"

तावता तेन कुमारेणाश्वं मुक्त्वा स हस्ती गजदमनविद्यया दान्तः, पश्चात्तमारुह्य राजकुलासन्नमायातो राज्ञा दृष्टः, आकारितो मानपूर्वम्, कुमारेण तं गजमालानस्तम्भे बद्ध्वा राज्ञः प्रणामः कृतः, राज्ञा चिन्तितं कश्चिन्महापुरुषोऽयम्, यतोऽत्यन्तविनीतो दृश्यते, यतः-

"[2]सालीभरेण तोयेण, जलहरा फलभरेण तरुसिहरा ।
विणएण य सप्पुरिसा, नमंति न हु कस्सइ भएण ॥ १ ॥"

ततो विनयरञ्जितेन राज्ञा तस्य कुलादिकं पृष्टं कियान् कलाभ्यासः कृत इत्यपि पृष्टम्, कुमारस्तु लज्जालुत्वेन न किञ्चिज्जगौ, उपाध्यायेन तस्य कुलादिकं सर्वविद्यानैपुण्यं कथितम्, कुमारवृत्तान्तं श्रुत्वा चमत्कृतो भूपतिः । अथ तस्मिन्नवसरे राज्ञः पुरो नगरलोकः प्राभृतं मुक्त्वैवमूचिवान्-

हे देव ! त्वन्नगरं कुबेरपुरसदृशं कियद्दिनानि यावदासीत् साम्प्रतं रोरपुरतुल्यमस्ति, केनापि तस्करेण निरन्तरं मुष्यते, अतस्त्वं रक्षां कुरु । राज्ञा तलारक्षा आकारिताः, भृशं वचोभिस्तर्जिताः, तैरुक्तं महाराज ! किं क्रियते ? कोऽपि प्रचण्डस्तस्करोऽस्ति, स बहूपक्र-

---

१ किं चलित इव समुद्रः, किं वा ज्वलितो हुताशनो घोरो ।
किं प्राप्तं रिपुसैन्यं तडिद्दण्डो निपतितः किं वा ॥ १ ॥
हस्तिपकेनापि परित्यक्तो, मारयन् सुण्ढि गोपुरं प्राप्तः । अभिमुखं चलन्, काल इव अकारणे क्रुद्धः ॥ २ ॥

२ शालीभृतेन तोयेन, जलधरा फलभृतेन तरुशिखराः ।
विनयेन च सत्पुरुषा, नमन्ति न हु कस्यापि भयेन ॥ ३ ॥

मेऽपि न दृश्यते । ततः कुमारेणोक्तं राजन्नहं सप्तदिनमध्ये तस्करकर्षणं चेन्न करोमि तदाग्निप्रवेशं करोमीति प्रतिज्ञा कृता, राज्ञा तु पुरलोकप्राभृतं कुमाराय दत्तम् । कुमारस्तत उत्थाय चौरस्थानानि विचारयति, यथा-

"[१]वेसाण मंदिरेसु, पाणागारेसु जूयट्ठाणेसु ।
[२]कुल्लरियावणेसु अ, उज्जाणनिवाणसालासु ॥ १ ॥
मठसुन्नदेवलेसु अ चच्चरचउहट्टसुन्नसालासु ।
एएसु ठाणेसु, पाएणं तक्करो होई ॥ २ ॥"

एवं चौरस्थानानि पश्यतः कुमारस्य षड् दिना गताः, पश्चात्सप्तमे दिने नगराद्बहिर्गत्वा तरोरधः स्थित एवं चिन्तयति -

"[३]छिज्जउ सीसं अहवा, होउ बंधणं चयउ सव्वहा लच्छी ।
पडिवन्नपालणेसु, पुरिसाणं जं होइ तं होउ" ॥ १ ॥

एवं चिन्तयन्नसौ कुमार इतस्ततो दिगवलोकनं करोति । तस्मिन्नवसरे एकः परिहितधातुवस्त्रो मुण्डितशिरःकूर्चस्त्रिदण्डधारी चामरहस्तः किमपि 'बुड् बुड्' इति शब्दं मुखेन कुर्वाणः परिव्राजकस्तत्रायातः, कुमारेण दृष्टश्चिन्तितं चायमवश्यं चौरो यतोऽस्य लक्षणानीदृशानि सन्ति, यथा -

"[४]करिसुंडाभुयदंडो, विसालवत्थलो फरुसकेसो ।
नवजुव्वणो रउद्दो, रत्तच्छो दीहजंघो य" ॥ १ ॥

एवं चिन्तयतः कुमारस्य तेन कथितमहो सत्पुरुष ! कुतस्त्वमायातः ? केन कारणेन च पृथिव्यां भ्रमसि ? भणितमुज्जयिनीतोऽहमत्रायातोऽस्मि, दारिद्र्यभग्नश्च भ्रमामि । परिव्राजक उवाच-वत्स ! मा खेदं कुरु, अद्य तव दारिद्र्यं छिनद्मि समीहितमर्थं च ददामि । ततो दिवसं यावत्तौ तत्र स्थितौ, रात्रौ कुमारसहितश्चौरः कस्यचिदिभ्यस्य गृहे गतः, तत्र क्षात्रं दत्तवान्, तत्र स्वयं प्रविष्टः, कुमारस्तु बहिः स्थितः, परिव्राजकेन द्रव्यभृताः पेटिकास्ततो बहिः कर्षिताः, ताः क्षात्रमुखे कुमारसमीपे मुक्त्वा स्वयमन्यत्र कुत्रचिद्गत्वा दारिद्र्यभग्नाः पुरुषा अनेके आनीताः, तेषां शिरस्सु ताः पेटिका दत्वा कुमारेण समं स्वयं बहिर्गतः ।

---

१ "वेश्यानां मन्दिरेषु, पानागारेषु द्यूतस्थानेषु । कान्दविकापणेषु च, उद्याननिपानशालासु ॥ १ ॥
मठ-शून्यदेवलेषु च, चत्वर-चतुष्पथशून्यशालासु । एतेषु स्थानेषु, प्रायः तस्करो भवति ॥ २ ॥"

२ कुल्लूरियवणेसु L.। 'कुल्लूरिअ' एवं कुल्लरिअ'
द्वावपि कान्दविकार्थे स्तः । द्रष्टव्यः पाइअसद्दमहण्णवो प. २५६ ॥

३ "छिद्यते शीर्षम् अथवा, भवतु बन्धनं, त्यजतु सर्वथा लक्ष्मी ।
प्रतिपन्नपालनेषु, पुरुषानां यद् भवति तद्भवतु ॥ १ ॥"

४ हस्तिशुण्डाभुजदण्डो, विशालवक्षस्थलः कर्कशकेशः । नवयौवना रौद्रो, रक्ताक्षो दीर्घजङ्घश्च ॥ १ ॥

स तापसः कुमारं प्रत्येवमुवाच-कुमार ! क्षणमात्रं वने तिष्ठामः, निद्रासुखमनुभवामः, परिव्राजकेनेत्युक्ते सर्वेऽपि पुरुषास्तत्र सुप्ताः, कपटनिद्रया परिव्राजकोऽपि सुप्तः, कुमारोऽपि नैतादृशानां विश्वासः कार्य इति कपटनिद्रयैव सुप्तः, तावता स परिव्राजक उत्थाय तान् सर्वान् कङ्क्पत्र्या मारयामास, यावत्कुमारसमीपे समायाति, तावत्कुमार उत्थाय तं खड्गेन जङ्घाद्वये जघान, छिन्ने जङ्घाद्वये स तत्रैव पतितः कुमारं प्रत्येवमुवाच हे वत्साहं भुजङ्गनामा चौरः, ममेह श्मशाने पातालगृहमस्ति, तत्र वीरपत्नी नाम्नी मम भगिन्यस्ति । अथ वटपादपस्य मूले गत्वा तस्याः शब्दं कुरु । यथा सा भूमिगृहद्वारमुद्घाटयति, त्वां च स्वस्वामिनं करिष्यति।

सङ्केतदानार्थं मत्खड्गं गृहाणेत्युक्ते कुमारस्तत्खड्गं गृहीत्वा तत्र गतः, स तु तत्रैव मृतः, कुमारेण सा शब्दिता, आगता च सा द्वारमुद्घाटयामास । कुमारेण भ्रातुः खड्गं दर्शयित्वा स्वरूपमुक्तम्, तस्या अन्तः खेदो जातः, परं न मुखे खेदं दर्शयामास मध्ये आकारितः कुमारः, पल्यङ्के शायितः, उक्तं च तव विलेपनाद्यर्थं चन्दनादिकमहमानयामीति । ततो निर्गता सा, कुमारेण चिन्तितं प्रायः स्त्रीणां विश्वासो न कार्यः; यतः शास्त्रे इमे दोषा प्रायो भवन्ति -

[1]माया अलियं लोभो, मूढत्तं साहसं असोयत्तं ।
निस्संतिया तहच्चिय, महिलाण सहावया दोसा ॥ १ ॥

एतस्यास्तु तथाविधचौरभगिन्या विश्वासो नैव कार्य इति विचिन्त्य कुमारः शय्यां मुक्त्वान्यत्र गृहकोणे स्थितः, सा बहिर्गत्वा यन्त्रप्रयोगेण शय्योपरि शिलां मुमोच, तया शय्या चूर्णिता । ततः कुमारेण सा सद्यः साक्रोशं केशेषु धृत्वा राज्ञः समीपे आनीता, प्रोक्तः सर्वोऽपि वृत्तान्तः, राज्ञा तद्भूमिगृहात्समस्तं वित्तमानाय्य लोकेभ्यो दत्तम्, कुमारेण सा जीवन्ती मोचिता, पश्चान्नृपाग्रहात् कुमारेण नृपसुता कमलसेना नाम्नी परिणीता, नृपेण कुमारस्य सहस्रं ग्रामा दत्ताः, शतं गजा दत्ताः, दशसहस्राण्यश्वा दत्ताः, लक्षं पदातयश्च दत्ताः, ततः सुखेन कुमारस्तत्र तिष्ठति ।

अन्यदा कलाभ्याससमये यया श्रेष्ठिसुतया सह प्रीतिर्जातास्ति तया मदनमञ्जर्या कुमारसमीपे दूती प्रेषिता; तयोक्तं तव गुणानुरक्ता तवैवेयं पत्नी भवितुं वाञ्छति, कुमारेणाप्युक्तं - यदाहं शङ्खपुरं यास्यामि तदा त्वां गृहीत्वा यास्यामीति तस्यास्त्वया वक्तव्यम् ।

अथान्यदा तत्र पित्रा प्रेषिता नराः कुमाराकारणाय समेताः, कुमारस्तु तेषां वचनमाकर्ण्य पितुर्मीलनाय भृशमुत्कण्ठितः श्वशुरं पृष्ट्वा कमलसेनया समं चलितः, चलनसमये च मदनमञ्जर्याकारिता, सापि कुमारेण समं चलिता, ताभ्यां प्रियाभ्यां सह सैन्यवृतः कुमारः पथि चलन् बहून् भिल्लान् सन्मुखमापततो ददर्श, तदा कुमारसैन्येन तैः

---

१ "मायाऽलिकं लोभो, मूढत्वं साहसमशौचत्वम् ।
निःशान्तिका [नृशंसता (?)] तथाचैव, महिलानां स्वाभाविका दोषाः ॥ १ ॥"

समं युद्धं कृतम्, भग्नं कुमारसैन्यम्, भिल्लैर्लुण्टितमितस्ततो गतम्, भिल्लपतिस्तु कुमाररथे समायातः, उत्पन्नबुद्धिना कुमारेण स्वपत्नी रथाग्रभागे निवेशिता, तस्या रूपेण मोहं गतो भिल्लपतिः कुमारेण हतः, पतिते च तस्मिन् सर्वेऽपि भिल्ला नष्टाः, कुमारस्तु तेनैवैकेन रथेन सह गच्छन्नग्रे महतः सार्थस्य मिलितः, सार्थोऽपि सनाथ इव मार्गे चलितः ।

कियन्मार्गं गत्वा सार्थिकैः कुमारायैवमुक्तम्, कुमार ! इतः प्रवरमार्गे भयं वर्तते, ततः प्रवरमार्गं विहायापरमार्गेण गम्यते, कुमारेणोक्तं किं भयं ? ते कथयन्त्यस्मिन् प्रवरमार्गे महत्यटवी समेष्यति, तस्या मध्ये महानेकश्चौरो दुर्योधननामा वर्तते, द्वितीयस्तु गर्जारवं कुर्वन् विषमो गजो वर्तते, तृतीयो दृष्टिविषसर्पो वर्तते, चतुर्थो दारुणो व्याघ्रो वर्तते । एवं चत्वारि भयानि तत्र वर्तन्ते । कुमारः प्राहैतेषां मध्ये नैकस्यापि भयं कुरुत, चलत सत्वरं मार्गे, कुशलेनैव शङ्खपुरे यास्यामः ।

ततः सर्वेऽपि तस्मिन्नेवाध्वनि चलिताः, अग्रे गच्छतां तेषां दुर्योधनश्चौरस्त्रिदण्डभाग्मिलितः सोऽपि पान्थोऽहं शङ्खपुरे यास्यामीति वदन् सार्थेन सार्धं चलति, मार्गे चैकः सन्निवेशः समायातस्तदा त्रिदण्डिनोक्तं ममोपलक्षितोऽयं सन्निवेशो वर्तते, तेनात्र गत्वा मया दध्याद्यानीयते यदि भवतां रुचिः स्यात् । सार्थिकैरुक्तमानीयतां, ततस्तेन तदन्तर्गत्वा दध्याद्यानीतम्, विषमिश्रितं कृत्वा सर्वेषां पायितम्, मृताः सर्वे सार्थिकाः, अगडदत्तेन भार्याद्वययुतेन तन्न पीतमिति न मृतः, स त्रिदण्डी पुनः सन्निवेशमध्ये गत्वा कियत्परिवारयुतो गृहीतशस्त्रः कुमारमारणायायातः, कुमारेण खड्गं गृहीत्वा सन्मुखं गत्वा घोरसङ्ग्रामकरणेन स हतः, परिवारस्तु नष्टः, भूमौ पतता तेन चौरेणैवमुक्तमहं दुर्योधनश्चौरः प्रसिद्धः, त्वयाहं हतो न जीविष्यामि, परं मम बहुद्रव्यं वर्तते, मम भगिनी जयश्रीनाम्न्यस्मिन् वनमध्ये वर्तते, तत् त्वया गृहीतव्यम्, सा च पत्नी कार्या, कुमारस्तत्र गतः, साहूता समायाता, दृष्टः कुमारः, ज्ञातस्तया भ्रातृवृत्तान्तः, तया कुमारोऽपि गुहामध्ये आकारितः, तत्र गच्छन् मदनमञ्जर्या वारितः, तां तत्रैव मुक्त्वा रथारूढः कुमारोऽग्रे चलितः, कियन्मार्गं यावद्गतेन कुमारेण प्रचण्डशुण्डादण्डप्रभग्नतरुकोटिनिघृष्टगिरितटः सवेगं सन्मुखमागच्छन् यम इव रौद्ररूपो गजो दृष्टः ।

ततः कुमारो रथादुत्तीर्य गजाभिमुखं प्रचलितः, उत्तरीयवस्त्रवेष्टिकां कृत्वा गजाग्रे मुमोच, गजस्तत्प्रहारार्थं शुण्डादण्डमधः क्षिपन् यावदीषन्नतस्तावता कुमारस्तद्दन्ताग्रद्वये पादौ कृत्वा तत्स्कन्धेऽधिरूढः, वज्रकठिनाभ्यां स्वमुष्टिभ्यां तत्कुम्भस्थलद्वयं जघान, कुमारेण प्रकाममितस्ततो भ्रामयित्वा स गजो वशीकृतः, पश्चात्स गजो गौरिव शान्तीकृतो मुक्तश्च, तत्रैव पुनः कुमारो रथे निविष्टोऽग्रे चलितः, कियन्मार्गं यावद् गच्छति कुमारस्तावत्कुण्डलीकृतलाङ्गुलः स्वरवेण गिरिप्रतिच्छन्दान् विस्तारयन् विद्युच्चञ्चललोचनः सर्पोपमां रसनां स्वमुखकुहरान्निष्कासयन् व्याघ्रः समायातः, तेनापि समं कुमारो युद्धं कृतवान्, कुमारेण कर्कशप्रहारैर्जर्जरितः व्याघ्रस्तत्रैव पतितः, कुमारस्ततोऽग्रे चलितः, सर्पोपद्रवोऽपि मार्गे विद्ययैव निवर्त्तितः, कुशलेन कुमारः स्त्रीद्वयसंयुतः शङ्खपुरे प्राप्तः, प्रवेशमहोत्सवः प्रकामं पितृभ्यां कृतः, सर्वेषां पौराणां परमानन्दः सम्पन्नः, तत्र सुखेन कुमारस्तिष्ठति ।

अन्यदा वसन्ते मदनमञ्जर्या सह कुमार एकाक्येव क्रीडावने गतः, तत्र रात्रौ मदनमञ्जरी सर्पेण दष्टा, मृतेव सञ्जाता ।

कुमारस्तु तन्मोहादग्नौ प्रविशन् गगनमार्गेण गच्छता विद्याधरेण वारितः, विद्याबलेन सा जीविता, विद्याधरस्तु स्वस्थानं गतः, कुमारस्तया समं रात्रिवासार्थं कस्मिंश्चिद्देवकुले गतः, तत्र तां मुक्त्वोद्योतकरणायाग्निमानेतुं कुमारो बहिर्गतः, तदानीं तत्र पञ्च पुरुषाः पूर्वं कुमारहत-दुर्योधनचौरभ्रातरः कुमारवधाय पृष्ठावागता इतस्ततो भ्रान्त्वा कुमारछल-मलभन्तः समायाताः सन्ति, तैस्तु तत्र दीपको विहितः, मदनमञ्जर्या तेषां मध्ये लघुभ्रातू रूपं विलोकितम्, रूपाक्षिप्तयानया तस्यैव प्रार्थना विहिता त्वं मम भर्ता भव अहं तव पत्नी भवामि, तेनोक्तं तव भर्तरि जीवति सति कथमेवं भवति, सा प्राह तमहं मारयिष्यामि, तदानीमग्निं गृहीत्वा कुमारस्तत्र प्राप्तः, आगच्छन्तं कुमारं दृष्ट्वा तया तत्रस्थो दीपो विध्यापितः, तत्रायातेन कुमारेण पृष्टमत्रोद्योतः कथमभूत् ? तयोक्तं तव हस्तस्थस्याग्ने-रेवोद्योतः, सरलेन तेन तथैवाङ्गीकृतम्, मदनमञ्जर्या हस्ते खड्गं दत्वा कुमारोऽग्निप्रज्वलनार्थं ग्रीवामधश्चकार, तावता तया कुमारवधार्थं खड्गं प्रतीकारान्निष्कासितम्, तस्याश्चरित्रं दृष्ट्वा चौरलघुभ्रातुर्वैराग्यमुत्पन्नम् ।

पश्चादस्या हस्तात्तेन खड्गमन्यत्र पातितम्, पञ्चापि भ्रातरस्ततः कुमाराऽलक्षिताः शनैः शनैर्निर्गताः कस्मिंश्चिद्वने गताः, तैस्तत्र चैत्यमेकमुत्तुङ्गं दृष्टम्, तत्र सातिशयज्ञानी साधुरेको दृष्टः, तत्समीपे तैः पञ्चभिरपि दीक्षा गृहीता, ततस्तदाज्ञां पालयन्तः संयमे रतास्तत्रैव तिष्ठन्ति, कुमारेण नैतत्किमपि ज्ञातम् ।

अथ कुमारस्तत्र मदनमञ्जर्या सह रात्रिमेकामुषित्वा प्रभाते स्वगृहे समायातः, कियद्दिनानन्तरमश्वापहृत एक एवागडदत्तकुमारस्तस्मिन्नेव वने तत्रैव चैत्ये गतस्तत्र देवान्नमस्कृत्य साधवो वन्दिताः, गुरुणा देशना दत्ता, कुमारेण पृष्टं भगवन् ! क एते पञ्चापि भ्रातर इव साधवः ? कथमेषां वैराग्यमुत्पन्नम् ? कथमेभिर्यौवनभरेऽपि व्रतं गृहीतम् ? एवं कुमारेण पृष्टे गुरुः प्राह सर्वं तदीयं वृत्तान्तम् । कुमारस्तच्चरित्रं श्रुत्वा युवतीस्वरूपमेवं विचिन्तयति-

"[1]अणुरज्जंति खणेणं, जुवईओ खणेण पुणो विरज्जंति ।
अन्नन्नरागणिरया, हलिद्दरागुव्व चलपेमा ॥ १ ॥"

इति विचिन्त्य कुमारोऽपि वैराग्यात्प्रव्रजितः । यथासावगडदत्तः प्रतिबुद्धजीवी पूर्वं द्रव्यासुप्तः, पश्चाद्भावासुप्तोऽपीहलोके परलोके च सुखी जातः ॥ ६ ॥

चरे पयाइं परिसंकमाणो, जं किंचि पासं इह मन्नमाणो ।
लाभंतरे जीविय वूहइत्ता, पच्छा परिन्नाय मलावधंसी ॥ ७ ॥

---

१ अनुरज्यन्ति क्षणेण, युवतयः क्षणेण पुनः विरज्यन्ति ।
अन्यान्यरागनिरता, हलिद्दराग इव चलत्प्रेमा ॥ १ ॥

साधुः संयममार्गे पदानि धर्मस्थानानि परिशङ्कमानश्चारित्रदूषणानि विचारयंश्चरेत्, संयममार्गे विहरेत्, किं कुर्वाणः ? यत्किञ्चिदपि गृहस्थपरिचयादिकं प्रमादपदं दुश्चिन्तनादिकं बन्धस्य हेतुत्वात्पाशमिव मन्यमानः, पुनः साधुर्लाभान्तरे जीवितं बृंहयित्वा पश्चात्परिज्ञाय मलापध्वंसी स्यात्। कोऽर्थः ? एकस्माल्लाभादन्यो लाभो लाभान्तरम्; तस्मिन् लाभान्तरे सति ज्ञान-दर्शन-चारित्रादीनां लाभविशेषे सति जीवितं शरीरं बृंहयित्वा-आहारभाटकदानेन धारयित्वा पश्चाल्लाभप्राप्तेरभावं (ज्ञपरिज्ञया) कृत्वेदं मम शरीरम्, अतः परं ज्ञानादिगुणार्जकं नास्तीति परिचिन्त्य प्रत्याख्यानपरिज्ञया भक्तं प्रत्याख्यायाष्टकर्म-लक्षणमलस्यापध्वंसको-निवारकः स्यात् ॥ ७ ॥

अत्र मण्डिकचौरोदाहरणमुत्तराध्ययनबृहद्वृत्तिगतं प्राकृतं संस्कृतीकृत्य लिख्यते-

बेन्नातटे मण्डिकनामा तुन्नकश्चौरः परद्रव्यहरणासक्त आसीत्। स च दिवसे राजमार्गमध्यस्थः पादयोर्मे गण्डानीति वदन् बद्धपट्टकपादौ मुखेन भृशमाक्रन्दन् तुन्नक-शिल्पमुपजीवति, रात्रौ च व्यवहारिगृहे क्षात्रं दत्वा बहुधनं गृह्णाति, नगरोद्यानान्तः-स्थितभूमिगृहकूपके सर्वं क्षिपति, तत्र चास्य भगिनी कन्या तिष्ठति, यांश्च भारवाहकान-सावानयति तान् सर्वानेषा स्वयं पादशौचादिबहूपचारपूर्वकं भोजनपङ्क्तावुपवेश्य विषमिश्रितभोजनदानेन मारयति, अपरकूपान्तर्निक्षिपति च। एवं काले व्रजति सति तेन चौरेण तन्नगरं भृशं मुषितम्। अन्यदा तन्नगरे मूलदेवो राजा राज्ये उपविष्टः, स कथं तत्र राजा संवृत इति तदाख्यानमुच्यते-

उज्जयिन्यां नगर्यां सर्वगणिकाप्रधाना देवदत्ता नामा गणिकास्ति, तस्या गृहेऽचलो नाम व्यवहारिपुत्रः परदेशायातो भोगान् भुङ्क्ते, मार्गितमर्थं च ददाति, तस्या एव गृहे परदेशायातो राजपुत्रो मूलदेवोऽतिरूपसौभाग्यस्तयैव गुणबुद्ध्या मानितः, अचलप्रच्छन्न-मायाति, भोगानपि च भुङ्क्ते, सा तु मूलदेवेन सहैव प्रेमवती बभूव, परमचलस्तत्स्वरूपं न जानाति। एकदा देवदत्ताजनन्योक्तं- हे पुत्रि ! किमनेन मूलदेवेन निःस्वेन ? अचल-मेव भज, मूलदेवं त्यज। देवदत्ता प्राहायं पण्डितोऽतीवसौन्दर्यादिगुणवान्, जननी प्राहास्य मूलदेवस्य निःस्वत्वेन सर्वेऽपि गुणा गताः, अचलस्य च सस्वत्वेन सर्वेऽप्यौदार्यादिगुणाः सन्ति, यस्यौदार्यं तस्य सर्वगुणाधारत्वम्, चेन्न मन्यसे तदास्य मूलदेवस्याचलस्यापि चौदार्यपरीक्षां कुरु।

ततो देवदत्तयैका दासी मूलदेवस्य पार्श्वे प्रेषिता, एका चाचलस्य पार्श्वे, द्वयोरपि दासीद्वयं प्रत्येकमेवमुवाच देवदत्तेक्षुभक्षणं कर्तुमीहते, ततो मूलदेवेनेक्षुयष्टिद्वयं गृहीत्वा त्वचमपनीय शकलानि कृत्वा कर्पूरचूर्णवासनां दत्वा पवित्रभाजने क्षिप्त्वा प्रेषितानि, देवदत्ताम्बां प्राह पश्य मूलदेवस्य विवेकितां तदैवाचलेनेक्षुयष्टिभृतं शकटं प्रेषितम्, अक्का देवदत्तां प्रत्याह-पुत्रि पश्याचलस्यौदार्यं, सा प्राह-अहं किं करिण्यनेन ज्ञाता यस्यां कृते तेनासंस्कृतेक्षुयष्टिभृतं शकटं प्रेषितम् ?

अथाक्का मूलदेवस्य द्वेषिण्यचलपार्श्वे गत्वा देवदत्ताया मूलदेवासक्तस्वरूपमूचे, अचलेनोक्तं तथा कुरु यथाहं मूलदेवं गृह्णामि, तयोक्तमवश्यं मया तद्भोगावसरो ज्ञाप्यः, अचलेन तस्या दीनाराष्टशतं दत्तम्, सा गृहे गत्वा देवदत्ताया इदमकथयदचलोऽद्य त्वरितकार्ये समुत्पन्ने क्वचिद् ग्रामे चलितोऽस्ति, सोऽद्य नायास्यति, तथाप्यद्यदिनसत्कं भाटकं प्रेषितमस्ति, एवमुक्त्वा दीनाराष्टशतं तया देवदत्ताया दत्तम् , देवदत्तयापि मूलदेवस्तदानीमेवाकारितः, सोऽप्यागतस्तस्याः शयनीये सुप्त्वा भोगे प्रवृत्तः, तस्यां वेलायां तयाक्कया मूलदेवदेवदत्तासम्भोगस्वरूपमचलस्य ज्ञापितम्, अचलोऽपि सपरिवारस्तत्रायातः, देवदत्ता तं सपरिवारमायातं दृष्ट्वा मूलदेवं शयनीयादधश्चिक्षेपेतस्ततो वस्त्राणि विस्तारयामास च । अचलस्तु द्वारि सपरिवारं मुक्त्वा तद्वासगृहान्तर्गत्वा शयनीये उपविष्टः, देवदत्ता तु न किञ्चिदुवाच, नापि तस्य किञ्चिद्विलेपनाद्युपचारं चकार । अचलेन शयनीयाधः प्रविष्टो मूलदेवो ज्ञातः, स तस्या इदमूचेऽद्य मयात्रस्थेनैवाभ्यङ्गनस्नाने करिष्यते, देवदत्तयोक्तं शयनीयवस्त्रविनाशो भविष्यति, स आख्यत्तवापूर्ववस्त्रसहितमपूर्वं शयनीयं दास्यामीत्युक्त्वा तत्रैवाभ्यङ्गनं स्नानं च चकार । तन्मलक्लिन्नो मूलदेवः शय्याधःस्थ इतस्ततश्चलन्नचलेन शयनीयवस्त्रमपसार्य केशेषु गृहीत्वा निष्कासितः, उक्तमुच्चस्वरेण रे याहि, त्वं मया जीवन्नेव मुक्तः, अपराधस्तु तवेदृशोऽस्ति यत्साम्प्रतमेव त्वं मया हन्यसे, परं कृपया त्वं मया मुच्यसे, त्वमपि कदाचिन्ममापराधे ईदृशो भूयाः ।

एवमचलेनोक्ते लज्जितो मूलदेवः कुमार उज्जयिन्या निर्गतो बेन्नातटमार्गे प्रस्थितः, तदा तस्यैकः पुरुषो मिलितः, मूलदेवेन पृष्टं क्व त्वं यास्यसि ? तेनोक्तं बेन्नातटे यास्यामि, मूलदेवेनोक्तमहमपि तत्रैव प्रस्थितोऽस्मि, आवां सहैव व्रजावः, तेनोक्तमेवं भवत्विति द्वावपि सहैव प्रस्थितौ, तस्य पुरुषस्य शम्बलं वर्तते, मूलदेवस्य किमपि शम्बलं नास्ति, अन्तराटवी समायाता, द्वावप्यटव्यां प्रविष्टौ, मूलदेवश्चिन्तयत्येष मे शम्बलविभागं करिष्यति, स च भोजनसमये स्वयं भुङ्क्ते , न किञ्चिद्ददाति, मूलदेवस्त्वद्यानेन न किञ्चिद्दत्तं परं कल्ये दास्यतीत्याशयैवाग्रतो गच्छति । एवं दिनत्रयं यावन्मूलदेवेन न किञ्चिल्लब्धं न किञ्चिद्भुक्तम् । चतुर्थदिने मूलदेवेन स पुरुषः पृष्टोऽत्र क्वचित्प्रत्यासन्नो ग्रामोऽस्ति न वा ? तेनोक्तमितस्तिर्यक्प्रदेशे नातिदूरे ग्रामो वर्तते, परमहं तत्र न यास्यामि, अग्रे यास्यामीत्युक्त्वा स पुरुषोऽग्रे चलितः, मूलदेव एकाक्येव तत्र गतः, भिक्षां भ्रमता च मूलदेवेन राद्धाः कुल्माषा लब्धाः, तान् वस्त्राञ्चले गृहीत्वा मूलदेवो ग्रामाद्बहिर्याति तावता मासोपवासपारणके यतिरेको भिक्षार्थं ग्रामान्तः प्रविशन् मूलदेवेन दृष्टः, भक्त्युल्लासेन ते कुल्माषा मूलदेवेन तस्मै साधवे दत्ताः, साधुरपि द्रव्य-क्षेत्र-काल-भावशुद्धांस्तान् गृहीतवान्, मूलदेवेन परमया भक्त्या भणितम्-

"[1]धन्नाणं खु नराणं, कुम्मासा हुंति साहुपारणए" ।

[उप० पद० गा० ११ वत्त्यां गा० ६१]

१ "धन्यानां खलु नराणां, कुल्माषा भवन्ति साधुपारणके ॥"

अथ तत्प्रदेशाधिष्ठात्र्या देव्या मूलदेवस्योक्तं वत्स ! एतस्या गाथाया द्वितीयार्धे यन्मार्गयसि तद्ददामीति । मूलदेवेन गाथाद्वितीयार्धमिदं कृतम् -

"[1]गणिअं च देवदत्तं, दंतिसहस्सं च रज्जं च ॥ १ ॥

[उप० पद० गा० ११ वृत्यां गा० ६२]

देवतया भणितमेतत्तवाचिरेणैव भविष्यति ।

ततो मूलदेवो बेन्नातटे गतः, देश्यकुट्यां सुप्तः, तत्र कार्पटिका अपि बहवः सुप्ताः सन्ति, तेषां मध्ये एकेन कार्पटिकेन स्वमुखे प्रविशंश्चन्द्रो दृष्टः, तादृश एव स्वप्नो मूलदेवेन दृष्टः, कार्पटिकेन तु प्रातरुत्थाय गुरोः पुरः स्वप्नः उक्तः, गुरुणापि त्वमद्य घृतगुडसहितं मण्डकं प्राप्स्यसीति बभाषे, मूलदेवस्तत उत्थाय नगरान्तः स्वप्नपाठकगृहे गत्वा घनं विनयं कृत्वा स्वप्नपाठकाय स्वस्वप्नमाचख्यौ । तेनोक्तं सप्तमदिवसे तव राज्यं भविष्यतीति ।

तस्मिन्नवसरे तत्रापुत्रो राजा मृतः, सामन्तैर्मन्त्रिभिश्च पट्टाश्वोऽभिषिक्तः; सप्तमे दिवसे मूलदेवसमीपेऽश्वः समागत्य हेषारवं चक्रे, स्वपृष्टौ च मूलदेवमध्यारोपितवान्, सामन्ताद्यैर्योग्योऽयमिति कृत्वा राज्येऽभिषिक्तः, मूलदेवस्तत्र सहस्रदन्तिराज्यं प्राप्तः, उज्जयिनीनृपेण सार्धं प्रीतिं चकार, अनेकद्रव्यलक्षप्राभृतानि प्रेषितवान् । एकदा मूलदेवेन तत्पार्श्वे देवदत्ता मार्गिता, तेन प्रीतिपरवेशन सा प्रेषिता, मूलदेवेन स्वपट्टराज्ञी कृता, तया समं यथेष्टं मूलदेवो भोगान् भुङ्क्ते ।

अन्यदा तत्र समुद्रमार्गादचलः समायातः, माण्डविकैः शुल्कचौर्याद्बद्धो मूलदेवराज्ञः पुर आनीतः, मूलदेवेन राज्ञा स उपलक्षितः, कथितं च त्वं मामुपलक्षयसि ? स आह कस्त्वां नोपलक्षयति ? त्वं महाराजः, मूलदेवेनोक्तं सोऽहं मूलदेव इत्युक्त्वा बन्धनान्मोचितो विसर्जितश्च । एवं मूलदेवो निश्चिन्तस्तत्र राज्यं करोति ।

स मूलदेवो नगरलोकेभ्यश्चौरपराभवं ज्ञात्वान्यं नगररक्षकं कृतवान्, सोऽपि चौरं ग्रहीतुं न शक्तः, तदा मूलदेवः स्वयं नीलपट्टं प्रावृत्त्य रात्रौ निर्गतः, इतस्ततो भ्रमन् यत्र स तुन्नको मण्डिकचौरोऽस्ति तत्रैवायातस्तत्पार्श्वे च कपटनिद्रया सुप्तः, अपरेऽपि दारिद्र्यभग्नाः पुरुषास्तत्र सुप्ताः सन्ति, मण्डिकेन तावदाक्रन्दं कृतं यावन्मध्यरात्रिः समायाता, तदानीं तत उत्थाय सर्वेऽप्युत्थापिताः, मूलदेवोऽप्युत्थापितः, आयान्तु मया सार्धं सर्वानपि धनवतः करोमीति वदन् तैः सार्धं पुरान्तर्भ्रान्त्वैकस्य धनिकस्य गृहे क्षात्रं दत्वा बहूनि धनानि निष्कास्य सर्वेषां तेषां शिरसि पोट्टलिका दत्ताः, मूलदेवस्य शिरस्येकः पोट्टलिको दत्तः, सर्वानप्यग्रे कृत्वा स्वयं खड्गपाणिः पृष्ठौ स्थितः, श्मशानान्तर्भूमिगृहे सर्वेऽपि प्रवेशिताः, ततः पोट्टलकधनानि कूपान्तश्चिक्षेप, सर्वेषामपि तेषां पादशौचं तत्रस्थया चौरभगिन्या दत्तम्, स्वयं पादक्षालनं चक्रे, मूलदेवपादक्षालनावसरे तत्पादतले पद्मं दृष्ट्वा सौकुमार्यादिना कोऽप्ययं महान् राजेति ज्ञातवती, नायं मया विनाश्य इति मत्वा तया मूलदेवस्य नेत्रसंज्ञा कृता, ततः स मूलदेवो नष्टः ।

---

१ "गणिकां च देवदत्तां, दन्तिसहस्रं च राज्यं च ॥"

पश्चात्तया चौरस्य स्वभ्रातुरुक्तमेष पुरुषो नष्टः, भ्रातापि गृहीतखड्गस्तत्पृष्ठौ चलितः, मूलदेवोऽपि तं प्रत्यासन्नमागतं दृष्ट्वा क्वचित्स्थाने बब्बरपाषाणशिवलिङ्गं स्वोत्तरीय-वस्त्रेणाच्छाद्य स्वयमंतरितः स्थितः, कोपान्धेन चौरेण तत्रागत्य स एवायं पुरुष इति कृत्वा शिवलिङ्गमस्तके कङ्कलोहमयखड्गप्रहारो दत्तः, तच्छिवलिङ्गं द्विधा कृतम्, हतो मया स पुरुष इति जानन् स्वस्थाने गत्वा सुप्तः, मूलदेवोऽपि स्वस्थाने गत्वा सुप्तः ।

प्रभाते स मण्डिकतुन्नकश्चतुष्पथान्तः समागत्य तथैवाक्रन्दं कुर्वन् स्थितः, राज्ञा च प्रभाते स्वपुरुषैः स आकारितः, राजपुरुषेषु तत्रायातेषु तेन चिन्तितं तदानीं मया स पुरुषो न हतः, किन्तु दृषदावेव खड्गप्रहारो दत्तः, यो नष्टः पुरुषः सोऽवश्यमत्रत्यो राजा, तेनैव ममाह्वातुं पुरुषाः प्रेषिताः, यामि तावत्तत्र, अथेतो न नष्टुं शक्यते, यद्भाव्यं तद्भवत्विति चिन्तयन्नेवासौ तैः पुरुषैः शनैः शनैर्व्रजन् राजसभायामानीतः, राज्ञाप्यसावभ्युत्थानादिना मानितः, अर्धासने निवेशित आश्वासितश्च, स्वनेपथ्यसमस्तस्य नेपथ्यो दत्तः, स्वभोज्यसमं भोजनं कारितः ।

अन्यदा तस्योक्तं स्वभगिनीं मम देहि, तेन सा दत्ता, सा परिणीता, राज्ञः प्रेमपात्री कृता । अन्यदा राज्ञोक्तं द्रव्यं मे विलोक्यते, त्वं धनी स्वकीयोऽसि, ततो मे द्रव्यं देहि ? तव चिन्ता तु ममैवास्ति, तेन राजमार्गितं द्रव्यं दत्तम्, स राजपार्श्वे सुखेन तिष्ठति । अन्यदा पुनरपि राज्ञा द्रव्यं मार्गितम्, तेन दत्तम्, राज्ञा तस्य महान् सत्कारः कृतः, पुनरपि राज्ञा द्रव्यं मार्गितम्, तेनापि तथैव दत्तम् । एवमन्तरान्तरा राज्ञा सत्कारपूर्वकं तस्य द्रव्यं गृहीतम्, भगिनी पृष्टा, अथास्त्यस्य किञ्चिद्धनम् ? सा प्राहायं रिक्तीकृतस्त्वया, नातःपरमस्य किञ्चिद्धनमस्तीति श्रुत्वा राज्ञासौ मण्डिकश्चौरः शूलायामारोपितः ।

अत्रायमुपनयो यथायमकार्यकार्यपि मण्डिकश्चौरो मूलदेवेन यावल्लाभं तावत्क्षि-तस्तथा धर्मार्थिनापि संयमलाभहेतुकं जीवितं रक्षणीयम्, यावत्कालं संयमलाभस्तावत्कालं जीवितमौषधादिभिः कृत्वा रक्षणीयम्, नान्यथेति ।

छंदं निरोहेण उवेइ मोक्खं, आसे जहा सिक्खियवम्मधारी ।
पुव्वाइं वासाइं चरप्पमत्तो, तम्हा मुणी खिप्पमुवेइ मुक्खं ॥ ८ ॥

साधुश्छन्दो निरोधेन मोक्षमुपैति, गुर्वादेशं विनैव प्रवर्तनं छन्दस्तस्य निरोधो निवारणं तेन गुर्वाज्ञया प्रवर्त्तनेन निर्भयस्थानं प्राप्नोति, को यथा ? शिक्षितवर्मधार्यश्वो यथा, यथाशब्द इवार्थे शिक्षा जाताऽस्येति शिक्षितः, वर्म-सन्नाहं धरतीति वर्मधारी, सन्नाहधारकः, एतादृश सुशिक्षितः कवचधारी चाश्वोऽश्ववारशिक्षायां स्थितश्छन्दो निरोधेन स्वेच्छागमन-निषेधेन मोक्षं प्राप्नोति, निर्भयं स्थानं प्राप्नोति, शत्रुभिर्हन्तुं न शक्यते, हे साधो ! पूर्वाणि पूर्वप्रमितानि वर्षाणि यावदप्रमत्तः सन् चर-साधुमार्गे विहर । तस्मादप्रमत्तविहारान्मुनिः क्षिप्रं मोक्षमुपैति ॥ ८ ॥

अत्र कुलपुत्र शिक्षिताश्वद्वयोदाहरणं -

एकेन राज्ञा द्वयोः कुलपुत्रयोः शिक्षणार्थमश्वौ दत्तौ, एकेन कुलपुत्रेण प्रथमो धावनवल्गनादिकलाः शिक्षितः, द्वितीयस्तु द्वितीयेन कुलपुत्रेण न शिक्षितः, सङ्ग्रामावसरे

प्रथमोऽश्वोऽथक्रः पोत इव सङ्ग्रामसागरमवगाह्य पारङ्गतः सुखी बभूव, द्वितीयस्तु सङ्ग्राममध्य एव मृतः, अत्रायमुपनयः-यथासावश्वः कुलपुत्रेण शिक्षितस्तथा धर्मार्थ्यपि स्वातन्त्र्यविरहितो गुरुशिक्षितः शिवमाप्नोति ॥ ८ ॥

स पुव्वमेवं न लभिज्ज पच्छा, एसोवमा सासयवाइयाणं ।
विसीयई सिढिले आउयंमि, कालोवणीए सरीरस्स भेए ॥ ९ ॥

यः पुरुषः पूर्वमेवाप्रमत्तत्वं न लभेत, स पुरुषः पश्चादपि पूर्वमिवाप्रमत्तत्वं न लभेत, एषा शाश्वतवादिनां निरुपक्रमायुषामुपमायुक्तिः यादृशो जीवः पूर्वं स्यात्तादृशः पश्चादपि स्यादिति शाश्वतवादिनो वदन्तीत्यर्थः । आयुषि शिथिले जाते सति शरीरस्य भेदे कालेनोपनीते सति-मरणे निकटे समागते सति विषीदति-विषण्णो भवति, अतःकारणात्पूर्वमपि पश्चादपि च न प्रमाद्यम् ॥ ९ ॥

खिप्पं न सक्केइ विवेगमेउं, तम्हा समुट्ठाय पहाय कामे ।
समिच्च लोगं समया महेसी, अप्पाणरक्खी चरप्पमत्तो ॥ १० ॥

हे भव्य ! क्षिप्रं-शीघ्रं विवेकं-द्रव्यभावेन सङ्गत्यागरूपमेतुं-प्राप्तुं भवान्न शक्नोति-न समर्थो भवति, तस्मादात्मरक्षी सन्नप्रमत्तश्च सन् त्वं विचर । किं कृत्वा ? समुत्थाय सम्यगुद्यमं विधाय, पुनः किं कृत्वा ? कामानिन्द्रियविषयान् प्रकर्षेण हित्वेति प्रहाय-त्यक्त्वा, पुनः किं कृत्वा ? लोकं-प्राणिसमूहं समया शत्रुमित्रोपरि साम्यभावेन समित्य-सम्यग् ज्ञात्वा ॥ १० ॥

अत्र ब्राह्मणीकथा -

एको ब्राह्मणः परदेशे गत्वा सर्वशास्त्रपारगो भूत्वा स्वदेशे समायातः, तस्य प्रकामं पाण्डित्यं दृष्ट्वैकेन ब्राह्मणेन कन्या दत्ता, तेन परिणीता, स च लोके भृशं दक्षिणां लभते, धनवान् जातः । तस्या भार्यायास्तेन बहून्याभरणानि दत्तानि, सापि तानि स्वाङ्गे परिहितान्येव रक्षति, न चाङ्गात्कदाचिदप्युत्तारयति, तेनैकदा तस्याः कथितमेष तुच्छग्रामोऽस्ति, नित्यमाभरणपरिधानमयुक्तम्, कदाचिद्यद्यत्र चौराः समायान्ति तदा तवाङ्गकदर्थना भवति, सा प्राह यदा चौराः समायास्यन्ति तदा त्वरितमङ्गादाभरणान्यहमुत्तारयिष्यामि ।

अन्यदा तस्या गृह एव चौराः समायाताः, सा तदानीं निबिडमङ्गलग्नान्याभरणानि स्वाङ्गादुत्तारयितुमसमर्था तथैव स्थिता, तस्याः साभरणान् पाण्याद्यवयवांश्छित्वा तैर्गृहीताः, सा च महतीं कदर्थनां प्राप्य मृता । एवमन्येऽपि प्राक्कृतकर्मविपाककाले विवेकमेतुं न शक्नुवन्ति ।

'समिच्चलोगं समया महेसी, अप्पाणरक्खी चरप्पमत्तो ।'

अत्र प्रमादपरिहारा-ऽपरिहारयोर्वणिग्महिलाद्वयोरुदाहरणम्-

एका वणिग्महिला प्रोषितपतिका निजवपुःशुश्रूषापरा गृहव्यापारेषु प्रमत्ता दासादीनां

यथार्हं भोजनाद्यप्यददाना तैर्मुक्ता, ततो गृहागतेन भर्त्रा स्वगृहे भृत्यविभवहानिं दृष्ट्वा सा स्त्री निष्कासिता। ततो वणिजा बहुद्रव्येणान्या परिणीता, सा च न स्वदेहशुश्रूषां करोति यथार्हं भृत्यान् भोजयन्ती कार्येषु नियुञ्जयन्ती च, भर्त्रा गृहस्वामिनी कृता। इहैव जन्मनि प्रथमस्त्री-वत्प्रमादाद्दोषान् प्राप्नोति, अप्रमादाद् द्वितीयस्त्रीवद् गुणानवाप्नोतीत्युपनयः ॥ १० ॥

मुहुं मुहुं मोहगुणे जयंतं, अणेगरूवा समणं चरंतं ।
फासा फुसंती असमंजसं च, न तेसु भिक्खू मणसा पओसे ॥ ११ ॥

स्पर्शाः-स्पृश्यन्त इन्द्रियैरिति स्पर्शाः-शब्दादयो विषयाः, श्रमणं-साधुमसमञ्जसं-प्रतिकूलं यथा स्यात्तथा स्पृशन्ति, साधुं प्रति दुःखदा भवन्ति कीदृशाः स्पर्शाः ? अनेक रुपास्त्रयोविंशतिविधाः, साधुं किं कुर्वन्तं ? मुहुर्मुहुः- वारंवारं मोहस्य गुणान् जयन्तं - शब्दादिविषयान् जयन्तं, भिक्षुस्तेषु प्रतिलोमेष्वनुलोमेषु वा न प्रादुष्येत-प्रद्वेषं न कुर्वीत न च हर्षितोऽपि भवेदित्यर्थः ॥ ११ ॥

मंदा य फासा बहुलोहणिज्जा, तहप्पगारेसु मणं न कुज्जा ।
रक्खेज्ज कोहं विणइज्ज माणं, मायं न सेविज्ज पयहिज्ज लोहं ॥ १२ ॥

च पुनः साधुस्तथाप्रकारेषु विषयेषु मनो न कुर्यात्, तथाप्रकारेष्विति कीदृशेषु ? स्पर्शाः कीदृशाः सन्ति ? तानाह-स्पर्शा मन्दा वर्तन्ते, मन्दयन्ति मूषयन्ति विवेकिनमिति मन्दाः, पुनः कीदृशाः स्पर्शाः ? बहुलोभनीया-बहु लोभयन्ति लोभमुत्पादयन्तीति बहुलोभनीयाः, पुनः साधुः क्रोधं रक्षेत्, पुनर्मानं विनयेत्, गर्वं स्फेटयेत्, मायां न सेवेत, लोभं प्रसह्यात्परित्यजेत् ॥ १२ ॥

जे संखया तुच्छ परप्पवाई, ते पिज्जदोसाणुगया परज्झा ।
एए अहम्मुत्ति दुगुंछमाणो, कंखे गुणे जाव सरीरभेओ ॥ १३ ॥ त्तिबेमि ॥

ये परप्रवादिनः संस्कृतास्तुच्छा यदृच्छाभिधानतया निःसारास्ते 'पिज्जदोसाणुगया' प्रेम - द्वेषानुगताः सन्ति पुनस्ते परज्झाः-परवशा राग-द्वेषग्रस्ताः सन्ति, एतेऽधर्महेतु-त्वादधर्मा इत्यमुना प्रकारेण जुगुप्समानस्तत्परिचयं निवारयन्, निन्दायाः सर्वत्र निषेधान्न निन्दन् गुणान्-ज्ञानादीन् काङ्क्षेताभिलषेत्, कथं यावच्छरीरभेदः शरीरस्य भेदः- पतनं स्यादित्यर्थः ॥ १३ ॥

इति प्रमादा-ऽप्रमादयोर्हेयोपादेयसूचकमसंस्कृतप्रथमपदोपलक्षितमसंस्कृताख्यं चतुर्थमध्ययनं सम्पूर्णम् ।

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणि-विरचितायां चतुर्थाध्ययनस्यार्थः सम्पूर्णः ॥

॥ अथ पञ्चममकाममरणाख्यमध्ययनं प्रारभ्यते ॥

अथ पूर्वाध्ययने यावच्छरीरभेद इति ब्रुवता मरणकालेऽप्यप्रमादः कार्य इत्युक्तम्, स च मरणविभागज्ञानतः स्यात्, अतो मरणभेदमाह, इति चतुर्थपञ्चमयोः सम्बन्धः ।

अण्णवंसि महोघंसि, एगे तिण्णे दुरुत्तरे ।
तत्थ एगे महापन्ने, इमं पण्हमुदाहरे ॥ १ ॥

एके महापुरुषा गौतमादयो घातिकर्मरहिता अर्णवात्संसारसमुद्रात्तीर्णाः- पारंप्राप्ताः, कीदृशादर्णवात् ? महौघात्-महानोघो यस्य स महौघस्तस्मात्, अत्र प्राकृतत्वाद्विभक्तिव्यत्ययः । हे जम्बू ! तत्र देव-मनुष्यसभायामेकस्तस्मिन् काले, अत्र भरतक्षेत्रे एकस्य तीर्थङ्करस्य विद्यमानत्वादेको महावीरः, इमं प्रश्नं प्रष्टव्यार्थरूपं प्रश्नयोग्यं वाक्यमुदाजहे-उदाहृतवान्, कथम्भूत एकः ? महाप्रज्ञः, महती केवलात्मिका प्रज्ञा-ज्ञप्तिर्यस्य स महाप्रज्ञः ॥ १ ॥

संतिमे य दुवे ठाणा, अक्खाया मारणंतिया ।
अकाममरणं चेव, सकाममरणं तहा ॥ २ ॥

इमे प्रत्यक्षे द्वे स्थाने आख्याते, जीवनिवासाश्रयावाख्यातौ, पूर्वं तीर्थङ्करैः कथितौ, कीदृशे द्वे स्थाने ? मारणान्तिके-मरणमेवान्तो मरणान्तस्तत्र भवं मारणान्तिकम्, तस्मिन् मरणावस्थायां जाते इत्यर्थः । ते द्वे स्थाने के ? एकमकाममरणं च-पुनरन्यत्तथा सकाममरणम्, अकाममरणम्-बालमरणम्, सकाममरणं-पण्डितमरणम्, चैवशब्दौ पादपूरणार्थौ । मरणं सप्तदशधा-आवीची-मरणम् १, अवधिमरणम् २, अन्तिम (क) मरणम् ३, वलन्मरणम् ४, वशार्तमरणम् ५, अन्तःशल्यमरणम् ६, तद्भवमरणम् ७, पण्डितमरणम् ८, बालमरणम् ९, मिश्रमरणम् १०, छद्मस्थमरणम् ११, केवलिमरणम् १२, वैहायसमरणम् १३, गृध्रस्पृष्टमरणम् १४, भक्तपरिज्ञामरणम् १५, इङ्गिनीमरणम् १६, पादपोपगमनमरणम् १७, [चेति] ॥ २ ॥

बालाणं अकामं तु, मरणं असइं भवे ।
पंडियाणं सकामं तु, उक्कोसेण सइं भवे ॥ ३ ॥

बालानां-मूर्खाणामकामम्, अकामेन-अनीप्सितत्वेन म्रियतेऽस्मिन्नित्यकाममरणमसकृद्वारंवारं भवेत्, तु पुनः पण्डितानां सकामम्, सह कामेनेप्सितेन म्रियतेऽस्मिन्निति सकाममरणम्, यस्मिन्नागते सत्यसन्त्रस्ततयोत्सवभूतत्वेन सकाममिव सकामम्, तादृशं मरणं पण्डितानामुत्कृष्टं सकृदेकवारमेव भवेत्, उत्कर्षेणोपलक्षितं केवलिसम्बन्धीत्यर्थः, जघन्येन तु शेषचारित्रवतः सप्ताष्टवारान् भवेत् ॥ ३ ॥

तत्थिमं पढमं ठाणं, महावीरेण देसियं ।
कामगिद्धे जहा बाले, भिसं कूराइं कुव्वई ॥ ४ ॥

तत्र तयोर्द्वयोर्मरणयोर्मध्ये प्रथमं स्थानं महावीरेणाकामं मरणं देशितं-कथितम्, तथा येन प्रकारेण कामगृद्धाः- कामेष्विन्द्रियसुखेषु गृद्धाः कामगृद्धा-विषयिणो जीवाः, अत एव बाला-मूर्खा भृशमत्यर्थं वारंवारमकाममरणमतिकुर्वते; अशक्तावपि मनसा दुष्कर्माणि कृत्वा मुहुर्मुहुर्म्रियन्त इत्यर्थः, कीदृशा मूर्खाः ? क्रूराः ॥ ४ ॥

जे गिद्धे कामभोगेसु, एगे कूडाय गच्छई ।
न मे दिट्ठे परे लोए, चक्खुदिट्ठा इमा रई ॥ ५ ॥

कामभोगेषु य एकः कश्चित्क्रूरकर्मा पुरुषः कूटाय-नरकस्थानाय नरकस्थानं गच्छति-नरकं व्रजतीत्यर्थः । कूटं-प्राणिनां पीडाकरं स्थानम्, द्वितीयास्थाने चतुर्थी प्राकृतत्वात् । अथवा य एकः कश्चित्कामभोगेषु गृद्धः स कूटाय गच्छति, मृषाभाषादि कूटम्, तस्मै प्रवर्तते, तं प्रति कश्चिद्वक्ति-भो त्वं धर्मं कुरु । तदा स वक्ति मया परलोको न दृष्टः, 'इमा' इयं रतिः कामभोगसुखं रतिः चक्षुर्दृष्टा - प्रत्यक्षं दृश्यमाना वर्तते ॥ ५ ॥

हत्थागया इमे कामा, कालिया जे अणागया ।
को जाणइ परे लोए, अत्थि वा नत्थि वा पुणो ॥ ६ ॥

इमे कामाः कामभोगा हस्तागताः, हस्ते आगता हस्तागताः-स्वाधीना वर्तन्त इत्यर्थः । येऽनागता - आगामिजन्मनि भविष्यन्तीत्यागामिनः, कामभोगसुखास्ते कालिकाः काले भवाः कालिका-अनिश्चिताः, को जानाति परलोकः- परभवोऽस्ति वा नास्ति वेति भावः ॥ ६ ॥

जणेण सद्धिं होक्खामि, इइ बाले पगब्भई ।
कामभोगाणुराएणं, केसं संपडिवज्जई ॥ ७ ॥

ततः स कामभोगरसगृद्धः पुमान् बाल इति प्रगल्भते इति धाष्टर्यं गृह्णाति, इत्युक्त्वा धृष्टो भवति, इतीति किं ? अहं जनेन सार्धं भविष्यामि, अयं कामभोगसुखभोक्ता जनो यादृशो भविष्यति, तेन सार्धमहमपि भविष्यामि । स बाल इत्युक्त्वा कामभोगानुरागेण-कामभोग-स्नेहेन क्लेशं सम्प्रतिपद्यते, क्लेशमिह परत्र च बाधात्मकं - दुःखं भजत इत्यर्थः ॥ ७ ॥

तओ से दंडं समारभई, तसेसु थावरेसु अ ।
अट्ठाए य अणट्ठाए, भूयग्गामं विहिंसई ॥ ८ ॥

ततः कामभोगानुरागात्स धाष्टर्यवान् त्रसेषु च पुनःस्थावरेषु, दण्डं समारभते, मनोदण्ड-वाक्कायैः पीडां समारभते, अर्थेन-द्रव्योत्पादननिमित्तम्, अनर्थेन-निष्प्रयोजनेन

वा भूतग्रामं, भूतानां-पृथिव्यप्तेजोवायुवनस्पत्येकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रिय-पञ्चेन्द्रियादिजीवानां वर्गं विशेषेण हिनस्ति । अत्राजापालकथा यथा -

एकः पशुपालो वटतलेऽजासु सुप्तासु वटपत्राणि छिद्रीकुर्वन्नश्वापहृतेन कुतश्चिदायातेन कस्यचिद्राज्ञः पुत्रेण दृष्टो भणितश्चारेऽहं यस्य कथयामि तदक्षीणि त्वं पातयिष्यसि किं ? तेन तत्प्रतिपन्नम्, राजपुत्रेण स स्वनगरे नीतः । एकदाऽश्ववाहनिकार्थं गच्छतो राज्ञोऽक्षिणी राजपुत्रप्रेरितः स पातयामास, पश्चात्स राजपुत्रो राजा जातः, पशुपालस्यैवमुवाच वरं वृणु । तेनोक्तं यत्राहं वसामि तदेव ग्रामं देहि, राज्ञा तद् ग्रामं तस्य दत्तम्, तेन च तत्र घनास्तुम्ब-वल्लय आरोपिताः, निष्पन्नेषु च तुम्बेषु गुडेन सार्धं तुम्बखण्डानि खादन् गायति, यथा -

[1]अट्टमट्टंपि सिक्खिज्जा, सिक्खियं न निरत्थयं ।
अट्टमट्टप्पसाएण, खज्जए गुडतुंबयं ॥ १ ॥

तेन हि पशुपालेन वटपत्राण्यनर्थाय छिद्रितानि, अक्षीणि पुनरर्थायोत्पाटितानि, उभयत्रापि प्राणिवधः कृत इति ॥ ८ ॥

हिंसे बाले मुसावाई, माइल्ले पिसुणे सढे ।
भुंजमाणे सुरं मंसं, सेयमेयंति मन्नई ॥ ९ ॥

स बालो हिंस्रो - हिंसनशीलो भवति, पुनर्मृषावादी भवति, 'माइल्लो'- मायाकारकः कापट्यवान्, पिशुनः-परनिन्दकः, पुनः शठो - वेषाद्यन्यथाकरणेन धूर्तो मूर्खो वा, सुरां मांसं च भुञ्जानोऽपि 'मे' ममैतत् श्रेयः-कल्याणमिति मन्यते, अत एव शठ इत्यर्थः ॥९॥

कायसा वयसा मत्ते, वित्ते गिद्धे अ इत्थिसु ।
दुहओ मलं संचिणुई, सिसुनागुव्व मट्टियं ॥ १० ॥

पुनः कीदृशः सः ? कायेन मत्तः, पुनर्वचसा मत्तः, पुनर्वित्ते - द्रव्ये गृद्धो लोभी, च पुनः स्त्रीषु गृद्धः, कायेन मत्तो यतस्ततः प्रवृत्तिमान् बलवानहं रूपवानहमिति चिन्तयन्, वा वचसात्मगुणान् कथयन् सुस्वरोऽहमिति वा चिन्तयन्, उपलक्षणत्वान्मनसा मदाध्मातो धारणादिशक्तिमानहमिति वा चिन्तयन् स 'दुहओत्ति' द्वेधा - द्वाभ्यां रागद्वेषाभ्यां मलं सञ्चिनुते मलसञ्चयं कुरुते, कः कामिव ? शिशुनागः-अलसो द्वीन्द्रियजीवविशेषो भूनागो यथा मृत्तिकां सञ्चिनुते, स च स्निग्धतनुतया बहिःप्रदेशे शरीरे रेणुभिरवगुण्ठ्यते, अन्तश्च मृत्तिकामेवाश्नाति, ततश्च मृत्तिकातो बहिर्निस्सरन् सूर्यकिरणैः शुष्यन् क्लिश्यति विनश्यति, विनश्य च मृत्तिकाया एव वृद्धिं कुरुते, तथा सोऽपि मलं कर्ममलं वर्धयति, कर्मणेवोत्पद्यते, पुनः कर्ममलवृद्धिं करोतीत्यर्थः ॥ १० ॥

---

१ "अट्टमट्टमपि शिक्षेत शिक्षितं न निरर्थकम् । अट्टमट्टप्रसादेन खाद्यते गुडतुम्बकम्" ॥ १ ॥

तओ पुट्ठो आयंकेण, गिलाणो परितप्पइ ।
पभीओ परलोगस्स, कम्माणुप्पेहि अप्पणो ॥ ११ ॥

ततोऽष्टकर्ममलसञ्चयादनन्तरमातङ्केन-रोगेण स्पृष्टः सन् ग्लानः-ग्लानिं प्राप्तः परितप्यते-परिखिद्यते परलोकात्प्रभीतः, कथंभूतः सः ? आत्मनः कर्मानुप्रेक्षी, यदा रोगादिग्रस्तो भवति तदा स्वयं जानाति मम कर्मणां विपाको जातः, मया पुरा यान्यशुभानि कर्माणि कृतानि तस्मादहं परलोकेऽपि दुःखी भविष्यामि, इति स्वकृतकर्मापेक्षी - स्वकृत-कर्मविचारक इत्यर्थः ॥ ११ ॥

सुया मे नरए ठाणा, असीलाणं च जा गई ।
बालाणं कूरकम्माणं, पगाढा जत्थ वेयणा ॥ १२ ॥

'मे' मया नरके स्थानानि श्रुतानि, या गतिर्नरकादिः, अशीलानां-कुशीलानां गतिर्विद्यते, यत्र-यस्यां गतौ क्रूरकर्मणां बालानां-मूर्खाणामात्महितविध्वंसकानां प्रगाढा वेदनास्ति ॥ १२ ॥

तत्थोववाइयं ठाणं, जहा मे तमणुस्सुयं ।
अहाकम्मेहिं गच्छंतो, सो पच्छा परितप्पइ ॥ १३ ॥

तत्र नरकेषु औपपातिकं स्थानं वर्तते, उपपाते भवमौपपातिकम्, तत्रौपपातिके स्थानेऽन्तर्मुहूर्त्तादनन्तरं छेदन-भेदन-ताडन-तर्जनादिकम् स्यात्, यथा तन्नारकादिस्थानं 'मे' मयानुश्रुतं वर्तते, अवधारितमिति चिन्तयन् पश्चादायुःक्षये यथा कर्मभिर्गच्छन् स परितप्यति ॥ १३ ॥

जहा सागडिओ जाणं, समं हिच्चा महापहं ।
विसमं मग्गमोइण्णो, अक्खे भग्गंमि सोयइ ॥ १४ ॥

यथा शाकटिकः समं-समीचीनं महापथं-राजमार्गं हित्वा-त्यक्त्वा विषमं मार्गमुत्तीर्णः सन् यानं-शकटं 'अक्खे' धुरि भग्ने सति शोचति-शकटं चिन्तयति-शकट-भङ्गस्य शोकं करोति, यतो धिग्मामहं जानन्नपि शकटभङ्गकष्टमवाप्तवान् ॥ १४ ॥

एवं धम्मं विउकम्म, अहम्मं पडिवज्जिया ।
बाले मच्चुमुहं पत्ते, अक्खे भग्गेव सोयइ ॥ १५ ॥

एवममुना प्रकारेण धर्मं व्युत्क्रम्य-विशेषेणोल्लङ्घ्याधर्मं प्रतिपद्य बालो-मूर्खो मृत्युमुखं -मरणमुखं प्राप्तः सन् शोचते-शोकं कुरुते, क इव ? अक्षे भग्ने शाकटिक इव ॥ १५ ॥

तओ से मरणंतंमि, बाले संतस्सई भया ।
अकाममरणं मरइ, धुत्तेव कलिणा जिए ॥ १६ ॥

ततः स मूर्खो मरणान्ते भयात् सन्त्रसति - सन्त्रासं प्राप्नोति, अकाममरणं म्रियते, म्रियमाणः सन् शोकं विदधाति, क इव ? धूर्त्तो-द्यूतकारी कलिना-द्यूतदोषेन जितः, केनचित्ततोऽधिकेन दुष्टेन जितो गृहीतद्रव्यः सन् शोचते, तथा शोचत इत्यर्थः अनेन सह मया किमर्थं क्रीडा कृता ? अहं हारितः ॥ १६ ॥

एयं अकाममरणं, बालाणं तु पवेइयं ।
एत्तो सकाममरणं, पंडियाणं सुणेह मे ॥ १७ ॥

बालानामकाममरणमेतत्प्रवेदितम्, तुशब्दो निश्चयार्थे मूर्खाणामेवाकाममरण-मित्यर्थः, तीर्थङ्करैः कथितम्, इतः प्रस्तावादनन्तरं 'मे' मम कथयतः पण्डितानां सकाममरणं यूयं श्रृणुत ॥ १७ ॥

मरणंपि सपुन्नाणं, जहा मे तमणुस्सुयं ।
विप्पसन्नमणाघायं, संजयाणं वुसीमओ ॥ १८ ॥

सपुण्यानां-पुण्यवतां संयतानां यथा 'मे' मया मरणमनुश्रुतमवधारितम्, भो भव्यास्तत्सकाममरणं भवद्भिर्मनसि धार्यम्, कीदृशं सकाममरणं ? विप्रसन्नं, विशेषेण-कषायादिमलराहित्येन प्रसन्नं-निर्मलम्, पुनः कीदृशं ? अनाघातम्, न विद्यते आघातो यत्लवत्त्वेनान्यजीवानां संयमजीवितव्यस्य च नाशो यस्मिंस्तदनाघातम्, कीदृशानां संयतानां ? 'वुसीमओ' आर्षत्वाद्वश्यवताम्, वश्य आत्मा येषां ते वश्यवन्तः, तेषां जितात्मनामित्यर्थः ॥ १८ ॥

न इमं सव्वेसु भिक्खुसु, न इमं सव्वेसुऽगारिसु ।
नाणासीला अगारत्था, विसमसीला य भिक्खुणो ॥ १९ ॥

इदं पण्डितमरणं सर्वेषां भिक्षूणां - साधूनां न भवति, किन्तु केषाञ्चित्साधूनां भवेत्, सर्वेषामगारिणां-गृहस्थानामपीदं पण्डितमरणं न भवति, किन्तु केषाञ्चिदेव भवेत्; यतोऽगारस्था-गृहस्था नानाशीला-नानाचारा भवन्ति, च पुनर्भिक्षवोऽपि-साधवोऽपि विषमशीला विषमं-विसदृशं शीलं येषां ते विषमशीलाः, केचित्सनिदानतपःकारकाः, केचिन्निदानरहिततपःकारिणः, केचिद्विमलचारित्रिणः, केचिद्बकुशचारित्रिणः, इति कथनेन तीर्थान्तरीयास्तु वेषधारिणो दूरत एवोत्सारिताः ॥ १९ ॥

संति एगेहिं भिक्खुहिं, गारत्था संयमुत्तरा ।
गारत्थेहिं य सव्वेहिं, साहवो संजमुत्तरा ॥ २० ॥

एकेभ्यो भिक्षुभ्यो-निह्नवभग्नचारित्रादिभ्यः पाखण्डिकुतीर्थिभ्यश्च, अगारस्था अपि-गृहस्था अपि संयमुत्तराः सन्ति, संयमेन-देशविरतिलक्षणेन धर्मेणोत्तराः प्रधानाः सन्ति, सर्षपमेरुपर्वतयोरिवान्तरमस्ति, सर्वेभ्यो द्विविध-त्रिविधप्रत्याख्यानधरेभ्योऽगारस्थेभ्यः साधवः षड्व्रत-षट्कायरक्षकाः संयमेन सप्तदशभेदेनोत्तराः प्रधानाः समीचीनाः सन्ति। अत्र दृष्टान्तः-एकः श्रावकः साधुं पृच्छति श्रावकाणां साधूनां च मिथः कियदन्तरं ? साधुनोक्तं मेरुसर्षपोपममन्तरम्, तत आकुलीभूतः स श्रावकः पुनः पृच्छति-कुलिङ्गिनां श्रावकाणां मिथः कियदन्तरं ? साधुनोक्तं तदपि मेरुसर्षपोपममन्तरम्, ततः स श्रावकः स्वस्थो जात इति ॥ २० ॥

चीराजिणं नगिणिणं, जडी संघाडि मुंडिणं ।
एयाणि वि न तायंति, दुस्सीलं [१]परियागयं ॥ २१ ॥

एतानि सर्वाणि द्रव्यलिङ्गानि 'परियागयं' प्रव्रज्यां गतं-दीक्षां प्राप्तम्, अर्थात् द्रव्यलिङ्गिनं दुःशीलं न त्रायन्ते संसारात्, दुष्कर्मविपाकाद्वा न रक्षन्ति, एतानि कानि लिङ्गानि तान्याह - चीराणि वल्कलानि वल्कलचीरधारित्वम्, अजिनं - चर्मधारित्वम्, 'नगिणिणं' नग्नत्वम्, 'जडी' त्ति जटाधारित्वम्, सङ्घाटीत्वं वस्त्रसङ्घातोत्पन्ना, तया युक्तत्वं कन्थाधारित्वम्, 'मुंडिणं' मुण्डत्वम्, एतानि सर्वाणि द्रव्यलिङ्गानि न मोक्षदानि भवन्तीत्यर्थः ॥ २१ ॥

पिंडोलएव दुस्सीले, नरगाओ न मुच्चई ।
भिक्खाए वा गिहत्थे वा, सुव्वए कम्मई दिवं ॥ २२ ॥

पिण्डोलगोऽपि भिक्षुर्यदि नरकान्न मुच्यते तदा दुःशीलः- कषायादियुक्तस्तु नरकान्न मुच्यत एव, पिण्डं-परदत्तग्रासमवलगते-सेवत इति पिण्डोलगः, अत्र निश्चयमाह-भिक्षादो भिक्षुरथवा गृहस्थो वा भवेत् तयोर्भिक्षादगृहस्थयोः साधु-श्रावकयोर्मध्ये यः सुव्रतः सुष्ठु-शोभनानि व्रतानि यस्य स सुव्रतः, स दिवं - स्वर्गं क्रमति-व्रजतीत्यर्थः, अत्र द्रम्मककथा यथा -

राजगृहे कश्चिद् द्रम्मक उद्यानिकानिर्गतजनेभ्यो भिक्षामलभमानो रुष्टः सर्वेषां चूर्णनाय वैभारगिरिशिलां चालयन् शिलान्तर्निपतितः, शिलातले चूर्णितवपुः सप्तमं नरकं गतः। एवं भिक्षुरपि दुर्ध्यानेन - दुःशीलत्वान्नरकमेव गच्छतीति परमार्थः ॥ २२ ॥

अगारिसामाइयंगाइं, सड्ढी काएण फासए ।
पोसहं दुहओ पक्खं, एगराइं न हावए ॥ २३ ॥

अगारी-गृहस्थः सामायिकाङ्गानि सामायिकस्याङ्गानि सामायिकाङ्गानि निःशङ्कित-निष्काङ्क्षित-निर्विचिकित्सिता-ऽमूढदृष्टिप्रमुखाणि कायेन स्पृशति, कीदृशः सन् ? श्रद्धी-श्रद्धावान् सन्, पुनर्गृहस्थः उभयोः- शुक्लकृष्णपक्षयोः पौषधं सेवते । चतुर्दशी-

१ परियागतं D.L. ॥

पूर्णिमावस्यादिषु पौषधम्-आहारपौषधादिकं कुर्यात् । एकरात्रिमप्येकदिनमपि न हापयेत्, न हानिं कुर्यादित्यर्थः । रात्रिग्रहणं दिवा व्याकुलतायां रात्रावपि पौषधं कुर्यात्, चेदेवं न स्यात्तदा चतुर्दश्यष्टम्युद्दिष्टा, महाकल्याणक-पूर्णिमा-चतुर्मासकत्रयस्य दिवसे पौषधं कुर्यात्, सामायिकाङ्गत्वेनैव सिद्धे भेदेनोपादानमादरख्यापनार्थम् ॥ २३ ॥

एवं सिक्खासमावन्ने, गिहवासेवि सुव्वए ।
मुच्चई छविपव्वाओ, गच्छे जक्खसलोगयं ॥ २४ ॥

एवममुना प्रकारेण शिक्षासमापन्नः श्रद्धाचारसहितो गृहस्थवासेऽपि सुव्रतो द्वादश-व्रतधारकः सन् त्वक्पर्वतो मुच्यते, त्वक् -चर्म-पर्व-जानु-कूर्पर-गुल्फादि, ततो भुक्तो भवति, औदारिकशरीरान्मुच्यते, पुनः स श्राद्धो यक्षसलोकतां गच्छेत्, सह लोकेन वर्तत इति सलोकः, यक्षैर्देवैः सलोको यक्षसलोकस्तस्य भावो यक्षसलोकता तां देवजातित्वं प्राप्नोतीत्यर्थः । अत्र पण्डितमरणप्रस्तावेऽप्यवसरप्रसङ्गाद् बालपण्डितमरणमुक्तम् ॥ २४ ॥

अह जे संवुडे भिक्खू, दोण्हं अन्नयरे सिया ।
सव्वदुक्खप्पहीणे वा, देवे वावि महड्ढिए ॥ २५ ॥

अथानन्तरं यः संवृतः- पञ्चाश्रवनिरोधको भिक्षुः सर्वदुःखप्रहीणे - मोक्षेऽथवा देवे-देवलोके, एतयोर्द्वयोः स्थानयोर्मध्येऽन्यतरस्मिन्नेकस्मिन् स्थाने स्यात्, कीदृशो देवः स्यात् ? महर्द्धिको महती ऋद्धिर्यस्य स महर्द्धिकः ॥ २५ ॥

उत्तराइं विमोहाइं, जुइमंताणुपुव्वसो ।
समाइन्नाइं जक्खाहिं, आवासाइं जसंसिणो ॥ २६ ॥

दीहाउया इड्ढिमंता, समिद्धा कामरूविणो ।
अहुणोववण्णासंकासा, भुज्जो अच्चिमालिप्पभा ॥ २७ ॥

ताणि ठाणाणि गच्छन्ति, सिक्खित्ता संजमं तवं ।
भिक्खाए वा गिहत्थे वा, जे संति परिनिव्वुडा ॥ २८ ॥ त्रिभिः कुलकम्

ते भिक्षादा-भिक्षावृत्तयः साधवोऽथवा गृहस्थाः-श्राद्धाः संयमं पुनस्तपः शिक्षयित्वा - हृदि धृत्वा तानि स्थानानि गच्छन्ति-प्राप्नुवन्तीति तृतीयगाथायाः सम्बन्धः । ते के भिक्षादाः ? पुनस्ते के च गृहस्थाः ? ये परिनिवृताः सन्ति, परि-समन्तान्निर्वृता-विधूतकषायमलाः । तानि कानि स्थानानि ? उत्तराणि सर्वेभ्यो देवलोकेभ्य उपरिस्थानि पञ्चानुत्तरविमानानि, पुनः कीदृशानि तानि ? विमोहान्यज्ञानरहितानि, येषु स्थानेषूत्पन्नानां देवानां मिथ्यात्वाभावात् सम्यक्त्वं भवतीत्यतो विमोहानि, पुनः कीदृशानि ? द्युतिमन्ति-

दीप्तियुक्तानि प्राकृतत्वाल्लिङ्गव्यत्ययः[१] । पुनः कीदृशानि स्थानानि ? यक्षैर्देवैः समाकीर्णानि-सहितानि, पुनः कीदृशानि ? आसमन्तादाह्लादपूर्वकं दुःखराहित्येन उष्यते येषु तान्यावासानि । कथंभूतास्ते भिक्षादा गृहस्थाश्च ? यशस्विनः, कुत्रचिट्टीकान्तरेऽत्र माथायामुक्तानि साधुश्राद्धानां विशेषणानि सन्ति । पुनः कीदृशा भिक्षादगृहस्थजीवदेवाः ? 'दीहाउया' दीर्घायुषः पल्य-सागरोपमजीविनः, पुनः कीदृशाः ? ऋद्धिमन्तो रत्नादियुक्ता, पुनः कीदृशाः ? समृद्धा अत्यन्तप्रकटाः, पुनः कीदृशाः ? कामरूपिणः कामं-स्वेच्छापूर्वं रूपं येषां ते कामरूपिणः, यादृशं रूपं मनसि वाञ्छन्ति तादृशं कुर्वन्तीत्यर्थः । पुनः कीदृशा ? अधुनोत्पन्नसङ्काशाः, येषां कान्त्यृद्धिदीप्तिवर्णादिकं दृष्ट्वेति ज्ञायते यदेते इदानीमुत्पन्नाः सन्ति । पुनः कीदृशाः ? भूयोऽर्चिमालिप्रभाः-कोटिसूर्यप्रभाः, अर्चिषा-ज्योतिषा मालन्ते-शोभन्ते इत्येवंशीला अर्चिमालिनः-सूर्याः, भूयांसश्च तेऽर्चिमालिनश्च भूयोऽर्चिमालिनस्त-द्वत्प्रभा येषां ते भूयोऽर्चिमालिप्रभाः ॥ २६-२७-२८ ॥

तेसिं सोच्चा सपुज्जाणं, संजयाणं वुसीमओ ।
न संतसंति मरणंते, सीलवंता बहुस्सुया ॥ २९ ॥

शीलवन्तः-साध्वाचारसहिता बहुश्रुताः साधवो मरणान्ते-मरणे समीपे समागते सति न सन्त्रसन्ति-न भयं प्राप्नुवन्ति । किं कृत्वा ? तेषां सत्पूज्यानां संयतानां-भावितभिक्षूणा-मुक्तस्वरूपस्थानप्राप्तिं श्रुत्वा, पुनः कीदृशानां संयतानां ? वश्यवताम् ॥ २९ ॥

तुलिया विसेसमादाय, दयाधम्मस्स खंतिए ।
विप्पसीइज्ज मेहावी, तहाभूएण अप्पणा ॥ ३० ॥

मेधावी-बुद्धिमान् साधुस्तथाभूतेन विषयकषायरहितेनात्मना विप्रसीदेत्, विशेषेण प्रसन्नतां भजेत्, किं कृत्वा ? बालपण्डितमरणे 'तुलिया' इति तोलयित्वा-परीक्ष्य पुनर्विशेष-मादाय बालमरणात्पण्डितमरणाच्च विशेषं विशिष्टत्वमादाय - गृहीत्वा तथैव दयाधर्मस्य-यतिधर्मस्य क्षान्त्या-क्षमया कृत्वा विशेषमादायान्येभ्यो धर्मेभ्यः क्षमया साधुधर्मो विशिष्ट इति ज्ञात्वा विप्रसीदेत् कषायादिभ्यो विरक्तो भवेदित्यर्थः ॥ ३० ॥

तओ काले अभिप्पेए, सड्ढी तालिसमंतिए ।
विणइज्ज लोमहरिसं, भेयं देहस्स कंखए ॥ ३१ ॥

ततः कषायोपशमनानन्तरं काले-मरणसमयेऽभिप्रेते सति - रुचिते सति श्रद्धी-श्रद्धावानन्तिके गुरूणां समीपे तादृशं भूयात् उत्पन्नं रोमहर्षं रोमाञ्चं हा मे मरणं भावीति

१ इतोऽग्रे-'अणुपुव्वसो' इति शब्दस्य व्याख्या न दृश्यते हस्तप्रत्यादिषु । 'अणुपुव्वसो' अनुपूर्वतः क्रमेण विमोहादिविशेषेणविशिष्टाः, इति नैमि० सुख० वृत्त्यां पृ. १०८ A ॥

भयाभिसूचकं रोमोद्गमं विनयेत्-स्फेटयेत्, मरणभयं न कुर्यात्, देहस्य भेदं काङ्क्षेत्, शरीरत्यागमभिलषेत्, यादृशो हर्षो दीक्षावसरे, यादृशो हर्षः संलेखनावसरे, तादृशो हर्षो मरणसमयेऽपि विधेयो, न भेतव्यमित्यर्थः ॥ ३१ ॥

अह कालम्मि संपत्ते, आघायाय समुस्सयं ।
सकाममरणं मरई, तिण्हमन्नयरं मुणी ॥ ३२ ॥ त्ति बेमि ॥

अथ काले-मरणे सम्प्राप्ते सति मुनिः समुच्छ्रयमभ्यन्तरशरीरं बाह्यशरीरं च, अभ्यन्तरं कार्मणशरीरम्, बाह्यमौदारिकशरीरम्, आघाय-विनाश्य त्रयाणां सकाममरणानां मध्येऽन्यतरेणैकेन सकाममरणेन म्रियते, तानि त्रीणि सकाममरणानीमानि—भक्तपरिज्ञा-भक्तप्रत्याख्यान १ इङ्गिनी २ पादपोपगमनाख्यानि ३। यत्र भक्तस्य त्रिविधस्य चतुर्विधस्य चाहारस्य प्रत्याख्यानं भक्तप्रत्याख्यानम् १, यत्र मण्डलं कृत्वा मध्ये प्रविश्य मण्डलाद्बहिर्न निःस्रियते तदिङ्गिनीमरणम् २, यत्र छिन्नवृक्षशाखावदेकेन पार्श्वेन निपत्यते, पार्श्वस्य परावर्त्तो न क्रियते तत्पादपोपगमनम् । एतेषां त्रयाणां मध्येऽन्यतरेण मरणेन म्रियते, इति सुधर्मास्वामी जम्बूस्वामिनं प्रति कथयति हे जम्बू ! अहं भगवद्वचसा त्वां ब्रवीमि ॥ ३२ ॥

इत्यकामसकाममरणीयमध्ययनं पञ्चमम् ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायामकाम-सकाममरणीयाख्यस्य पञ्चमस्यार्थः सम्पूर्णः ॥

॥ अथ षष्ठं क्षुल्लकनिर्ग्रन्थित्वाख्यमध्ययनं प्रारभ्यते ॥

पूर्वस्मिन्नध्ययनेऽकाम-सकाममरणे उक्ते, तत्र सकाममरणं निर्ग्रन्थस्य भवति, ततो निर्ग्रन्थस्याचारः षष्ठेऽध्ययने कथ्यते, अयं पञ्चमषष्ठाध्ययनयोः सम्बन्धः ।

जावन्तऽविज्जा पुरिसा, सव्वे ते दुक्खसंभवा ।
लुप्पंति बहुसो मूढा, संसारंमि अणंतिगे ॥ १ ॥

यावन्तोऽविद्याः पुरुषास्ते सर्वेऽपि मूढाः संसारे बहुशो - वारंवारं लुप्यन्ते - आधि-व्याधि-वियोगादिभिः पीड्यन्ते । न विद्यते विद्या-सम्यग्ज्ञानं येषां तेऽविद्याः, अत्र नञ् कुत्सार्थवाचकः, ये कुत्सितज्ञानसहिता मिथ्यात्वोपहतचेतसो वर्तन्ते, ते मूर्खाः संसारे दुःखिनो भवन्ति । कीदृशे संसारे ? अनन्तकेऽपारे, कीदृशास्तेऽविद्याः ? दुःखसम्भवाः, दुःखस्य सम्भवो येषु ते दुःखसम्भवा दुःखभाजनमित्यर्थः । यावन्तोऽविद्या इत्यत्र प्राकृतत्वादकारोऽदृश्यः ॥ १ ॥ अत्राविद्यापुरुषोदाहरणं यथा -

कश्चिद् द्रम्मकोऽभाग्यात् क्वापि किञ्चिदप्राप्नुवन् पुराद्बहिरेकस्मिन् देवकुले रात्रा-वुषितः, तत्रैकं पुरुषं कामकुम्भप्रसादेन यथेष्टभोगान् भुञ्जानं वीक्ष्य प्रकामं सेवितवान्, तुष्टेन तेन तस्य भणितं भो ! तुभ्यं कामकुम्भं ददाम्युत कामकुम्भविधायिकां विद्यां ददामि ? तेन विद्यासाधनपुरश्चरणादिभीरुणा विद्याभिमन्त्रितं घटमेव मे देहीति भणितम्, विद्यापुरुषेण विद्याभिमन्त्रितो घट एव तस्मै दत्तः, सोऽपि तत्प्रसादात्सुखी जातः । अन्यदा पीतमद्योऽयं पुरुषस्तं कामकुम्भं मस्तके कृत्वा नृत्यन् पातितवान्, भग्नः कामकुम्भस्ततो नासौ किञ्चिदर्थमवाप्नोति, शोचति चैवं यदि मया तदा विद्या गृहीताऽभविष्यत्तदाभिमन्त्र्य नवं कामकुम्भमकरिष्यम्, पूर्ववदेव सुखी चाभविष्यम् । एवमविद्या नरा दुःखसम्भवाः क्लिश्यन्ते ॥ १ ॥

समिक्ख पंडिए तम्हा, पासजाईपहे बहू ।
अप्पणा सच्चमेसिज्जा, मेत्तिं भूएसु कप्पए ॥ २ ॥

तस्मादज्ञानिनां-मिथ्यात्विनां संसारभ्रमणत्वात्पण्डितस्तत्त्वज्ञ आत्मना स्वयमेव -परोपदेशं विनैव सत्यमेषयेत्, सद्भ्यो हितं सत्यमर्थात्संयममभिलषेत् । पुनः पण्डितो भूतेषु-पृथिव्यादिषु षट्कायेषु मैत्रीं कल्पयेत् । किं कृत्वा ? बहून् पाशजातिपथान् समीक्ष्य, पाशाः-पारवश्यहेतवः-पुत्रकलत्रादिसम्बन्धास्त एव मोहहेतुतयैकेन्द्रियादिजातीनां पन्थानः पाशजातिपथास्तान् पाशजातिपथान् दृष्ट्वा, यदा हि पुत्रकलत्रादिषु मोहं करोति तदैकेन्द्रियत्वं जीवो बध्नाति ॥ २ ॥

माया पिया ण्हुसा भाया, भज्जा पुत्ता य ओरसा ।
नालं ते मम ताणाय, लुप्पंतस्स सकम्मुणा ॥ ३ ॥

पण्डित इति विचारयेदित्यध्याहारः कर्तव्यः इतीति किं ? एते मम त्राणाय-मम रक्षायै नालं-न समर्थाः, कथंभूतस्य मम ? स्वकर्मणा लुप्तस्य - स्वकर्मणा पीड्यमानस्य, एते के ? माता पिता स्नुषा-वधूः भ्राता-सहोदरो भार्या-पत्नी पुत्राः-पुत्रत्वेन मानिताः, च पुनः 'ओरसा' स्वयमुत्पादिताः, एते सर्वेऽपि स्वकर्मसमुद्भूतदुःखाद्रक्षणाय न समर्था भवन्तीत्यर्थः ॥ ३ ॥

एयमट्ठं सपेहाए, पासे समियदंसणे ।
छिंदे गेहिं सिणेहं च, न कंखे पुव्वसंथवं ॥ ४ ॥

शमितदर्शनः शमितं-ध्वस्तं दर्शनं-मिथ्यादर्शनं येन स शमितदर्शनः, अथवा सम्यक्प्रकारेण इतं-प्राप्तं दर्शनं-सम्यक्त्वं येन स समितदर्शनः, एतादृशः संयम्येतदर्थं पूर्वोक्तमर्थमशरणादिकं 'सपेहाए' स्वप्रेक्षया-स्वबुद्धया 'पासे' इति पश्येत्, हृद्यवधारयेत्, च पुनः 'गेहिं' गृद्धिं - रसलाम्पट्यम्, च पुनः स्नेहं - पुत्रकलत्रादिषु रागं छिन्द्यात्, पुनः पूर्वसंस्तवं न काङ्क्षेत्, पूर्वसंस्तवः-पूर्वपरिचय एकग्रामादिवासस्तं न स्मरेत् ॥ ४ ॥

गवासं मणिकुंडलं, पसवो दासपोरुसं ।
सव्वमेयं चइत्ताणं, कामरूवी भविस्ससि ॥ ५ ॥

पुनरपि पण्डित आत्मानमिति शिक्षयेत्, अथवा गुरुः शिष्यं प्रत्युपदिशति हे आत्मन् ! अथवा हे शिष्य ! एतत्सर्वं त्यक्त्वा कामरूपी-स्वेच्छाचारी भविष्यसि, एतेषु ममत्वं त्यजसि, तदा इहभवे तु वैक्रियलब्ध्यणिमा-गरिमा-लघिमा-प्राप्ति-प्राकाम्येशित्व-वशित्वादिमान् भविष्यसि, परलोके च निरतीचारसंयमपालनाद्देवभवे वैक्रियादिलब्धिमांस्त्वं भविष्यसि, एतत्किं तदाह-गवाश्वम्, गावश्चाश्वाश्च गवाश्वम्, पुनर्मणिकुण्डलं, मणयश्चन्द्रकान्ताद्याः, कुण्डलग्रहणेनान्येषामप्यलंकाराणां ग्रहणं स्यात्, सर्वे मणयः सर्वाण्यलङ्काराणि चेत्यर्थः, पशवोऽजैडकपक्ष्मपट्याद्युत्पादकरोमधारकाः कुर्कुरादयश्च, दासा-गृहदासीभ्यः समुत्पन्ना जीवाः, पौरुषा निजकुलोत्पन्नपुरुषाः दासाश्च पौरुषाश्च दासपौरुषम्, एते सर्वेऽपि मरणान्न त्रायन्त इत्यर्थः, तस्मात्पूर्वमेतत्त्यक्त्वा संयमं परिपालयेदित्यर्थः ॥ ५ ॥

थावरं जंगमं चेव, धणं धन्नं उवक्खरं ।
पच्चमाणस्स कम्मेहिं, नालं दुक्खाउ मोअणे ॥ ६ ॥

पुनरेतत्सर्वं वस्तु कर्मभिः पच्यमानस्य जीवस्य दुःखान्मोचनेऽलं-समर्थं न भवति । एतत्किं ? स्थावरं-गृहादिकम्, च पुनर्जङ्गमं-पुत्र-मित्र-भृत्यादि, पुनर्धनं-गणिमादि, धान्यं-व्रीह्यादि, पुनरुपस्करं-गृहोपकरणम् ॥ ६ ॥

अज्झत्थं सव्वओ सव्वं, दिस्स पाणे पियायए ।
न हणे पाणिणो पाणे, भयवेराओ उवरए ॥ ७ ॥

साधुः सर्वतः-सर्वप्रकारेण सर्वमध्यात्मं सुख-दुःखादिकं 'दिस्स' इति दृष्ट्वा सर्वप्रकारेण सर्वं सुख-दुःखादिकमात्मनि स्थितं ज्ञात्वा सुख-दुखयोर्वेदकमात्मानं ज्ञात्वा इष्टसंयोगादिहेतुभ्यः समुत्पन्नं सुखं सर्वस्यात्मनः प्रियं स्यात्, इष्टवियोगादिहेतुभ्यः समुत्पन्नं दुःखं सर्वस्यात्मनोऽप्रियं ज्ञात्वेत्यर्थः । च पुनः प्राणिनो-जीवान् प्रियात्मनो दृष्ट्वा, प्रिय आत्मा येषां ते प्रियात्मानस्तान् प्रियात्मान् ।

[1]"सव्वे जीवावि इच्छंति, जीविऊं न मरिज्जिऊं ।" [दशवैकालिक ६/११]

इति दृष्ट्वा हृदि विचार्य प्राणिनो-जीवस्य प्राणान्-इन्द्रियोच्छ्वासनिःश्वासायुर्बल-रूपान्न हन्यात्, भयाद्वैराच्चोपरमेत-निवर्तेत । अथवा कथम्भूतः साधुः ? भयाद्वैरादुपरतो निवर्तितः, इति साधुविशेषणं कर्तव्यम् ॥ ७ ॥

आयाणं नरयं दिस्स, नायइज्ज तणामवि ।
दोगुंछी अप्पणो पाए, दिन्नं भुंजिज्ज भोयणं ॥ ८ ॥

साधुस्तृणमपि 'नायइज्ज' इति नाददीत, अदत्तं न गृह्णीत, किं कृत्वा ? आदानं नरकं दृष्ट्वा, आदीयत इत्यादानं-धनधान्यादिकं परिग्रहम्, नरकं-नरकहेतुत्वान्नरकं ज्ञात्वेत्यर्थः । पुनः साधुः 'पाए दिन्नं' पात्रे दत्तं-गृहस्थेन पात्रमध्ये प्रक्षिप्तं भोजनं शुद्धाहारं 'भुंजेज्ज' इति भुञ्जीत, कथम्भूतः सन् ? 'अप्पणो दुगंछी' आत्मनो जुगुप्सी सन्, आहारसमये आत्मनिन्दकः सन्, अहो धिग्ममात्मानमयमात्मा देहो वाहारं विना धर्मकरणेऽसमर्थः, किं करोमि ? धर्मनिर्वाहार्थमस्मै भाटकं दीयत इति चिन्तयन्नाहारं कुर्यात्, न तु बल-वीर्य-पुष्ट्याद्यर्थमाहारं विदधीयत इति चिन्तयेत् । अत्रादत्त - परिग्रहाश्रवद्वय-निरोधादन्येषामप्या-श्रवाणां निरोध उक्त एव ॥ ८ ॥

इहमेगे उ मन्नंति, अप्पच्चक्खाय पावगं ।
आयरियं विदित्ताणं, सव्वदुक्खा विमुच्चई ॥ ९ ॥

इहास्मिन् संसारे एके-केचित्कापिलिकादयो ज्ञानवादिन इति मन्यन्ते, इतीति किं ? पापकं-हिंसादिकमप्रत्याख्याय-पापमनालोच्यापि मनुष्य आचारिकं-स्वकीयस्वकीयमतोद्भवानुष्ठानसमूहं विदित्वा-ज्ञात्वा, सर्वदुःखाद्विमुच्यते, एतावता तत्त्वज्ञानान्मोक्षावाप्तिः, इति वदन्ति, जैनानां तु ज्ञान-क्रियाभ्यां मोक्षः, ज्ञानवादिनां तु ज्ञानमेव मुक्त्यङ्गमिति ॥ ९ ॥

---

१ सर्वे जीवा अपि इच्छन्ति, जीवितुं न मर्त्तुम् ।

भणंता अकरिंता य, बंधमोक्खपइन्निणो ।
वाया विरियमित्तेणं, समासासेंति अप्पयं ॥ १० ॥

पुनस्त एव ज्ञानवादिनो बन्ध-मोक्षप्रतिज्ञिनो वाचा वीर्यमात्रेण केवलं वाक्शूरत्वेनात्मानं समाश्वासयन्ति, बन्धश्च मोक्षश्च बन्ध-मोक्षौ, तयोः प्रतिज्ञातं-ज्ञानं येषां ते बन्ध-मोक्षप्रतिज्ञिनो बन्ध-मोक्षज्ञा इत्यर्थः । यतः-

"मन एव मनुष्याणां, कारणं बन्ध-मोक्षयोः ।
यत्रैवालिङ्गिता कान्ता, तत्रैवालिङ्गिता सुता" ॥ १ ॥

इत्यादि प्रतिज्ञां कुर्वाणास्ते किं कुर्वतः ? आत्मानमाश्वासयन्ति भणन्तो - ज्ञानमभ्यस्यन्तः, च पुनरकुर्वन्तः क्रियामनाचरन्तः प्रत्याख्यान-तपः पौषधव्रतादिकां क्रियां निन्दन्तः, ज्ञानमेव मुक्त्यङ्गतयाङ्गीकुर्वन्त इत्यर्थः ॥ १० ॥

न चित्ता तायए भासा, कओ विज्जाणुसासणं ।
विसन्ना पावकम्मेहिं, बाला पंडियमाणिणो ॥ ११ ॥

पण्डितमानिन आत्मानं पण्डितंमन्या ज्ञानाहङ्कारधारिण इति न जानन्ति, इत्यध्याहारः, इतीति किं ? चित्राः प्राकृतसंस्कृताद्याः षड्भाषाः, अथवान्या अपि देशविशेषान्नानारूपा भाषा वा, पापेभ्यो-दुःखेभ्यो न त्रायन्ते न रक्षन्ते, तर्हि विद्यानां न्याय-मीमांसादीनामनुशासनमनुशिक्षणं विद्यानुशासनं कुतस्त्रायते ? न त्रायत इत्यर्थः । अथवा विद्यानां विचित्रमन्त्रात्मिकानां रोहिणी-प्रज्ञप्तिका-गौरी-गन्धार्यादिषोडशविद्यादेव्यधिष्ठितानामनुशासनमनुशिक्षणमाराधनं कुतो नरकात् त्रायते ? कीदृशास्ते बालाः ? अतत्त्वज्ञाः, पुनः कीदृशास्ते ? पापकर्मभिर्विषण्णा विविधमनेकप्रकारं यथास्यात्तथा सन्नाः-पापपङ्केषु कलिता इत्यर्थः ॥ ११ ॥

जे केइ सरीरे सत्ता, वन्ने रूवे य सव्वसो ।
मणसा कायवक्केणं, सव्वे ते दुक्खसम्भवा ॥ १२ ॥

ये केचन ज्ञानवादिनः शरीरे सक्ताः सन्ति, शरीरे सुखान्वेषिणः सन्ति, तथा पुनर्ये वर्णे शरीरस्य गौरादिके, च पुनस्तथारूपे सुन्दरनयन-नासादिके, चशब्दाच्छब्दे रसे गन्धे स्पर्शे च सर्वथा मनसा कायेन वाक्येन सक्तां-संलग्नां सन्ति ते सर्वे दुःखसम्भवा दुःखस्य सम्भवा दुःखसम्भवा - दुःखभाजनं भवन्ति, मृग-पतङ्ग-मीन-मधुप-मातङ्गवदिहलोके यथा मरणदुःखभाजः, परलोकेऽप्यार्तध्यानेन मृता दुःखिनः स्युरित्यर्थः ॥ १२ ॥

आवन्ना दीहमद्धाणं, संसारंमि अणंतए ।
तम्हा सव्वदिसं पस्स, अप्पमत्तो परिव्वए ॥ १३ ॥

तेऽज्ञानवादिनो विषयिणोऽनन्तकेऽपारे संसारे दीर्घमध्वानं-मार्गमापन्नाः प्राप्ताः सन्ति, तस्मात्कारणात्सर्वां दिशं भवभ्रमणरूपामष्टादशभावदिशो दृष्ट्वा साधुरप्रमत्तः प्रमादरहितः सन् विचरेत्, अष्टादशभावदिशश्चेमाः-

"[1]पुढवि १, जल २, जलण ३, वाउ ४, मूला ५, खंध ६, ग्गा ७, पोरबीया य ८, ।
बि ९, ति १०, चउ ११, पञ्चिन्दियतिरि १२, नारया १३, देवसंघाया १४, ॥ १ ॥
समुच्छिम १५, कम्मा १६, कम्म-गा य १७, मणुया तहंतरद्दीवा १८, ॥
भावदिसा दिस्सइ जं, संसारी नियययमेआहिं ॥ २ ॥" [विशेषा भा० गा० ३२०७-८]

इति संसारे प्रमादिनो जीवा इमास्वष्टादशभावदिशासु पुनः पुनर्भ्रमन्तीत्यर्थः ॥ १३ ॥

बहिया उड्ढमादाय, नावकंखे कयाइ वि ।
पुव्वकम्मक्खयट्ठाए, इमं देहं समुद्धरे ॥ १४ ॥

साधुः पूर्वकर्मक्षयार्थमिमं देहं समुद्धरेत्, सम्यक् शुद्धाहारेण धारयेत्, पुनः कदापि परीषहोपसर्गादिभिः पीडितोऽपि न कस्यापि साहाय्यमवकाङ्क्षेन्नाभिलषेत् । अथवा कदापि विषयादिभ्यो न स्पृहयेत् । किं कृत्वा ? 'बहिया' संसाराद्बहिस्तात्संसाराद्बहिर्भूतमूर्द्ध्वं लोकाग्रस्थानं मोक्षमादायाभिलष्य ॥ १४ ॥

विगिंच कम्मुणो हेउं, कालकंखी परिव्वए ।
मायं पिंडस्स पाणस्स, कडं लध्धूण भक्खए ॥ १५ ॥

कालकाङ्क्ष्यवसरज्ञः साधुः कर्मणां हेतुं - कर्मणां कारणं मिथ्यात्वा-विरति-कषाय-योगादिकं 'विगिंच' विविच्यात्मनः सकाशात्पृथक्कृत्य परित्यजेत्-संयममार्गे सञ्चरेत्, कालं-स्वक्रियानुष्ठानस्यावसरं काङ्क्षतीत्येवंशीलः कालकाङ्क्षी, पुनः स साधुः पिण्डस्याहारस्य तथा पानस्य-पानीयस्य मात्रां-परिमाणं लब्ध्वा भक्षयेत्, यावत्या मात्रयात्मसंयमनिर्वाहः स्यात्तावत्परिमाणमाहारं पानीयं च गृहीत्वाऽऽहारं पानीयं च कुर्यादित्यर्थः । कथम्भूतमाहारं ? 'कडं' गृहस्थेनात्मार्थं कृतम्, प्राकृतत्वाद्विभक्तिव्यत्ययः ॥ १५ ॥

सन्निहिं च न कुव्विज्जा, लेवमायाए संजए ।
पक्खी पत्तं समादाय, निरवेक्खो परिव्वए ॥ १६ ॥

च - पुनः संयतः साधुर्लेपमात्रयापि सन्निधिं न कुर्यात्, लेपस्य मात्रा लेपमात्रा, तया लेपमात्रया सं-सम्यक्प्रकारेण निधीयते-स्थाप्यते दुर्गतावात्मा येन स सन्निधिर्धृतगुडा-

---

१ "पृथ्वी-जल-ज्वलन-वाता, मूल-स्कन्धाग्र-पर्वबीजाश्च ।
द्वि-त्रि-चतुःपञ्चेन्द्रियतिर्यग्-नारका देवसङ्घाताः ॥ १ ॥
सम्मूर्च्छिम-कर्मा-ऽकर्मकाश्च मनुष्यास्तथान्तरद्वीपाः ।
भावदिशो व्यपदिश्यते यत्संसारी नियतमेताभिः ॥ २ ॥

दिसञ्चयस्तं न कुर्यात्, यावता पात्रं लिप्यते तावन्मात्रमपि-घृतादिकं न सञ्चयेत्, भिक्षुराहारं कृत्वा पात्रं समादाय-पात्रं गृहीत्वा निरपेक्षः सन्निःस्पृहः सन् परिव्रजेत् साधुमार्गे प्रवर्त्तेत । क इव ? 'पक्खी' इव-यथा पक्ष्याहारं कृत्वा पत्रं- [1]तनूरुहमात्रं गृहीत्वोड्डीयते, तथा साधुरपि कुक्षिशम्बलो भवेत् ॥ १६ ॥

एसणासमिओ लज्जू, गामे अनियओ चरे ।
अप्पमत्तो पमत्तेहिं, पिण्डवायं गवेसए ॥ १७ ॥

एषणासमितो निर्दोषाहारग्राही साधुर्ग्रामे नगरे वाऽनियतो-नित्यवासरहितः सन् चरेत्, संयममार्गे प्रवर्तेत ? कीदृशः साधुः ? लज्जुर्लज्जालुः, लज्जा संयमस्तेन सहितः, पुनः कीदृशः ? अप्रमत्तः-प्रमादरहितः, पुनः साधुः 'पमत्तेहिं' इति प्रमत्तेभ्यो गृहस्थेभ्यः पिण्डपातं भिक्षां गवेषयेत्, गृह्णीत, प्राकृतत्वात् पञ्चमीस्थाने तृतीया ॥ १७ ॥

एवं से उदाहु अणुत्तरनाणी, अणुत्तरदंसी अणुत्तरनाणदंसणधरे ।
अरहा नायपुत्ते, भयवं वेसालिए वियाहिए ॥ १८ ॥ त्ति बेमि ॥

सुधर्मास्वामी जम्बूस्वामिनं प्रत्याह-हे जम्बू ! 'से' इति सोऽर्हन् ज्ञातपुत्रो - महावीरः 'एवं उदाहु' एवमुदाहृतवान्, अहं तवाग्रे इति ब्रवीमि, अर्हन्निन्द्रादिभिः पूज्यो ज्ञातः-प्रसिद्धः सिद्धार्थक्षत्रियस्तस्य पुत्रो ज्ञातपुत्रः, कीदृशो महावीरः ? भगवानष्टमहाप्रातिहार्याद्यतिशयमाहात्म्ययुक्तः, पुनः कीदृशः ? विशाला - त्रिशला तस्याः पुत्रो वैशालिकः, अथवा विशालाः शिष्यास्तीर्थं यशःप्रभृतयो गुणा यस्येति वैशालिकः, पुनः कीदृशो महावीरः ? 'वियाहिए' इति व्याख्याता विशेषेणाख्याता द्वादशपरिषत्सु समवसरणे धर्मोपदेशं व्याख्याता धर्मोपदेशक इत्यर्थः । पुनः कीदृशो महावीरः ? अनुत्तरज्ञानी - सर्वोत्कृष्टज्ञानधारी, पुनः कीदृशः ? अनुत्तरदर्शी, अनुत्तरं-सर्वोत्कृष्टं पश्यतीत्येवंशीलोऽनुत्तरदर्शी, पुनः कीदृशः ? अनुत्तरज्ञान-दर्शनधरः, ज्ञानं च दर्शनं च ज्ञानदर्शने, अनुत्तरे च ते ज्ञानदर्शने च अनुत्तरज्ञान-दर्शने, अनुत्तरज्ञान-दर्शने धरतीति अनुत्तरज्ञान-दर्शनधरः, केवलवरज्ञान-दर्शनधारीत्यर्थः । अत्र पूर्वमनुत्तरज्ञान्यनुत्तरदर्शीति विशेषणद्वयमुक्त्वा पुनरनुत्तरज्ञानदर्शनधर इति विशेषणमुक्तम्, तेन केवलज्ञान-केवलदर्शनयोरेकसमयान्तरेण युगपदुत्पत्तिः सूचिता, अनयोः कथञ्चिद्भेदोऽभेदश्च सूचितः, पुनरुक्तदोषो न ज्ञेयः ॥ १८ ॥

इति क्षुल्लकनिर्ग्रन्थित्वाध्ययनम् । अत्राध्ययने क्षुल्लकस्य साधोर्निर्ग्रन्थित्वमुक्तमित्यर्थः ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां क्षुल्लकनिर्ग्रन्थित्वाध्ययनस्य षष्ठस्यार्थः सम्पूर्णः ॥

---

१ पक्षीनी चांच ।

॥ अथ सप्तममौरभ्रीयाख्यमध्ययनं प्रारभ्यते ॥

अत्र पूर्वाध्ययने साधोनिर्ग्रन्थत्वमुक्तम्, तच्च यो रसेष्वगृद्धो भवेत्तस्यैव स्यात्, रसगृद्धस्य कष्टमुत्पद्यते, तेन रसगृद्धस्य कष्टोत्पत्तिदृष्टान्तसूचकमुरभ्रादि-पञ्चदृष्टान्तमयं सप्तममौरभ्रीयाख्यं कथ्यते, इति षष्ठसप्तमयोः सम्बन्धः ।

जहाएसं समुद्दिस्स, कोइ पोसिज्ज एलयं ।
ओयणं जवसं दिज्जा, पोसिज्जा वि सयंगणे ॥ १ ॥

यथा कोऽपि कश्चिन्निर्दयः पुमानादेशम् आदिश्यते विविधव्यापारेषु प्रेर्यते परिजनो यस्मिन्नागते स आदेशस्तं प्राघूर्णकं समुद्दिश्याश्रित्य स्वकाङ्गणे - स्वकीयगृहाङ्गणे एलकमेडकमूरणकं पोषयेत्, तस्मै एलकायौदनं सम्यग्धान्यं यवसं मुद्गमाषादिकं दद्यात् । ततश्च पोषयेत् । पुनः पोषयेदित्युक्तं तदत्यादरख्यापनार्थम् । अपिशब्दः सम्भावने सम्भाव्यत एवंविधः कोऽपि गुरुकर्मेत्यर्थः ॥ १ ॥ अत्रोदाहरणं यथा -

एकमूरणकं प्राघूर्णकार्थं पोष्यमाणं-लाल्यमानं दृष्ट्वैको वत्सः खिन्नः क्षीरमपिबन् गवा मात्रा पृष्टः- कथं न वत्स ! क्षीरं पिबसि ? स आह-मातरेष ऊरणकः सर्वैर्लोकैः पाल्यते, व्रीहींश्चार्यते, पुत्र इव विविधैरलङ्कारैरलङ्क्रियते । अहं तु मन्दभाग्यः शुष्कान्यपि तृणानि न प्राप्नोमि । न च निर्मलं पानीयमपि प्राप्नोमि । न च मां कोऽपि लालयति । माता प्राह - पुत्र ! अस्यैतान्यातुरचिह्नानि, यथा मर्तुकाम आतुरो यद्यन्मार्गयति पथ्यमपथ्यं वा तत्तत्सर्वं दीयते, अथासौ मारयिष्यते तदा त्वं द्रक्ष्यसि । अन्यदा तत्र प्राघूर्णकः समायातः । तदर्थं तमूरणकं मार्यमाणं दृष्ट्वा भीतः स वत्सः पुनः स्तन्यपानमकुर्वन्मात्राऽनुशिष्टो-हे पुत्र ! किं त्वं भीतोऽसि ? पूर्वं मयोक्तं न स्मरसि किं ? आतुरचिन्हान्येतानीति, य एवं व्रीहींश्चारितः प्रकामं लालितः स एव मार्यते । त्वं तु शुष्कान्येव तृणानि चरितवानसीति मा भैषीः । नैव मारयिष्यसे इति मात्रोक्तो वत्सः सुखेनैव स्तन्यपानमकरोत् । एवं यो यथेष्टविविधास्वादलम्पटोऽधर्ममाचरति स नरकायुर्बध्नातीत्यर्थः ॥ १ ॥

तओ से पुट्ठे परिवूढे, जायमेए महोदरे ।
पीणिए विउले देहे, आएसं परिकंखए ॥ २ ॥

ततः स एलकः कीदृशो जातः ? ततः स उरभ्रः पुष्ट-उपचितमांसः परिवृढो-युद्धादौ समर्थः, सर्वेष्वन्येषूरभ्रेषु मुख्य इव दृश्यमाणः । पुनः कीदृशः ? जातमेदः पुष्टीभूत-चतुर्थधातुः, पुनः कीदृशः ? महोदरो-विशालकुक्षिः, पुनः कीदृशः ? प्रीणितो यथेप्सितभोजनादिना सन्तुष्टीकृतः । एतादृशः सन् स उरभ्रो विपुले - विस्तीर्णे देहे सत्यादेशं प्राघूर्णकं परिकाङ्क्षति-प्रतीच्छतीव ॥ २ ॥

जाव न एइ आएसे, ताव जीवइ से दुही ।
अह पत्तंमि आएसे, सीसं छित्तूण भुंजई ॥ ३ ॥

स उरभ्रस्तावज्जीवति-प्राणान् धारयति । कीदृशः सः ? दुःखी, दुःखमस्य भावीति दुःखी, भाविनि भूतोपचारात् । यद्यपि वर्तमानकाले तस्य सुखमस्ति तथापि दुःखस्यागामित्वाद् दुःख्युच्यते । तावदिति किं ? यावदादेशः-प्राघूर्णको नैति-नागच्छति । अथादेशे प्राप्ते सति शीर्षं छित्वा स उरभ्र आदेशेन समं स्वामिनापि भुज्यते ॥ ३ ॥

जहा से खलु उरब्भे, आएसाए समीहिए ।
एवं बाले अहम्मिट्ठे, ईहइ नरयाउयं ॥ ४ ॥

यथा स उरभ्र आदेशाय समीहितः-कल्पितः, एवमिति तथा बालः कार्याऽकार्यविचाररहितोऽधर्मिष्ठो नरकायुरीहते, नरकगतियोग्यकर्मकरणेन नरकाय कल्पित इत्यर्थः ॥ ४ ॥

तिसृभिर्गाथाभिः पूर्वोक्तमेव दृढयति -

हिंसे बाले मुसावाई, अद्धाणम्मि विलोवए ।
अन्नदत्तहरे तेणे, माई कन्नुहरे सढे ॥ ५ ॥

इत्थीविसयगिद्धे अ, महारंभपरिग्गहे ।
भुंजमाणे सुरं मंसं, परिवूढे परंदमे ॥ ६ ॥

अयकक्करभोई य, तुंदिल्ले चिय सोणिए ।
आऊयं नरए कंखे, जहा एसं व एलए ॥ ७ ॥

एतादृशो नरो नारके इति नरकगतौ नरकायुरर्थान्नरकस्यायुः काङ्क्षति, नरकगतियोग्यकर्माचरणात्स नरो नरकगतिमेव वाञ्छति, नरकाय कल्पितः । कः कमिव ? एलकः-पूर्वोक्त उरभ्र आदेशमिव यथा केनचित्पापेन यथेप्सितभोजनेन पोषित उरभ्र आदेशमिच्छति । कीदृशः सः ? हिंस्रो - हिंसनशीलः, पुनः कीदृशः ? बालोऽज्ञानी, पुनः कीदृशः ? मृषावादी, पुनः कीदृक् ? अध्वनि विलोपको - [१]जिनमार्गलोपकः, पुनः कीदृक् ? अन्यादत्तहरः, अन्येषामदत्तं हरतीत्यन्यादत्तहरः, अदत्तादानसेवीत्यर्थः । पुनः कीदृक् ? स्तेनश्चौर्येण कल्पितवृत्तिः, पुनः, कीदृक् ? मायी-कापट्ययुक्तः, पुनः कीदृक् ? कन्नुहरः कस्यार्थं 'नु' इति वितर्के हरिष्यामीति विचारो यस्य स कहनुहरः, पुनः कीदृशः ? शठो-वक्राचारः ॥ ५ ॥

पुनः कीदृशः ? स्त्रीविषये गृद्धः, पुनः कीदृशः ? महारम्भपरिग्रहः, महान्तावारम्भपरिग्रहौ यस्य स महारम्भ-परिग्रहो, महारम्भी, पुनर्महापरिग्रही, पुनः कीदृशः ? सुरां-मद्यं

१ अत्र सर्वार्थसिद्धिटीकायामेवं- 'अध्वनि मार्गे विलोपकः पथि जनानां मोषकः ।' नैमिचन्द्रीयवृत्तावपि एवमेव ॥

मांसं च भुञ्जानः, पुनः कीदृशः ? परिवूढ-उपचितमांसत्वेन स्थूलः, पुनः कीदृशः ? परन्दमः, परमन्यं जीवं दमतीति परन्दमः-परपीडाकारकः, आत्मार्थं परजीवोपघातक इत्यर्थः ॥ ६ ॥

पुनः कीदृशः ? अजकर्करभोजी, अजस्य-छागादेः कर्करमतिभ्रष्टं यच्चणकवद्-भुज्यमानं कर्करायते तन्मेदो दन्तुरं पक्वं शूलाकृतं मांसं तद्भुङ्क्ते, इत्येवंशीलोऽज-कर्करभोजी, पुनस्तुन्दमस्यास्तीति तुन्दिलो-यथेप्सितभोजनेन वर्धितोदरः । अत एव चितशोणितो-वर्धितरुधिरः, रुधिरवृद्ध्यान्येषामपि धातूनां वृद्धिर्गृह्यते ॥ ७ ॥ पूर्वं 'हिंसे बाले' इत्यादिनारम्भोक्तिः कथिता 'भुंजमाणे सुरं मांसं' इत्यनेन दुर्गतिगमनभणनात्कष्टो-त्पत्तिः कथिता ।

अथ गाथाद्वयेन साक्षादिहैव कष्टं कथयति-

आसणं सयणं जाणं, वित्तं कामे अ भुंजिआ ।
दुस्साहडं धणं हिच्चा, बहुसंचिणिया रयं ॥ ८ ॥

तओ कम्मगुरूजंतू, पच्चुपन्नपरायणे ।
अयव्व आगयाएसे, मरणंतंमि सोयए ॥ ९ ॥

ततस्तदनन्तरं प्रत्युत्पन्नपरायणः, प्रत्युपन्ने - प्रत्यक्षभुज्यमानविषयसुखे परायणः प्रत्युत्पन्नपरायणः, परलोकसुखनास्तिकवादी जनो मरणान्ते - मरणस्यान्तः सामीप्यं मरणान्तस्तस्मिन् मरणान्ते-मरणे समागते सति शोचते - शोकं कुरुते इति सम्बन्धः । तत इति कुतः ? पूर्वं किं कृत्वेत्याह-आसनं-सुखासनादिकम्, शयनं-खट्वा-छप्परादिकम्, हिण्डोल-खट्वादिकम्, यानं-गडुिकादिकम्, वित्तं-द्रव्यम्, कामान् - विषयान् भुङ्क्त्वा, दुःखाहृतम्, दुःखेनाह्रियत इति दुःखाहृतं-दुःखोत्पाद्यं धनं त्यक्त्वा, पुनर्बहु-प्रचुरं रजःपातकं 'संचिणिया' सञ्चित्य-समुपार्ज्य, एतावता बहुभिः परिग्रहैः पातकमुपार्ज्यायुषोऽन्ते स आरम्भी जीवः शोचते । कथम्भूतः सः ? जन्तुः कर्मगुरुः, कर्मभिर्गुरुः कर्मगुरुः, गुरुकर्मा । स क इव शोचते ? अज इव यथा पूर्वोक्तोऽज आदेशे-प्राघूर्णके आगते सति शोचते, तथा स महारम्भी परिग्रही विषयी जीवो मरणसमये शोचत इत्यर्थः ॥ ९ ॥

पुनस्तदेव दृढयति-

तओ आउपरिक्खीणे, चुआ देहा विहिंसगा ।
आसुरीयं दिसं बाला, गच्छन्ति अवसा तमं ॥ १० ॥

तत आयुषि परिक्षीणे सति ते विहिंसका-विशेषेण हिंसाकारका नरा देहाच्च्युता मनुष्यशरीराद्भ्रष्टाः सन्त आसुरीयं दिशं गच्छन्ति । कीदृशास्ते ? बालाः-मूर्खा असुराणां रौद्राणां रुद्रकर्मकारिणामियं भावदिशा आसुरी, ताम्, पुनः कीदृशास्ते ? अवशाः-परवशा इन्द्रियवशवर्तिनो वा, कीदृशीमासुरीं दिशं ? 'तमं' इति तमोऽन्धकारं तद्युक्तत्वात्, तमःस्तो-ममयीं नरकगतिमिति भावः ॥ १० ॥ इति प्रथम एलकस्य दृष्टान्तः ।

अथ काकिन्याम्र-दृष्टान्तमाह-

जहा कागिणिए हेउं, सहस्सं हारए नरो ।
अपत्थं अंबगं भुच्चा, राया रज्जं तु हारए ॥ ११ ॥

यथा कश्चिन्नरः काकिण्या हेतोः सहस्रं-टङ्कानां सहस्रं हारयेत् काकिणी तु रूपकद्रव्य-स्याशीतितमो भागस्तदर्थं कश्चित्कृपणः टङ्कानां - दीनाराणां सहस्रं पातयेत्; सोऽतीव-मूर्खशिरोमणिः । अत्र मनुष्यभोगसुखस्य तुच्छत्वेन कपर्दिकादृष्टान्तः । 'तु' पुनः, कश्चिद्रा-जाऽपथ्यमाम्रफलं भुक्त्वा राज्यं हारितवान् हारयेद्वा । अत्र भोगसुखस्य तुच्छत्वोपरि काकिण्याम्रदृष्टान्तद्वयोदाहरणे दर्श्येते-

एकेन केनापि द्रमकेण वृत्तिं कुर्वता महोपक्रमेण कार्षापणसहस्रमर्जितम् स तद्वासनिकां कटौ बद्ध्वा सार्थेन समं गृहं प्रस्थितः । मार्गे भोजनार्थं चैकं रूपकमशीति-काकिणीभिर्भित्वा दिने दिने एकया काकिण्या भुङ्क्ते । एवं मार्गे तेनैकोनाशीतिका-किण्यो भक्षिताः । एका काकिण्यवशिष्टास्ति सा च सद्यः सार्थे चलिते विस्मृता । अग्रे गच्छतस्तस्य सा स्मृतिपथमागता । एवं च तेन चिन्तितमेकदिने भोजनार्थं मे रूपकभेदः कर्तव्यो भविष्यतीति क्वचिद्वासनिकां सङ्गोप्य पश्चान्निवृत्तः । तत्र सा काकिणी केनचिद् हृता, यावच्च वासनिकास्थाने पुनरायाति तावत्सापि केनचिद् हृता, ततोऽसावुभयभ्रष्टो गृहं गतः शोचति । अथाम्रदृष्टान्तो दर्श्यते -

कस्यचिदाज्ञ आम्रजीर्णेन विसूचिकाभूत्, वैद्यैर्महतोपक्रमेण तामपनीयोक्तं-चेदाम्राणि पुनस्त्वं खादसि तदा विनश्यसि । ततस्तेन राज्ञा स्वदेशे आम्रा उत्खातिताः । अन्यदा स राजाश्वापहृतो दूरतरवने गतः, तत्राम्रवृक्षच्छायायामुपविष्टः । पक्वान्याम्राणि दृष्ट्वा चलचित्तो मन्त्रिणा वार्यमाणोऽपि भक्षितवान् । तदानीमेव स मृतः, एवं काकिण्याम्र-सदृशमनुष्यकामासेवनतो बालनरेण देवकामा हार्यन्ते इति परमार्थः ॥ ११ ॥

एवं माणुस्सगा कामा, देवकामाणं अंतिए ।
सहस्सगुणिआ भुज्जो, आउं कामाय दिव्विया ॥ १२ ॥

एवममुना प्रकारेण काकिण्याम्रदृष्टान्तेन काकिण्याम्रसदृशा मानुष्यकाः कामा देवसुखानामन्तिके - देवसुखानां समीपे ज्ञेयाः । इह च दिव्यकामानामतिभूयस्त्वेन कार्षापण-सहस्रराज्यतुल्यता सूचिता । मनुष्यकामा हि देवकामानामग्रे भूयो - वारंवारं सहस्रगुणिताः-सहस्रैस्ताडिताः । 'दिव्विया' इति दिव्यका-देवसम्बन्धिनः कामाः-शब्दादयो ज्ञेयाः । आयुर्जीवितमपि देवसम्बन्धिसहस्रगुणितं ज्ञेयम्, दिव्यकाः कामाश्च यथा मनुष्यकामानामग्रे वारंवारं सहस्रगुणितास्तथायुरपि मनुष्यायुर्देवायुषोरन्तरं ज्ञेयम् ॥ १२ ॥

अणेगवासानउया, जा सा पन्नवओ ठिई ।
जाणि जीयंति दुम्मेहा, ऊणे वाससयाऊए ॥ १३ ॥

प्रज्ञावतः क्रियासहितज्ञानयुक्तस्य या स्थितिर्विद्यते, सा भवतामस्माकं च प्रतीतास्ति, तत्र स्थितौ यान्यनेकवर्षनयुतानि, अनेकान्यसङ्ख्येयानि वर्षनयुतानि येषु तान्यनेकवर्षनयुतानि अर्थाद्यानि पल्योपमसागराणि भवन्ति, अत्र प्राकृतत्वादनेकवर्षनयुता इति पुलिङ्गनिर्देशः कृतः । अथवा यत्र देवस्थितावनेकवर्षनयुता यानीति ये कामा भवन्ति तानि सर्वाणि पल्योपमसागराणि, तत्प्रमाणान्यायूंषि दिव्यस्थितिविषयभूतानि, दुर्मेधसो-दुर्बुद्धयः पुरुषा ऊने वर्षशतायुषि महावीरस्वामिवारके मनुष्यविषयैर्जीयन्ते-हार्यन्ते, दैवयोनियोग्यायुःकामसुखरहिताः क्रियन्ते, तुच्छमनुष्यसुखलब्धा मूर्खा देवस्थितिसुखहीना भवन्ति, अत एव दुर्मेधस इत्युक्तम्, दुर्दुष्टा मेधा येषां ते दुर्मेधस इति ॥ १३ ॥

अथ द्वाभ्यां गाथाभ्यां व्यवहारोपमामाह-

जहा य तिन्नि वणिया, मूलं घित्तूण निग्गया ।
एगुत्थ लहए लाभं, एगो मूलेण आगओ ॥ १४ ॥

एगो मूलंपि हारित्ता, आगओ तत्थ वाणिओ ।
ववहारे उवमा एसा, एवं धम्मे वियाणह ॥ १५ ॥

यथा च त्रयो वणिजः कस्माच्चिद्व्यापारिणः समीपान्मूलं नीवीद्रव्यं गृहीत्वा स्वकीयनगरादपरनगरे गताः । अत्र त्रिषु वणिग्जनेष्वेको लाभं लभते, एको मूलेन नीवीद्रव्येण सह समागतः, एको मूलं द्रव्यमपि हारयित्वा द्युत-मद्य-परस्त्री-वेश्यासेवनादि-कुव्यापारैर्गमयित्वा स्वगृहमागतः । एषा व्यवहारे उपमास्ति, एषैवोपमा धर्मेऽपि यूयं जानीथेत्यर्थः ॥ १५ ॥

माणुसत्तं भवे मूलं, लाभो देवगई भवे ।
मूलच्छेएण जीवाणं, नरगतिरिक्खत्तणं धुवं ॥ १६ ॥

मनुष्यो मृत्वा मनुष्य एव भवेत्, तदा मनुष्यत्वं मूलद्रव्यसदृशं ज्ञेयम्, यो मनुष्यभवाच्च्युत्वा देवो भवेत्तदा देवत्वं लाभतुल्यं ज्ञेयम्, यत्पुनर्मनुष्याणां नरकतिर्यक्त्वप्राप्तिर्भवेत्तदा मूलच्छेदेन ध्रुवं-निश्चितं दुर्भाग्यत्वं ज्ञेयम् ॥ १६ ॥

दुहओ गई बालस्स, आवईवहमूलिया ।
देवत्तं माणुसत्तं च, जं जिए लोलया सढे ॥ १७ ॥

बालस्य-मूर्खस्य द्विधा गतिर्भवेत्, कथम्भूता गतिः ? 'आवईवहमूलिया' आपद्वधमूलिकाः, आपदो-विपदो, वधस्ताडनादिः, आपदश्च वधश्चापद्वधौ, तौ मूलं यस्याः सापद्वधमूलिका । 'जं' इति यस्मात्कारणात्स बालो-मूर्खो देवत्वं मानुषत्वं च हारितः, कीदृशः सन् ? लोलया-लाम्पट्येन जितः, पुनः कीदृशः ? शठो-धूर्त्तः ॥ १७ ॥

तओ जिए सया होई, दुव्विहं दुग्गइं गए ।
दुल्लहा तस्स उम्मग्गा, अद्धाए सुचिरादवि ॥ १८ ॥

ततो देवत्व-मनुष्यत्वजयाद्देवगति-मनुष्यगतिहारणात्स मूर्खः सकृद्वारंवारं दुर्गतिं गतो भवतीत्यध्याहारः । तस्य बालस्य सुचिरादपि 'अद्धाए' - प्रभूतेऽप्यागामिनि काले 'उमग्गा' उन्मज्जनमुन्मज्जा तस्या दुर्गतेः सकाशान्निःसृतिः 'दुल्लहा' दुर्लभा भवति, निःसरणं दुष्करं भवेदित्यर्थः ॥ १८ ॥

एवं जिए संपेहाए, तुल्लिया बालं च पंडियं ।
मूलियं ते पवेसंति, माणुसं जोणिमिंति जे ॥ १९ ॥

एवममुना प्रकारेण बालं-मूर्खं जितं सम्प्रेक्ष्यालोच्य, च - पुनर्बालं-मूर्खम्, पुनः पण्डितं-तत्वज्ञं तुलित्वा-तोलयित्वेति विचारणीयम् । इतीति किं ? ते मनुष्या मूलियं-मौलिकं-मूले भवं मौलिकं मूलद्रव्यं प्रविशन्ति-लभन्ते । ते के ? ये मनुष्या मानुषं योनिमेन्ति-प्राप्नुवन्ति ते मूलरक्षकव्यवहारितुल्या ज्ञेयाः ॥ १९ ॥

मानुषं योनिं के व्रजन्ति तदाह -

वेमायाहिं सिक्खाहिं, जे नरा गिहिसुव्वया ।
उविंति माणुसीं जोणिं, कम्मसच्चा हु पाणिणो ॥ २० ॥

ये नरा विमात्राभिर्विविधप्रकाराभिः शिक्षाभिर्गृहिसुव्रता भवन्ति, गृहिणश्च ते सुव्रताश्च गृहिसुव्रता - गृहीतसम्यक्त्वादिगृहस्थद्वादशव्रताः । ते प्राणिनस्ते जीवा 'हु' इति निश्चयेन मानुषं योनिमुत्पद्यन्ते । कीदृशास्ते ? सत्यकर्माणः- सत्यान्यवन्ध्यफलानि कर्माणि ज्ञानावरणीयादीनि येषां ते सत्यकर्माणः कर्मसत्याः, प्राकृतत्वात्कर्मशब्दस्य प्राग्निपातः ॥ २० ॥

जेसिं तु विउला सिक्खा, मूलियं ते अइत्थिया ।
सीलवंता सविसेसा, अदीणा जंति देवयं ॥ २१ ॥

तुरेवार्थे, येषां जीवानां विपुला-विस्तीर्णा शिक्षा ग्रहणा-ऽऽसेवनादिकास्ति ते जीवा मूलकमिव नृभवत्वमतिक्रान्ताः सन्तो देवत्वं यान्ति-प्राप्नुवन्ति । किम्भूतास्ते जीवाः ? शीलवन्तः-सदाचाराः, पुनः कथम्भूतास्ते ? सविशेषाः, सह विशेषणेनोत्तरगुणेन वर्तन्त इति सविशेषाः, पुनः कीदृशाः ? अत एवादीनाः, न दीनाः सन्तोषभाज इत्यर्थः ॥ २१ ॥

एवं अदीणवं भिक्खुं, अगारिं च वियाणिया ।
कहं नु जिच्चमेलिक्खं, जिच्चमाणो न संविदे ॥ २२ ॥

पण्डितः पुमान् 'एलिक्खं' ईदृक्षं 'जिच्चं' इति जेयं-जेतव्यं देवगति-मनुष्यगति-रूपम्, जीयमान-इन्द्रियविषयैर्हार्यमाणः, कथं 'नु' न संविदेत् ? - कथं न जानीत ? अपि तु पण्डितो ज्ञपरिज्ञयैवं जानीतैव । किं कृत्वा ? एवममुना प्रकारेणादैन्यवन्तं - सन्तुष्टिभाजं भिक्षुं-साधुम्, च पुनरगारिणं-गृहस्थं 'वियाणिया' विशेषेण देवगतिमनुष्यगतित्वागा-मित्वलक्षणेन ज्ञात्वा, तस्मात्पण्डितो धर्ममार्गे सावधानो भवेदित्यर्थः ॥ २२ ॥

जहा कुसग्गे उदयं, समुद्देण समं मिणे ।
एवं माणुस्सगा कामा, देवकामाण अंतिए ॥ २३ ॥

यथा कुशाग्रे उदकं समुद्रेण समं मन्यते, एवं मानुष्यकाः कामा देवकामानामन्तिके -समीपे ज्ञेयाः ॥ २३ ॥

कुसग्गमित्ता इमे कामा, संनिरुद्धंमि आउए ।
कस्स हेउं पुरा काउं, जोगक्खेमं न संविदे ॥ २४ ॥

संनिरुद्धे-संक्षिप्ते आयुषीमे प्रत्यक्षा मनुष्यसम्बन्धिनः कामाः कुशाग्रमात्राः सन्तीत्यध्याहारः । एवं सत्यपि जनः कस्य हेतुं पुरस्कृत्य कं हेतुं - किंकारणमाश्रित्य योगं च पुनः क्षेमं न संविदे-न संवित्ते, योगं क्षेमं च कथं न जानातीत्याश्चर्यमित्यर्थः ॥ २४ ॥

इह कामाणियट्टस्स, अत्तट्ठे अवरज्झई ।
सुच्चा नेआउयं मग्गं, जं भुज्जो परिभस्सई ॥ २५ ॥

इहेत्यत्र दृष्टान्तपञ्चके क्रमात्-अपायबहुलत्वम् १, तुच्छत्वम् २, आयव्ययतो लाभम् ३, हारणम् ४, समुद्रजलदृष्टान्तं च ५, ज्ञात्वेह नरभवे कश्चिद् गुरुकर्मा जीवस्तस्य कामाद्भो-गसुखादनिवृत्तस्य, आत्मार्थो मोक्षोऽपराध्यति-नश्यति, विषयिणो जीवस्य मोक्षो न भवतीत्यर्थः । अत्र हेतुमाह-'जं' इति यस्मात्कारणात्स गुरुकर्मा जीवो नैयायिकं मार्ग-मोक्षमार्गं श्रुत्वा भूयो-वारंवारं परिभ्रश्यति, संसारगर्त्तायां पततीत्यर्थः ॥ २५ ॥

इह कामणियट्टस्स, अत्तट्ठे नावरज्झई ।
पूइदेहनिरोहेण, भवे देवित्ति मे सुयं ॥ २६ ॥

हे शिष्य ! 'मे' मयेति श्रुतम्, इतीति किं ? इहास्मिन्नरभवे कामान्निवृत्तस्य जीवस्य लघुकर्मण, आत्मार्थो-मोक्षो न नश्यति, स च पुमान् पूतिदेहनिरोधेनौदारिकदेहत्यागेन शतन-पतन-विध्वंसनधर्मात्मकपिण्डाभावेन देवो भवेद्देवशरीरं प्राप्नुयात् ॥ २६ ॥

इड्ढी जुइ जसो वण्णो, आउयं सुहमणुत्तरं ।
भुज्जो जत्थ मणुस्सेसु, तत्थ से उववज्जइ ॥ २७ ॥

स निर्विषयी कामान्निवृत्तो जीवस्तत्र मनुष्येषु भूयो वारंवारमुत्पद्यते, तत्र कुत्र ? यत्र मनुष्येषु ऋद्धिः स्वर्ण-रूप्य-रत्न-माणिक्यादिका भवन्ति, यत्र द्युतिर्देहस्य कान्तिर्भवति, पुनर्यत्र यशो भवति, पराक्रमादुत्पन्नधर्मविशेषरूपं यश उच्यते, पुनर्यत्र वर्णो गाम्भीर्यादिगुणैर्वर्णनम् वर्णः-श्लाघा, अथवा वर्णशब्देन गौरत्वादिगुणो वा, पुनर्यत्रायुः सम्पूर्णं प्रचुरं च भवति, पुनर्यत्र सुखं भवति, एतेषां सर्वेषामनुत्तरपदेन विशेषणं कर्त्तव्यम्, अनुत्तरं - सर्वोत्कृष्टं देवभवापेक्षयेतद्वक्तव्यम् ॥ २७ ॥

बालस्स पस्स बालत्तं, अहम्मं पडिवज्जिया ।
चिच्चा धम्मं अहम्मिट्ठे, नरएसु उववज्जई ॥ २८ ॥

हे शिष्य ! त्वं बालस्य - हिताहितज्ञानरहितस्य बालत्वं मूर्खत्वं पश्य । स अधर्मिष्ठो बालो धर्मं त्यक्त्वाऽधर्मं प्रतिपद्य नरके उत्पद्यते ॥ २८ ॥

धीरस्स पस्स धीरत्तं, सव्वधम्माणुवत्तिणो ।
चिच्चा अधम्मं धम्मिट्ठे, देवेसु उववज्जई ॥ २९ ॥

हे शिष्य ! धीरस्य - पण्डितस्य धीरत्वं पश्य-त्वं विचारय । धिया राजत इति धीरः, धियं - बुद्धिं राति-ददातीति धीरः । तस्य कीदृशस्य धीरस्य ? सर्व धर्मानुवर्तिनः, सर्वे ये क्षान्त्यादयो धर्मास्ताननुवर्तितुमनुकूलत्वेन चरितुं शीलं यस्य स सर्वधर्मानुवर्ती, तस्य क्षान्त्यादिदशविधधर्मधारकस्य, कीदृशं धीरत्वं तदाह-स धर्मिष्ठो धीरोऽधर्मं त्यक्त्वा देवेषूत्पद्यते ॥ २९ ॥

तुलिया ण बालभावं, अबालं चेव पंडिए ।
चइउण बालभावं, अबालं सेवइ मुणि ॥ ३० ॥त्ति बेमि ॥

मुनिस्तीर्थङ्करादेशकारी साधुरेवममुना प्रकारेण बालस्य बालभावम्, च - पुनः पण्डितस्याबालं पण्डितत्वम्, 'तुलिया' इति तोलयित्वा, णकारो वाक्यालङ्कारे, पश्चात्पण्डितस्तत्वज्ञः पुमान् बालभावं-मूर्खत्वं त्यक्त्वाऽबालं-पण्डितत्वं सेवयेत्, अङ्गीकुर्यादित्यर्थः, इत्यहं ब्रवीमि, सुधर्मा स्वामी जम्बूस्वामिनं प्रत्याह ॥ ३० ॥

इत्यौरभ्रीयाख्यं सप्तममध्ययनं सम्पूर्णम् ॥ ७ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां सप्तमाध्ययनस्यार्थः सम्पूर्णः ॥

॥ अथाष्टमं कापिलीयाख्यमध्ययनं प्रारभ्यते ॥

पूर्वस्मिन्नध्ययने विषयत्याग उक्तः, स च निर्लोभस्यैव भवति, ततोऽष्टममध्ययनं कपिलस्य महामुनेर्दृष्टान्तगर्भितं निर्लोभत्वदृढीकरणं कथ्यते। पूर्वं कः कपिलः ? कथं च स मुनिर्जातः ? अतस्तदुत्पत्तिरुच्यते-

कौशाम्ब्यां नगर्यां जितशत्रुराजा राज्यं करोति स्म। तत्र काश्यपो ब्राह्मणः, स चतुर्दशविद्यास्थानपारगः पौराणां राज्ञश्चातीवसम्मतः, तस्य राज्ञा महती वृत्तिर्दत्ता, काश्यपब्राह्मणस्य यशानाम्नी भार्या वर्तते, तयोः पुत्रः कपिलनामास्ति। तस्मिन् कपिले बाल एव सति काश्यपो ब्राह्मणः कालं गतः। तदधिकारो राज्ञान्यस्मै ब्राह्मणाय दत्तः, सोऽश्वारूढच्छत्रेण ध्रियमाणेन नगरान्तर्व्रजति। एकदा तं तथा व्रजन्तं दृष्ट्वा यशा भृशं रुरोद। कपिलेन पृष्टं-मातः किं रोदिषि ? सा प्राह-वत्स ! तव पितेदृश्या ऋद्ध्या पुरान्तर्भ्रमन्नभूत्। मृते च तव पितरि, त्वयि चाविदुषि सत्ययं तव पैत्र्यं पदं प्राप्तस्ततो रोदिमि। कपिल ऊचेऽहं भणामि। यशा प्राह-हे पुत्र ! अत्र तव न कोऽप्येतद्धीत्या पाठयिष्यति, इतस्त्वं श्रावस्त्यां व्रज। तत्र त्वत्पितृमित्र इन्द्रदत्तो ब्राह्मणस्त्वां पाठयिष्यति। ततः कपिलः श्रावस्त्यां तत्समीपं गतः। तेन पृष्टं-कस्त्वं ? कुत आयातः ? कपिलेन सर्वं स्वस्वरूपमूचे। तेन मित्रपुत्रत्वात्सविशेषं पाठ्यते। परं स्वगृहे भोजनं तस्य कारयितुं न शक्यते।

ततोऽनेन शालिभद्रनामा तत्रत्यो व्यवहारी प्रार्थितो, यथास्य त्वया निरन्तरं भोज्यं देयम्। त्वत्प्रसादान्निश्चिन्तोऽसौ पठिष्यति। तेनापि तत्प्रतिपन्नम्, कपिलः शालिभद्रगृहे प्रत्यहं भुङ्क्ते, इन्द्रदत्तगुरुसमीपे चाध्येति। शालिभद्रगृहे चैका दासी वर्तते। दैवयोगात्तस्यामसौ रक्तोऽभूत्। अन्यदा सा गर्भिणी जाता। सा कपिलं प्रत्याहाहं तव पत्नी जाता। ममोदरे त्वद्गर्भो जातोऽतस्त्वया मे भरणपोषणादि कार्यम्। कपिलस्तद्वचः श्रवणाद् भृशं खिन्नः- परमामधृतिं प्राप, न च तस्यां रात्रौ निद्रां प्राप। पुनस्तया भणितम्-स्वामिन् ! खेदं मा कुर्याः। मदुक्तमेकमुपायं शृणु।

अत्र धननामा श्रेष्ठी वर्तते। तस्य यः प्रथमं प्रभाते गत्वा वर्धापयति तस्य स सुवर्णमाषद्वयं ददाति। ततस्त्वमद्य प्रभाते गत्वा प्रथमं वर्धापय, यथा सुवर्णमाषद्वयं प्राप्नुयाः। कपिलस्तस्या वचः श्रुत्वा मध्यरात्रावुत्थितः, तस्य धाम्न्यपरः कश्चिन्मा प्रथमं यायादिति मत्वौत्सौक्येन गच्छन् कपिलः पुरारक्षकैर्गृहीतः, चौरधिया बद्धः, प्रभाते पुरस्वामिनः पुरो नीतः। पुरस्वामिना पृष्टं-कस्त्वं ? किमर्थमर्धरात्रौ निर्गतः ? तेन सकलं स्वरूपं प्रकटीकृतम् सत्यवादित्वात्तस्य तुष्टो राजा प्राह-यत्त्वं मार्गयसि तदहं ददामि, सा प्राह-विमृश्य मार्गयामि। राजा प्राह-याह्यशोकवनिकायां, विचारय स्वेष्टं।

कपिलस्तत्र गत इति चिन्तयितुमारब्धवान्। चेदहं सुवर्णमाषद्वयं मार्गयामि, तदा तस्या दास्याः शाटिकामात्रं जायते, न त्वाभरणानि। ततः सहस्रं मार्गयामि तदापि तस्या

आभरणानि न जायन्ते, ततोऽहं लक्षं मार्गयामि, तदापि मम जात्यतुरङ्गमोत्तमगजेन्द्रप्रवर-रथादिसामग्री न जायते, ततः कोटिं मार्गयामीति चिन्तयन्नेव स्वयं संवेगमागतः । सुवर्ण-माषद्वयार्थं निर्गतस्यापि मम कोट्यापि तुष्टिर्न जातेति धिगिमां तृष्णामिति विचार्य स्वमस्तके लोचं कृतवान् । शासनदेवतया तस्य रजोहरणादिलिङ्गमर्पितम् । कपिलो द्रव्य-भावाभ्यां यतिर्भूत्वा राज्ञः पुरः समागतः, राज्ञा भणितं-त्वया विचारितं किं ? स आह-

जहा लाहो तहा लोहो, लाहा लोहो पवड्ढई ।
दोमासकयंकज्जं, कोडिएवि न निट्ठियं ॥ १ ॥ [उत्त. ८/३७]

इति विचार्याहं त्यक्ततृष्णः संयमी जातः । राज्ञोक्तं-कोटिमपि तवाहं ददामि । तेनोक्तं सर्वोऽपि परिग्रहो मया व्युत्सृष्टः । न मे कोट्यापि कार्यमित्युक्त्वा स श्रमणस्ततो विहृतः षण्मासान् यावच्छद्मस्थ एवासीत्, पश्चात्केवली जातः । इतश्च राजगृहनगरान्तरालमार्गे बलभद्रप्रमुखाश्चौराः सन्ति । एतेषां प्रतिबोधो मत्तो भविष्यतीति ज्ञात्वा स कपिलकेवली गतः । तैर्दृष्टः प्रोक्तश्च-भोः श्रमण ! नृत्यं कुरु । केवली प्राह-वादकः कोऽपि नास्ति । ततस्ते पञ्चशतचौरास्तालानि कुट्टयन्ति, कपिलकेवली च गायति, तद्गीतवृत्तमाह-

अधुवे असासयंमि, संसारंमि दुक्खपउराए ।
किं नाम हुज्ज तं कम्मयं, जेणाहं दुग्गइं न गच्छिज्जा ॥ १ ॥

भो जनाः ! अस्मिन् संसारे तत्कर्मकं किं नाम किं सम्भाव्यते ? तत्किं कर्म वर्तते ? तत्किं क्रियानुष्ठानं वर्तते ? येन कर्मणाहं दुर्गतिं न गच्छेयम् । केवलिनः संशयस्य दुर्गतिगमनस्य चोभयोरभावेऽपि प्रतिबोधापेक्षयेति केवली भगवानिदमाह । कथम्भूते संसारे ? अध्रुवे, [1]नवनवस्थानकनिवाससद्भावादस्थिरे, पुनः कीदृशे संसारे ? अशाश्व-तेऽनित्ये, पुनः कीदृशे संसारे ? दुःखप्रचुरे - दुःखैः - शारीरिक-मानसिककष्टैः प्रचुरे-पूर्णे जन्मजरामृत्युसहिते ॥ १ ॥

विजहित्तु पुव्वसंजोगं, न सिणेहं कहंचि कुव्विज्जा ।
असिणेह सिणेहकरेहिं, दोसपओसेहिं पमुच्चए भिक्खू ॥ २ ॥

भिक्षुः साधुः कथञ्चित्क्वचिद्बाह्याऽभ्यन्तरे वस्तुनि स्नेहं न कुर्यात् । किं कृत्वा ? पूर्वसंयोगं 'विजहित्तु' विहाय, कथम्भूतो भिक्षुः ? स्नेहकरैः, सस्नेहाः स्नेहं कुर्वन्तीति स्नेहकरास्तैः पुत्र-कलत्रादिभिरस्नेहो वीतरागः । अथवा स्नेहकरेष्वस्नेहः, सप्तमीस्थाने तृतीया । पुनः स भिक्षुर्दोषप्रदोषैः प्रमुच्यते, दोषाश्च प्रदोषाश्च दोषप्रदोषास्तैर्दोषप्रदोषैः प्रमुक्तो भवति, प्रकर्षेण रहितो भवति, दोषैर्मनस्तापादिभिः, प्रदोषैः प्रकृष्टदोषैः, परभवे नरकदुःखै रहितो भवति ॥ २ ॥

---

१ भवभव°-मु. ॥

तो नाणदंसणसमग्गो, हियनिस्सेसाय सव्वजीवाणं ।
तेसिं विमोक्खणट्ठाए, भासई मुनिवरो विगयमोहो ॥ ३ ॥

ततोऽनन्तरं मुनिवरः कपिलः केवली सर्वजीवानां हितनिःश्रेयसाय भाषते । हितं पथ्यसदृशम्, यन्नितरामतिशयेन श्रेयः- कल्याणं हितनिःश्रेयसस्तस्मै हितनिःश्रेयसाय । किमर्थं भाषते ? तेषां चौराणां विमोक्षणार्थम् स्वयं तु कपिलो विमुक्त एवास्ति । अथ च तेषां चौराणां मोक्षणार्थमाहेत्यर्थः । कथम्भूतो मुनिवरः ? विगतमोहो - मोहरहितः, कीदृशो मुनिवरः ? ज्ञान-दर्शनसमग्रो - ज्ञान-दर्शनाभ्यां पूर्णः ॥ ३ ॥

किं भाषत इत्याह -

सव्वं गंथं कलहं च, विप्पजहे तहाविहं भिक्खू ।
सव्वेसु कामजाएसु, पासमाणो न लिप्पई ताई ॥ ४ ॥

भिक्षुः- साधुस्तथाविधं पूर्वोक्तं कर्मबन्धहेतुं सर्वग्रन्थं - बाह्याभ्यन्तरभेदेन द्विविधं परिग्रहं विशेषेण प्रजह्यात्परित्यजेत् । च पुनर्भिक्षुः कलहं-क्रोधम्, चकारान्मान-माया-लोभादीन् विप्रजह्यात् । पुनः साधुः सर्वेषु कामजातेष्विन्द्रियविषयेषु न लिप्यते-नासक्तो भवेत् । किं कुर्वन् ? पश्यन्-विषयविपाकं चिन्तयन्नित्यर्थः । पुनः कीदृशः साधुः ? 'ताई' त्रायी - सर्वजीवानामभयदानदायीत्यर्थः ॥ ४ ॥

भोगामिसदोसविसण्णे, हियनिस्सेयसबुद्धिवुच्चत्थे ।
बाले य मंदिए मूढे, बज्झइ मच्छिया व खेलंमि ॥ ५ ॥

एतादृशो बालोऽज्ञानी कर्मणा बध्यते, कर्मणा बद्धश्च संसारान्निर्गन्तुं न शक्नोति, संसार एव सीदति । कस्मिन् क इव ? खेले-श्लेष्मणि मक्षिका-जन्तुरिव, कथम्भूतो ? बालो जनः, मन्दो धर्मक्रियायामलसः, पुनः कीदृशः ? मूढो-मोहव्याकुलमनाः, पुनः कीदृश ? विषयामिषदोषविषण्णः, विषया एव गृद्धिहेतुत्वादामिषं विषयामिषम्, तदेव दोषो जीवस्य दूषणकरणत्वाद्विषयामिषदोषस्तत्र विशेषेण सन्नो-निमग्नो विषयामिष-दोषविषण्णः । पुनः कीदृशः ? हितनिःश्रेयसबुद्धिपर्यस्तः, हितमात्मसुखम्, निःश्रेयसो मोक्षः, हितं च निःश्रेयसश्च हितनिःश्रेयसौ, तयोर्विषये या बुद्धिर्हितनिःश्रेयसबुद्धिस्तस्याः सकाशाद्विशेषेण पर्यस्तः-पराङ्मुखो हितनिःश्रेयसबुद्धिविपर्यस्तः स्वर्गापवर्गसुखाद्भ्रष्ट इत्यर्थः ॥ ५ ॥

दुपरिच्चया इमे कामा, नो सुजहा अधीरपुरिसेहिं ।
अह संति सुव्वया साहु, जे तरंति अतरं वणिया वा ॥ ६ ॥

इमे प्रसिद्धाः कामा अधीरपुरुषैर्न सुजहाः-न सुखेन हातुं योग्या इत्यर्थः, मिष्टान्नादिभोजनवत् । अत एव कीदृशा इमे कामाः ? दुष्परित्यजाः । अथ केचित्सुव्रताः साधवः सन्ति, येऽतरं - तरीतुमशक्यं संसारं तरन्ति । के इव ? वणिज इव, यथा वणिजः सामुद्रिका व्यापारिणोऽतरं महासमुद्रं प्रवहणैस्तरन्ति, अत्र वाशब्दो हीवार्थे ॥ ६ ॥

समणा मु एगे वयमाणा, पाणवहं मिया अयाणंता ।
मंदा निरयं गच्छंति, बाला पावियाहिं दिट्ठीहिं ॥ ७ ॥

एके - केचित्कुतीर्थ्या - मिथ्यात्विनः पापिकाभिः- पापहेतुकाभिर्दृष्टिभिर्बुद्धिभिः प्राणवधमधर्ममजानन्तो नरकं गच्छन्ति । कथम्भूतास्ते मृगाः ? अविवेकिनः, पुनः कीदृशास्ते ? मन्दा-जडाः, यथा केचिद्रोगग्रस्ताभिर्दृष्टिभिः सम्यग्मार्गमजानन्तः कस्मिंश्चिद् दुःखव्याप्ते मार्गे व्रजन्ति । पुनस्ते केचित्कुतीर्थ्याः किं कुर्वन्तः ? 'मु' इति वयं श्रमणा इति 'वयमाणा' वदन्तः श्रमणधर्मरहिता अपि स्वस्मिन् श्रमणत्वं मन्यमाना इत्यर्थः । यदि प्राणवधमपि न जानन्ति, तदान्येषां मृषावादादीनां तु ज्ञानं तेषु कुत एव सम्भाव्यते । कथम्भूतास्ते ? मन्दा मिथ्यात्वरोगग्रस्ताः, पुनः कथम्भूतास्ते ? बाला-विवेकहीनाः, विवेक-हीनत्वं हि तेषां पापशास्त्रेषु धर्मशास्त्रबुद्धित्वात् । तद्यथा- "ब्रह्मणे ब्राह्मणमालभेत, इन्द्राय क्षत्रमालभेत, मरुद्भ्यो वैश्यं, तमसे शूद्रम्" तथा -

"यस्य बुद्धिर्न लिप्येत, हत्वा सर्वमिदं जगत् ।
आकाशमिव पङ्केन, नासौ पापेन लिप्यते ॥ १ ॥"

(धर्मो हि बालैरज्ञेयः ॥ ७ ॥)

न हु पाणवहमणुजाणे, मुच्चिज्ज कयाइ सव्वदुक्खाणं ।
एवमायारिएहिं अक्खायं, जेहिं इमो साहुधम्मो पन्नत्तो ॥ ८ ॥

तैरार्यैः पूज्यैराचार्यैरेवमाख्यातमित्युक्तम् । तैः कैः ? यैराचार्यैरयं साधुधर्मः- साध्वाचारः, अथवा सम्यग्धर्मः प्रज्ञप्तः-कथितः, इतीति किं ? जीवः प्राणिवधं- जीवस्य हिंसामनुजानन्ननुमोदयन् 'हु' इति निश्चये कदापि सर्वदुःखेभ्यो न मुच्येत । अत्र प्राणिवध-स्यानुमोदनायास्त्यागात्करणकारणयोरपि त्याग उक्तः । प्राणिवधकरणकारणाऽनुम-तित्यागाच्च मृषावादाऽदत्तादान-मैथुन-परिग्रहादीनामपि करणकारणानुमतस्यापि निषेधो ज्ञेयः ॥ ८ ॥

पाणे य नाइवाइज्जा, से समीइत्ति वुच्चई ताई ।
तओ से पावयं कम्मं, निज्जाइ उदगंव थलाओ ॥ ९ ॥

यः साधुः प्राणान्-जीवान्नातिपातयेन्न विनाशयेत्-स्वयं न हिंस्यात्, चशब्दात्प्राण-हिंसायाः कारणानुमत्योरपि निषेध उक्तः । स त्राता जीवरक्षाकारी साधुः समित उच्यते । 'से' इत्यथानन्तरं-सर्वजीवरक्षणादनन्तरं, ततस्तस्मात्समितात्समितिगुणयुक्तात्साधोः पापकं कर्म-अशुभं कर्म निर्याति-निर्गच्छति । कस्मात्कमिव ? स्थलादुन्नतभूतलादुदकं-पानीयं निर्गच्छति, उन्नतभूतले यथोदकं न तिष्ठति, तथा समिते साधौ पापकं न तिष्ठतीत्यर्थः ॥ ९ ॥

जगनिस्सिएहिं भूएहिं, तसनामेहिं थावरेहिं च ।
नो तेसिमारंभे दंडं, मणसा वयसा कायसा चेव ॥ १० ॥

जगल्लोकास्तत्र निश्रिता-आश्रितास्तेषु जगन्निश्रितेषु त्रसेषु स्थावरेषु च जीवेषु मनसा वचसा, च पुनः कायेन, तेषु दण्डं न समारभेत-वधं न कुर्यादित्यर्थः । अत्रोज्जयिन्यां श्राद्धपुत्रस्य कथा वाच्या ॥ १० ॥

सुद्धेसणाओ नच्चाणं, तत्थ ठविज्ज भिक्खु अप्पाणं ।
जायाए गासमेसिज्जा, रसगिद्धे न सिया भिक्खाए ॥ ११ ॥

भिक्षुः-साधुः शुद्धैषणां ज्ञात्वा - शुद्धाहारग्रहणं विज्ञाय, तत्र - निर्दोषग्रहणे आत्मानं स्थापयेत्, पुनः साध्वाचारं वदति भिक्षादो-भिक्षाचरो मुनिर्यात्रायै - शरीरनिर्वाहाय ग्रासमाहारमेषयेत्-गवेषयेत्, न पुनः साधू रसगृद्धः स्यात् ॥ ११ ॥

पंताणि चेव सेविज्जा, सीयपिंडपुराणकुम्मासं ।
अदुव बुक्कसं पुलागं वा, जवणट्ठा य निसेवए मंथुं ॥ १२ ॥

साधुर्यापनार्थं--शरीरनिर्वाहार्थं प्रान्तानि - निरसाण्यन्नपानीयानि सेवेत, च पुनरन्तान्यपि सेवेत । तानि प्रान्तान्यन्तान्यन्नपानीयानि कानीत्याह-शीतं पिण्डम्, शीतः-शाल्यादिस्तस्य पिण्डः शीतपिण्डस्तम्, पुनः पुराणकुल्माषं- पुराणाः- प्रभूतकालं यावत्सञ्चिताः, पुराणाश्च ते कुल्माषाश्च पुराणकुल्माषाः पुरातनराजमाषास्तान्, प्राकृतत्वादेकवचनम्, 'अदुव्व' अथवा 'बुक्कसं' अतिनिपीडितरसं-तुषमात्रस्थितम्, 'बुक्कसं' मुद्गादीनां तुषं वा, अथवा पुलाकमसारं वल्लचणकादिकम्, पुनः शरीरधारणार्थं 'मन्थुं' बदरचूर्णं निषेवेत, बदरचूर्णस्यापि रूक्षतया प्रान्तत्वम्, अत्र यापनार्थमित्युक्तं तेनायमर्थो ज्ञेयः- यदि त्वतिवातादिना तद्देहयापना नैव स्यात्ततो न निषेवेत, अपि स्थविरो ग्लानश्च येनाहारेण शरीरे सुखं स्यात्तदाहारं सेवेत, अयमर्थो ज्ञेयः ॥ १२ ॥

जे लक्खणं च सुविणं च, अंगविज्जं च जे पओजंति ।
न हु ते समणा वुच्चंति, एवं आयरिएहिं अक्खायं ॥ १३ ॥

'हु' इति निश्चये न ते श्रमणा उच्यन्ते आचार्यैरेवमाख्यातम् । ते के ? ये लक्षणं सामुद्रिकशास्त्रोक्तं द्वात्रिंशत्प्रमाण - माषतिलकादिकं च, च पुनः स्वप्नं-स्वप्नशास्त्रं-

'गजारोहणाद्भवेद्राज्यं, श्रीप्राप्तिः श्रीफलागमात् ।
पुत्राप्तिः फलिताम्रस्य, सौभाग्यं माल्यदर्शनात्' ॥ १ ॥

इत्यादि अङ्गविद्यामङ्गस्फुरणफलशास्त्रं यथा -

"शिरसः स्फुरणे राज्यं, हृदयस्फुरणे सुखं ।
बाह्वयोश्च मित्रमेलापो, जङ्घयोर्भोगसङ्गमः" ॥ १ ॥

इत्यादि सर्वं मिथ्याश्रुतं साधुना न प्रयोज्यमित्यर्थः । यदाह धर्मदासगणिः क्षमाश्रमणः-

"[1]जोइसनिमित्तअक्खर-कोउयआएसभूयकम्मेहिं ।
करणाणुमोयणिज्जे, साहुस्स तवक्खओ होइ" ॥ १ ॥ ॥ १३ ॥

इह जीवियं अनियमित्ता, पब्भट्ठा समाहिं जोएहिं ।
ते कामभोगरसगिद्धा, उववज्जंति आसुरे काए ॥ १४ ॥

ते कामभोगरसगृद्धा आसुरे काये उत्पद्यन्ते । किं कृत्वा ? इहास्मिन् संसारे जीवितमात्मानं तपोविधानादिना, 'अनियमित्ता' इत्यनियंत्र्यावशीकृत्य, ते के ? ये समाधियोगेभ्यः प्रभ्रष्टाः, समाधिना-स्थैर्येण योगा-मनोवाक्कायानामेकीभावाः समाधियोगास्तेभ्यः प्रभ्रष्टाः-प्रकर्षेणाधः पतिताः । पुनः कीदृशास्ते ? कामभोगरसगृद्धा विषयसेवनस्वादलोला, आसुरे कायेऽसुरकुमारयोनौ, अत्र 'अनियमित्ता' इत्युक्तेन किञ्चिदनुष्ठानं कृत्वाऽसुरकुमारत्वेनोत्पद्यन्ते, नितरामतिशयेन यमित्वा-नियम्य, न नियम्यानियम्योत्कृष्टं तपोऽकृत्वेत्यर्थः ॥ १४ ॥

ततोवि य उवट्टित्ता, संसारं बहु अणुपरियट्टंति ।
बहुकम्मलेवलित्ताणं, बोही होइ सुदुल्लहा तेसिं ॥ १५ ॥

ततोऽपि च ततोऽसुरनिकायादुद्धृत्य निःसृत्य बहुं संसारमनुपर्यटन्ति-बहुलं संसारं भ्रमन्ति । पुनस्तेषां संसारे भ्रमतां बोधिः- सम्यक्त्वलब्धिः सुदुर्लभा भवति । कथम्भूतानां तेषां ? बहुकर्मलेपलिप्तानां - प्रचुरकर्मपङ्कखरण्टितानाम् ॥ १५ ॥

कसिणं पि जो इमं लोगं, पडिपुन्नं दलिज्ज इक्कस्स ।
तेणावि से ण तुसिज्जइ, इइ दुप्पूरए इमे आया ॥ १६ ॥

यदिशब्दस्याध्याहारः, यदि कश्चिदिन्द्रादिदेव एकस्य कस्यचित्पुरुषस्य प्रतिपूर्णं धनधान्यादिपदार्थैर्भृतं कृत्स्नं समस्तलोकं-विश्वं दद्यात्तदापि तेन धनधान्यादिपरिपूर्णसमस्तलोकदानेन स पुरुषो न तुष्येत्, इति हेतोरयमात्मा दुष्पूरकः, दुःखेन पूर्यत इति दुष्पूरः, दुष्पूर एव दुष्पूरकः ॥ १६ ॥

पूर्वोक्तमर्थमेव दृढयति -

जहा लाहो तहा लोहो, लाहा लोहो पवड्ढइ ।
दोमासकयं कज्जं, कोडिएवि न निट्ठियं ॥ १७ ॥

यथा लाभस्तथा लोभः लाभाल्लोभः प्रवर्धते, द्विमाषार्थं-द्विमाषप्रमितस्वर्णग्रहणार्थं कृतं कार्यं स्वर्णकोटीभिरपि 'न निट्ठियं' न निष्ठितम्, पूर्णं न जातमित्यर्थः । माषं तु पञ्चगुञ्जाप्रमाणम्, माषद्वयप्रमितस्वर्णेन कार्यं दास्याः पुष्प-ताम्बूलवस्त्राभूषणादिमूल्यरूपम्, तत्कार्यं कोटिद्रव्येणापि परिपूर्णं नाभूत् ॥ १७ ॥

---

१ ज्योतिष्-निमित्ताक्षरकौतुकादेशभृतकार्यैः । करणानुमोदनीये, साधोस्तपःक्षयो भवति ॥ १ ॥

स्त्रीमूला हि तृष्णेति हेतोस्तत्परिहारार्थं गाथामाह-

नो रक्खसीसु गिज्झिज्जा, गंडवच्छसुऽणेगचित्तासु ।
जाओ पुरिसं पलोभित्ता, खेलंति जहा व दासेहिं ॥ १८ ॥

राक्षसीषु नो गृद्धयेन्न विश्वसेत्, ज्ञानादिजीवितापहारादाक्षसीत्युक्तम् । कथम्भूतासु स्त्रीषु ? गण्डवक्षस्सु, गण्डं-गडुस्तदुपमत्वादुच्चैः कुचौ वक्षसी यासां ता गण्डवक्षसस्तासु गण्डवक्षस्सु, उच्चकुचस्फोटकवक्षस्कासु, वैराग्योत्पादनार्थं कुचयोर्गडूपमानम्, बिभत्स्योत्पादमुपमानम् । पुनः कीदृशीषु स्त्रीषु ? अनेकचित्तासु-अनेकेषु पुरुषेषु चित्तं यासां ता अनेकचित्तास्तासु, अथवानेकेषां पुरुषाणां चित्तं यासु ता अनेकचित्तास्तासु, अथवानेकानि चित्तानि-सङ्कल्पविकल्परूपाणि चिन्तनानि यासां ता अनेकचित्तास्तासु, याः स्त्रियो राक्षस्यः पुरुषं - कुलीनं मानवं प्रलोभयित्वा त्वमेव मम भर्ता, त्वमेव मम जीवितम्, त्वमेव मम शरणमित्यादिवचनैर्वशीकृत्य प्रीतिमुत्पाद्य तैः पुरुषैः सह रमन्ते-क्रीडन्ति । कैः ? यथादासैर्यथेव दासैः क्रीड्यते, ते कुलीनपुरुषा अपि स्त्रीभिर्व्यामोहिताः सन्तो दासप्राया भवन्ति । यथा दासा गम्यताम्, स्थीयताम्, इदं कार्यं क्रियताम्, इदं कार्यं मा क्रियतामिति वचनं श्रुत्वा स्वाम्यादेशकारिणो भवन्ति, तथा नारीणां वशवर्तिनः पुरुषाः किङ्करा भवन्तीत्यर्थः ॥ १८ ॥

नारीसु नोपगिज्झिज्जा, इत्थी विप्पजहे अणगारे ।
धम्मं च पेसलं नच्चा, तत्थ ठविज्ज भिक्खू अप्पाणं ॥ १९ ॥

अनगारः-साधुः स्त्रीषु न गृद्धयेन्न गृद्धिं कुर्यात्, अनगारः स्त्रियं विशेषेण प्रजह्यात्परित्यजेत्, पुनर्भिक्षुधर्मं-ब्रह्मचर्यादिरूपं पेशलं-मनोज्ञं ज्ञात्वा तत्र - धर्मे आत्मानं स्थापयेत् ॥ १६ ॥

इइ एस धम्मे अक्खाए, कविलेणं विसुद्धपन्नेणं ।
तरिहिंति जे उ काहिंति, तेहिं आराहिया दुवे लोग ॥ २० ॥ त्ति बेमि ॥

इत्यमुनाप्रकारेणैष धर्मः कपिलेनाख्यातः-कथितः । कथम्भूतेन कपिलेन ? विशुद्ध-प्रज्ञेन - केवलज्ञानयुक्तेन, ये पुरुषाः कपिलकेवलिनोक्तं धर्मं करिष्यन्ति ते पुरुषाः संसारं तरिष्यन्ति, पुनस्तैः पुरुषैर्द्वावपि लोकावाराधितौ सफलीकृतावित्यर्थः ॥ २० ॥ इत्यादिदोधकान् - कपिलोक्तान् श्रुत्वा तत्र केचिच्चौराः प्रथमेनैव दोधकेन प्रतिबुद्धाः केचिद् द्वितीयेन, एवं पञ्चशतचौरा अपि प्रतिबुद्धाः प्रव्राजिताश्च ॥

इति कापिलीयमध्ययनमष्टमं सम्पूर्णम् ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यश्रीलक्ष्मीवल्लभगणि-विरचितायां कापिलिकाध्ययनस्यार्थः सम्पूर्णः ॥

॥ अथ नवमं नमिप्रव्रज्याख्यमध्ययनं प्रारभ्यते ॥

अष्टमेऽध्ययने हि निर्लोभत्वमुक्तम्, निर्लोभः पुरुषो हीन्द्रादिभिः पूज्यःस्यात्, अतो नवमेऽध्ययने नमिराजर्षिरिन्द्रेणागत्य भावपूर्वकं वन्दितः, इत्यष्टमनवमाध्ययनयोः सम्बन्धः। तत्र नमिस्तु प्रत्येकबुद्धः प्रत्येकबुद्धाश्चत्वारः, समकालसुरलोकच्यवन-प्रत्येकप्रतिबोध-प्रव्रज्याग्रहण-केवलज्ञानोत्पत्तिसिद्धिगमनभाजो जाताः, तेषु प्रथमः करकण्डूः १, द्वितीयो द्विमुखः २, तृतीयो नमिराजा ३, चतुर्थो नगातिः ४, इति। तेषां प्रत्येकबुद्धानां कथानकमुच्यते। तत्र प्रथमं करकण्डूकथा यथा -

[1]करकंडू कलिंगेसु। पंचालेसु अ दुम्मुहो।
नमी राया विदेहेसु। गंधारेसु य नग्गई ॥ १ ॥ [उत्त. निर्युक्तिः गा. २६४]

श्रीवासुपूज्य जिनपतिकल्याणकपञ्चकास्तपापायां चम्पायां नगर्यां दधिवाहननामा नृपोऽभूत्, तस्य चेटकमहाराजपुत्री पद्मावती प्रिया जाता। सान्यदा गर्भिणी बभूव, गर्भानुभावेन च तस्या ईदृशं दोहदमुत्पन्नम्, अहं पुंवेषधरा, भर्त्रा धृतातपत्रा, गजाग्रभागारूढाऽऽरामें सञ्चरामि, लज्जयेदं दोहदं भूपतेः पुरो वक्तुमशक्ता सा कृशाङ्गी बभूव। राज्ञान्यदा तस्याः कृशाङ्गकारणं पृष्टम्, अतिनिर्बन्धेन सा स्वदोहदं कथयामास। राजात्यन्तं तुष्टस्तां पट्टहस्तिस्कन्धे समारोप्य स्वयं तच्छिरसि छत्रं धृतवान्, तादृश एव राजा गजारूढराज्ञीपश्चाद्भागे स्थितो वने ययौ, तस्मिन् समये तत्र जलदारम्भो बभूव, तत्र सल्लकीप्रमुखविविधवृक्षपुष्पगन्धैर्जलसिक्तमृद्गन्धैश्च विह्वलीभूतः स करी मदोन्मत्तः स्ववासभूमिं स्मरन्नटवीं प्रत्यधावत्। अश्ववारैः पदातिभिश्चासौ न स्पृष्टः, तेन गजेन गर्भान्वितया कदलीकोमलशरीरया राज्ञ्या सार्धं स राजा महाटव्यां नीतः। सम-विषमोन्नतदूरासन्नाननेकभावान् पश्यन् भूपतिर्वटमेकमायातं दृष्ट्वा भार्यां प्रतीदमवदत्-हे भद्रे ! पुरःस्थस्यास्य वटस्य शाखामेकामवलम्बेथास्त्वम्, अहमप्येकां शाखामाश्रयिष्यामि, गजस्त्वेवमेव यातु।

एवमुक्त्वा राजा वटशाखायां लग्नः, राज्ञी तु भयव्यग्रा वटावलम्बं कर्तुमक्षमा हस्तिनाग्रतो नीता, राजा तु वटादुत्तीर्य शनैः शनैर्मिलितसैन्यः पत्नीविरहदुःखितश्चम्पायां प्रविष्टः, राज्ञी दुष्टेन तेन हस्तिना महतीमटवीं नीता, तृषाकुलः स हस्ती चतुर्दिक्षु पानीयं पश्यन्नेकं सरो दृष्ट्वा तत्पाल्यावतीर्य यावदधः पतति तावत्सा राज्ञी वृक्षावलम्बेन तत्स्कन्धादुत्ततार, गजस्तु ग्रीष्मतापितः सरोन्तर्विवेश।

राज्ञी कान्तारं दृष्ट्वा भृशं भीता सती मनस्येवं चिन्तयामास-क्व च तन्नगरं ! क्व च सा श्रीः ! क्व तन्मन्दिरं ! क्व सा सुखशय्या ! दुष्कर्मणां विपाकात्सर्वं मे गतम्। अथवात्र वने विचित्रश्वापदैश्चेत्प्रमादवशगाया मम मृत्युर्भविष्यति, तदा मम दुर्गतिरेवेति

---

१ "करकण्डूः कलिङ्गेषु, पञ्चालेषु च द्विमुखः। नमी राजा विदेहेषु; गन्धारेषु च नगातिः ॥ १ ॥"

मत्वाऽप्रमत्ता सत्याराधनां व्यधात्, सुकृतान्यनुमोद्य सर्वजीवेषु [1]क्षमां कृत्वानशनं सागारं प्रपेदे । नमस्कारं ध्यायन्ती तत उत्थाय सैकया दिशा गच्छन्ती पुरस्तादेकं तापसं ददर्श । तापसेनेयमेवं पृष्टा-वत्से ! त्वं कस्य पुत्री ? कस्य प्रिया वा ? आकृत्यैव त्वं मया भूरिभाग्ययुता ज्ञाता, इयं का तवावस्था, कथय ? वयमभयाः शमिनस्तापसाः स्म । सा राज्ञी तं तापसं निर्विकारं निर्मलधर्मकरं च ज्ञात्वा स्ववृत्तान्तं सकलं जगौ । एतस्या राज्ञ्याः पितुश्चेटकराज्ञो मित्रेण तेन तापसेनोक्तं वत्से ! नातः परं त्वया चिन्ता कार्या, अयं भवः सर्वविपदामास्पदम्, सर्ववस्तूनामनित्यता चिन्तनीया । एवं प्रतिबोध्य सा राज्ञी तेन तापसेन स्वाश्रमं नीता, तस्याः प्राणयात्रा फलैः कारिता ।

अथ च देशसीम्नि तां नीत्वा स तापस एवं जगाद-हे पुत्रि ! अतः परं हलाकृष्टा सावद्या धरा वर्तते, सा मुनिभिर्नोल्लङ्घनीया, ततोऽहं पश्चाद्वलामि । अयं मार्गो दन्तपुरस्य वर्तते, तत्र दन्तवक्त्रनामा राजा वर्तते । इतः सुसार्थेन सह त्वं पुरे गच्छेः । एवं निगद्य स तापसः स्वाश्रमं जगाम । राज्ञी पुरान्तः साध्व्युपाश्रये जगाम । तत्र साध्व्या पृष्टे तया सकलोऽपि वृत्तान्तः कथितः । साध्वी तस्या एवमुपदेशं ददौ-

अस्मिन् बहुदुःखागारे संसारे मृषाभास एव सर्वेषां सर्वोऽपि भवविस्तारो भवद्भिस्त्याज्यः । एवं साध्वीवचसा वैराग्यं गता सा तदैव दीक्षां जग्राह । स्वव्रतविघ्न भयात्सा सन्तमपि गर्भं न जगौ । कालान्तरे तस्या उदरवृद्धौ साध्व्या पृष्टं-किमेतत्तवेति ? तयोक्तं मम पूर्वावस्थासम्भवो गर्भो वर्तते, मया तु व्रतविघ्नभयान्नोक्तः । ततो महत्तरा साध्वी तां साध्वी[2]मुड्डाहनाभयेनैकान्ते संस्थापयामास । काले सा पुत्रं प्रसूय रत्नकम्बलेन संवृतं पितृनाममुद्राङ्कितं च कृत्वा श्मशाने द्राग्मुमोच । तदा श्मशानपतिर्जनङ्गमस्तं बालकं तथाविधमालोक्य गृहीत्वा चानपत्यायाः स्वपत्न्याः समार्पयत् । सा श्रमणी गुप्तचर्यया तं व्यतिकरं ज्ञात्वा महत्तराया अग्रे एवमाचख्यौ मृत एव मया बालो जातस्ततो मया त्यक्तः । स बालो लोकोत्तरकान्तिर्जनङ्गमधाम्नि दत्तावर्णिकनामा ववृधे, सा साध्वी सततं बहिर्व्रजन्ती पुत्रस्नेहेन मातङ्गया सह कोमलालापैः सङ्गतिं चक्रे । स बालः प्रातिवेश्मिकबालकैः सह क्रीडन् महत्तेजसा भृशं राजते ।

आगर्भं बहुशाकाद्यशनदोषेण तस्य बालकस्य कण्डुलतादोषोऽभवत् । स्वयं राजचेष्टां कुर्वाणः स बालः परबालैः सामन्तीकृतैर्देहकण्डूया करैः कारयति । ततो लोकैः करकण्डूरिति तस्य नाम दत्तम् । सा साध्वी तद्विलोकनार्थं मातङ्गपाटके निरन्तरं याति, भिक्षालब्धं मोदकादि तस्मै ददाति । श्रमणत्वेऽप्यपत्यजा प्रीतिस्तस्या दुस्तरेति बालकोऽपि तस्या दृष्टाया बहु विनयं करोति, प्रीतिं च दधाति । स बालकः षड्वर्षः पितुरादेशात् श्मशानं रक्षति ।

अन्यदा तस्मिन् श्मशाने रक्षति सति कोऽपि साधुर्लघुं साधुं प्रति तत् श्मशानस्थं

---

१ क्षामणां-मु० ॥ २ मुड्डाहभये°- D.L.॥

सुलक्षणं वंशं दर्शितवानुक्तवांश्च मूलाच्चतुरङ्गुलत इमं वंशमादाय यः स्वसमीपे स्थापयति सोऽवश्यं राज्यं प्राप्नोति । इदं साधुवचस्तेन बालकेन ततस्थेनैकेन द्विजेन च श्रुतम्, द्विजस्तु तं वंशमाचतुरङ्गुलं छित्त्वा यावद् गृह्णाति तावत्करकण्डुना तत्करात्स वंशो गृहीतः स्वकरे, कलहं कुर्वतो द्विजस्य करकण्डुनोक्तं मत्पितृश्मशानवनोत्थवंशं नाहमन्यस्मै दास्ये, स ब्राह्मणः करकण्डूबालश्चेति द्वावपि विवदन्तौ नगराधिकारिपुरो गतौ । नगराधिकारिभिर्भणितमहो बाल ! तवायं वंशः किं करिष्यति ? स प्राह ममायं राज्यं दास्यति । तदाधिकारिणः स्मित्वैवमूचुर्यदा तव राज्यं भवति तदा त्वयास्य ब्राह्मणस्यैको ग्रामो देयः । शिशुस्तद्वचोऽङ्गीकृत्य स्वगृहमगात्, स विप्रोऽन्यविप्रैः सम्भूय तं बालं हन्तुमुपाक्रमत् । तं द्विजोपक्रमं ज्ञात्वा करकण्डूपिता जनङ्गमः स्वकलत्र-पुत्रयुक्त देशं विहायानश्यत् ।

अथ सकुटुम्बः स जनङ्गमः क्षितितलं क्रामन् कञ्चनपुरं जगाम । तत्रापुत्रनृपे मृते सति सचिवैरधिवासितस्तुरगः करकण्डुं दृष्ट्वा हेषारवं कृतवान्, तं सलक्षणं दृष्ट्वा नगरलोका जयजयारवं चक्रुः । अवादितान्यपि वाद्यानि स्वयं निनेदुः । स्वयं छत्रं शिरसि स्थितम् । ततोऽमात्यैरपि नवीनानि वस्त्राणि परिधाय स करकण्डुस्तमश्वमारोहितः । यावन्नगरलोकैः परमप्रमोदेन स पुरान्तः प्रवेशितस्तावद्विप्रास्तं म्लेच्छोऽयमिति कृत्वा न मेनिरे । तदा क्रुद्धः स शिशुस्तं वंशदण्डं रत्नमिव करे जग्राह । अधिष्ठातृदेवैर्व्योम्नीति घुष्टम्, य इमं राजानमवगणयिष्यति तस्य मूर्ध्न्यसौ दण्डः पतिष्यति । इत्युक्त्वा सुरास्तच्छिरसि पुष्पवृष्टिं चक्रुः । भीताः सन्तो विप्रास्तस्य स्तुतिं कृत्वा वारंवारमाशीर्वादमुच्चरन्ति । अथ करकण्डुरेवमुवाचाहो ब्राह्मणा ! एते भवद्भिश्चाण्डाला गर्हितास्ततः सर्वेऽप्यमी वाटधानकवास्तव्याश्चाण्डालाः संस्कारैर्ब्राह्मणाः कार्याः । संस्कारादेव ब्राह्मणो जायते, न तु जात्या कश्चिद् ब्राह्मणो भवतीति भवदागमवचनात् । अथ ते ब्राह्मणाः प्रकामं भीतास्तन्नगरवाटधानकवास्तव्यांश्चाण्डालान् संस्कारैर्ब्राह्मणान् चक्रुः । उक्तं च -

"दधिवाहनपुत्रेण, राज्ञा तु करकण्डुना ।
वाटधानकवास्तव्या-श्चाण्डाला ब्राह्मणाः कृताः" ॥ १ ॥

अत्युत्सवेन काञ्चनपुरे प्रवेशितः स करकण्डूरमात्यैर्नृपपट्टेऽभिषिक्तः, क्रमात्स महाप्रताप्यभूत् ।

अन्यदा स वंशप्रतिवादी विप्रस्तं भूपं निशम्य ग्रामाभिलाषुकः सन् करकण्डुनृपपर्षदि प्राप्तः, करकण्डुनोपलक्ष्य तस्य विप्रस्योक्तम्-तव यदिष्टं तत्कथय । ब्राह्मणेनोक्तं मद्गृहं चम्पायां वर्तते, तेन तद्विषयग्राममेकमहमीहे । अथ करकण्डुनृपश्चम्पापूर्नाथस्य दधिवाहनभूपतेरस्मै द्विजाय त्वद्विषयग्राममेकं देहीत्याज्ञां प्राहिणोत् । आज्ञाहारिणं करकण्डुनृपस्य दूतं विस्मितचित्तः क्रुद्धश्चम्पापतिर्दधिवाहनः प्राह-अरे ! स म्लेच्छबालः स मृगतुल्यः करकण्डुः सिंहतुल्येन मया सह विरुध्यते । परवस्त्वभिलाषभवस्य पातकस्य तव स्वामिनः शुद्धिं मत्खड्गतीर्थस्नानं दास्यति ।

एवमुक्त्वा दधिवाहनेन तिरस्कृतः स दूतस्तत्र गत्वा करकण्डुनृपाय यथार्थमवदत् । करकण्डुनृपोऽपि प्रकामं क्रुद्धः स्वसैन्यपरिवृतश्चम्पापुरसमीपे समायातः । दधिवाहनोऽपि पुरीदुर्गं सज्जीकृत्य स्वयं बहिर्निस्ससार । उभयोः सैन्ये सज्जीभूते यावता योद्धुं लग्ने तावता सा साध्वी तत्रागत्य करकण्डुनृपतिं प्रत्येवमूचे, ऽहोकरकण्डुनृप ! त्वयाऽनुचितं पित्रा सह युद्धं किमारब्धम् ? करकण्डुनृपः प्राह-हे महासति ! कथमेष दधिवाहनोऽस्माकं पिता ? साध्वी स्वस्वरूपमखिलं तमूचे । आर्यां मातरं दधिवाहनं च पितरं मत्वा करकण्डुनृपो जहर्ष । तथापि करकण्डुनृपोऽभिमानात्स्वपितरं दधिवाहनं नन्तुं नोत्सहते । तदा साध्व्यपि दधिवाहनसमीपे गता, दधिवाहनभृत्यैरूपलक्षिता, दधिवाहनभूपाय राज्ञी साध्वीरूपा समागतेति वर्धापनिका दत्ता । अथ दधिवाहननृपोऽपि तां साध्वीं ननाम गर्भवृत्तान्तं च पप्रच्छ । साध्व्यूचे सोऽयं ते तनयो येन सह त्वया युद्धमारब्धमस्ति । अथ दधिवाहननृपः प्रीतात्मा पादचारी करकण्डुनृपं प्रति गत्वा हे वत्स ! उत्तिष्ठेत्युक्त्वा तमुत्थाप्याश्लिष्य च शिरस्याजिघ्रनहर्षाश्रुजलसहितैस्तीर्थजलैः पुत्रोऽयं राज्यद्वयेऽपि दधिवाहनेनाभिषिक्तः, दधिवाहनः कर्मविनाशाय स्वयं दीक्षां गृहीतवान् ।

करकण्डुनृपो राज्यद्वयं पालयामास, चम्पायामेव स्वावासमकरोत् । तस्य गोकुलानीष्टान्यासन्, संस्थानाकृतिवर्णविशिष्टानि गोकुलानि कोटिसङ्ख्यानि तेन मेलितानि सतानि निरन्तरं पश्यन् प्रकामं प्रमोदं लभते ।

अन्येद्युः स्फटिकसमान एको गोवत्सस्तेन गोकुलमध्ये दृष्टः । अयं कण्ठपर्यन्तदुग्धपानैः प्रत्यहं पोषणीय इति गोपालान् स आदिष्टवान् । अन्यदा स मांसैः पुष्टतनुर्बलशाली घनघर्घरशब्देनान्यवृषभान् त्रासयन् भूपतिना दृष्टः, तथापि भूपतिस्तस्मिन् वृषे प्रीतिपर एव बभूव । साम्राज्यकार्यकरणव्यग्रो भूपतिः कतिचिद्वर्षाणि यावद् गोकुले नायातः ।

अन्यदा तद्दर्शनोत्कण्ठः स भूपतिस्तत्र समायातः । स वृषः क्व ? इति गोपालान् भूपतिः पप्रच्छ । गोपालैर्जराजीर्णः पतितदशनो हीनबलो वत्सैर्घट्टितदेहः कृशाङ्गः स दर्शितः । तं तथाविधं दृष्ट्वा भवदशां विषमां विचारयन् करकण्डुराजैवं चिन्तयति-यथायं वृषभः पूर्वावस्थां मनोहरां परित्यज्येमां वृद्धावस्थां प्राप्तः, तथा सर्वोऽपि संसारी संसारे नवां नवामवस्थां प्राप्नोति । मोक्षे चैवैकावस्था, मोक्षस्तु जिनधर्मादेव प्राप्यते । अतो जिनधर्ममेव सम्यगाराधयामीति परं वैराग्यं प्राप्तः करकण्डुराजा स्वयमेव प्राग्भवसंस्कारोदयात्प्रतिबुद्धः सद्यः शासनदेव्यर्पितलिङ्गस्तृणवद्राज्यं परित्यज्य प्रव्रज्यामाददे । उक्तं च -

"श्वेतं सुजातं सुविभक्तशृङ्गम्, गोष्टांगणे वीक्ष्य वृषं जरार्तम् ।
ऋद्धिं च वृद्धिं च समीक्ष्य, बोधात्कलिङ्गराजर्षिरवाप धर्मम् ॥ १ ॥"

इति करकण्डूनृपचरित्रं समाप्तम् ।

यदानीं करकण्डुराजा प्रतिबुद्धस्ततो द्विमुखराजा प्रतिबुद्धस्ततो द्विमुखचरित्रं प्रोच्यते-

[1]काम्पिल्यपुरे जयवर्मराजा, तस्य गुणमाला प्रियास्ति । अन्येद्युर्जयवर्मराजा स्थपतीनेवमाह-अद्भुतमास्थानमण्डपं कुरुत, वास्तुज्ञैस्तैर्भूमिपूजापुरस्सरं भूमिभागं परीक्ष्य सुमुहूर्ते खातं विरचितम्, तत्र खाते पञ्चमदिवसे नानामणिमण्डितः खमणिरिव प्रज्ज्वलन् मुकुटो दृष्टः, तैर्विज्ञप्तो राजा सहर्षं भूमितस्तं मुकुटं जग्राह । विचित्रवादित्रनिर्घोषपूर्वं महतोत्सवेन तं मुकुटं स्वगृहे प्रावेशयत् । वस्त्राद्यैः सत्कृताः शिल्पिनो विमानसदृशमास्थानमण्डपं सद्यश्चक्रुः । चित्रकरैस्तत्सद्य एव चित्रितम् । भूपः शुभमुहूर्ते तं मुकुटं मस्तके निधाय तस्मिन्नास्थानमण्डपे सुवर्णासने निषण्णः । तस्मिन् मुकुटे मूर्ध्नि स्थिते सति राज्ञो मुखद्वयं दृश्यते । तदनु स राजा लोके द्विमुखतया विख्यातः ।

अथेयं मुकुटकथा अवन्तीशेन चण्डप्रद्योतेन श्रुता, तत् श्रुत्वा स्वदूतस्तत्र प्रहितः । दूतोऽपि तत्र गत्वा द्विमुखं प्रत्येवमवादीत् - हे राजन् ! तव मुकुटमिमं चण्डप्रद्योतभूपतिर्मार्गयति, यदि तव जीवितेन कार्यम्, तदा तस्यायं प्रेष्यः । एवं दूतवचः श्रुत्वा द्विमुखनरेन्द्रः प्रोवाच-रे दूत ! तव स्वामिनो मम मुकुटग्रहणाभिलाषः स्ववस्तुहारणायैव जातोऽस्ति । त्वं तत्र गत्वा स्वस्वामिनं ब्रूयाः, शिवादेवी राज्ञी १ अनलगिरिनामा हस्ती २, अग्निभीरुनामा रथः ३, लोहजङ्घनामा दूतश्चेति ४, वस्तुचतुष्टयं ममार्पयतामित्युक्त्वा द्विमुखनृपेण स दूतो गले धृत्वा बहिर्निष्कासितः, उज्जयिन्यां गत्वा चण्डप्रद्योताय तद्वचो निवेदयामास ।

क्रुद्धोऽथ चण्डप्रद्योतनृपतिर्गणनायकतुरङ्गमगजेन्द्ररथपदातिदलपरिवेष्टितः स्थाने स्थाने प्राभृतपूर्वकमभ्यागतानेकराजसैन्यवर्धमानबलः पञ्चालदेशसीमां प्राप । द्विगुणोत्साहो द्विमुखनृपस्तैः सप्तसुतैः सैनिकलक्षैश्च परिवृतश्चण्डप्रद्योतसम्मुखमगात्, तयोर्घोरसङ्ग्रामो बभूव, मुकुटप्रभावात् द्विमुखराज्ञस्तदा द्विगुणं भुजाबलं प्रससार, क्षणेन सकलमपि चण्डप्रद्योतबलं तेन भग्नम्, नष्टं च चण्डप्रद्योतं रथान्निपात्य बद्ध्वा च स्वपुरं निन्ये । द्विमुखनृपस्तं स्वावासे भव्यरीत्या रक्षितवान् । अन्यदा चण्डप्रद्योतेन प्रकामसुरूपां सलावण्यां कन्यां दृष्ट्वा यामिकानामेवमुक्तम्, अस्य द्विमुखराज्ञः कत्यपत्यानि सन्ति ? इयमङ्गजा कस्यास्ति ? यामिका ऊचुरस्य राज्ञो वनमालापत्नी सप्तसुतान् सुषुवे ।

अन्यदा तया चिन्तितं मया सप्त पुत्रा जनिता लालिताश्च, पुत्री तु नैकापि जातेति तन्मनोरथपूर्तये सा मदनयक्षमाराध । अन्यदा सा कल्पद्रुमकलिकां स्वप्ने ददर्श । क्रमेणेमां कन्यां सुषुवे । यक्षोपयाचितं दत्वास्या मदनमञ्जरीति नाम कृतम् । साम्प्रतं सर्वलोकचमत्कारकरी यौवनागमे इयं जाता । इति यामिकवचनं श्रुत्वाऽप्सरोऽधिकं च तद्रूपं दृष्ट्वा कामार्तश्चण्डप्रद्योतश्चिन्तयति, इयं चेन्मम पत्नी स्यात्तदा मम जीवितं सफलं स्यात् । राज्यभ्रंशोऽपि मत्कल्याणाय जातो यदियं मया दृष्टा । चेद् द्विमुखो राजेमां मह्यं दत्ते, तदाहमस्य यावज्जीवं सेवको भवामि । चण्डप्रद्योतस्येदृशः परिणामस्तदा यामिकैर्ज्ञात्वा द्विमुखराज्ञे कथितः । राजाज्ञया यामिकैश्चण्डप्रद्योतः सभायामानीतः । द्विमुखराज्ञाऽभ्युत्थानं

---

१ निविष्टः - मु. ॥

कृत्वा चण्डप्रद्योतः स्वार्धासने निवेशितः । (चण्डप्रद्योतः) प्राञ्जलीभूय एवं बभाषे, मत्प्राणास्तव वशगाः सन्ति । मच्छ्रियस्त्वदायत्ताः सन्ति, त्वं मम प्रभुरसि, अहमतःपरं सदैव तव सेवकोऽस्मि ।

अथ तद्भाववेत्ता द्विमुखराजा चण्डप्रद्योताय तदैव निजां पुत्रीं ददौ, ज्योतिर्विद्भिः सुमुहूर्त्ते दत्ते चण्डप्रद्योतनृपो द्विमुखराजपुत्रीं परिणीतवान् । करमोक्षावसरे च तस्मै घनं द्रव्यं दत्तमवन्तीदेशं च दत्तवान् । कन्यासहितं चण्डप्रद्योतं स्वदेशे द्विमुखो विसर्जितवान् ।

अन्यदा द्विमुखनरेन्द्रस्य पुरे लोकैरिन्द्रस्तम्भोऽद्भूतः कृतः पूजितश्च । द्विमुखनृपोऽपि तं भृशं पूजितवान् । तस्मिन्महे व्यतीतेऽन्येद्युस्तमिन्द्रस्तम्भं विलुप्तशोभममेध्यान्तः पतितं द्विमुखराजा ददर्श । एवं च चिन्तितवान्-जनैर्यः पूजितो मणिमालाकुसुमादिभिश्च श्रृङ्गारितः, सोऽयमिन्द्रस्तम्भः साम्प्रतमीदृशो जातः । यथायं स्तम्भः पूर्वापरावस्थाभेदमाप्तस्तथा सर्वोऽपि संसारी भिन्नां भिन्नामवस्थामाप्नोति । अवस्थाभेदकारणं रागद्वेषावेव, तत्प्रलयस्तु समताश्रयणाद्भवति, समता च ममतापरित्यागाद्भवति, ममतापरित्यागस्तु संयमं विना न भवतीति वैराग्यमापन्नः शासनदेवतासमर्पितवेषः सर्वविरतिसामायिकं द्विमुखराजा स्वयं प्रतिपद्य प्रत्येकबुद्धो बभूव । उक्तं च -

"वीक्ष्यार्चितं पौरजनैः सुरेश - ध्वजं च लुप्तं पतितं परेऽह्नि ।
भूतिं त्वभूतिं द्विमुखो निरीक्ष्य, बुद्धः प्रपेदे जिनराजधर्मम्" ॥ १ ॥

इति द्वितीयप्रत्येकबुद्धद्विमुखचरित्रं समाप्तम् ॥ २ ॥

यदानीं द्विमुखराजा प्रतिबुद्धस्तदानीमेव नमिराजा प्रतिबुद्धः । अथ तृतीयप्रत्येक-बुद्धनमिचरित्रमुच्यते-

मालवमण्डलमण्डनं सुदर्शनपुरमस्ति । तत्र मणिरथो राजा, तस्य भ्राता युगबाहुर्वर्तते । तस्य भार्या सुशीला सुरूपा मदनरेखा वर्तते । सा बालावस्थात आरभ्य सम्यक्त्वमूलद्वादश-व्रतानि जग्राह । तस्याः पुत्रश्चन्द्रयशा वर्तते । अन्यदा मणिरथेन मदनरेखा दृष्टा, तद्रूपमोहितो नृप एवं चिन्तयति-इयं मदनरेखा मम कथं वशीभवति ? प्रथमं साधारणैः कृत्यैस्तां विश्वासयामि, पश्चात्कामाभिलाषमपि तस्याः समये कारयिष्येऽहम्, दुष्करं कार्यं बुद्ध्या किं न सिद्ध्यति ? एवं चिन्तयित्वा राजा तस्यै कुसुमताम्बूलवस्त्रालङ्कारादि प्रेषयति । साऽपि निर्विकारा ज्येष्ठप्रेषितत्वात्सर्वं गृह्णाति ।

एकदा मणिरथस्तामेकान्ते स्वयमित्युवाच - हे भद्रे ! त्वं मां भर्तारं विधाय यथेष्टं सुखं भुङ्क्ष्व । सा जगौ-हे राजन् ! तव लघुबन्धुसत्ककलत्रे मयि एतादृशं वचनमयुक्तम् । त्वं निष्कलङ्कभूरिसत्वश्च पञ्चमो लोकपालोऽसि । एवं वदंस्त्वं किं न लज्जसे ? शस्त्राग्नि-विषयोगैर्मृत्युसाधनं वरम्, निजकुलाचाररहितं जीवितं न श्रेयः । परस्त्रीलम्पटाः स्वजीवितं यशश्च नाशयन्ति । तयैवं प्रतिबोधितोऽपि नृपः कदाग्रहं न मुमोच । एवं च व्यचिन्तयद्यद्यस्याः प्रीतिपात्रं मदनुबन्धुर्युगबाहुर्व्यापाद्यते तदेयं मम वशीभवति । अन्यदा मदनरेखा स्वप्ने

पूर्णेन्दुं ददर्श । तया युगबाहवे स्वप्नो निवेदितः, युगबाहुना कथितं तव सुलक्षणः पुत्रो भविष्यति । तस्याः गुरुदेववन्दनार्चादोहद उत्पन्नः, युगबाहुस्तमपूपुरत् ।

अन्यदा युगबाहुर्वसन्ते मदनरेखया सममुद्याने रन्तुं गतः । तत्रैव रात्रौ कदलीगृहे सुप्तः । परिवारः समन्तात्तद् गृहं वेष्टयित्वा स्थितः, तदावसरं ज्ञात्वा मणिरथनृपस्तत्रैकाकी समायातः । अद्य युवराजात्र कथं सुप्त इति यामिकान् प्रत्युवाच । युगबाहुरपि कदलीगृहाद्बहिरागत्य मणिरथपादौ ननाम । नमतोऽस्य स्कन्धदेशे मणिरथः खड्गं चिक्षेप । उवाचैवं च धिग्मे प्रमादतः करात्खड्गं पतितम् । मणिरथेङ्गिताकारेण तद्दुष्कर्म ज्ञात्वाऽपि स्वामीत्युपेक्षितः । इतोऽवसरे इत्युक्त्वा मणिरथः सद्यस्ततो गतः । पितृघातवार्तां निशम्य चन्द्रयशा पुत्रो घातचिकित्सिकैः परिवृतस्तत्रायातः । चिकित्सिकैरन्त्यावस्थागतं युगबाहुं निरीक्ष्य धर्म एवास्यौषधमिति प्रोक्तम् । मदनरेखा स्वभर्तुरन्त्यावस्थां विलोक्य विधिनाराधनां कारयामास ।

हे दयित ! मे विज्ञप्तिं शृणु ! धनाङ्गनादिषु मोहं त्यज, जैनधर्मं स्वीकुरु, हितं भजस्व, धर्मप्रसादादेव प्रधानं कुटुम्बदेहगेहादिकं भवान्तरे प्राप्स्यसि । सर्वाण्यपि पापानि सिद्धसाक्षिकमालोचय, पुण्यान्यनुमोदय, सर्वजीवान् क्षामय, अष्टादशपापस्थानानि व्युत्सृज, अनशनं च कुरु । शुभभावनां भावय, चतुःशरणान्याश्रय, परमेष्ठिमन्त्रस्मरणं कुरु, मनसा सम्यक्त्वमाश्रय । इत्येवं मदनरेखावचनानि श्रद्दधानः पञ्चपरमेष्ठिमन्त्रं स्मरन् युगबाहुः परलोकमसाधयत् ।

अथ मदनरेखा मनस्येवं व्यचिन्तयत्-अथ स्वतन्त्रो ज्येष्ठो मम शीलं विध्वंसयिष्यति, ततो निःसरणावसरो मम साम्प्रतमेवास्तीति निश्चित्य मदनरेखा वेगतो निर्गता । सद्य एकाकिन्येव व्रजन्त्युत्पथमाश्रिता, क्वापि महत्यामटव्यां प्राप्ता, विभावरी विरराम । जातं प्रभातम् । सा देवगुरुनामस्मरणं चकार । मध्याह्ने सा प्राणयात्रां फलैरेवाकरोत्, तस्यामेवाटव्यां रात्रौ सुप्तायास्तस्याः शीलप्रभावेण न किञ्चिद्भयं बभूव । सा सत्यर्धरात्रौ पुत्रं सुषुवे, पितृनामाङ्कितमुद्रिकां तस्याङ्गुलौ क्षिप्त्वा रत्नकम्बलेन वेष्टयित्वा शुचिभूमौ निक्षिप्य मदनरेखा शौचार्थं सरसि गता, तत्र स्नानं कुर्वन्ती जलकरिणा शुण्डादण्डेन गृहीता नभस्युत्क्षिप्ता, नभसोऽपि च पतन्तीं तां कश्चित्तरुणविद्याधरो वैताढ्यं निनाय । सा विद्याधरं प्राह-बन्धोऽहमद्य निश्यटव्यां पुत्रमजीजनम्, स तु रत्नकम्बलवेष्टितो मया तत्रैव मुक्तोऽस्ति । अहं तु सरसि स्नानं कुर्वन्ती जलकरिणोत्क्षिप्ता त्वया गृहीतात्रानीता ।

अथ त्वं ततो मत्पुत्रमिहानय । मां वा तत्र नय । अन्यथा बालस्य तत्र मरणापद्भविष्यति, त्वं प्रसीद, मां पुत्रेण मेलय । पुत्रभिक्षाप्रदानेन त्वं मे दयां कुरु । सोऽपि युवा विद्याधर एतस्यां सरागं चक्षुः क्षिपन्नेवमुवाच । गन्धारदेशे रत्नवाहं नाम नगरमस्ति, तत्र विद्याधरेन्द्रो मणिचूडो वर्तते । अस्य प्रिया कमलावती मणिप्रभनामानं पुत्रं माम् असूत । यौवनावस्थां गतस्य च मे श्रेणिद्वयराज्यं दत्वा मणिचूडः स्वयं प्रव्रज्यां जग्राह ।

स चारणमुनिश्चतुर्ज्ञानी भूत्वा साम्प्रतमष्टमे (नंदीश्वर) द्वीपे जिनबिम्बानि नन्तुं समायातोऽस्ति । अहं तत्र वन्दितुं गच्छन्नभूवम्, अन्तराले त्वां दृष्ट्वा लात्वा चाहं

पुनरत्रागतः । अतःपरं त्वं मे प्रिया भव, तवादेशकरोऽहमस्मि । तव पुत्रसम्बन्धो मया प्रज्ञप्तीविद्यया ज्ञातः । अश्वापहृतो मिथिलेश्वरः पद्मरथाख्यस्तत्रायातः । तं बालं सुरूपं दृष्ट्वा गृहीत्वा च स्वपत्न्यै ददौ । तत्रायं प्रकामं सुखभागस्ति । एवं तद्वचः श्रुत्वा मदनरेखाचिन्तय-दसौ स्वतन्त्रो युवा दृष्टो मे शीलभङ्गं करिष्यतीति तावत्कालं मे विलम्बः श्रेयान् यावदस्य पिता साधुर्न वन्द्यते, तदुपदेशात्सर्वं भव्यं भविष्यतीति ध्यात्वा मदनरेखावदत्-हे भद्र ! त्वं मां प्रथमं नन्दीश्वरे नय । यथाहं तज्जिनबिम्बानि वन्दे । पश्चात्कृतकृत्याऽहं तवेप्सितं करिष्यामि । एवं तयोक्ते सहर्षो मणिप्रभस्तां विमानान्तर्निधाय नन्दीश्वरद्वीपे गतः । तत्र शाश्वतजिनबिम्बानि नत्वा मदनरेखात्मानं कृतार्थं मन्यमाना मणिप्रभेण समं चतुर्ज्ञानधरं चारणश्रमणं प्रासादमण्डपोपविष्टं मणिचूडमुनिं प्रणनाम । स मुनिस्तां सतीं मत्वा स्वसुतं च लम्पटं मत्वा तथा देशनां विस्तारयामास-यथासौ युवा विद्याधरः स्वदारसन्तोषव्रतं जग्राह । मदनरेखां च स्वाम्बां भगिनीं च मेने । अथ सा हृष्टमानसा सती स्वपुत्रस्य कुशलोदन्तं पप्रच्छ । मुनिराह-हे महानुभावे ! शोकं मुक्त्वा सर्वं सुतवृत्तान्तं श्रृणु ।

जम्बूद्वीपे पुष्कलावती विजयोऽस्ति, तत्र मणितोरणापुरी, तस्यां मितयशाराजा, स च चक्रवर्त्यभूत् । तस्य पुष्पवती कान्ता, तयोः पुष्पसिंह-रत्नसिंहाभिधानौ पुत्रावभूताम् । तौ सदयौ विनीतौ धर्मकर्मरतौ स्तः । अन्यदा तौ राज्ये स्थापयित्वा चक्रवर्ती तपस्यां जग्राह । तौ द्वावपि भ्रातरौ चतुरशीतिलक्षपूर्वं यावद्राज्यं प्रपालयतः । एकदा च तौ दीक्षां गृहीतवन्तौ, षोडशपूर्वलक्षाणि यावद्दीक्षां प्रपालयतः, अन्ते समाधिना मृत्वाऽच्युतकल्पे सामानिकौ देवौ जातौ । ततश्च्युत्वा धातकीखण्डभरते हरिषेणराज्ञः समुद्रदत्ताभार्यासुतौ सागर-देवदत्ताभिधानौ धार्मिकौ सहोदरौ जातौ । अन्यदा तौ द्वादशतीर्थङ्करस्य दृढसुव्रतस्य बहु व्यतिक्रान्ते तीर्थे सुगुरुसमीपे दीक्षामगृह्णीताम् । तृतीये दिवसे तौ द्वावपि विद्युत्पातेन मृत्वा शुक्रदेवलोके महर्द्धिकौ देवावभूताम् । अन्येद्युस्तौ देवावत्रैव भरते श्रीनेमिजिनेश्वर-मिति पृष्टवन्तौ-हे भगवन् ! नावद्यापि कियान् संसारस्तिष्ठति ? स भगवान् प्राह-युवयोर्मध्ये एको अत्रैव भरते मिथिलापुर्यां विजयसेनभूपतेः पद्मरथः पुत्रो भावी, एकस्तु सुदर्शनपुरे युगबाहुपुत्रो मदनरेखाकुक्षिसम्भूतो नमिनामा भविष्यति, तस्मिन् भवे द्वावपि युवां शिवपदं प्राप्स्यथ । एवं नेमिजिनवचनं निशम्य निजमायुः पूर्णं विधाय एको मिथिलापुरि पद्मरथो नृपो अभवत् । तेन पद्मरथेनाश्वापहृतेन तस्मिन् वने समायातेन हे महानुभावे ! स तव पुत्रो दृष्टो गृहीतश्च मिथिलायां नीत्वा स्वपत्न्यै समर्पितश्च, तेन तज्जन्मोत्सवो महान् विहितः ।

अत्रान्तरे तत्र नन्दीश्वरप्रासादे अन्तरिक्षादेकं विमानमवततार, तन्मध्यादेको दिव्यविभूषाधरः सुरो निर्गत्य मदनरेखां त्रिःप्रदक्षिणीकृत्य प्रथमं प्रणनाम, पश्चान्मुनिं प्रणम्याग्रे निविष्टः सुरो मणिप्रभविद्याधरेन्द्रेण विनयविपर्यासकारणं पृष्टः स सुरः प्राह-अहं पूर्वभवे युगबाहु-र्मणिरथनाम्ना बृहद्भ्रात्रा निहतः, अनया ममाराधनाऽनशनादिकृत्यानि कारितानि, तत्प्रभावादहमीदृशो ब्रह्मदेवलोके देवो जातः । ततो धर्माचार्यत्वादहमिमां प्रथमं प्रणतः । एवं खेचरं प्रतिबोध्य स सुरो मदनरेखां जगौ-हे सति ! त्वं समादिश ? किं

ते प्रियं कुर्वे ? सा प्राह मम मुक्तिरेव प्रिया, नान्यत्किमपि, तथापि सुताननं द्रष्टुमुत्सुकां मां त्वमितो मिथिलां पुरीं नय । तत्राहं निर्वृतात्मना परलोकहितं करिष्यामीत्युक्तवन्तीं तां देवो मिथिलापुरीं निनाय । तत्र प्रथमं मदनरेखा जिनचैत्यानि नत्वा श्रमणीनामुपाश्रये जगाम । वन्दित्वा पुरो निविष्टां तां प्रवर्तिन्येवं प्रतिबोधयामास-मूढचेतसो जना धर्माद्विना भवक्षयमिच्छन्तोऽपि मोहवशेन पुत्रादिषु स्नेहं कुर्वन्ति । संसारे हि मातृ-पितृ-बन्धु-भगिनी-दयिता-वधू-प्रियतम-पुत्रादीनामनन्तशः सम्बन्धा जाताः, लक्ष्मीकुटुम्बदेहादिकं सर्वं विनश्वरम्, धर्म एवैकः शाश्वतः । इत्यादि साध्वीवाक्यैः प्रतिबुद्धा सा सती देवेन पुत्रदर्शनार्थं प्रार्थिता एवमाह-भववृद्धिकरेण प्रेमपूरेण ममालम्, अतःपरं तु साध्वीचरणा एव शरण-मित्युक्त्वा साध्वीसमीपे सा प्रव्रज्यां जग्राह । देवस्तां वन्दित्वा स्वस्थाने जगाम ।

पद्मरथस्य गृहे यथा यथायं बालो वर्धते तथा तथा तस्यान्ये राजानोऽनमन् । ततः पद्मरथो राजा तस्य बालस्य नमिरिति नाम कृतवान् । वृद्धिं व्रजतस्तस्य बालस्य कलाचार्य-सेवनात्सर्वाः कलाः समायाताः, सकललोकलोचनहरं यौवनमप्यस्यायातम् । पित्रा चाष्टाधिकसहस्रराजकन्यापाणिग्रहणं कारितम् । पद्मरथोऽस्मै राज्यं दत्वा स्वयं तपस्यां गृहित्वा केवलज्ञानं प्राप्य मोक्षं गतवान् । नमिराजा प्राज्यं राज्यं पालयामास । न्यायेन यशस्पात्रमभूत् ।

अथ पूर्वं युगबाहुं हत्वा मणिरथनृपः सिद्धमनोरथः स्वं धाम जगाम । तत्र तदानीमेव प्रचण्डसर्पेण दष्टस्तुर्यं नरकं जगाम । द्वयोर्भ्रात्रोरूद्ध्वदेहिकं कृत्वा मन्त्रिभिर्यु-गबाहुपुत्रश्चन्द्रयशा राज्येऽभिषिक्तः । स न्यायेन राज्यं पालयति । अन्यदा नमिराज्ञो धवलकान्तिर्गजो मदोन्मत्त आलानस्तम्भमुन्मूल्यापरान् हस्तिनोऽश्वान् मनुष्यानपि त्रासयं-श्चन्द्रयशानृपनगरसीम्नि समायातः । चन्द्रयशानृपस्तमागतं श्रुत्वा समन्तात्सुभटैर्वेष्टयित्वा स्वयं वशीकृत्य च जग्राह । नमिराजाष्टभिर्दिनैस्तां वार्तां श्रुत्वा चन्द्रयशान्तिके दूतं प्रेषितवान् । दूतोऽपि तत्र गत्वा धवलकरिणं मार्गयामास । कुपितश्चन्द्रयशा दूतं गले धृत्वा नगराद्बहिर्निष्कासयामास । दूतोऽपि नमेः पुरो गत्वा स्वापमानं जगौ । कुपितो नमि-राजाऽतुलसैन्यैः वेष्टितोऽच्छिन्नप्रयाणैः सुदर्शनपुरसमीपे समायातः । चन्द्रयशा भूपतिः स्वसैन्यवेष्टितो यावदभिमुखं युद्धार्थं चलितस्तावदपशकुनैर्वारितो मन्त्रिभिरेवमूचे-स्वामिन् ! कोट्टं सज्जीकृत्य तव साम्प्रतं पुरान्तरेऽवस्थातुं युक्तम् । कालविलम्बेनैतत्कार्यं कर्त्तव्यम् । ततश्चन्द्रयशाः [1]शतघ्नीभिर्जलाद्युपस्करैश्च कोट्टं सज्जीकृतवान् । नमिस्तं कोट्टं स्वसैन्यैरवेष्टयत् । अधःस्थैः सैनिकैः सहोद्ध्वस्थानां सैनिकानां महान् सङ्ग्रामः प्रववृधे । नमिः कोट्टभङ्गं विधातुमुपायान् विविधान् करोति । चन्द्रयशा नृपस्तु कोट्टरक्षणे विविधानुपायान् करोति ।

अस्मिन्नवसरे तयोर्माता साध्वी मदनरेखा प्रवर्तिनीमनुज्ञाप्य तत्सङ्ग्रामवारणार्थं प्रथमं नमिराजसैन्ये समायाता । नमिरपि तां साध्वीं ननाम, आसने चोपविश्य नमेः पुरः

१ यन्त्रविशेष

सा साध्व्येवं वाचं विस्तारयामास । अनन्तदुःखैकभाजनेऽस्मिन् संसारे नृभवं प्राप्य पापैस्त्वं किं मुह्यसे ? हे राजन् ! तव बन्धुना चन्द्रयशसा स्वयमागतो हस्ती चेद् गृहीतस्तर्हि तेन समं कथं युद्धं करोषि ? क्रुद्धस्त्वं न किञ्चिद्वेत्सि । यदुक्तम् -

"लोभी पश्येद्धनप्राप्तिं, कामिनीं कामुकस्तथा ।
भ्रमं पश्येदथोन्मत्तो, न किञ्चिच्च क्रुधाकुलः" ॥ १ ॥

इदं साध्वीवचो निशम्य नमिश्चिन्तयामास-अयं चन्द्रयशा युगबाहुभवोऽस्ति । अहं तु पद्मरथपुत्रोऽस्मि, इयं साध्वी सत्यवादिनी सती कथं मम चानेन समं भ्रातृत्वं वदतीति विमृश्य साध्वीं प्रत्येवं भाषते स्म । हे पूज्ये ! असौ क्व ? अहं क्व ? भिन्नकुलसम्भवयोर्मदेतयोः कथं भ्रातृत्वं वदसीति नमिनोक्ते साध्वी प्राह-हे वत्स ! यौवने ऐश्वर्यभवं मदं मुक्त्वा यदि श्रृणोसि तदा सकलं स्वरूपं कथ्यते, अथ श्रोतुमुत्सुकाय नमिनृपाय सर्वं पूर्वस्वरूपं साध्वी जगाद । पुनरेवं [1]बभाषे सुदर्शनपुरस्वामी युगबाहुस्तवास्य च पिता, अहं मदनरेखा तव मातेति, पद्मरथस्तु तव पालकः पिता इति, अनेन भ्रात्रा समं मा विरोधं कुरु । बुद्ध्यस्व हितमिति साध्वीप्रोक्तं [2]युगबाहुनामाङ्कितकरमुद्रादर्शनतश्च सर्वं नमिः सत्यं [3]विवेद । तां साध्वीं प्रकामं चित्तोल्लासेन स्वमातरं मत्वा विशेषान्नमि प्रणनाम । उवाच च मातर्यत्त्वया प्रोक्तं तत्सर्वं तथ्यमेव, नात्र काचिद्विचारणास्ति । ममेयं करमुद्रा युगबाहुसुतत्वं ज्ञापयति, अयं चन्द्रयशा मे ज्येष्ठभ्राता [4]भवति एव, परं लोकः कथं प्रत्यायते । लघुभ्रातृवात्सल्यतो ज्येष्ठश्चेत्सन्मुखमायाति तदाहमुचितं विनयं कुर्वन् शोभामुद्वहामि । एवं नमिनृपोक्तमाकर्ण्य सा साध्वी दुर्गद्वारवर्त्मना प्रविश्य राजसौधे जगाम । चन्द्रयशाभूपस्तु तामकस्मादागतामुपलक्ष्य स्वमातरं साध्वीं विशेषादभ्युत्थाय [5]नतवान्, उचितासनोपविष्टां तां साध्वीं वृत्तान्तं पृष्टवान् । साध्वी सकलं वृत्तान्तं नमिराजमिलनं यावत्कथयामास । चन्द्रयशा नृपस्तं नमिं निजलघुभ्रातरं मत्वा सभालोकान् प्रत्येवमुवाच-

"सुलभाः सन्ति सर्वेषां, पुत्रपत्न्यादयः शुभाः ।
दुर्लभः सोदरो, बन्धुर्लभ्यते सुकृतैर्यदि" ॥ १ ॥

इत्युक्त्वा चन्द्रयशानृपोऽपि पुराद्बहिर्निर्गतः । नमिरपि तं ज्येष्ठभ्रातरमभ्यागच्छन्तं दृष्ट्वा सिंहासनादुत्थाय भूतलमिलच्छिराः प्रणनाम । चन्द्रयशा नृपोऽपि स्वकराभ्यां तं भूतलादुत्थाप्य भृशमालिलिङ्ग । तुल्याकारौ तुल्यवर्णौ तावेकमातृपितृत्वसमभूतत्वेन तदा परमप्रीतिपदं जातौ । लोकैः सहोदरौ ज्ञातौ, चन्द्रयशा नृपस्तु तदानीमेव नमिबन्धवे सुदर्शनपुराज्यं ददौ । स्वयं सङ्ग्रामाङ्गणमध्ये दीक्षां ललौ । क्रमेण राज्यद्वयं पालयन्नमिः क्षितौ प्रचण्डाज्ञां जज्ञे ।

अन्यदा नमेर्वपुषि दाघज्वरो जातः । पूर्वकर्मदोषेण तस्य षण्मासिकी पीडा समुत्पन्ना । निद्रामपि न लेभे, अन्तःपुरीनूपुरशब्दा अपि कर्णशूलायासन्, नमिराज्ञो दाघज्वरशान्तये स्वयं चन्दनं घर्षयन्तीनामन्तःपुरीणां वलयशब्दा[6] रोमसु भल्लप्राया बभूवुः । तत्र

---

१ सा बभाषे-मु० ॥ २ तथा युगबाहु-मु० ॥ ३ मेने-मु० ॥ ४ वर्तते-मु० ॥ ५ ननाम-मु० ॥ ६ वलयशब्दास्तु भल्ल°-मु० ॥

ताभिर्वलयानि समस्तान्युत्तारितानि, एकैकं मङ्गलाय रक्षितम्, तदानीं शब्दाश्रवणेन नमिना कञ्चिन्निकटस्थः सेवकः पृष्टः कथमधुना कङ्कणशब्दा न श्रूयन्ते ? तेनोक्तम्- स्वामिन् ! भवत्पीडाकरत्वेनान्तःपुरीभिः कङ्कणान्युत्तारितानि, एकैकं मङ्गलाय रक्षितमिति । नैकैककङ्कणशब्दाः श्रूयन्ते परस्परघर्षणाभावात् । एवं तद्वचः श्रुत्वा प्रतिबुद्धो नमिरेवं चिन्तयामास-यथा संयोगतः शुभा अशुभाः शब्दा जायन्ते, तथा रागादिका दोषाः संयोगत एव भवन्ति । यद्यस्मादोगादहं मुक्तः स्यां तदा सर्वसङ्गं विमुच्य दीक्षां गृह्णामि । तस्येति ध्यायमानस्य रात्रौ सुखेन निद्रा समायाता, निद्रायां स्वप्नमेवं ददर्श, गजमारुह्याहं मन्दरगिरिमारूढः । प्रातः प्रतिबुद्धः स नीरोगो जातः । स एवं व्यचिन्तयदमुं पर्वतं क्वाप्यहमदर्शम्, एवमुहापोहं कुर्वतस्तस्य जातिस्मरणमुत्पन्नम् । नमिराजा पूर्वभवं ददर्श । यदहं पूर्वभवे शुक्रकल्पे सुरोऽभूवम्, तदार्हज्जन्माभिषेककरणायाहमस्मिन् मेरावागमम् । अथ कङ्कणदृष्टान्तेनैकत्वं सुखकारीति चिन्तयन्, प्रत्येकबुद्धत्वं प्राप्य प्रव्रजितो नमिः । तदा राज्यमन्तःपुरमेकपदे त्यजन्तं नमिं ब्राह्मणरूपेण शक्रः समागत्य परीक्षितवान्, प्रणतवांश्च । शक्रपरीक्षासमये नमिराजसत्कं शक्रप्रश्ननमिराजर्ष्युत्तररूपं सूत्रं कथयति-

चईऊण देवलोगाओ, उववन्नो माणुसंमि लोगंमि ।
उवसंतमोहणिज्जो, सरई पोरणियं जाइं ॥ १ ॥

जाईसरित्तु भयवं, सहसंबुद्धो अणुत्तरे धम्मे ।
पुत्तं ठवित्तु रज्जे, अभिनिक्खमई नमी राया ॥ २ ॥

द्वाभ्यां गाथाभ्यां सम्बन्धं वदति-नमी राजा पुत्रं राज्ये स्थापयित्वा अभिनिष्क्रामति अभि-समन्तान्निष्क्रामति, गृहवासान्निःसरति, अनगारो भवतीत्यर्थः । किं कृत्वा ? 'जाइ सरित्तु' जातिं स्मृत्वा - पूर्वभवं स्मृत्वा, कथम्भूतः स नमिः ? 'भयवं' भगवान् - धैर्यसौभाग्यमाहात्म्ययशोज्ञानादियुक्तः, पुनः कीदृशः ? अनुत्तरे-सर्वोत्कृष्टे श्रीजिनधर्मे 'सहसंबुद्धो' स्वयंसम्बुद्धः । इति द्वितीयगाथाया अर्थः । अथ प्रथमगाथाया अर्थः-स नमिः पूर्वं देवलोके देव आसीत्, तेनेत्युक्तम् 'चइउण देवलोगाओ' देवलोकाच्च्युत्वा स नमिभूपो मनुष्यलोके मनुष्यजन्मन्युत्पन्नः । स च नमिभूप उपशान्तमोहनीयः सन् 'पौराणिकाजातिं - पूर्वजन्मदेवलोकादि स्मरति । अत्र वर्तमाननिर्देशस्तत्कालापेक्षयोक्तः ॥ २ ॥

सो देवलोगसरिसे, अंतेउरवरगओ वरे भोए ।
भुंजित्तु नमी राया, बुद्धो राया [भोए] परिच्चयई ॥ ३ ॥

स नमी राजा बुद्धो-ज्ञाततत्त्वः सन् भोगान् परित्यजति, किं कृत्वा ? भोगान् भुक्त्वा, कथम्भूतान् भोगान् ? वरान् प्रधानान् सर्वेन्द्रियसौख्यदान्, कीदृशः सन् ? वरे प्रधानेऽन्तःपुरे गतः सन् स्त्रीसमूहे प्राप्तः सन्, कीदृशेऽन्तःपुरे ? देवलोकसदृशे देवाङ्गनासदृशे इत्यर्थः । भुक्तभोगस्य पुरुषस्य भोगा दुस्त्यजा इति हेतोर्भोगान् परित्यजतीत्युक्तम् ॥ ३ ॥

---

१ पौराणिकां जातिं-मु० ॥

मिहिलं सपुरजणवयं, बलमोरोहं च परियणं सव्वं ।
चिच्चा अभिनिक्खंतो, एगंतमहिट्ठिओ भयवं ॥ ४ ॥

स भगवान् माहात्म्यवान् यशस्वी नमी राजा एकान्तं द्रव्यतो-वनखण्डादिकं भावतश्च-सर्वसंयोगरहितत्वम्, एक एवाहमित्यतो निश्चयस्तमाश्रितः, पुनः कीदृशो नमिराजा ? अभिनिष्क्रान्तः, अभिः-समन्तान्निष्क्रान्तः संसारान्निस्सृतः, किं कृत्वा ? मिथिलां सपुरजनपदाम्, तथा बलम्, तथावरोधमन्तःपुरम्, तथा परिजनं सर्वं त्यक्त्वा, पुराणि च जनपदाश्च पुरजनपदाः, तैः सह वर्तत इति सपुरजनपदा, तां सपुरजनपदाम्, एतादृशीं मिथिलापुरीं हित्वा ॥ ४ ॥

कोलाहलगब्भूयं, आसी मिहिलाइ पव्वयंतंमि ।
तइया राइरिसिंमि, नमिंमि अभिनिक्खमंतंमि ॥ ५ ॥

तदा तस्मिन् काले मिथिलायां नगर्यां सर्वं स्थानं कोलाहलकभूतमासीत्, कोलाहलोऽव्यक्तरोदनाक्रन्दितजनितकलकलशब्दः, कोलाहल एव कोलाहलकः, कोलाहलको भूतोजातो यस्मिंस्तत्कोलाहलकभूतम्, एतादृशं सर्वं स्थानं गृहविहारादिकं जातम् । क्व सति ? नमौ राज्यभिनिष्क्रामति सति, गृहात्कुटुम्बात्क्रोधमानमायादिभ्यो वा निःसरति सति, कथम्भूते नमौ ? राजर्षौ, राजा चासावृषिश्च राजर्षिस्तस्मिन् राजर्षौ, राज्यावस्थायामपि ऋषिरिव ऋषिस्तस्मिन् राजर्षौ ॥ ५ ॥

अब्भुट्ठियं रायरिसिं, पव्वज्जाठाणमुत्तमं ।
सक्को माहणरूवेण, इमं वयणमब्बवी ॥ ६ ॥

नमिं राजर्षिं शक्रो ब्राह्मणरूपेणेदं वचनमब्रवीत् । कथम्भूतं राजर्षिं ? उत्तमं प्रव्रज्यायाः स्थानं प्रव्रज्यास्थानं ज्ञानदर्शनचारित्रादिगुणस्थानानां निवासं प्रत्यभ्युत्थितमुद्यतमित्यर्थः ॥ ६ ॥

किं नु भो अज्ज मिहिलाए, कोलाहलगसंकुला ।
सुव्वंति दारुणा सद्दा, पासाएसु गिहेसु अ ॥ ७ ॥

'किमि'ति प्रश्ने, 'नु' इति वितर्के, 'भो' इति आमन्त्रणे, भो राजर्षे ! अद्य मिथिलायां प्रासादेषु देवगृहेषु भूपमन्दिरेषु, च पुनस्त्रिक-चतुष्क-चत्वरादिषु दारुणा हृदये उद्वेगोत्पादका विलापाः- क्रन्दितादयः शब्दाः किं नु श्रूयन्ते ? इतीन्द्रो राजर्षिं नमिं पृच्छति स्मेत्यर्थः । कीदृशाः शब्दाः ? कोलाहलकसंकुला - अव्यक्तशब्दव्याप्ताः ॥ ७ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदं इणमब्बवी ॥ ८ ॥

तत इन्द्रप्रश्नानन्तरं नमी राजर्षिर्देवेन्द्रमिदमब्रवीत् । किं कृत्वा ? एतमर्थमित्यर्थ-प्रतिपादकं शब्दं निशम्य - श्रुत्वा । कथम्भूतो नमी राजर्षिः ? हेतुकारणाभ्यां चोदितः-प्रेरितो हेतुकारणचोदितः, तत्र हेतुः पञ्चावयववाक्यरूपः, कारणं च येन विना कार्यस्यो-त्पत्तिर्न भवति । पञ्च अवयवा इमे-प्रतिज्ञा १, हेतु २, उदाहरण ३, उपनय ४, निगमन ५ रूपाः । पक्षवचनं प्रतिज्ञा १, साध्यसाधकं हेतुः २, तत्सादृश्यदर्शनमुदाहरणम् ३, उदाहरणेन साध्येन च संयोजनमुपनयः ४, हेतूदाहरणोपनयैः साध्यस्य निश्चयीकरणं निगमनम् ५ । तथैव दर्शयति-तव धर्मार्थिनोऽस्मान्नगराद्गृहात्कुटुम्बाद्वा निःसरणं दीक्षाग्रहणमयुक्तमिति प्रतिज्ञावाक्यम् १ । कस्माद्धेतोः ? आक्रन्दादिदारुणशब्दहेतुत्वात्, इदं हेतुवाक्यम् २ । यद्य-दाक्रन्दादिदारुणशब्दहेतुकं भवति तत्तद्धर्मार्थिनः पुरुषस्यायुक्तम्, किंवत् ? हिंसादि-कर्मवत्, यथा हिंसादिकर्मआक्रन्दादिदारुणशब्दहेतुकम्, तद्धिंसादिकर्म च धर्मार्थिनो-ऽप्ययुक्तं भवति, इदमुदाहरणवाक्यम् ३ । तस्मात्तथा तवापि धर्मार्थिनो निःसरणमयुक्तम्, इदमुपनयवाक्यम् ४ । तस्मादाक्रन्दादिदारुणरौद्रशब्दहेतुत्वाद्धिंसादिकर्मवत्सर्वथा तव गृहात्कुटुम्बान्नगरान्निःसरणमयुक्तमेव, इति निगमनवाक्यम् ५ । इति पञ्चावयवात्मको हेतुरुच्यते । कारणं दर्शयति-यदस्य पूर्वमसतो वस्तुन उत्पादकं तत्तस्य कारणम्, भवतो गृहान्निःसरणं दारुणशब्दकार्यस्य कारणं ज्ञेयम्, यदा भवतो गृहान्निःसरणं पूर्वं जातम्, तदा पश्चादाक्रन्दादिशब्दलक्षणं कार्यं जातम्, यदा भवतो दीक्षाग्रहणं न स्यात्तदाक्रन्दा-दिशब्दश्च कथं स्यादित्यर्थः ॥ ८ ॥

एवं हेतुकारणाभ्यामिन्द्रेण प्रेरितो नमिराजर्षिरथ यदब्रवीत्तदग्रेतनया गाथयाह -

मिहिलाए चेइए वच्छे, सीयच्छाए मणोरमे ।
पत्तपुप्फफलोवेए, बहूणं बहुगुणे सया ॥ ९ ॥
वाएण हीरमाणंमि, चेइयंमि मणोरमे ।
दुहिआ असरणा अत्ता, एए कंदंति भो खगा ॥ १० ॥

नमिराजर्षिः किमब्रवीदित्याह-मिथिलायां नगर्यां चैत्ये-उद्याने भो ! एते खगाः पक्षिणः क्रन्दन्ति-कोलाहलं कुर्वन्ति । चितिः-पत्र-पुष्प-फलादीनामुपचयः, चित्यां साधु चित्यम्, चित्यमेव चैत्यमुद्यानम्, तस्मिन् चैत्ये-उद्याने एते उच्यमाना खगा-विहगाः पूत्कुर्वन्ति।कथम्भूते चैत्ये ? मनोरमे-मनोज्ञे, पुनः कीदृशे ? वृक्षैः शीतलच्छाये, कीदृशैर्वृक्षैः ?पत्र-पुष्प-फलोपेतैः पत्र-पुष्प-फलैर्युक्तैः, पुनः कीदृशे चैत्ये ? बहूनां खगानां बहुगुणे प्रचुरोप-कारजनके इत्यर्थः । एते खगाः क्व सन्ति विलपन्ति ? चैत्ये वृक्षे वातेन ह्रियमाणे सतीतस्ततः प्रक्षिप्यमाणे सति '[1]उद्याने देवगेहे च वृक्षे चैत्यमुदाहृतमि' त्यनेकार्थः ।

१ चैत्यं जिनौकस्तद् बिम्बं चैत्यो जिनसभातरुः । उद्देशवृक्षश्चोद्यं तु, प्रेर्ये प्रश्नेऽद्भुतेऽपि च ॥ ३५६-अनेकार्थसंग्रहः ॥

कथम्भूते चैत्ये ? मनोरमे-मनोज्ञे, कीदृशा एते खगाः ? दुःखिताः, पुनः कीदृशा ? अशरणाः, पुनः कीदृशाः ? आर्त्ताः-पीडिताः । अत्र यत्स्वजनाक्रन्दनमुक्तं तत्खगाक्रन्दनम्, स्वयं वृक्षकल्पो यावत्कालं तद्वृक्षस्य स्थितिरासीत्तावत्कालं भोगादिषु स्थिरतासीत् । ततश्चाक्रन्दादिदारुण-शब्दानामभिनिष्क्रमणं हेतुत्वमसिद्धम्, स्वार्थहेतुकत्वात्तेषां स्वार्थं सीदमानं दृष्टैवं करोति सर्वो जनः, अतो भवदुक्ते हेतुकारणे असिद्धे एव, एतेषां स्वजनानां मया स्वार्थभङ्गः कृतो नास्ति । ममाप्यत्र स्थाने एभिः स्वजनैः सहेयत्येव स्थितिः, केनाप्यधिकीकर्तुं न शक्यते । तस्मान्मम मिथिलातो निःसरणं दीक्षाग्रहणं सर्वथा मिथिलावास्तव्यलोकानामा-क्रन्दशब्दहेतुः कारणं च नास्त्येवेत्यर्थः ॥ १० ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिं रायरिसिं, देविंदो इणमब्बवी ॥ ११ ॥

ततस्तदनन्तरं देवेन्द्रो नमिराजर्षिं प्रतीदं वक्ष्यमाणं वचनमब्रवीत्, किं कृत्वा ? एतमर्थं निशम्य, कीदृशो देवेन्द्रः ? हेतुकारणाभ्यां प्रेरितः, अथवा हेतुकारणयोर्विषये नमिराजर्षिणा प्रेरितः, पूर्वं हीन्द्रेण नमिराजर्षिं प्रतीत्युक्तम्-भो नमिराजर्षे ! एतेषामाक्रन्दादिदारुणशब्द-हेतुत्वात्तव दीक्षाग्रहणमयुक्तम्, पुनस्तेषामाक्रन्दादिशब्दरूपकार्यस्य तव दीक्षाग्रहणमेव कारणमित्युक्ते सति नमिराजर्षिणा च तेषामाक्रन्दादिदारुणशब्दस्य स्वार्थ एव हेतुकारणे उक्ते, तेनासिद्धोऽयं भवदुक्तो हेतुः, कारणं चाप्यसिद्धमेवेति राजर्षिणेन्द्रः प्रेरितः सन्निदं वचनं नमिराजर्षिं प्रति पुनरुवाचेत्यर्थः ॥ ११ ॥

एस अग्गी य वाओ य, एयं डज्झंति मंदिरं ।
भयवं अंतेउरं तेण, कीस णं नावपेक्खह ॥ १२ ॥

हे भगवन् ! एष प्रत्यक्षोऽग्निर्वायुश्च दृश्यते, पुनरेतत्प्रत्यक्षं मन्दिरं दह्यते, तवेत्यध्या-हारः तव गृहं प्रज्ज्वलति । हे भगवन् ! 'तेणं' इति तेन कारणेन, अथवा 'णं' इति वाक्यालङ्कारे, तवान्तःपुरं - राज्ञीवर्गम्, 'कीस णं' इति कस्मात् कारणान्नोपेक्षसे-नावलोकसे ? यद्यदात्मनो वस्तु भवति तत्तद्वीक्षणीयम्, यथात्मीयं ज्ञानादि, तथेदं भवतोऽन्तःपुरमपि ज्वलमानमवलोकनीयम् ॥ १२ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिरायरिसी, देविदं इणमब्बवी ॥ १३ ॥

अस्या गाथाया अर्थस्तु पूर्ववत् अयमेव विशेषः-नमिराजर्षिर्देवेन्द्रस्य वचनं श्रुत्वा देवेन्द्रं प्रतीदमब्रवीत् ॥ १३ ॥

किमब्रवीदित्याह -

सुहं वसामो जीवामो, जेसिं मो नत्थि किंचणं ।
मिहिलाए डज्जमाणीए, न मे डज्जइ किंचणं ॥ १४ ॥

भो प्राज्ञ ! वयं सुखं यथास्यात्तथा वसामः- सुखं तिष्ठामः सुखं यथा स्यात्तथा जीवामः- प्राणान् धारयामः । 'मो' इत्यस्माकं 'किंचन' किमपि-स्वल्पमपि, ज्ञानदर्शनाभ्यां विना परं किमपि स्वकीयं नास्ति । यत्किञ्चिदात्मीयं भवति तद्विलोक्यते, अग्निजलाद्युपद्रवेभ्यो रक्ष्यते, यदात्मीयं न भवति तस्यार्थं केन चेखिद्यते । यदुक्तम् -

[1]एगो मे सासओ अप्पा, नाणदंसणसंजुओ ।
सेसाण बाहिरा भावा, सव्वे संजोगलक्खणा ॥ १ ॥

तदेव दर्शयति-मिथिलायां नगर्यां दह्यमानायां 'मे'-मम किमपि न दह्यते, इति हेतोः सर्वेऽपि स्वजनधनधान्यादयः पदार्था मत्तोऽतिशयेन भिन्नाः, एतेषां विनाशे न चास्माकं विनाश इत्यर्थः ॥ १४ ॥

चत्तपुत्तकलत्तस्स, निव्वावारस्स भिक्खुणो ।
पियं न विज्जए किंचि, अप्पियंपि न विज्जए ॥ १५ ॥

एतादृशस्य भिक्षोर्भिक्षाचरस्य प्रियमप्रियं च न किञ्चिद्विद्यते । कथम्भूतस्य भिक्षोः ? त्यक्तपुत्रकलत्रस्य, त्यक्तानि पुत्रकलत्राणि येन स त्यक्तपुत्रकलत्रस्तस्य- परिहृतसुतभार्यस्य, पुनः कीदृशस्य ? निर्व्यापारस्य, व्यापारान्निर्गतो निर्व्यापारस्तस्य निरारम्भस्य पञ्चविंशतिक्रियारहितस्य ॥ १५ ॥

बहुं खु मुणिणो भद्दं, अणगारस्स भिक्खुणो ।
सव्वओ विप्पमुक्कस्स, एगंतमणुपस्सओ ॥ १६ ॥

'खु' इति निश्चयेन, मुनेः-साधोर्बहुभद्रं-प्रचुरं सुखं वर्तते । कथम्भूतस्य मुनेः ? अनगारस्य नियतवासरहितस्य, पुनः कीदृशस्य मुनेः ? भिक्षया गृहीताहारस्य, किं कुर्वतो मुनेः ? एकान्तमनुपश्यतः, एक एवाहमित्यतो निश्चय एकान्तस्तं निश्चयं विचारयत एकत्वभावनां भावयतः, पुनः कीदृशस्य मुनेः ? सर्वतः परिग्रहाद्विप्रमुक्तस्य ॥ १६ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिं रायरिसिं, देविंदो इणमब्बवी ॥ १७ ॥

इति नमिराजर्षेर्वचनं श्रुत्वा देवेन्द्रः, पुनर्नमिराजर्षिं प्रतीदमब्रवीत् ॥ १७ ॥

पागारं कारयित्ताणं, गोपुरट्टालगाणि य ।
उसूलगसयग्घीओ, तओ गच्छसि खत्तिया ॥ १८ ॥

हे क्षत्रिय ! ततः पश्चात्त्वं गच्छ, दीक्षार्थं गच्छेरित्यर्थः । किं कृत्वा ? पूर्वं नगरस्य रक्षार्थं

---

१ एको मम शाश्वत आत्मा, ज्ञानदर्शनसंयुक्तः । शेषा (मत्तः) बाह्या भावाः, सर्वे संयोगलक्षणाः ॥ १ ॥

प्राकारं-कोट्टं कारयित्वा, पुनस्तस्य प्राकारस्य गोपुराणि-प्रतोलीद्वाराणि कारयित्वा प्रतोलीकथनादेवार्गलासहितमहादृढकपाटानि कारयित्वा, पुनस्तस्य प्राकारस्याट्टालकानि च कारयित्वा, अट्टालकानि हि प्राकारकोष्टकोपरिवर्तीनि मन्दराण्युच्यन्ते। मुरजानामुपरिस्थ-गृहाणि सङ्ग्रामस्थानानि कारयित्वा, पुनस्तस्य प्राकारस्य 'उसूलगे' ति खातिकां कारयित्वा, पुनस्तत्र प्राकारे शतघ्नीः कारयित्वा, शतघ्न्यो हि यन्त्रविशेषाः, या हि एकं वारं चालिताः सत्यः शतसङ्ख्याकान् भटान् विनाशयति। दूरमार-कुहकबाणाऽऽरावादिपाषाणयन्त्रादीन् कारयित्वा पश्चाद् व्रजेः। अत्र हे क्षत्रियेति सम्बोधन-मुक्तम्, तेन क्षत्रियो हि रक्षाकरणे समर्थः स्यात्, क्षतात्प्रहाराद्धयात् त्रायत इति क्षत्रियः, यो हि क्षत्रियः स्यात्स पुररक्षां प्रति क्षम एव स्यादिति हेतोः क्षत्रियेति सम्बोधनं प्रोक्तम् ॥ १८ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदमिणमब्बवी ॥ १९ ॥

इति देवेन्द्रवचः श्रुत्वा पुनर्नमिराजर्षिर्देवेन्द्रं प्रतीदमब्रवीत् ॥ १९ ॥

सद्धं च नगरं किच्चा, तवसंयममग्गलं ।
खंतीनिऊणपागारं, तिगुत्तं दुप्पधंसगं ॥ २० ॥

धणुं परक्कमं किच्चा, जीवं च इरियं सया ।
धिइं च केयणं किच्चा, सच्चेणं पलिमंथए ॥ २१ ॥

तवनारायजुत्तेणं, भित्तूणं कम्मकंचुयं ।
मुणी विगयसंगामो, भवाओ परिमुच्चई ॥ २२ ॥

तिसृभिर्गाथाभिरिन्द्रवाक्यस्य प्रत्युत्तरं ददाति-भो प्राज्ञ ! मुनिर्जिनवचनप्रमाण-कृत्साधुर्भवात्संसारात्परिमुच्यते, परि-समन्तान्मुक्तो भवति, मुक्तिसौख्यभाक् स्यात्। कथम्भूतो मुनिः ? विगतसङ्ग्रामः, विगतः सङ्ग्रामो यस्मात्स विगतसङ्ग्रामः, सर्वशत्रूणां विजयात्सङ्ग्रामरहितो जात इत्यर्थः। स मुनिः किं कृत्वा विगतसङ्ग्रामो जातस्तदाह-श्रद्धां तत्त्वश्रवणरुचिरूपां समस्तगुणाधारभूताम्, भगवद्वचने स्थैर्यबुद्धिं नगरं कृत्वा, तत्र श्रद्धानगरे उपशमवैराग्यविवेकादीनि गोपुराणि कृत्वेत्यनुक्तमपि गृह्यते। तपो-द्वादशविधम्, संयमं-सप्तदशविधम् अर्गलाप्रधानं कपाटमपि अर्गला, ततोऽर्गलाकपाटं कृत्वा, पुनस्तस्य श्रद्धानगरस्य क्षान्ति प्राकारं कृत्वा, क्षमां वप्रं कृत्वा, कथम्भूतं प्राकारं ? निपुणं परिपूर्णं धान्यपानीयादिभिर्भृतम्। पुनः कथम्भूतं प्राकारं ? तिसृभिर्गुप्तिभिर्गुप्तं रक्षितम्, गोपुराट्टालकोत्सूलकखातिकास्थानीयादिभी रक्षितम्। पुनः कीदृशं प्राकारं ? दुष्प्रधर्षिकं - शत्रुभिर्दुराकलनीयम्, पूर्वमिन्द्रेण प्राकारादीन् कारयित्वेत्युक्तम्, तस्योत्तरमिदं ज्ञेयम्। अथाधुना प्राकारादौ सङ्ग्रामो विधेय इत्याह-

मुनिर्विगतसङ्ग्रामः स्यात्, पराक्रमं-क्रियायां बलस्फोरणम्, धनुः कृत्वा, च पुनस्तस्य धनुषः सदा ईर्यासमितिम्, जीवां-प्रत्यञ्चां कृत्वा, च पुनस्तस्य पराक्रमधनुषो धृतिधैर्यं धर्माभिरतिम्, केतनं-श्रृङ्गमयं धनुर्मध्ये काष्ठं मुष्ठिस्थानं कृत्वा, तत्केतनं च स्नायुना दृढं बध्यते । इदमपि धैर्यकेतनं श्रृङ्गधनुर्मध्यस्थकाष्ठं सत्येन सत्यरूपस्नायुना 'पलिमंथए' इति परिबध्नीयात् । पुनस्तप एव नाराचो लोहमयो बाणस्तपोनाराचस्तेन युक्तं तपोनाराचयुक्तम्, तेन तपोनाराचयुक्तेन, तेन पूर्वोक्तेन पराक्रमधनुषा कर्मकञ्चुकं कर्मसन्नाहं भित्त्वा, अत्र कर्मकञ्चुकग्रहणेन आत्मैवोद्धतः शत्रुः, स एव योधव्यः, तस्यैव कर्मकञ्चुकं कर्मसन्नाहं भेद्यमित्यर्थः । कर्मणस्तु कञ्चुकत्वं तद्गतमिथ्यात्वाविरतिकषायोदयभाज-आत्मनः श्रद्धानगरस्य रोधं कुर्वतो दुर्निवारत्वात्, कर्मकञ्चुकभेदात्तस्यात्मनो जितत्वात्, जितकाशी जात एव, प्राकारं कारयित्वेत्यादि तस्य साधनता प्रोक्ता ॥ २०-२२-२२ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिरायरिसिं, देविंदो इणमब्बवी ॥ २३ ॥

एतन्नमिराजर्षेर्वचनं श्रुत्वा देवेन्द्रो नमिराजर्षिं प्रतीदमब्रवीत् ॥ २३ ॥

पासाए कारइत्ताणं, वद्धमाणगिहाणि य ।
वालग्गपोइआओ य, तओ गच्छसि खत्तिया ॥ २४ ॥

हे क्षत्रिय ! ततः पश्चात्त्वं गच्छ । किं कृत्वा ? प्रासादान् कारयित्वा भूपयोग्यमन्दिराणि कारयित्वा, पुनर्वर्धमानगृहाणि अनेकधा वास्तुविद्यानिरूपितानि वर्धमानगृहाणि कारयित्वा, वालाग्रपोतिकाश्च कारयित्वा-वलभीः कारयित्वा, गृहोपरि 'बङ्गलाराउटी प्रमुखाः कारयित्वेत्यर्थः । अथवा वालाग्रपोतिका-जलमध्यमन्दिराणि कारयित्वा, षड्ऋतु-सुखदानि गृहाणि कारयित्वा पश्चाद्गन्तव्यमित्यर्थः ॥ २४ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदमिणमब्बवी ॥ २५ ॥

ततो नमिराजर्षिरिन्द्रस्य वचनं श्रुत्वा देवेन्द्रं प्रत्यब्रवीत् ॥ २५ ॥

संसयं खलु सो कुणइ, जो मग्गे कुणई घरं ।
जत्थेव गंतुमिच्छिज्जा, तत्थ कुव्विज्ज सासयं ॥ २६ ॥

भोः प्राज्ञ ! स पुरुषः संशयमेव कुरुते, यः पुरुषो मार्गे गृहं कुरुते । यो ह्येवं जानाति मम कदाचिद्वाञ्छितपदे गमनं न भविष्यति, स एव मार्गे गृहं कुर्यात् । अत्र गृहकारणं तु मार्गप्रायमेव ज्ञेयम्, यस्य तु गमनस्य निश्चयो भवेत्स मार्गे गृहं न कुर्यादेव । अहं तु न संशयितः, मम संशयो नास्तीति हार्दम् । सम्यक्त्वादिगुणयुक्तानां मुक्तिनिवासयोग्यत्वेन यत्रैव गन्तुमिच्छेत्तत्रैव स्वाश्रयं स्वगृहम् अथवा 'सासयमि' ति शाश्वतमविनश्वरं गृहं कुर्यादित्यर्थः ॥ २६ ॥

---

१ मकाननी उपर अगासीमां रूम जेवुं बनाववुं के ज्यांथी चारे बाजु दूर सुधी जोई शकाय अथवा अगासी उपर धजा-पताका बांधवी ।

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिं रायरिसिं, देविंदो इणमब्बवी ॥ २७ ॥

ततः पुनर्देवेन्द्रो नमिराजर्षेर्वचनं श्रुत्वा नमिराजर्षिं प्रतीदं वचनमब्रवीत् ॥ २७ ॥

आमोसे लोमहारे य, गंठिभेये य तक्करे ।
नगरस्स खेमं काउणं, तओ गच्छसि खत्तिया ॥ २८ ॥

हे क्षत्रिय ! त्वं ततस्तदनन्तरं गच्छेः, किं कृत्वा ? नगरस्य क्षेमं कृत्वा, तत्र नगरे आमोषा, लोमहाराः, च पुनर्ग्रन्थिभेदास्तस्कराः, खातपातका, लुण्टाका विद्यन्ते, तान् नगरान्निष्कास्य सुखं कृत्वा पश्चात्त्वया दीक्षा गृहीतव्या । आमोषादयो ह्येते तस्कराणां भेदाः सन्ति । आ समन्तान्मुष्णन्ति चोरयन्तीत्यामोषास्तान्निवार्या । लोमहारास्ते उच्यन्ते येऽतिनिर्दयत्वेन परस्य पूर्वं प्राणान् हृत्वा पश्चाद् द्रव्यं गृह्णन्ति ते लोमहाराः । लोम्ना तन्तुना पट्टसूत्रमयपाशेन प्राणान् हरन्तीति लोमहाराः पाशवाहकास्तान्निवार्य, पुनर्ग्रन्थिं द्रव्यग्रन्थिं घुर्घुरककर्तिकाक्षुरकादिप्रयोगेण भिन्दन्ति विदारयन्तीति ग्रन्थिभेदास्तान् सर्वान् तस्करान्निराकार्य नगरं तस्करहितं कृत्वा [1]पश्चात्परिव्रजेरित्यर्थः ॥ २८ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिरायरिसी, देविंदमिणमब्बवी ॥ २९ ॥

तत एतद्वचनं श्रुत्वा नमिराजर्षिरिन्द्रं प्रतीदं वचनमब्रवीत् ॥ २९ ॥

असइं तु मणुस्सेहिं, मिच्छादंडो पजुंजए ।
अकारिणोत्थ बज्झंति, मुच्चई कारगो जणो ॥ ३० ॥

असकृद्वारंवारं मनुष्यैर्मिथ्या वृथैवापराधरहितेषु निरपराधजीवेष्वज्ञानादहङ्काराद्वा दण्डः प्रयुज्यते । यतो ह्यत्र संसारेऽकारिण आमोषादिक्रूरकर्मणामकर्तारो बध्यन्ते, कारकाश्चामोषादीनां क्रूरकर्मणां कर्तारश्च जना मुच्यन्ते, अनेन तेषां तु ज्ञातुमशक्यत्वेन क्षेमकरणस्याप्यशक्यत्वं प्रोक्तम् । यदिन्द्रियाण्यामोषतुल्यानि ज्ञेयानि, तान्येव जेयानि ॥ ३० ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिरायरिसिं, देविंदो इणमब्बवी ॥ ३१ ॥

[2]ततः पुनः देवेन्द्रो नमिराजर्षिं प्रतीदमब्रवीत् ॥ ३१ ॥

जे के पत्थिवा तुब्भं, नो नमंति नराहिवा ।
वसे ते ठावइत्ताणं, तओ गच्छसि खत्तिया ॥ ३२ ॥

---

१ परिव्रजेदि-मु. ॥ २ एतन्नमिराजर्षेर्वचनं श्रुत्वा-मु. ॥

हे नराधिप ! ये केचित्पार्थिवा राजानस्तुभ्यं न नमन्ति तान् भूपालान् वश्ये स्थापयित्वा, ततो हे क्षत्रिय ! त्वं गच्छ ॥ ३२ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदमिणमब्बवी ॥ ३३ ॥

ततो देवेन्द्रवचनानन्तरं नमिराजर्षिर्देवेन्द्रं प्रत्यब्रवीत् ॥ ३३ ॥

जो सहस्सं सहस्साणं, संगामे दुज्जए जिणे ।
एगं जिणेज्ज अप्पाणं, एस से परमो जओ ॥ ३४ ॥

यो मनुष्यः सङ्ग्रामे सुभटसहस्राणां सहस्रं जयेत्, कथम्भूते सङ्ग्रामे ? दुर्जये, अथवा कथम्भूतं सुभटसहस्राणां सहस्रं ? दुर्जयम्, दुःखेन जयो यस्य तद् दुर्जयम्, यः कश्चिदेक एतादृशः सुभटः स्यात्, यः सुभटानां दशलक्षं जयेत् । एकः पुनरेतादृशः पुरुषः स्याद्य आत्मानं - दुष्टाचारे प्रवृत्तं तेन सह युध्येत, आत्मना सह युद्धं कुर्यादित्यर्थः । एष आत्मविजयः 'से' इति तस्यात्मजयिनः परम उत्कृष्टो जयः प्रोक्तः । कोऽर्थः ? यो ह्यात्मविजयी पुमान् भवति तस्य पुरुषात् दशलक्षसुभटविजयिनः पुरुषान्महान् जयवादः, दशलक्षसुभटजेतुः सकाशादात्मविजयी पुमान् बलिष्ठ इत्यर्थः ॥ ३४ ॥

अप्पाणमेव जुज्झाहि, किं ते जुज्झेण बज्झओ ।
अप्पणा एव अप्पाणं, [१]जइत्ता सुहमेहए ॥ ३५ ॥

ततश्चात्मना सहैव युध्यस्व, 'ते' तव बाह्येन युद्धेन-बाह्यसङ्ग्रामेण किं ? न किमपीत्यर्थः । बाह्यपार्थिवादिविजयो व्यर्थ एवेत्यर्थः । आत्मना एव आत्मानं जित्वा मुनिः सुखमेधते प्राप्नोतीत्यर्थः । अत्रात्माशब्देन मनः, सर्वत्र सूत्रत्वान्नपुंसकत्वम् अतति-गच्छति प्राप्नोति नवीनानि नवीनान्यध्यवसायस्थानान्तराणीत्यात्मा मन उच्यते ॥ ३५ ॥

पंचेन्दियाणि कोहं, माणं मायं तहेव लोहं य ।
दुज्जयं चेव अप्पाणं, सव्वमप्पे जिए जिअं ॥ ३६ ॥

भोः प्राज्ञ ! आत्मा-मन एव दुर्जयम्, तस्मिन्नात्मनि जिते सर्वमेतज्जितम् । एतत्किं किं तदाह-पञ्चेन्द्रियाणि, च पुनः क्रोधो मानो माया, तथैव लोभश्चकारान्मिथ्यात्वाविर-तिकषायादिकम्, एतत्सर्वमरिचक्रमात्मनि जिते जितमिति ज्ञेयम् । यत्पूर्वं ये केचित्पार्थिवा अनम्रा इत्युक्तं तस्योत्तरं प्रोक्तम् ॥ ३६ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिं रायरिसिं, देविंदो इणमब्बवी ॥ ३७ ॥

एतद्वचनं श्रुत्वेन्द्रः पुनर्नमिं राजर्षिं प्रतीदमब्रवीत् ॥ ३७ ॥

---

१ जिणित्ता - अन्यसंस्करणे ॥

जइत्ता विउले जन्ने, भोइत्ता समणमाहणे ।
दच्चा भुच्चा य जिट्ठा य, तओ गच्छसि खत्तिया ॥ ३८ ॥

रागद्वेषयोस्त्यागं निश्चित्याथ जिनधर्मे स्थैर्यं परीक्षितुमिन्द्रः प्राह-भो क्षत्रिय ! ततः पश्चात्त्वं गच्छ । किं कृत्वा ? विपुलान्-विस्तीर्णान् यज्ञान् याजयित्वा, विस्तीर्णान् यज्ञान् कारयित्वेत्यर्थः । श्रमणब्राह्मणान् भोजयित्वा पश्चाच्छ्रमणब्राह्मणादिभ्यो गवादीन् दत्वा, च पुनर्भुक्त्वा, शब्दरूपरसगन्धस्पर्शादिविषयान् भुक्त्वा राजर्षित्वेन स्वयमेव यागानिष्ट्वा -यज्ञानश्वमेधादीन् कृत्वा, यत्प्राणिनां प्रीतिकरं स्यात्, तद्धर्माय स्यात्, तथाऽहिंसादि, तथामूनि यजापनभोजनदानभोगयजनादीनि धर्माय स्युरित्यर्थः ॥ ३८ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिरायरिसी, देविंदमिणमब्बवी ॥ ३९ ॥

ततः पुनर्नमिराजर्षिर्देवेन्द्रं प्रतीदमब्रवीत् ॥ ३९ ॥

जो सहस्सं सहस्साणं, मासे मासे गवं दए ।
तस्सावि संजमो सेओ, अदिंतस्सवि किंचणं ॥ ४० ॥

यो गवां सहस्राणां सहस्रमर्थाद्दशलक्षं गवां मासे मासे दाने पात्रेभ्यो दद्यात्तस्यै-वंविधस्य गवां दशशतसहस्रदायकस्यापि तस्माद्गवां दानात्साधोः संयम - आश्रवादिभ्यो विरागः श्रेयानतिशयेन प्रशस्यः । अत्र साधोरिति पदमध्याहार्यम् । कीदृशस्य साधोः ? किञ्चित्स्वल्पं वस्त्वप्यददानस्यादातुरित्यर्थः ॥ ४० ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिं रायरिसिं, देविंदो इणमब्बवी ॥ ४१ ॥

एतत्पूर्वोक्तमर्थं श्रुत्वा नमिं राजर्षिं प्रति देवेन्द्रः पुनरब्रवीत् ॥ ४१ ॥ अथ चतुर्णामाश्रमाणां मध्ये प्रथमं गृहस्थाश्रममेव वर्णयति, प्रव्रज्यादार्ढ्यं च परीक्षयति-

घोरासमं चइत्ताणं, अन्नं पत्थेसि आसमं ।
इहेव पोसहरओ, भवाहि मणुआहिवा ॥ ४२ ॥

भो मनुजाधिप ! घोराश्रमं-गृहस्थाश्रमं त्यक्त्वान्यं भिक्षुकाश्रमं प्रार्थयसि, घोरो-हीनसत्वैर्नरै[1]र्निर्वोढुमशक्यः, आश्रम्यते विश्रामो गृह्यते यस्मिन् स आश्रमः, आश्रमाश्च-त्वारः-ब्रह्मचारि-गृहि-वानप्रस्थ-भिक्षुरूपाः, तत्र गृहिणामाश्रमो हि दुरनुचरः पालयितुम-

---

१ °नैर्वोढु°-मु. ॥

शक्यस्तं परित्यज्यान्यमपरं हीनबलानां कातराणां सुखेनोदरभरणकरणसमर्थं भिक्षूणामाश्रमं वाञ्छसि । यत उक्तं-

"गृहाश्रमसमो धर्मो, न भूतो न भविष्यति ।
पालयन्ति नराः शूराः, क्लीबाः पाखण्डमाश्रिताः ॥ १ ॥
सुदुर्वहं परिज्ञाय, घोरं गार्हस्थ्यमाश्रमम् ।
मुण्डनग्नजटावेषाः, कल्पिताः कुक्षिपूर्तये ॥ २ ॥
सर्वतः सुन्दरा भिक्षा, रसा यत्र पृथक् पृथक् ।
स्यादैकयामिकी सेवा, नृपत्वं साप्तयामिकम्" ॥ ३ ॥

तस्मादिदं कातराणामाचरितं भवादृशानां शूराणां न योग्यमिति हार्दम् । इहैवात्रैव गृहस्थाश्रमे पौषधे रतश्चतुर्दशीपूर्णिमोद्दिष्टामावास्याष्टम्यादितिथिषूपवासादिरतो भव, अणुव्रतोपलक्षणं चैतत् । अस्योपादानं पर्वदिनेष्ववश्यं तपोऽनुष्ठानख्यापकं यद्यद् घोरं दुष्करं तत्तद्धर्माथिना नरेणानुष्ठेयम् । यथानशनादीत्यन्तर्गतहेतुकारणे स्वयमेव ज्ञेये ॥ ४२ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिरायरिसी, देविंदमिणमब्बवी ॥ ४३ ॥

अथ नमिराजर्षिर्देवेन्द्रं प्रति गृहस्थाश्रमाद्भिक्षुकाश्रमेऽधिकलाभं दर्शयति, धर्मव्यापारपरो ह्यधिकलाभदृष्टिर्भवेत् ॥ ४३ ॥

मासे मासे उ जो बालो, कुसग्गेणं तु भुंजए ।
न सो सुअक्खायधम्मस्स, कलं अग्घइ सोलसिं ॥ ४४ ॥

यः कश्चिद्बालो निर्विवेकी नरो मासे मासे कुशाग्रेणैव भुङ्क्ते, न तु कराङ्गुल्यादिना भुङ्क्ते, यद्वा यः कश्चिद्यावद्भोजनादिकुशस्य-दर्भस्याग्रेऽधितिष्ठति तावदेव भुङ्क्ते अधिकं न भुङ्क्ते, अल्पाहारी स्यादित्यर्थः । अथवा यो बालोऽज्ञानी मासे मासे कुशाग्रेणैव भुङ्क्ते, कुशाग्रेणाहारवृत्तिं कुर्यात्, अन्नं न किमपि भुङ्क्त इत्यर्थः । एतादृक्तपोनुष्ठानकारी, सोऽपि स्वाख्यातधर्मस्य षोडशीमपि कलां नार्घति-न प्राप्नोति । सुष्ठु निरवद्यमाख्यातः स्वाख्यातस्तस्य स्वाख्यातस्य जिनोक्तस्य संयमधर्मस्य चारित्रस्य यः षोडशो भागस्तत्तुल्योऽप्यज्ञानीलाभालाभस्याज्ञः, कुशाग्रभोजी न स्यादित्यर्थः । तस्माद् गृहे तिष्ठतस्तपः कुर्वतो बालस्य यथाख्यातचारित्रपालकस्य साधोर्महदन्तरम्, गृही अतीवाधर्मात्मा भवति, तथापि सर्वसावद्यत्यागी न भवति, देशविरत एव स्यात्, तस्मात्सर्वनिरवद्यत्वाज्जिनोक्तत्वान्मोक्षार्थिना निरवद्यधर्म एव आश्रयणीयः सावद्यस्तु नाश्रयणीयः, आत्मघातादिवत् ॥ ४४ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिरायरिसिं, देविंदो इणमब्बवी ॥ ४५ ॥

ततः पुनर्नमिराजर्षिं प्रति देवेन्द्र इदमब्रवीत् ॥ ४५ ॥

हिरण्णं सुवण्णं मणिमुत्तं, कंसं दूसं च वाहणं ।
कोसं वड्ढावइत्ताणं, तओ गच्छसि खत्तिया ॥ ४६ ॥

अथ द्रव्यलोभत्यागं परीक्षितुमाह-हे क्षत्रिय ! हिरण्यं-घटितस्वर्णम्, सुवर्णमघटितम्, मणयश्चन्द्रकान्ताद्य इन्द्रनीलाद्य वा, मुक्तं-मुक्ताफलम्, कांस्यं-कांस्यभाजनादि, दुष्यं-वस्त्रादि, वाहनं-रथाश्वादि, कोशं - [1]भाण्डागारम्, एतद् वृद्धिं प्रापय्य-वर्धयित्वा ततस्त्वं दीक्षायै गच्छ । अत्रायमाशयः-योऽपरिपूर्णेच्छो भवति स धर्मानुष्ठानयोग्यो न भवति । यथा मम्मणः, अपरिपूर्णेच्छो हि भवान् साकांक्षो [2]भवति ॥ ४६ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिरायरिसी, देविंदमिणमब्बवी ॥ ४७ ॥

तत एतद्वचनं श्रुत्वा नमिराजर्षिरिन्द्रं प्रतीदं वचनमब्रवीत् ॥ ४७ ॥

सुवण्णरूपस्स उ पव्वया भवे, सिया हु केलाससमा असंखया ।
नरस्स लुद्धस्स न तेहिं किंचि, इच्छा हु आगाससमा अणंतिया ॥ ४८ ॥

पुढवी साली जवा चेव, हिरण्णं पसुभिस्सह ।
पडिपुन्नं नालमेगस्स, इइ विज्जा तवं चरे ॥ ४९ ॥

सुवर्णस्य तु पुना रूप्यस्य चासङ्ख्यका बहवः कैलाशसमा अत्युच्चाः स्युः, कदाचित् 'हु' यस्मात्कारणात्पर्वता भवेयुस्तदापि लुब्धस्य - लोभग्रस्तनरस्य तैः कैलाशपर्वतप्रमाणैः स्वर्णरूप्यपुञ्जैर्न किञ्चिदित्यर्थः । लोभवतः पुरुषस्य कदापीच्छापूर्तिर्न स्यात् । 'हु' इति निश्चयेनेच्छाकाशसमाऽनन्तिकाऽपारा ॥ ४८ ॥ पुनरिच्छाया एव प्राबल्यमाह-

पृथिवी समुद्रान्ता, शालयः कलम[3]षाष्टिक्यलोहितदेवभोज्यदेयस्तन्दुलाः, यवधान्यानि, च शब्दादन्यान्यपि गोधूममुद्गादीनि, हिरण्यं सुवर्णं घटितदीनारादिद्रव्यं हिरण्यग्रहणेन अन्याऽपि ताम्र[4]कस्तीरादिधातवः, पशुभिर्गवाश्वगजखरौष्ट्रादिभिः सह प्रतिपूर्णं समस्तम्, एवमेकस्य पुरुषस्येच्छापूर्तये नालं-न समर्थं भवति ।

'इइ' इत्येतद्विदित्वा साधुस्तपश्चरेत्साधुस्तपः कुर्यात्, इच्छानिरोध एव तपस्तद्विदध्यात् । तपसैवेच्छापूर्तिः स्यात् , तथा च सति साकाङ्क्षत्वमसिद्धम्, सन्तुष्टतया मम चाकाङ्क्षणीयवस्तुन एवाभावात् ॥ ४९ ॥

---

१ भाण्डागारादि-मु. ॥ २ भविष्यति-मु. ॥ ३ साठी चोखा ॥ ४ कलई ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमिरायरिसिं, देविंदो इणमब्बवी ॥ ५० ॥

अथ पुनर्नमिं मुनिं प्रति देवेन्द्र इदमाह ॥ ५० ॥

अच्छेरयमब्भूदए, भोए चयसि पत्थिवा ।
असंते कामे पत्थेसि, संकप्पेण विहन्नसि ॥ ५१ ॥

हे पार्थिवैतदाश्चर्यं वर्तते, यत्त्वमेवंविधोऽप्यद्भुतान् रमणीयान् भोगान् त्यजसि । भोगत्यागाच्चासतोऽविद्यमानादप्रत्यक्षान् कामान् विषयसुखानि स्वर्गापवर्गसौख्यानि प्रार्थयसे, एतदप्याश्चर्यम् । अथवा तवात्र को दोषः ? अतिलोभस्य विजृम्भितमेतदलब्ध-प्रधान-प्रधानतरभोगसुखाभिलाषरूपेण विकल्पेन विहन्यसे विबाध्यसे । अदृष्टस्वर्गापवर्गसुखलोभेन प्रत्यक्षाणि भोगसुखानि त्यक्त्वा पश्चात्तापेन त्वं पीड्यसे इत्यर्थः । यः सद्विवेको भवेत्स लब्धं वस्तु त्यक्त्वाऽलब्धवस्तुनि साभिलाषो न स्यात् ॥ ५१ ॥

एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।
तओ नमी रायरिसी, देविंदमिणमब्बवी ॥ ५२ ॥

ततः पुनर्नमिराजर्षिर्देवेन्द्रं प्रतीदमब्रवीत् ॥ ५२ ॥

सल्लं कामा विसं कामा, कामा आसीविसोवमा ।
कामे पत्थेमाणा, अकामा जंति दुग्गइं ॥ ५३ ॥

एते कामा-विषया विविधबाधाविधायित्वाच्छल्यं शल्यसदृशा देहमध्यप्रविष्टत्रुटितभल्लितुल्याः, प्रतिक्षणं पीडोत्पादकाः । पुनः कामा विषं विषसदृशाः, यथा विषं तालपुटादि भक्षितं सन्मरणोत्पादकम्, तथा कामा अपि धर्मजीवितविनाशका मुखे मधुरत्वमुत्पाद्य पश्चान्मरणमुत्पादयन्ति दारुणत्वात् । पुनः कामा आशीविषोपमाः, आशी-दाढाविषं येषां ते आशीविषाः सर्पास्तेषामुपमा येषां ते आशीविषोपमाः सर्पसदृशाः यथा सर्पदष्टा जीवा म्रियन्ते तथैव कामैर्दष्टा जीवा म्रियन्ते । यथा हि फणिमणिभूषिताः सर्पाः शोभना दृश्यन्ते, स्पृष्टाश्च विनाशाय स्युः, एतादृशान् कामान् प्रार्थयन्तो जना दुर्गतिं यान्ति । कीदृशा जनाः ? अकामाः कामसुखाभिलाषं वाञ्छन्तोऽप्यलभमाना अप्राप्तमनोरथाः कामिनो नरकादौ व्रजन्ति । तस्मादेते प्रत्यक्षं सुखोत्पादका अपि कामाः कष्टदायकत्वात्संयमधर्मश्च सकलकष्टहरत्वाद्विवेकिभिः कामास्त्याज्याः, संयमो ग्राह्य इति हार्दम् ॥ ५३ ॥ अथ कथं दुर्गतिं यान्तीत्याह -

अहे वयइ कोहेणं, माणेणं अहमागई ।
मायागइपडिग्घाओ, लोभाओ दुहओ भयं ॥ ५४ ॥

जीवः क्रोधेनाधो व्रजति, नरके याति, मानेनाधमा गतिर्भवति, गर्दभौष्ट्रमहिष-शूकरादिगतिः स्यात् । मायया सुगतेः प्रतिघातः, माया सुगतेरर्गला भवति । लोभाद् द्विधापि भयं स्यात्, ऐहिकं पारलौकिकं च भयं दुःखं स्यात् । कामप्रार्थने ह्यवश्यं भाविनः क्रोधादयस्ते च क्रोधादय इदृशाः । ततः कथं तत्प्रार्थनातो दुर्गतिर्न स्यात् ? ॥ ५४ ॥ एवं वचनयुक्तिं श्रुत्वेन्द्रो नमिराजर्षिं प्रति क्षोभयितुमशक्तः किमकरोदित्याह-

अवउज्झिऊण माहण-रूवं विउव्विऊण इंदत्तं ।
वंदइ अभित्थुणंतो, इमाहिं महुराहिं वग्गूहिं ॥ ५५ ॥

इन्द्रो नमिराजर्षिं प्रति वन्दते । किं कुर्वन् ? इमाभिः प्रत्यक्षं वक्ष्यमाणाभिर्मधुराभिर्वाग्भिः स्तुवन् किं कृत्वा ? ब्राह्मणरूपमपोह्य-त्यक्त्वा, इन्द्रत्वं विकुर्व्य-विधाय ॥ ५५ ॥

अहो ते निज्जिओ कोहो, अहो माणो पराजिओ ।
अहो ते निज्जिया माया, अहो लोहो वसीकओ ॥ ५६ ॥

अहो इत्याश्चर्ये, त्वया क्रोधो निर्जितः, यतो मया त्वां प्रत्युक्तमनग्रपार्थिवावशीकर्तव्यास्तदापि त्वं न क्रुद्ध इत्यर्थः । अहो इत्याश्चर्ये त्वया मानोऽपि दूरीकृतः, यतो मन्दिरं दह्यते, अन्तःपुरं दह्यत इत्याद्युक्तम्, तथापि मयि विद्यमाने मम पुरं ममान्तःपुरं च दह्यत इति तव मनस्यहंकृतिर्नायात्, तस्मान्निर्मानस्त्वं वर्त्तसे । अहो इत्याश्चर्ये, त्वया मायापि निर्जिता-निराकृता, यतस्त्वं नगरस्य रक्षाकारणेषु प्राकाराट्टालकादिषु, निष्कासनयोग्येष्वामोषलोमाहारग्रन्थिभेदकतस्करादीनां वशीकरणहननादिषु च मनो नोऽकरोः । अहो इत्याश्चर्ये, लोभो वशीकृतः, हिरण्यसुवर्णादिकं वर्धयित्वा पश्चाद्गन्तव्यमिति श्रुत्वापि मां प्रतीच्छा हु आकाशसमाऽनन्तका इत्युक्तवान् तस्माच्चत्वारोऽपि कषायास्त्वया जिता इत्यर्थः ॥ ५६ ॥

अहो ते अज्जवं साहु, अहो ते साहु मद्दवं ।
अहो ते उत्तमा खंति, अहो ते मुत्ति उत्तमा ॥ ५७ ॥

अहो इति विस्मये, आश्चर्यकारि वा, साधु-समीचीनं ते तवार्जवम्, ऋजोः-सरलस्य भाव आर्जवं विनयवत्त्वं वर्तते । अहो आश्चर्यकारि तव साधु-सुन्दरं मार्दवम्, मृदोर्भावो मार्दवं-कोमलत्वं सदयत्वं वर्तते । अहो साध्वी तव क्षान्तिः-क्षमा वर्तते, अहो साध्वी तव मुक्तिर्वर्तते - निर्लोभता वर्तते ॥ ५७ ॥

अथ पुनर्वर्धमानगुणद्वारेणाभिष्टौति-

इहंसि उत्तमो भंते, पिच्चा होइसि उत्तमो ।
लोगुत्तमुत्तमं ठाणं, सिद्धिं गच्छसि नीरओ ॥ ५८ ॥

हे मुने ! हे भगवन् ! हे पूज्य ! त्वमिह-अस्मिन् जन्मन्युत्तमोऽसि, सर्वपुरुषेभ्यः

प्रधानोऽसि, उत्तमगुणान्वितत्वात् । 'पिच्चा' इति प्रेत्य - परलोकेऽप्युत्तमो भविष्यसि लोकस्योत्तमोत्तममतिशयप्रधानं स्थानमेतादृशं सिद्धिं मुक्तिस्थानं नीरजा-निष्कर्मा गच्छसि-त्वं गमिष्यसि । अत्र 'लोगुत्तमुत्तममि' त्यत्र मकारः प्राकृतत्वात्, लोकोत्तमोत्तम इति वक्तव्यम् ॥ ५८ ॥

एवमभित्थुणंतो, रायरिसिं उत्तमाए सद्धाए ।
पायाहिणं करंतो, पुणो पुणो वंदए सक्को ॥ ५९ ॥

शक्र-इन्द्रो नमिराजर्षिं पुनः पुनर्वन्दते-भूयो भूयो नमस्कुरुते । किं कुर्वन् ? प्रदक्षिणां कुर्वन्, पुनः किं कुर्वन् ? उत्तमया-प्रधानया श्रद्धया-रुच्या, भक्त्याऽभिष्टुवन् - स्तुतिं कुर्वन्नित्यर्थः ॥ ५९ ॥

तो वंदिऊण पाए, चक्कंकुसलक्खणे मुनिवरस्स ।
आगासेणुप्पइओ, ललियचवलकुंडलकिरीडी ॥ ६० ॥

'तो' इति ततः शक्र आकाशमनुत्पतित - उड्डितः, किं कृत्वा ? मुनिवरस्य राजर्षेः पादौ वन्दित्वा, कीदृशौ मुनेः पादौ ? चक्राङ्कुशलक्षणौ, राज्ञो हि पादयोश्चक्राङ्-कुशलक्षणं स्यात् । कीदृशः शक्रः ? ललितचपलकुण्डलकिरीटी, ललिते सविलासे चपले-चञ्चले च ते कुण्डले च यस्य स ललितचपलकुण्डलः, किरीटं-मुकुटं यस्यास्तीति किरीटी, ललितचपलकुण्डलश्चासौ किरीटी च ललितचपलकुण्डलकिरीटी, चपलसुन्दर-कुण्डलमुकुटधारक इत्यर्थः ॥ ६० ॥

नमी नमेइ अप्पाणं, सक्खं सक्केण चोइओ ।
चइऊण गेहं वेदेही, सामन्ने पज्जुवट्ठिओ ॥ ६१ ॥

नमिराजर्षिरात्मानं नमयति-आत्मानं विनयधर्मे भावयति, कथम्भूतो नमिः ? शक्रेण साक्षात्प्रकारेण प्रत्यक्षीभूय चोदितः, गृहीतमनोभावः परीक्षिताशयः स नमिर्विदेहेषु विदेहदेशेषु भवो - वैदेहो - विदेहदेशाधिपो गृहं त्यक्त्वा श्रामण्ये श्रमणस्य - साधोः कर्म श्रामण्यं साधुधर्मस्तत्र पर्युपस्थित उद्यतोऽभूत्, परि उपसर्गेणायमर्थो द्योतते स्वयमेवोद्यतः, न त्विन्द्रप्रेरणातो धर्मे विप्लुतोऽभूदिति भावः ॥ ६१ ॥

एवं करंति संबुद्धा, पंडिया पविअक्खणा ।
विणयट्ठंति भोगेसु, जहा से नमी रायरिसि ॥ ६२ ॥ त्ति बेमि

सम्बुद्धाः- सम्यग्ज्ञाततत्त्वाः पण्डिताः सुनिश्चितशास्त्रार्था एवममुना प्रकारेण कुर्वन्ति, भोगेभ्यो विशेषेण निवर्तन्ते, कीदृशाः सम्बुद्धाः ? प्रविचक्षणाः, प्रकर्षेणाभ्यासातिशयेन विचक्षणः क्रियासहितज्ञानयुक्ताः इत्यर्थः । क इव भोगेभ्यो निवर्तन्ते ? यथा नमिराजर्षिर्भो-गेभ्यो निवर्तित इत्यहं ब्रवीमि-सुधर्मा स्वामी जम्बूस्वामिनं प्रति वदति ॥ ६२ ॥ इति तृतीयप्रत्येकबुद्धनमिराजर्षिसम्बन्धः ॥

अथ यदा नमिः प्रतिबुद्धस्तदानीमेव नगातिर्नृपः प्रतिबुद्धः । अथ नगातिनृपचरित्रं कथ्यते-अस्मिन् भरते पुण्ड्रवर्धनं नाम नगरमस्ति, तत्र सिंहरथो नाम राजा वर्तते । गन्धार-देशाधिपतेस्तस्य राज्ञोऽन्यदा द्वावश्वौ प्राभृतौ समायातौ । तयोः परीक्षार्थमेकस्मिंस्तुरगे राजाधिरूढः, एकस्मिंश्च तुरगेऽपरो नर आरूढः, तेन सममपरैश्चाश्ववारशतैः परिवृतो भूपतिर्बाह्यारामिकायां गतः, परीक्षां कुर्वता राज्ञाश्वः प्रधानगत्या विमुक्तः, सोऽपि बलवता वेगेन निर्ययौ । यथा यथा राजा वल्गामाकर्षति तथा तथा स वायुवेगवान् जातः, पुरोपवना-न्यतिक्रम्य सोऽश्वो राजानं लात्वा महाटव्यां प्रविष्टः, श्रान्तेन भूपेन तदास्य वल्गा मुक्ता, तदा राजैनं विपरीताश्वं मन्यते स्म, तस्मादुत्तीर्य राजा भूमिचरो बभूव । तं च पानीयं पाययित्वा वृक्षे बबन्ध, स्वप्राणवृत्तिं फलैर्विदधे ।

तत एकं नगमारुह्य क्वचित्प्रदेशे सुन्दरमेकं महावासं ददर्श । राजा कुतूहला-त्तस्मिन्नावासे प्रविष्टः । तत्रैकाकिनीं पवित्रगात्रां कन्यां भूपतिर्दृष्टवान्, सा राजानमागच्छन्तं दृष्ट्वा भूरिहर्षा आसनं ददौ । राज्ञोचे का त्वं ? कोऽयमद्रिनिवासः ? किमिदं रम्यं धाम ? कन्या प्राह-भूपाल ! प्रथमं मत्पाणिग्रहणं कुरु । साम्प्रतं विशिष्टं लग्नमस्ति, पश्चात्सर्वं वृत्तान्तमहं कथयिष्यामि । तयेत्युक्ते नरपतिस्तत्र तया समं पूजितं जिनबिम्बं प्रणम्यो-द्वाहमाङ्गल्यमलञ्चकार । भूपतिना परिणीता सा कन्या विविधान् भोगोपचारांश्चकार । विचित्राश्च स्वभक्तीर्दर्शयामास । अवसरे राजा तां प्रत्येवमाह-विमलैः पुण्यैरावयोः सम्बन्धो जातोऽस्ति, परं त्वं स्ववृत्तान्तं वद, का त्वं कथमत्रैकाकिनी वससि ? स्वभर्त्रा एवमुक्ते सा स्वसम्बन्धं मूलतो वक्तुमारेभे ।

क्षितिप्रतिष्ठे नगरे जितशत्रुर्नृपोऽस्ति । सोऽन्यदा परदेशायातचरानेवमाह- अहो ! मम राज्ये किञ्चिन्न्यूनमस्ति ? ते प्राहुः-सर्वमपि तव राज्येऽस्ति, परं विचित्रचित्रा सभा नास्ति । ततो नृपतिश्चित्रकरानाकार्य सभागृहभित्तिभागाः सर्वेषां समाश्चित्रयितुं दत्ताः, सर्वेऽपि चित्रकराः स्वस्वभित्तिभागान् गाढोद्यमेन चित्रयन्ति, तत्रैको वृद्धश्चित्रकरः सकलचित्रकलावेदी स्वभित्तिभागं चित्रयितुमारब्धवान्, सहायशून्यतस्तस्य निरन्तरं गृहतः कनकमञ्जरी रूपवती पुत्री भक्तं तत्रानयति । अन्यदा सा स्वगृहाद्भक्तमानयन्ती राजमार्गे गच्छन्त्यश्ववारमेकं ददर्श । स च बाल-स्त्री-वराकादिजनसंकीर्णेऽपि राजमार्गे त्वरितमश्वम-वाहयत् । लोकास्तु तद्भयादितस्ततो नष्टाः, सापि क्वचिन्नंष्ट्वा स्थिता, पश्चात्तत्रायाता, भक्तपानहस्तां तामागतां वीक्ष्य स वृद्धचित्रकारः पुरीषोत्सर्गार्थं बहिर्जगाम । एकत्राहार-पात्रामाच्छादयित्वा सा क्वचिद्भित्तिदेशे वर्णकैर्मयूरपिच्छमालिलेख ।

अथ तत्र राजा सम्प्राप्तः भित्तिचित्राणि पश्यन् कुमार्यालेखिते केकिपिच्छे साक्षात्पिच्छं मन्यमानः करं चिक्षेप । भित्त्यास्फालनतो नखभङ्गेन विलक्षीभूतं तं नृपं सामान्यपुरुषमेव जानन्ती सा चित्रकरपुत्र्येवमाह-'चतुर्थः पादस्त्वमद्य मया लब्धः' । नृपः प्राह-पूर्वं त्वया

के त्रयः पादा लब्धाः ? साम्प्रतमहं कथं त्वया चतुर्थः पादो लब्धः ? सा प्राह-श्रूयतां, योऽद्य मया राजमार्गे त्वरितमश्वं वाहयन् बाल-स्त्रीप्रमुखजनानां त्रासयन् दृष्टः स मूर्खत्वे प्रथमः पादो 'लब्धः, द्वितीयः पाद इहत्यो राजा, यः कुटुम्बलोकसहितैश्चित्रकरैः समं भित्तिभागं जरातुरस्य मम पितुर्ददौ । तृतीयः पादो मम पिता, यो नित्यं भक्ते समायाते बहिर्याति । चतुर्थस्त्वं योऽस्मिन् भित्तिदेशे मल्लिखिते मयूरपिच्छे करं चिक्षेप । परमेवं त्वया न विमृष्टं यदत्र सुधाघृष्टे भित्तिदेशे निराधारा मयूरपिच्छस्थितिः कुतो भवति ? एवं तस्या वचश्चातुरीरञ्जितो राजा तत्पाणिग्रहणं वाञ्छकः सन् तस्याः पितुः समीपे स्वमन्त्रिणं प्रेषयित्वा तां प्रार्थितवान् । पित्रापि सा दत्ता, सुमुहूर्ते परिणीता राज्ञः प्रकामं प्रेमपात्रं बभूव । सर्वान्तःपुरीषु मुख्या जाता, विविधानि दूष्यानि रत्नाभरणानि चाससाद । एकदा तया मदनाभिधा स्वदासी रहस्येवं बभाषे-भद्रे ! यदा मद्रतिश्रान्तो भूपतिः स्वपिति तदा त्वयाहमेवं पृष्टव्या-'स्वामिनि ! कथां कथयेति' । तयोक्तमवश्यमहं तदानीं प्रश्नयिष्ये । अथ रात्रिसमये राजा तद्गृहे समायातः, तां भुक्त्वा रतिश्रान्तो राजा यावत्स्वपिति तावता दास्येयं पृष्टा-स्वामिनि ! कथां कथय । राज्ञी प्राह-यावद्राजा निद्रां नाप्नोति तावन्मौनं कुरु पश्चात्त्वदग्रे यथेच्छं कथां कथयिष्यामि, राजापि तां कथां श्रोतुकामः कपटनिद्रया सुष्वाप, पुनर्दास्या साम्प्रतं कथां कथयेति पृष्टा चित्रकरपुत्री कथां कथयितुमारेभे ।

मधुपुरे वरुणः श्रेष्ठी एककरप्रमाणदेवकुलमकारयत्, चतुष्करप्रमाणो देवस्तत्र स्थापितः, स देवस्तस्मै चिन्तितार्थदायको बभूव । अथ दासी प्राह-एकहस्ते देवकुले चतुष्करप्रमाणो देवः कथं मातः ? इति तया पृष्टे सा राज्ञी प्राह-इमं रहस्यं तव कल्यरात्रौ कथयिष्यामि, अद्य तु निद्रा समायातीति प्रोच्य सा राज्ञी राजशय्यापुरो भूमौ सुप्ता, सा दास्यपि स्वगृहे गता, राजा मनस्येवं चिन्तयामास कल्यरात्रावपीदं कथानकं मया श्रोतव्यमिति निश्चित्य राजा सुप्तः सुखं निद्रामवाप । द्वितीयदिनेऽपि राजा तस्या एव गृहे रात्रौ समायातः, रात्र्यर्धं यावद्रतिसुखं भुङ्क्ते, पश्चाद्रतिश्रान्तो राजा पूर्वकथानकश्रवणाय कपटनिद्रया सुप्तः । दासी प्राह-स्वामिनि ! कथानकरहस्यं वद । राज्ञी प्राहैकहस्ते देवकुले चत्वारः करा यस्य स चतुष्करो देवो नारायणादिकस्तत्र स्थापित इत्यर्थः । एका कथा समाप्ता ।

अथ तृतीयदिनरात्रावपि राजा तथैव कपटनिद्रया सुप्तः, दासी पुनः कथामद्य कथयेति तामाह सा प्राह-विन्ध्याचले पर्वते कोऽपि रक्ताशोकद्रुमः प्रौढोऽस्ति, तस्य घनानि पत्राणि सन्ति, परं छाया नाभवत् । दासी प्राह-पत्रावृत्तस्य तस्य छाया कथं न जाता ? राज्ञी प्राहैतद्रहस्यं तव कल्यरात्रौ कथयिष्यामि । अद्याहं रतिश्रान्ता निद्रासुखमनुभविष्यामीत्युक्त्वा सुप्ता, दासी तु स्वगृहे गता । अपररात्रौ राजा भोगान् भुङ्क्त्वा तथैव रात्रौ सुप्तः, दासी प्राह-स्वामिनि ! कल्यसत्ककथारहस्यं कथनीयम् । राज्ञी प्राह-तस्य वृक्षस्य सूर्यातपतप्तस्य मूर्ध्नि छाया नास्ति, अध एव छायास्तीत्यर्थः । इति द्वितीया कथा ॥

---

१ दृष्टः-D.L. ॥

अथ पुनस्तथैव नृपे सुप्ते दासीपृष्टा राज्ञी कथामाह-क्वचिन्निवेशे कश्चिदुष्ट्रश्चरन् कदापि बम्बूलतरुं ददर्श, तदभिमुखां ग्रीवां कुर्वन्नप्राप्ततच्छाखः प्रकामं खिन्नस्तस्यैव बम्बूलतरोरुपर्युत्सर्गं कृतवान् । तदा दासी राज्ञीं पप्रच्छ । हे स्वामिनि ! कथमेतद् घटते ? स्वग्रीवया यो बम्बूलतरुं न प्राप्तस्तदुपरि कथमसावुत्सर्गं चकार ? राज्ञी प्राहाद्य निद्रा समायाति, नैवेतत्कथारहस्यं कथयिष्यामीत्युक्त्वा सुप्ता, कल्यदिनरात्रावपि तथैव नृपे सुप्ते दासीपृष्टा राज्ञी तत्कथारहस्यं प्राह स ऊष्ट्रः कूपमध्यस्थं बम्बूलतरुं ददर्शेति परमार्थः । इति तृतीया कथा ।

पुनस्तथैव नृपे सुप्ते दासीपृष्टा राज्ञी कथामाचख्यौ-कस्मिंश्चिन्नगरे काचित्कन्या भृशं रूपसौभाग्यवती अस्ति, तदर्थं तन्मातृपितृभ्यां त्रयो वरा आहूताः समायाताः, तदानीं फणिना दष्टा सा कन्या मृता । तया समं मोहादेको वरस्तच्चितां प्रविष्टो भस्मसात्बभूव । द्वितीय-स्तद्भस्मपिण्डदाता तद्भस्मोपरि वासं चकार । तृतीयस्तु सुरमाराध्यामृतं प्राप । तदमृतेन च तच्चिता सिक्ता, कन्यां प्रथमं वरं च सद्योऽजीवयत्, कन्याप्युत्थिता तांस्त्रीन् वरान् ददर्श । राज्ञी दासीं प्राह-हे सखि ! ब्रूहि, तस्याः कन्यायाः को वरो युक्तः ? दासी प्राहाहं न वेद्मि, त्वमेव ब्रूहि । राज्ञी प्राहाद्य निद्रा समायातीत्युक्त्वा सुप्ता । द्वितीयदिनरात्रौ दासीपृष्टा सावदत्, यस्तस्याः सञ्जीवकः स पिता, यः सहोद्भूतः स बन्धुः, यो भस्मपिण्डदाता स तत्पतिरिति चतुर्थी कथा ।

तथैव रात्रौ नृपे सुप्ते दासीपृष्टा राज्ञी प्राह-कश्चिन्नृपः स्वपत्न्यै दिव्यमलङ्कारं सुगुप्तभूमिगृहे रत्नालोकात्सुवर्णकारैरजीघटत् । तत्रैकः स्वर्णकारः सन्ध्यां पतितां ज्ञातवान् । राज्ञी प्राह-हे सखि ! तेन कथं रत्नालोकसहिते सुगुप्तभूमिगृहे यामिनीमुखं ज्ञातम् ? दासी प्राह-नाहं वेद्मि, त्वमेव ब्रूहि ? राज्ञी प्राहाद्य साम्प्रतं निद्रा समायातीत्युक्त्वा सुप्ता । द्वितीयदिनरात्रौ दासीपृष्टा राज्ञी प्राह-स सुवर्णकारो रात्र्यन्धोऽस्तीति परमार्थः । इति पञ्चमी कथा ।

पुनरेकदा रात्रौ नृपे सुप्ते दासीपृष्टा राज्ञी प्राह-केनापि राज्ञा द्वौ मलिम्लुचौ निश्छिद्रपेटायां क्षिप्त्वा समुद्रमध्ये प्रवाहितौ, क्वापि तटे सा पेटी लग्ना, केनचिन्नरेण गृहीता, उद्घाट्य तौ दृष्ट्वा पृष्टौ-भो युवयोरत्र क्षिप्तयोरद्य कतमो दिवसोऽयं ? तयोर्मध्ये एकः प्राहाद्य चतुर्थो दिवसः, राज्ञी प्राह-हे सखि ! तेन चतुर्थो दिवसो कथं ज्ञातः ? दासी प्राहाहं न वेद्मि, त्वमेव ब्रूहि । राज्ञी त्वद्यसाम्प्रतं निद्रा समायातीत्युक्त्वा सुप्ता । द्वितीयदिनरात्रौ दासीपृष्टा राज्ञी प्राह-स चतुर्थदिनवक्ता पुरुषस्तुर्यज्वरी वर्तते, इति परमार्थः । इति षष्ठी कथा ।

पुनरन्यदा दासीपृष्टा रात्रौ सा राज्ञी कथामाचख्यौ । काचित्स्त्री सपत्नीहरणभयेन निजाङ्गभूषणानि पेटायां निक्षिप्य मुद्रां च दत्वाऽलोकभूमौ मुमोच । अन्यदा सा स्त्री सखिनिवासे गता, सपत्नी च विजनं विलोक्य तां पेटामुद्घाट्यानेकाभरणश्रेणिमध्यादेकं हारं निष्कास्य तनयायै ददौ, तनया च स्वपतिगृहे तं सुगुप्तं चकार । कियत्कालानन्तरं सा स्त्री तत्रायाता, तां पेटां दूरादवलोक्यैवं ज्ञातवती यदस्याः पेटाया मध्यान्मम हारोऽनयापहृत इति, सा स्त्री तां सपत्नीं चौर्येण दूषयामास, सपत्नी शपथान् करोति, हारापहारं न मन्यते,

तदा सा स्त्री तां सपत्नीं दुष्टदेवपादस्पर्शशपथायाकर्षितवती, तदानीं भयभ्रान्ता सपत्नी तं हारं तनयागृहादानीय तस्यै ददौ । दासी प्राह हे स्वामिनि ! तया कथं ज्ञातो हारापहारः ? राज्ञी प्राह कल्यरात्रौ कथयिष्यामीत्युक्त्वा सा सुप्ता । द्वितीयदिनरात्रौ पुनस्तया पृष्टा राज्ञी प्राह-सा पेटा स्वच्छकाचमय्यस्तीति परमार्थः । इति सप्तमी कथा ।

पुनरपि दासीपृष्टा तयोक्तं-कस्यचिद्राज्ञः कन्या केनापि खेटेनापहृता, तस्य राज्ञश्चत्वारः पुरुषाः सन्ति । एको निमित्तवेदी, द्वितीयो रथकृत्, तृतीयः सहस्रयोधा, चतुर्थो वैद्यः । तत्र निमित्तवेदी दिशं विवेद, रथकृद्दिव्यं रथं चकार, खगामिनं तं रथमारुह्य सहस्रयोधी वैद्यश्च विद्याधरपुरे गतौ, सहस्रयोधी तु तं खेटं हतवान्, हन्यमानेन खेटेन कन्याशिरश्छिन्नम् तदैव तेन वैद्येन शिर औषधेन संयोजितम् । राजा तु पश्चादागतेभ्य एभ्यश्चतुर्भ्यस्तां सुतां ददौ । कन्या प्राहैषु मध्ये यः मया सह चिताप्रवेशं करिष्यति तमहं वरिष्यामीति प्रोच्य सा कन्या सुरङ्गद्वारि रचितायां चितायां प्रविष्टा, यस्तया सह तत्र प्रविष्टः स तां कन्यामूढवान् । दासी प्राह-हे स्वामिनि ! चतुर्षु मध्ये कोऽत्र प्रविष्टः ? राज्ञी प्राहाद्य रतिश्रमार्त्ताया मे निद्रा समायातीत्युक्त्वा सुप्ता । द्वितीयवासररात्रौ पुनर्दासीपृष्टा राज्ञी प्राह-निमित्तवेदी इयं न मरिष्यतीति मत्वा चितां प्रविष्टस्तामूढवानिति परमार्थः । इत्यष्टमी कथा ।

पुनरपि रात्रौ पृष्टा राज्ञी कथां प्राह-जयपुरे नगरे सुन्दरनामा राजास्ति, सोऽन्यदा विपरीताश्वैनैकस्यामटव्यां नीतः, ततो वल्गां शिथिलीकृत्याश्वात्स [1]राजोत्तीर्णस्तमश्वं क्वचित्तरौ बद्ध्वा स्वयमितस्ततो भ्रमन् कस्मिंश्चित्सरसि जलं पपौ, तत्रैकां सुरूपां तापसपुत्रीं ददर्श, तापसपुत्र्याहूतः स तापसाश्रमं प्राप, तत्र तापसास्तस्य भृशं सत्कारं चक्रुः । सा कन्या तापसैस्तस्मै दत्ता, राज्ञा च परिणीता, तां नवोढां कन्यां गृहीत्वा तमेवाश्वमधिरुह्य पश्चाद्वलितः । अन्तरालमार्गे क्वचित्सरःपाल्यां राजा सुप्तो जाग्रन्नेवास्ति,राज्ञी तु सुप्ता निद्राणा च । अथ केनापि राक्षसेन तत्रागत्य नृपस्यैवं कथितं षण्मासान् यावद् बुभुक्षितोऽहमद्य त्वां भक्ष्यं प्राप्य तृप्तो भविष्यामि, अन्यथा मद्वाञ्छितं देहि, राज्ञोक्तं ब्रूहि स्ववाञ्छितं ? तेनोक्तं कश्चिदष्टादशवर्षीयो ब्राह्मणः पुत्रः शिरसि पितृदत्तपदस्त्वया खड्गेन हतः सप्तदिनमध्ये चेद् बलिर्दीयते तदाहं त्वां मुञ्चामि, नान्यथेति । राज्ञा तत्प्रतिपन्नम् ।

प्रभाते राजा ततश्चलितः कुशलेन स्वपुरे गतः, सैनिकाः सर्वेऽपि मिलिताः, राज्ञा स्वमन्त्रिणे राक्षसवृत्तान्तः कथितः, मन्त्रिणा सुवर्णपुरुषो निर्माय पटहवादनपूर्वं नगरे भ्रामितः, एवं चोद्घोषितं यो ब्राह्मणपुत्रो राक्षसस्य जीवितदानेन नृपजीवितदानं दत्ते तस्य पित्रोरयं सुवर्णपुरुषो दीयते । इयमुद्घोषणा षड्दिनानि यावत्तत्र जाता, सप्तमदिने एकः प्राज्ञो ब्राह्मणपुत्रस्तां निर्घोषणां श्रुत्वैवं मातापितरावबोधयत् । प्राणा गत्वराः सन्ति, मातापित्रोश्चेद्रक्षां प्राणैः क्रियते तदा वरम् । तेनाहं नृपजीवितरक्षार्थं स्वजीवितं राक्षसाय

---

१ राजोत्तीर्य-D.L. ॥

दत्वा सुवर्णपुरुषं दापयामि । एवं वारंवारमाग्रहेण पित्रोरनुमतिं गृहित्वा राजसमीपे गतः, राज्ञा तु तत्पितुः पादौ शिरसि दापयित्वा स्वयमाकर्षितखड्गेन पृष्टो भूत्वा राक्षसस्य समीपं स नीतः ।

यावता राक्षसो दृष्टस्तावता नृपेणोक्तः-भो ब्राह्मणपुत्र ! इष्टं स्मर एवं नृपेणोक्तः स ब्राह्मणपुत्र इतस्ततो नेत्रे निक्षिपन् जहास, तदा राक्षसस्तुष्टः प्राह यदिष्टं तन्मार्गय । स प्राह यदि त्वं तुष्टस्तदा हिंसां त्यज । जिनोदितं दयाधर्मं कुरु । राक्षसेनापि तद्वचसा दयाधर्मः [1]प्रपन्नः, राजादयोऽपि तं दारकं प्रशंसितवन्तः । अथ दासी प्राह-हे राज्ञि ! तस्य ब्राह्मणपुत्रस्य को हास्यहेतुः ? तयोक्तं साम्प्रतं मे निद्रा समायातीत्युक्त्वा सा सुप्ता । द्वितीयदिने दासीपृष्टा सा राज्ञी प्राह-हे हलेऽयं तस्य हास्यहेतुः-नृणां हि माता पिता नृपः शरणम्, ते त्रयोऽपि मत्पार्श्वस्थाः, अहं पुनः [2]कस्य शरणं श्रयामीति तस्य हास्यमुत्पन्नमिति परमार्थः । इति नवमी कथा ।

एवं सा चित्रकरसुता कथाभिर्मुहुर्मुहुर्मोहयन्ती राजानं वशीचकार । राजा तु तस्यामेवासक्तोऽन्यासां राज्ञीनां नामापि न जग्राह । ततस्तस्याश्छिद्राणि पश्यन्त्यः सर्वा अपि सपत्न्यः परमं द्वेषं वहन्ति, चित्रकरसुता तु निरन्तरं मध्याह्ने रहस्येकाकिनी कपाटयुगलं दत्त्वा गृहान्तः प्रविश्य पूर्ववस्त्राणि प्रावृत्यात्मानमेवं निनिन्द । हे आत्मंस्तवायं पूर्ववेषः, साम्प्रतं राजप्रसादादुत्तमामवस्थां प्राप्य गर्वं मा कुर्याः । एवमात्मनः शिक्षां ददतीं तां दृष्ट्वा सपत्न्यो राजानमेवं विज्ञपयामासुः-हे स्वामिन्नेषा क्षुद्रा तवानिशं कार्मणं कुरुते, यद्यस्माकं वचनं न मन्यसे तदा मध्याह्ने स्वयं तद्गृहे गत्वा तस्याः स्वरूपं विलोकयेति । अथ भूपतिस्तासां वाक्यं निशम्य मध्याह्ने तस्या गृहे गतः, सा तु तथैव पूर्वनेपथ्यं परिधायात्मनः शिक्षां ददती भूपतिना दृष्टा, सर्वाण्यपि तद्वचांसि श्रुतानि, तस्या निर्गर्वतां ज्ञात्वा परमं प्रमोदमवाप । स इमां पट्टराज्ञीं चकार, इयं च विशेषान्मनोविनोदं चकार । अन्यदा तन्नगरोद्याने विमलाचार्यः समायातः । राज्ञ्या सह नृपस्तद्वन्दनाय तत्र गतः, नगरलोकोऽपि तद्वन्दनार्थं गतः, तदा विमलाचार्यो देशनां चकार । चित्रकरसुता नृपश्च द्वावपि प्रतिबुद्धौ । श्रावकधर्मं गृहीतवन्तौ, परस्परमनाबाधया त्रिवर्गसाधनं कुरुतः । अन्येद्युस्तया दत्तपञ्चपरमेष्ठिनमस्कारः स पिता मृतो व्यन्तरो जातः । कालान्तरेणार्हन्तं धर्ममाराध्य चित्रकरसुता राज्ञी मृता देवीत्वं प्राप ।

ततश्च्युत्वा वैताढ्ये पर्वते तोरणाभिधे पुरे दृढशक्तिखेचरस्य पुत्री कनकमाला बभूव । प्राप्तयौवनां तामेकदा वीक्ष्य कन्दर्पतप्तो वासवनामा कश्चित् खेचरोऽपहृत्य तामत्र महाद्रौ मुक्त्वा स्वचित्ते प्रमोदं बभार । अत्र विद्याबलात्समग्रां सामग्रीं विधाय स वासवविद्याधरो यावद्गन्धर्वोद्वाहाय समुत्सुकोऽभवत्तावत्कनकमालाग्रजः स्वर्णतेजस्तदनुपदिकस्तत्रायातो वासवं विद्याधरम्[3]धिक्षिप्तवान् । तौ द्वावपि कोपाद् घोरं युद्धं कुर्वाणौ परस्परप्रहारात्तौ मृतौ । कनकमाला तु भृशं भ्रातृशोकं चकार । तदानीं कश्चिद्देवस्तत्रागत्य कनकमाला

१ प्रतिपन्नः-मु. ॥ २ कमन्यं-D.L.॥ ३ निर्भत्सना करी ॥

प्रत्येवमवदत् - हे पुत्रि ! भ्रातृशोकं मुञ्च, चित्तं स्वस्थं कुरु, ईदृश एव संसारोऽस्ति, त्वं मम पूर्वभवे पुत्र्यभूः, तिष्ठ त्वमत्रैव गिरौ, अत्र स्थितायास्तव सर्वं भव्यं भविष्यति ।

एवं देववचनमाकर्ण्य कनकमाला चिन्तयामास कोऽसौ देवः ? कथमस्याहं पुत्री ? असौ मयि स्निह्यति, अहमप्यस्मिन् स्निह्यामि, यावदेवं कनकमाला चिन्तयति तावत्तज्जनको विद्याधरेन्द्रो दृढशक्तिनामा धावन् तत्रायातः, स्वपुत्रं स्वर्णतेजसं, विरोधिनं वासवविद्याधरं च मृतं दृष्ट्वा, छिन्नमस्तकां च तां पुत्रीं दृष्ट्वैवं विचारयामास अयं सुत इयं सुतायं शत्रुस्त्रयोऽप्यमीदृगवस्थां प्राप्ताः, स्वप्नोपमं जगत्सर्वं दृश्यते । एवं ध्यायतस्तस्य दृढशक्तिविद्याधरस्य जातिस्मरणमुत्पन्नम्, असौ शासनदेवीप्रदत्तवेषश्चारणश्रमणो यतिरभूत् । अथ स व्यन्तरस्तया पुत्र्या सह तं श्रमणं ननाम । जीवन्तीं तां पुत्रीं वीक्ष्य स चारणश्रमणस्तं व्यन्तरं नमन्तमपृच्छत् किमिदमिन्द्रजालं मया द्रष्टुं ? व्यन्तरः प्राह-तव पुत्र-शत्रू मिथो वियुध्य मृतौ, इयं च कन्या जीवन्त्यपि मृता तव दर्शिता । मुनिः प्राह-कथं त्वया माया कृता ? स व्यन्तरः स्मृत्वैवमाह-हे मुनिनायक ! एतत् शृणु । क्षितिप्रतिष्ठ-नृपतेर्जितशत्रोरियं प्राग्भवे पत्न्यभवत् । चित्राङ्गदनाम्नश्चित्रकृतो ममैषा पुत्र्यभवत्, एतया प्राग्भवेऽन्त्यसमये मम नमस्कारा दत्ताः । तत्प्रभावादहं व्यन्तरो जातः, एषापि मृता देवी जाता, देवीत्वमनुभूय तव सुतात्र भवे जाता, तेन विद्याधरेणापहृत्यात्र चैत्ये मुक्ता, वासवाख्यखेचरेणावासं कृत्वा विवाहसामग्रीं मेलयित्वा विवाहः कर्तुमारब्धः । ततश्च कनकतेजनामा वृद्धभ्राता समायातः । ततो द्वौ क्रुद्धौ दुर्धर्षयुद्धेऽन्योन्यशस्त्रघातेन मरणमापतुः, असावपि भ्रातृशुचार्दिता स्थिता ।

अन्येद्युर्यात्रार्थमायातेन मया सा दृष्टा, एतस्या बन्धौ चौरे च मृते यावदिमामहमाश्वासयामि तावद्भवन्तोऽत्र प्राप्ताः । मया विमृष्टमियमनेन जनकेन समं मा यात्विति मयैतस्या गोपनमाया विहिता, यत्तव निराशत्वं मया तदानीं कृतं तत्क्षन्तव्यम् । मुनिरूचेऽहो-व्यन्तर ! या त्वया तदा माया कृता सा मम भवहारिणी जाता, तेन मम भवतोपकृतम् न किमप्यपराद्धम् । एवमुक्त्वा स मुनिर्धर्माशिषं दत्वान्यत्र विजहार । अथ प्राग्भववृत्तान्तं श्रुत्वा सा कन्या जातिस्मृतिभागभूत् । तदा प्राग्जन्मजनकं तं व्यन्तरमाह-हे तात ! तं पूर्वभवपतिं मे मेलय । व्यन्तरः प्राह-स ते प्राग्भवभर्ता जितशत्रुनृपतिर्देवीभूय च्युतः साम्प्रतं सिंहरथो नाम राजा जातोऽस्ति, स गन्धारदेशे पुण्ड्रवर्धननगरादश्वापहृतोऽत्र समायास्यति, स हि त्वामत्रैव सकलसामग्र्या परिणेष्यति, यावत्स इहाभ्येति तावत्त्वमत्रैव तिष्ठेत्युक्त्वा स व्यन्तरः सुराचले शाश्वतजिनबिम्बानि नन्तुं गतवान् ।

इमं सर्ववृत्तान्तं कथयित्वा सा कन्या राजानं प्रत्याह हे स्वामिंस्त्वमत्र मद्भाग्याकर्षितः समायातः । सिंहरथराजापीमां पूर्वभवकथां श्रुत्वा पूर्वभवस्वरूपं तं च व्यन्तरमस्मरत् । तेन स्मृतः स व्यन्तरः पुनस्तत्रागात्, दिव्यवादित्रनिर्घोषं कृतवान्, मध्याह्ने जिनबिम्बान्यभ्यर्च्य नृपो भुङ्क्तः । ततस्तेन व्यन्तरेण पूरिताशेषवाञ्छितोऽसौ नृपतिस्तत्र मासमेकं स्थितवान् । चिरकालेन स्वराज्यानिष्टशङ्की राजा तां दयितां प्रतीदमाह-प्रिये ! प्रबलो वैरिव्रजो मे राज्यमुपद्रोष्यति ततोऽहं स्वपुरं यामि ।

दयिता जगाद-यदि राज्यं मोक्तुं न शक्यते तदा व्योमगमनसाधिकां प्रज्ञप्तिविद्यां मन्मुखाद् गृहाण, यतस्तव व्योमगतिर्यथासुखं स्यात् । प्रदत्तां तां विद्यामासाद्य सिंहरथो राजा विद्याधराग्रणीर्बभूव । प्राग्भवप्रेमसम्पूर्णां तां प्रियामापृच्छ्य स राजा स्वपुरे व्योममार्गेण समायातः । तत्र पुरे कियद्दिनानि स्थित्वा सिंहरथो नृपतिस्तं पर्वतं पुनर्गतः । एवं स्वनगरान्नस्मिन्नगे नित्यं गतागतिं कुर्वन्नृपतिः सिंहरथो लोकान्नगातिरिति नाम प्राप ।

अन्यदा तत्र नगे तं भूपं स व्यन्तर एवमाह-अहं मत्स्वामिनिर्देशाद्देशान्तरं गमिष्यामि । त्वं मत्पुत्रीं स्वनगरे नीत्वेमं नगं शून्यं मा कार्षीः । एवमुक्त्वा स व्यन्तरः स्थानान्तरमगात्, नृपस्तन्नगे महन्नगरं व्यधात्, नगातिपुरमिति नाम कृतवान् । तत्रस्थो राजा तया राज्ञ्या सह भोगान् भुञ्जानः स सुखेन कालं निर्गमयति । तत्र राज्यं पालयतस्तस्य बहुतरः कालो ययौ ।

अन्यदा नगातिनृपः पुरपरिसरे वसन्तोत्सवं द्रष्टुं जगाम । मार्गे मञ्जरीपुञ्जमञ्जुलमाम्रवृक्षमद्राक्षीत् । तत एकां मञ्जरीं नृपतिर्लीलया स्वकरेण जग्राह, गतानुगतिका लोका अपि तस्य मञ्जरीफलपत्रादिकं जगृहुः । भूमिपालः क्रीडां कृत्वा ततः पश्चाद्वलितस्तमाम्रवृक्षं काष्ठशेषमालोक्यैवं चिन्तितवान्, अयमाम्रवृक्षो नेत्रप्रीतिकरो यो मया पूर्वमागच्छता दृष्टः, सोऽयं काष्ठशेषो विगतशोभः साम्प्रतं दृश्यते । यथायं तथा सर्वोऽपि जीवः कुटुम्ब-धन-धान्य-देहादिसौन्दर्यभ्रष्टो नैव शोभां प्राप्नोति । एतच्च सर्वं विनश्वरं यावन्न क्षीयते तावत्संयमे यत्नः कार्यः । इति चिन्तयन्नगातिः प्रतिबुद्धो जातः, शासनदेवीप्रदत्तवेषः संयममाददे । अन्यदा ते करकण्डु-द्विमुख-नमि-नगातिराजानश्चत्वारोऽपि प्रत्येकबुद्धाः संयमिनो विहरन्तोऽन्येद्युः क्षोणीप्रतिष्ठनगरे प्राप्ताः । तत्र चतुर्मुखे देवकुले क्रमतः पूर्वाद्येषु चतुर्दिग्द्वारेषु युगपत्प्रविष्टाः, तेषामादरकरणार्थं चतुर्मुखो यक्षः समन्तात्सन्मुखोऽभवत् ।

तदानीं करकण्डुमुनिः स्वदेहकण्डुरोगोपशमनाय कर्णधृतां शलाकां गोपयन् द्विमुखेन संयमिनोक्तः पुरमन्तःपुरं, राज्यं, देशं च विमुच्य पुनस्त्वं किं सञ्चयं कुरुषे ? करकण्डु-मुनिर्यावत्तं प्रति वक्ति तावन्नमिराजर्षिणा द्विमुखं प्रत्येवमुक्तं सर्वाणि राज्यकार्याणि मुक्त्वा पुनस्त्वया किमिदं शिक्षारूपं कार्यं कर्तुमारब्धम् ? यावद् द्विमुखो मुनिर्नमिराजर्षिं प्रत्युत्तरं दत्ते तावन्नगातिराजर्षिरेवमुवाच, यदा राज्यं परित्यज्य भवान् मुक्तावुत्सहते तदान्यं किमप्याख्यातुं नार्हति । अथ करकण्डुमुनिस्तान् त्रीन् प्रत्येवमुवाच साधुषु साधुहितं वदन्न दूष्यो भवति, कण्डूपशमनाय कर्णधृतोऽपि शलाकासञ्चयोऽयुक्त एव, परमसहता मया धृतोऽस्तीति । एवं चत्वारोऽपि परस्परं सम्बुद्धाः सत्यवादिनः सर्वथा संयमाराधकाः केवलज्ञानमासाद्य शिवं जग्मुः । अत्र नमिप्रसङ्गात्प्रत्येकबुद्धचतुष्टयकथा कथिता ।

॥ इति नमिप्रव्रज्याख्यं नवममध्ययनं सम्पूर्णम् ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यश्रीलक्ष्मीवल्लभगणि-विरचितायां नमिप्रव्रज्याख्यनवमाध्ययनस्यार्थः सम्पूर्णः ॥

॥ अथ दशमं द्रुमपत्रकाख्यमध्ययनं प्रारभ्यते ॥

नवमेऽध्ययने चारित्रविषये निष्कम्पत्वमुक्तम्, तन्निष्कम्पत्वं शिक्षात एव भवति। ततो दशमेऽध्ययने शिक्षां वदति, इति नवम-दशमाध्ययनयोः सम्बन्धः। दशममध्ययनं श्रीगौतममुद्दिश्य श्रीवीरेणाभिहितमिति गौतमवक्तव्यता तावदुच्यते-

पृष्ठिचम्पा नाम्नी नगरी, तत्र शालनामा राजा, महाशालनामा युवराजा, तयोर्भगिनी यशोमती, तस्याः पिठरनामा भर्त्तास्ति, यशोमतीकुक्षिसम्भूतः पिठरपुत्रो गाङ्गलिनामा वर्तते। अन्यदा भगवान् श्रीमहावीरस्तत्र समवसृतः। शालराजा महाशालादिपरिवृतस्तत्रागतो भगवन्तं वन्दित्वाग्रे धरणीतलोपविष्टः श्रीमहावीरकृतामिमां देशनामश्रृणोत्-मानुष्यादिका धर्मसाधनसामग्री दुर्लभास्ति, मिथ्यात्वादयो धर्मप्रतिबन्धहेतवो बहवो वर्तन्ते। महारम्भादीनि नरककारणानि सन्ति। जन्मादिदुःखप्रचुरः संसारोऽस्ति, कषायाः संसारपरिभ्रमणहेतवः सन्ति, कषायपरित्यागे च मोक्षप्राप्तिरिति भगवद्देशनां श्रुत्वा संवेगमुपागतः शालराजा जिनेन्द्रं प्रत्येवमुवाच, भगवच्चरणमूलेऽहं तपस्यामादास्ये, परं महाशालं यावद्राज्ये स्थापयामि तावत् श्रीभगवद्भिरन्यत्र विहारो न कार्यः।

भगवतोक्तं प्रतिबन्धं मा कार्षीरिति शालराजा गृहे गत्वा महाशालं भ्रातरं प्रत्येवमाह-बन्धो ! त्वं राज्यं पालय, अहं व्रतं गृह्णामि। महाशाल उवाच-भवद्वदहं संविग्नोऽस्मि। अलं महारम्भहेतुना राज्येन, ममापि प्रव्रज्याग्रहणमनोरथोऽस्ति। तदा शालराज्ञा भगिनीपुत्रो गाङ्गलिः स्वराज्येऽभिषिक्तः, शालमहाशालौ द्वावपि प्रव्रजितौ भगिनी श्रमणोपासिका जाता। भगवांस्ततो विहारं चकार। शाल-महाशालमुनी एकादशाङ्गान्यधीतौ, अन्यदा भगवान् राजगृहे समवसृतः। तत्रानेकभव्यान् प्रतिबोध्य स्वामी चम्पायां गतः। तत्र शाल-महाशालौ स्वामिनं प्रत्येवमूचतुर्यदि [1]भवदाज्ञा स्यात्तदा वयं पृष्ठिचम्पायां व्रजामः। यदि कश्चित्तत्र प्रतिबुद्ध्यते सम्यक्त्वं वा लभते तदास्माकं महान् लाभो भवतीति। स्वामिना तदा तयोर्गौतमः सार्थे दत्तः। गौतमस्वामी ताभ्यां सह पृष्ठिचम्पायां गतः। तत्र गाङ्गलिराजा पिता-मातृभ्यां पिठर-यशोमतीभ्यां सह वन्दितुमायातः। समागतायां पर्षद्येवं देशनां चकार-

भो भव्य सत्त्वाः ! विषयप्रसक्ता मा तिष्ठत। अनेकदुःखदारुणे संसारे प्रतिबन्धं मा कुरुत। कष्टेन मनुष्यादिसामग्री प्राप्तास्ति, सन्ध्याभ्रारागसदृशो यौवनादिप्रपञ्चोऽस्ति, क्षणदृष्टो नष्टः सकलसंयोगोऽस्ति, जलबिन्दुचञ्चलं जीवितमस्ति। ततो जिनधर्मे प्रकाममुद्यमं कुरुत। तथाकृतेऽचिरेण शाश्वतपदप्राप्तिर्भवतां भवतीति गौतमदेशनां श्रुत्वा गाङ्गलिः प्रतिबुद्धो भणति। भगवन्नहं भवदन्तिके प्रव्रज्यां गृहिष्ये। नवरं माता-पितरौ पृच्छामि, ज्येष्ठपुत्रं च राज्ये स्थापयामि। एवमुक्त्वा गृहे गत्वा माता-पितरौ पृष्ठौ, ताभ्यामुक्तं यदि त्वं प्रव्रजिष्यसि तदा वयमपि प्रव्रजिष्यामः। ततः पुत्रं राज्ये स्थापयित्वा गाङ्गलिराजा स्वमातृपितृभ्यां सह प्रव्रजितः।

---

१ भगवदां°-L.D. ॥

गौतमस्वामी तैः शिष्यैः सह पश्चाद्वलितः, मार्गे शाल-महाशालयोः शुभाध्यवसायेन केवलज्ञानमुत्पन्नम् । पुनरग्रे गच्छतां गाङ्गलिप्रमुखाणां त्रयाणामपि तथैव शुभध्यानेन केवलज्ञानमुत्पन्नम् । एवं सर्वेऽपि ते गौतमसहिताश्चम्पायां गताः । गौतमस्वामिना भगवच्चरणौ प्रणतौ, शालमहाशालादिकेवलिनो भगवतः प्रदक्षिणां कृत्वा तीर्थं प्रणम्य केवलपर्षदभिमुखं चलिताः । तावदुत्थितो गौतमस्तान् प्रत्येवं भणति-भोः शिष्याः क्व व्रजत ? वन्दत तीर्थङ्करं । तावता भगवान् प्राह-गौतम ! केवलिनो माशातयेति भगवद्वचसा गौतमस्तान् क्षामयति । मनस्येवं चिन्तयति, अहं न सेत्स्यामि किं ? मदीयाः शिष्याः [1]केवलमासादयन्ति, अद्य यावन्मया केवलज्ञानं नाप्तम् ।

अस्मिन्नवसरे मिथो देवानामेवं संलापो वर्तते-अद्य भगवता व्याख्यानावसरे एवमादिष्टम्-यो भूमिचरः स्वलब्ध्याष्टापदादौ चैत्यादि वन्दते स तत्रैव भवे सिद्धिं यातीति श्रुत्वा गौतमः स्वामिनं पृच्छति-हे भगवन्नहमष्टापदे चैत्यानि वन्दितुं यामीति ? भगवतोक्तं व्रजाष्टापदे । तत्र चैत्यानि वन्दस्व । ततो हृष्टो गौतमो भगवच्चरणौ वन्दित्वा तत्र गतः, पूर्वं हि तत्राष्टापदे तादृग्जनसंवादं श्रुत्वा पञ्चपञ्चशतपरिवारास्त्रयः कोडिन्न-दिन्न-सेवालाख्यास्तापसा गताः सन्ति तेषु कोडिन्नस्तापसः सपरिवार एकान्तरोपवासेन भुङ्क्ते, पारणे मूलकन्दान्याहारयति, सोऽष्टापदे प्रथममेखलामारूढोऽस्ति । द्वितीयो दिन्नतापसः सपरिवारः प्रत्यहं षष्ठषष्ठपारणके परिशटितानि पर्णानि भुङ्क्ते, स द्वितीयमेखलामारूढोऽस्ति । तृतीयः सेवालतापसः सपरिवारो निरन्तरमष्टमपारणके सेवालं भुङ्क्ते, स तृतीयमेखलामारूढोऽस्ति ।

एवं तेषु क्लिश्यमानेषु गौतमः सूर्यकिरणावलम्बेन तत्रारोढुमारब्धः, ते तापसाश्चिन्तयन्त्येष स्थूलवपुः कथमत्राधिरोढुं शक्ष्यते ? वयं तपस्विनोऽप्यशक्ताः । एवं चिन्तयत्स्वेव तेषु पश्यत्सु स गौतमः क्षणादष्टापदपर्वतशिखरमधिरूढः, ते पुनरेवं चिन्तयन्ति यदासाववतरिष्यति तदास्य शिष्या वयं भविष्यामः । गौतमस्वामी प्रासादमध्ये प्राप्तो निजनिजवर्णपरिमाणोपेताश्चतुर्विंशतिजिनेन्द्राणां भरतकारिताः प्रतिमा ववन्दे । तासां चैवं स्तुतिं चकार-

[2]जगच्चिंतामणि जगनाह, जगगुरु जगरक्खण ।' इत्यादि स्तुतिं कृत्वा पूर्वदिग्भागे पृथिवीशिलापट्टकेऽशोकवरपादपस्याध एकरात्रौ पर्युषितः । इतश्च शक्रलोकपालो वैश्रमणस्तत्र चैत्यानि वन्दितुमायातः, प्रत्येकं चैत्यानि वन्दित्वाऽशोकतरोरधः समायातः । गौतमस्वामिनोऽग्रे वन्दित्वा निषण्णः, तस्याग्रे गौतम एवं धर्मं कथयति-धर्मार्थकामास्त्रयः पुरुषार्थाः तत्रार्थ-कामसाधकत्वेन धर्म एव प्रधानः, स च देवगुरुभक्तिरागेण भवति । देवः पुनः सर्वज्ञः सर्वदर्श्यष्टादशदोषरहितो भवति । गुरवः सुसाधवो भवन्ति, साधवः समशत्रुमित्राः समलोष्टुकाञ्चनाः पञ्चसमितास्त्रिगुप्ता अममा अमत्सरा जितेन्द्रिया जितकषाया निर्मलब्रह्मचर्यधराः स्वाध्यायध्यानशक्ता दुश्चरेण तपश्चरणान्त-प्रान्ताहाराः

---

१ केवलज्ञानमा°-मु. ॥ २ जगचिन्तामणिर्जगनाथो, जगगुरुर्जगरक्षणः ॥

शुष्कमांस-रुधिराः कृशशरीरा भवन्ति। इमां गौतमक्रियमाणां देशनां श्रुत्वा वैश्रमणमनस्येवं विसंवादो जातोऽहो एतेषां विशेषपुष्टिद्युतिधरं शरीरम्, यतिवर्णनं चेदृशमिति वैश्रमण-मनोवितर्कं ज्ञात्वा गौतमस्तदा पुण्डरीकाध्ययनं प्ररूपितवान्। तथा च -

पुष्कलावतीविजये पुण्डरीकिण्यां नगर्यां महापद्मराजाभवत्, तस्य पद्मावती राज्ञी बभूव, तस्याः कुक्षिसम्भूतौ पुण्डरीक-कण्डरीकनामानौ पुत्रौ जातौ। पितर्युपरते पुण्डरिको राजा जातः, कण्डरीको युवराजा जातः। अन्यदा तत्र स्थविराः साधवः समायाताः, स्थिता नलिनीवनोद्याने, कण्डरीकसहितो पुण्डरीकस्तत्र गतो वन्दित्वाग्रे निषण्णस्तेषां [1]देशनां शुश्राव, पुण्डरीकः श्रावकधर्मं प्रपन्नवान्, कण्डरीकः प्रबुद्धस्तान् प्रत्येवं जगाद-अहं भवन्निकटे प्रव्रज्यां गृहीष्ये। नवरं पुण्डरीकराजानं प्रति पृच्छामीत्युक्त्वा पुण्डरीकं प्रत्यहं प्रव्रजामीत्युक्तवान्, पुण्डरीकोऽप्याह इदानीं त्वं मा प्रव्रज्यां गृहाण, तवाद्य राज्याभिषेकं करोमि, त्वं निश्चिन्तः सन् राज्यं पालय। यथेष्टं सुखं भज। कण्डरीको नैतदङ्गीकुरुते, पुनः प्रव्रज्याग्रहमेव कुरुते, यावदसौ राज्यादिलोभेन गृहे स्थापयितुं पुण्डरीकेण न शक्यते, तावत्संयमकष्टं पुण्डरीकोऽस्य दर्शयति-अयं संयमः सत्यः दुर्व्वहदुःखक्षयंकरः, परं वालुका-स्वादसदृशः, गङ्गाप्रमुखमहानदीप्रवाहसन्मुखगमनवद् दुःसाध्यः, भुजाभ्यां समुद्रतरण-वत्कष्टानुष्ठेयः।

अत्र द्वाविंशतिपरीषहाः सोढव्याः। ततः सुकुमालशरीरेण भवता नायं संयमः परिपालयितुं शक्यः। तस्माद् गृह एव तिष्ठ। राज्यसुखं च भजेति पुण्डरीकेणोक्तः कण्डरीकः प्राह-कापुरुषाणां-परलोकपराङ्मुखाणामिहलोकविषयसुखतृष्णावतामयं संयमो दुष्पालोऽस्ति, अहं च विषयसुखपराङ्मुखः परलोकसम्मुखः शूरतरोऽस्मीति नाहं संयमाद्बिभेमीति वदन्तं कण्डरीकं पुण्डरीको राजा संयमग्रहणार्थमनुज्ञातवान्। पुण्डरीक-कारितमहामहःपूर्वकं कण्डरीकः संयमं गृहीतवान्; क्रमेण स्थविरान्तिके स एकादशाङ्गानि पपाठ। चतुर्थ-षष्ठा-ऽष्टमादितपांसि प्रत्यहं चकार। एकदा तस्य तपस्विनस्तपःपारणके तुच्छाहारैर्दाहज्वरादयो रोगाः प्रादुर्भूताः, तथाप्यसौ स्थविरैः समं विहारं चकार।

एकदा ते स्थविराः कण्डरीकेण समं विहरन्तः पुण्डरीकिण्यां नगर्यां समायाताः। नलिनीवने समवसृताः, पुण्डरीकराजा तेषां वन्दनाय तत्रायातः। स्थविराणां देशनां श्रुत्वा कण्डरीकमृषिं वन्दते। तद्वपुः सरोगं पश्यति। पुनः स्थविरान्तिके समागत्यैवमवादीद्यदि स्थविराणामाज्ञा स्यात्तदाहं कण्डरीकमुनेर्वपुषि प्रासुकौषधादिभिश्चिकित्सां कारयामि। यूयं मम यानशालायां तावत्कालं तिष्ठत। ततस्ते स्थविराः कण्डरीकेण समं यानशालायां गत्वा स्थिताः। ततः स पुण्डरीकराजा कण्डरीकस्य प्रासुकौषधैश्चिकित्सां कारयति। त्वरितमेव तस्य रोगोपशान्तिर्जाता। स्थविरास्ततो विहारं चक्रुः।

रोगातङ्कद्विप्रमुक्तोऽपि कण्डरीकमुनिर्मनोज्ञाहारादिमूर्च्छितस्ततो विहारं कर्तुं नेच्छति। कण्डरीकस्य तादृशं स्वरूपमाकर्ण्य पुण्डरीकराजा तदन्तिके समागत्यैवमाह धन्यस्त्वम्,

---

१ धर्मदेशनां-मु० ॥

कृतपुण्यस्त्वं सुलक्षणस्त्वम्, सुलब्धमनुष्यभवस्त्वम्, येन राज्यमन्तःपुरं च परिहृत्य संयममादृतवान्। एवं द्विर्वारं त्रिर्वारं वा पुण्डरीकेणोक्ते प्राप्तलज्जः पुण्डरीकराजानमापृच्छ्य कण्डरीकः स्थविरैः समं ततो विजहार। कियत्कालमुग्रविहारं कृत्वा पश्चात्संयमाद्विखिन्नः शनैः शनैः स्थविरान्तिकान्निर्गत्य पुण्डरीकिण्यां नगर्यामशोकवनिकायामशोकवरपादपस्याधः समागत्य शिलापट्टमारूढ उपहतमनः सङ्कल्पः किञ्चिद् ध्यायन्नेव तिष्ठति। ततः पुण्डरीकधात्री प्रसंगात्तत्रायाता, तं दृष्ट्वा पुण्डरीकाय न्यवेदयत्। पुण्डरीकोऽपि तत्रागत्य तं त्रिःप्रदक्षिणीकृत्य धन्यस्त्वमित्याद्युक्तवान्। कण्डरीकस्य तद्वचनं न रोचते, सर्वथा संयमाद्भ्रष्टं तं ज्ञात्वा पुण्डरीकः पुनरेवमुवाचाहो भ्रातस्ते यदि विषयार्थस्तदेदं राज्यं गृहाणेत्युक्त्वा तं राज्येऽभिषिक्तवान्। स्वयं तु पञ्चमौष्टिकं लोचं कृत्वा संयममुपात्तवान्। कण्डरीकसत्कं पात्रोपकरणादिकं च गृहीतवान्। स्थविराणामन्तिके प्रव्रज्यां गृहीत्वाहारं गृहीष्ये, नान्यथेत्यभिग्रहं कृत्वा स्थविराभिमुखमेकाक्येव चलितः।

कण्डरीकस्तु राजगृहान्तर्गत्वा तस्मिन्नेव दिने सरसमाहारं भुक्तवान्। रात्रौ च तस्य [1]तदाहारसारस्यात्कृशशरीरस्योदरे महाव्यथोत्पन्ना। न कोऽपि तस्याग्रे मन्त्रिसामन्तादिकश्चिकित्सार्थं समायाति। प्रव्रज्यापरित्यागादयोग्य इत्ययं सर्वैरपि लोकैरुपेक्षित आर्त्तरौद्रध्यानोपपन्नः कालं कृत्वा सप्तमनरकपृथिव्यां नारकत्वेनोत्पन्नः। पुण्डरीकस्तु स्थविरान्तिके गत्वा पुनर्दीक्षां गृहीतवान्। प्रथममष्टमं तपः कृतवान्। पारणे च शीतलरूक्षाहारेण वपुषि महावेदना समुत्पन्ना। ततस्तेनानशनं विहितम्। चत्वारि शरणानि कृतानि। आलोचितप्रतिक्रान्तः पुण्डरीकः कालं कृत्वा सर्वार्थसिद्धविमाने देवत्वेनोत्पन्नः। इममाख्यातं वैश्रमणाग्रे उक्त्वैवं पुनरुवाचाहो देवानुप्रिय! दुर्बलशरीरोऽपि कण्डरीकः सप्तमीं भूमिं गतवान्। सबलशरीरोऽपि पुण्डरीकः सर्वार्थसिद्धविमाने गतस्तस्माद् दुर्बलशरीरं संयमसाधनं सबलशरीरं तद्व्याघातकम्, एवं नियमो नास्ति। किन्तु ध्यानमेव तत्साधनम्, यस्य शुभध्यानं स संयमाराधकः। यस्य तु ध्यानमशुभं स संयमविराधकः।

एवं गौतमस्वामिव्याख्यानं श्रुत्वा वैश्रमणो वन्दित्वा स्वस्थानं गतः। गौतमः प्रभाते चैत्यानि नमस्कृत्याष्टापदात्प्रत्यवतरति स्म, तापसास्तदैवमाहुः- यूयमस्मद्गुरवो वयं भवच्छिष्या भवामः। गौतमस्वामी भणति-मम धर्माचार्यस्त्रिलोकगुरुर्वर्धमाननामास्ति। ते च भणन्ति-युष्माकमप्याचार्यो वर्तते किं? गौतमः प्राहेदृशो मम धर्माचार्यो वर्तते, यथा सर्वज्ञः, सर्वदर्शी, रूपसंपदा तिरस्कृतत्रिलोकरूपः, किङ्करीकृतसकलसुरासुरविरचितसमवसरणोपविष्ट उपरिधृतश्छत्रत्रयः सुरेन्द्रवीज्यमानचामरयुगलः, चतुस्त्रिंशदतिशयनिधानः श्रमणभगवान् श्रीमहावीरनामा वर्तते।

एवं वीतरागस्वरूपमाकर्ण्य तेषां तापसानां सम्यक्त्वोपचयः संपन्नः। ततः सर्वेऽपि तापसा गौतमस्वामिना प्रव्राजिताः। शासनदेव्या तेषां सर्वेषां लिङ्गान्युपनीतानि। तैः सर्वैः

---

१ तदाहारस्य रसात्-मु०। तदाहारसारात्-मु० १॥

शिष्यैः सह गौतमस्वामी ततश्चलितः कस्मिंश्चिद् ग्रामे गतः । भिक्षावेला जाता, गौतमेनोक्तं यद्भवतां रोचते तद्भक्तव्यम्, मया तदानीयते, तैरुक्तं पायसमानेयम्, सर्वलब्धिसम्पन्नो गौतमः क्वचिद् गृहे पतद्ग्रहं पायसेन भृतवान् । उपाश्रये आगत्य सर्वेषां तेषां मण्डल्यामुपवेशितानां पात्रेषु क्षीरं परिवेषितवान् । न च क्षीरं क्षीणं भवति । महानसिकलब्धिमता गौतमेन पतद्ग्रहेऽङ्गुष्ठक्षेपाज्जेमतामेव सेवालतापसानामीदृशः परिणामो जातोऽहोऽस्माकं शुभकर्मोदयो जातः । यतोऽनभ्रवृष्टिसदृशः समस्तशास्त्रार्णवपारगामीदृशो गुरुरस्माभिर्लब्धः । इत्यादि भावनां भावयतां तेषां तदैव केवलज्ञानमुत्पन्नम् ।

दिन्नतापसानां तु भोजनानन्तरं चलितानां भगवत्समीपे प्राप्तानां भगवतश्छत्रादिविभूतिं च पश्यतां तथाविधशुभाध्यवसाययोगेन केवलज्ञानमुत्पन्नम् । कोडिन्नतापसानां तु स्वामिनं साक्षाद् दृष्ट्वा तादृशाध्यवसायेनैव केवलज्ञानमुत्पन्नम् । गौतमस्वामी भगवच्चरणौ प्रणनाम, ते तापसमुनयः केवलिनस्त्रिःप्रदक्षिणीकृत्य केवलिपर्षदभिमुखं चलिताः । तदा गौतमस्वामी भणति-इहागच्छत । भगवन्तं प्रणमत । भगवान् महावीरः प्राह-गौतम ! केवलिनो माशातय । ततो गौतमस्तेषां मिथ्यादुष्कृतं ददौ । ततःपरं गौतमस्य महत्यधृतिर्जाता । ततो भगवान् महावीरो गौतमस्वामीनं प्रत्याह-गौतम ! पूर्वभवपरिचितत्वेन तव मयि महान् रागोऽस्तीति । तत्क्षयमन्तरेण तव केवलज्ञानं नोत्पद्यते, क्षीणे च अस्मिन्नेव भवे तवावश्यं केवलमुत्पत्स्यते, प्रशस्तोऽपि रागः केवलप्रतिबन्धको भवत्येव । त्वमहं च द्वावपि निर्वाणे तुल्यौ भविष्याव इति माऽधृतिं कार्षीरिति । तदानीं स्वामी महावीरो द्रुमपत्तयमध्ययनं प्ररूपितवान् । इदं चाध्ययनं सूत्रतोऽर्थतश्च भगवता श्रीमहावीरेणैव प्ररूपितमिति [1]श्रीमदुत्तराध्ययनबृहद्वृत्तौ । ततो ये वदन्त्युत्तराध्ययनसूत्रे वीरवाणीस्पर्शोऽपि नास्ति ते कुमतय एव बोधव्याः ।

दुमपत्तए पंडुयए जहा, निवडइ राइगणाण अच्चए ।
एवं मणुआणजीवियं, समयं गोयम मा पमायए ॥ १ ॥

भगवान् श्रीमहावीरदेवो गौतमस्वामिनमुद्दिश्यान्यानपि भव्यजीवानुपदिशति-हे गौतम ! एवमनेन दृष्टान्तेन मनुजानां - मनुष्याणां जीवितं जानीहि, त्वं समयं-समयमात्रमपि मा प्रमादीः - प्रमादं मा कुर्याः । अत्र समयमात्रग्रहणमत्यन्तप्रमादनिवारणार्थम्, अनेन केन दृष्टान्तेन ? तद् दृष्टान्तमाह-यथा रात्रिगणानामत्यये-गमने, रात्रीणां गणा रात्रिगणाः-कालपरिणामा रात्रिदिवससमूहास्तेषामत्ययेऽतिक्रमे पाण्डुरकं द्रुमपत्रकं पक्वं वृन्ताच्छिथिलीप्रायं पर्णं निपतति, तथैव दिनानामत्यये आयुर्लक्षणे वृन्ते-शिथिले जाते सति जीवितं -शरीरं पतति, जीवो जातो यस्मिंस्तज्जीवितं शरीरमित्यर्थः, जीवितशब्देन शरीरमुच्यते । यदाह निर्युक्तिकार :-

---

१ 'तन्नीसाए भयवं सीसाणं देइ अणुसिट्ठिं ।' इति उत्त० निर्युक्तिः गा. ३०६ ।
गौतमनिश्राया 'अनुशिष्टिं' शिक्षाम् । इत्यनेनाभिप्रायेण सूत्रतोऽर्थतश्च भगवतोक्तं इदमध्ययनमेवं उक्तमस्ति, एवमनुमेने ॥

[1]परियट्टियलावन्नं, चलंतसंधिं मुअंतं बिटग्गं ।
पत्तं च वसणपत्तं, [2]काले पत्ते भणइ गाहं ॥ १ ॥
जह तुब्भे तह अम्हे, तुब्भेवि अ होहिआ जहा अम्हे ।
अप्पाहेइ पडंतं, पंडुअपत्तं किसलयाणं ॥ २ ॥
नवि अत्थि नवि अ होही, उल्लावो किसलपंडुपत्ताणं ।
उवमा खलु एस कया, भवियजण विबोहट्ठाए ॥ ३ ॥

[उत्त. निर्युक्ति गा. ३०७-८-९]

यथा हि किसलयानि पाण्डुपत्रेणाऽनुशिष्यन्ते तथान्योऽपि यौवनगर्वितोऽनुशासनीयः ॥ १ ॥

अथायुषोऽनित्यत्वमाह-

कुसग्गे जह ओसबिंदुए, थोवं चिट्ठइ लंबमाणए ।
एवं मणुयाण जीवियं, समयं गोयम मा पमायए ॥ २ ॥

हे गौतम ! समयमात्रमपि मा प्रमादीः । तत्र हेतुमाह-यथा कुशस्याग्रेऽवश्यायबिन्दुर्लम्बमानः सन् स्तोकं-स्तोककालं तिष्ठति, वातादिना प्रेर्यमाणः सन् पतति, तथा मनुष्याणां जीवितमायुरस्थिरं ज्ञेयम् । एवमायुषोऽनित्यत्वं ज्ञात्वा धर्मे प्रमादो न विधेय इत्यर्थः ॥ २ ॥

इ इ इतरियंमि आउए, जीवियए बहुपच्चवायए ।
विहुणाहि रयं पुरेकडं, समयं गोयम मा पमायए ॥ ३ ॥

इत्युक्तदृष्टान्तेन त्वरे-स्वल्पकालपरिमाणे मनुष्यस्यायुषि भो गौतम ! पुराकृतं रजः-प्राचीनकृतं पातकं दुष्कर्म विशेषेण धुनीहि, जीवात्पृथक्कुरु ! हे गौतम ! पुनर्जीवितकेऽर्थात्सोपक्रमे आयुषि बहवः प्रत्यवाया उपघातहेतवोऽध्यवसायादयो वर्तन्ते यस्मिंस्तद्बहुप्रत्यवायकम्, तस्मिन् बहुप्रत्यवायके समयमपि मा प्रमादं कुर्याः । अत्रायुःशब्देन निरुपक्रममायुर्भण्यते जीवितशब्देन सोपक्रमं भण्यते । एति-प्राप्नोत्युपक्रमहेतुभिः, अनपवर्त्यतया यथास्थित्यैव अनुभवमित्यायुः, तस्मिन्नायुषि - निरुपक्रमे आयुषि स्वल्पपरिमाणेऽपि दुष्कृतं दुरीकुरु । यद्यपि पूर्वकोटिप्रमाणमायुर्भवति, तथापि देवापेक्षया स्वल्पमेव ज्ञेयमतृप्तत्वात् । यदुक्तं-

---

१ परिवर्त्तितलावण्यं चलन्तसन्धिं मुञ्चद्वृन्तकम् । पत्रं च व्यसनप्राप्तं, काले प्राप्ते भणति गाथाम् ॥ १ ॥
२ कालप्पत्तं - निर्युक्तौ ॥

यथा यूयं तथा वयं, यूयमपि च भविष्यथ यथा वयम् ।
उपदिशति पतत् पाण्डुपत्रं किसलयानाम् ॥ २ ॥
नैवास्ति नैव च भविष्यति, उल्लापः किसलयपाण्डुपत्राणाम् ।
उपमा खल्वेषा कृता, भविकजनविबोधनार्थम् ॥ २ ॥

"धनेषु जीवितव्येषु, रतिकामेषु भारत ! ।
अतृप्ताः प्राणिनः सर्वे, याता यास्यन्ति यान्ति च ॥ १ ॥"

[अत्र सोपक्रमनिरुपक्रमायुर्ज्ञानं केवलिन एव भवेत् ॥ ३ ॥]

दुल्लहे खलु माणुसे भवे, चिरकालेण वि सव्वपाणिणं ।
गाढा य विवाग कम्मुणो, समयं गोयम मा पमायए ॥ ४ ॥

खल्विति निश्चयेन सर्वप्राणिनां - सर्वजीवानां चिरकालेनापि मनुष्यो भवो दुर्लभो-दुष्प्राप्यो (दुष्प्रापो) वर्तते, तत्र हेतुमाह-कर्मणां मनुष्यगतिविघातकानां विपाका - विगाढा विशेषेण गाढा विगाढा-विनाशयितुमशक्यास्तस्मात्समयमात्रमपि प्रमादं मा कुर्याः ॥ ४ ॥

कथं मनुजत्वं दुर्लभमित्याह-

पुढविक्कायमइगओ, उक्कोसं जीवो उ संवसे ।
कालं संखाईओ, समयं गोयम मा पमायए ॥ ५ ॥

जीवः संसारी पृथ्वीकायमधिगतः- पृथ्वीकायभावं प्राप्तः सन्नुत्कर्षत - उत्कृष्टकालं सङ्ख्यातीतमसङ्ख्योत्सर्पिण्यवसर्पिणीमानं कालं संवसेत्तद्रूपतयावतिष्ठेत्, तस्मात्समय-मात्रमपि मा प्रमादीः ॥ ५ ॥

आउक्कायमइगओ, उक्कोसं जीवो उ संवसे ।
कालं संखाईओ, समयं गोयम मा पमायए ॥ ६ ॥

तथाप्कायमधिगतो जीव उत्कृष्टमसङ्ख्योत्सर्पिण्यवसर्पिणीमानं कालं संवसेत् तस्मात् समयमात्रमपि मा प्रमादीः ॥ ६ ॥

तेउक्कायमइगओ, उक्कोसं जीवो उ संवसे ।
कालं संखाईओ, समयं गोयम मा पमायए ॥ ७ ॥

एवं तेजस्कायमग्निकायमधिगतो जीव उत्कृष्टं सङ्ख्यातीतं कालमसङ्ख्योत्सर्पिणी-कालं संवसेत्, तस्मात्समयमात्रमपि प्रमादं मा कुर्याः ॥ ७ ॥

वाउक्कायमइगओ, उक्कोसं जीवो उ संवसे ।
कालं संखाईओ, समयं गोयम मा पमायए ॥ ८ ॥

एवं जीवो वायुकायमधिगतोऽप्युत्कृष्टमसङ्ख्योत्सर्पिण्यवसर्पिणीप्रमाणकालं संवसेत्, तस्मात् समयमात्रमपि प्रमादं मा कुर्याः ॥ ८ ॥

वणस्सइकायमइगओ, उक्कोसं जीवो उ संवसे ।
कालमणंतं दुरंतं, समयं गोयम मा पमायए ॥ ९ ॥

जीवः संसारी वनस्पतिकायमधिगत उत्कर्षत - उत्कृष्टं कालमनन्तमुत्सर्पिण्यवसर्पिणीमानमनन्तकायिकापेक्षं वसेत्, कथम्भूतमनन्तं कालं ? दुरन्तं, दुष्टोऽन्तो यस्य स दुरन्तस्तम्, ते हि वनस्पतिकायमध्यगता जीवास्तत्स्थानादुद्धृता अपि प्रायो विशिष्टं नरादिभवं न लभन्ते, तस्माद् दुरन्तमिति विशेषणम् ॥ ९ ॥

बेइंदियकायमइगओ, उक्कोसं जीवो उ संवसे ।
कालं संखिज्जसन्नियं, समयं गोयम मा पमायए ॥ १० ॥

द्वीन्द्रियकायं जीवोऽधिगतः सन्नूत्कृष्टं कालं सङ्ख्यातसंज्ञकं, सङ्ख्यातासङ्ख्यातवर्षसहस्रात्मिका संज्ञा यस्य स सङ्ख्यातसंज्ञकस्तं सङ्ख्यातसंज्ञकं सङ्ख्यातवर्षसहस्रात्मकं कालं द्वीन्द्रियकायं तिष्ठेदित्यर्थः । तस्मात्समयमात्रमपि गौतम ! मा प्रमादं कुर्याः ॥ १० ॥

तेइंदियकायमइगओ, उक्कोसं जीवो उ संवसे ।
कालं संखिज्जसन्नियं, समयं गोयम मा पमायए ॥ ११ ॥

एवं जीवस्त्रीन्द्रियकायमधिगतः सङ्ख्यातवर्षसहस्रात्मकं कालमुत्कृष्टं वसेत् । तेन त्वं समयमात्रमपि प्रमादं मा कुर्याः ॥ ११ ॥

चउरिंदियकायमइगओ, उक्कोसं जीवो उ संवसे ।
कालं संखिज्जसन्नियं, समयं गोयम मा पमायए ॥ १२ ॥

एवं जीवश्चतुरिन्द्रियकायेऽधिवसन् सङ्ख्यातवर्षसहस्रात्मकं कालमधिवसेत् । तस्मात्त्वं प्रमादं समयमात्रमपि मा कुर्याः ॥ १२ ॥

पंचिंदियकायमइगओ उक्कोसं जीवो उ संवसे ।
सत्तट्ठभवग्गहणे, समयं गोयम मा पमायए ॥ १३ ॥

पञ्चेन्द्रियकायमधिगतः पञ्चेन्द्रियत्वं प्राप्तः सन्नुत्कृष्टं सप्ताष्टभवग्रहणे संवसेत् । सप्ताष्टौ वा परिमाणं येषां ते सप्ताष्टाः, सप्ताष्टाश्च ते भवाश्च सप्ताष्टभवास्तेषां ग्रहणं सप्ताष्टभवग्रहणम् तस्मिन् । यदा हि पञ्चेन्द्रियो मृत्वा पञ्चेन्द्रियो भवेत्तदोत्कृष्टं सप्ताष्टवारं स्यादित्यर्थः । तस्मात्समयमात्रमपि मा प्रमादीः । कश्चित्पुण्यवान् सङ्ख्यातायुष्को जीवो सप्तभवान् करोति। कश्चिदसङ्ख्यातायुष्को [1]जीवोऽष्टभवान् वा करोति, एवं ज्ञात्वा प्रमादो न विधेयः ॥ १३ ॥

देवे नेरइए य अइगओ, उक्कोसंजीवो उ संवसे ।
इक्केकभवग्गहणे, समयं गोयम मा पमायए ॥ १४ ॥

---

१ जीवो युगलादिकः-L. मु.१ ॥

देवे-देवभवे नरके-नरकभवेऽधिगतः संसारी जीव उत्कृष्टमेकैकस्मिन् भवग्रहणे संवसेत् । तस्मात्समयमात्रमपि प्रमादं मा कुर्याः । देवो मृत्वा देवो न स्यात्, नारको मृत्वा नारको न स्यात् । एकमन्यद्भवान्तरं कृत्वा पश्चात्स्यादित्यर्थः । तस्मादेकैकभवग्रहणमित्युक्तम् ॥ १४ ॥

एवं भवसंसारे, संसरइ सुहासुहेहिं कम्मेहिं ।
जीवो पमायबहुलो, समयं गोयम मा पमायए ॥ १५ ॥

एवममुना प्रकारेण जीवो भवसंसारे-भवभ्रमणे शुभाशुभैः कर्मभिः प्रेर्यमाणः संसरति-पर्यटति । कीदृशो जीवः ? प्रमादबहुलः, प्रमादो बहुलो यस्य स प्रमादबहुलः प्रमादवर्तीत्यर्थः । तस्मात्प्रमादस्य दुर्निवारत्वं ज्ञात्वा समयमात्रमपि प्रमादं मा कुर्याः ॥ १५ ॥

मनुष्यत्वप्राप्तोऽप्युत्तरोत्तरगुणाप्तिर्दुर्लभेत्याह-

लद्धूणवि माणुसत्तणं, आयरियत्तं पुणरवि दुल्लहं ।
बहवे दसुया मिलक्खुया, समयं गोयम मा पमायए ॥ १६ ॥

मनुष्यत्वमपि लब्ध्वा आर्यत्वमार्यदेशोत्पत्तिभावं पुनरपि दुर्लभम् । यद्यपि मनुष्यत्वं जीवः प्राप्नोति, तदाप्यार्यदेशे मनुष्यत्वं दुर्लभमित्यर्थः । यत्र देशेषु धर्माऽधर्मजीवाऽजीवविचारः स आर्यो देशस्तत्रोत्पत्तिर्दुर्लभा । पुनरपि बहवो जीवा दस्यवश्चौरा देशानां प्रान्ते पर्वतादिषु निवासकारिणस्तस्करा भवन्ति । म्लेच्छाः के ? येषां वाक् सम्यक्केनापि न ज्ञायते ते म्लेच्छा उच्यन्ते ।

"पुलिंदा नाहला नेष्टा, शबरा बरटा भटाः ।
माला भिल्लाः किराताश्च, सर्वेऽपि म्लेच्छजातयः ॥ १ ॥" [अभि. ९३४]

तत्र च धर्माऽधर्मज्ञानं दुर्लभम्, तस्मात्समयमात्रमपि प्रमादं मा कुर्याः ॥ १६ ॥

लद्धूणवि आयरियत्तणं, अहीणपंचेंदियया हु दुल्लहा ।
विगलिंदियया हु दीसई, समयं गोयम मा पमायए ॥ १७ ॥

आर्यत्वमार्यदेशोत्पत्तिभावमपि लब्ध्वा 'हु' इति पुनरर्थे अहीनपञ्चेन्द्रियता पुनर्दुर्लभा । 'हु' इति बाहुल्येन बहूनां विकलेन्द्रियता दृश्यते । विकलानि रोगाद्युपहतानीन्द्रियाणि येषां ते विकलेन्द्रियास्तेषां भावो विकलेन्द्रियता, सा दृश्यते । बहवो हि दुष्कर्मवशाद्रोगोदेकेण विगतनेत्र-श्रवण-रसन-स्पर्शन-कर-चरण-वीर्याः दृश्यन्ते । ते च धर्मानुष्ठानकरणेऽसमर्था भवन्ति । तस्मात्त्वं समयमात्रमपि हे गौतम ! प्रमादं मा कुर्याः ॥ १७ ॥

अहीणपंचिंदियत्तं पि से लहे, उत्तमधम्मसुइ हु दुल्लहा ।
कुतित्थिनिसेवए जणे, समयं गोयम मा पमायए ॥ १८ ॥

'से' इति स जीवोऽहीनपञ्चेन्द्रियत्वमपि चेल्लभेत तदापि 'हु' इति निश्चयेनोत्तम-धर्मश्रुतिर्दुर्लभा, जिनधर्मस्य श्रवणं दुष्प्राप्य (प) मित्यर्थः । तत्र हेतुमाह-जनो लोकः कुतीर्थिनिषेवकः स्यात्, कुतीर्थिनां - मिथ्यात्विनां निषेवकः । कुतीर्थिनो हि सत्कारयशो-लाभार्थिनो भवन्ति । ते च प्राणिनां विषयादिसुखसेवनोपदेशेन वल्लभत्वमुत्पाद्य जनान् रञ्जयन्ति । अतस्तेषां सेवा सुकरा, तेषां मुखात्तु धर्मवार्ता कुत इत्यर्थः ॥ १८ ॥

लद्धूणवि उत्तमं सुइं, सद्दहणा पुणरवि दुल्लहा ।
मिच्छत्तनिसेवए जणे, समयं गोयम मा पमायए ॥ १९ ॥

उत्तमधर्मस्य श्रुतिमपि लब्ध्वा पुनः श्रद्धा दुर्लभा, तत्त्वरुचिदुष्प्राप्या दुष्प्रापा, यतो हि जनो लोको मिथ्यात्वनिषेवकः स्यात् । मिथ्यात्वं हि कुगुरु-कुदेव-कुधर्मलक्षणं नितरां सेवते इति मिथ्यात्वनिषेवकः । तस्मान्मिथ्यात्वोदयाज्जिनधर्मरुचिर्दुर्लभा, तस्मात्समय-मात्रमपि त्वं मा प्रमादीः ॥ १९ ॥

धम्मं पि हु सद्दहंतया, दुल्लहया काएण फासया ।
इह कामगुणेसु मुच्छिया, समयं गोयम मा पमायए ॥ २० ॥

धर्म-जिनोक्तं धर्मं श्रद्दधतः, जिनोक्तमागमं साधु-श्राद्धधर्मं वा सर्वं सत्यमिति जानतोऽपि जीवस्य कायेन शरीरेण, कायग्रहणेन कायसम्बद्धयोर्वाङ्मनसोरपि ग्रहणम् । तस्मात्कायेन वचसा मनसा च स्पर्शना दुर्लभिका, दुर्लभा एव दुर्लभिका । धर्मक्रियानुष्ठा-नकरणं दुष्करमित्यर्थः । इह जगति जीवाः कामगुणेषु-विषयेषु मुर्च्छिता-लोलुपा भवन्ति । विषयिणो हि धर्मक्रियास्वयोग्याः । हे गौतम ! धर्मक्रियानुष्ठानकरणं दुष्करत्वात् समयमात्रमपि प्रमादं मा कुर्याः ॥ २० ॥

परिजूरइ ते सरीरयं, केसा पंडुरया हवंति ते ।
से सोयबले य हायई, समयं गोयम मा पमायए ॥ २१ ॥

हे गौतम ! ते शरीरकं परिजीर्यति, परि-समन्तात्सर्वप्रकारेण वयोहानिर्जरया जीर्णत्व-मनुभवति । तव पुनः केशाः पाण्डुरकाः-श्वेता भवन्ति, अत्र 'ते' तवेति कथनात्प्रत्यक्षानु-भवेन सन्देहो न कर्तव्यः । यथा हस्तकङ्कणस्यात्मदशावलोकनं । यथा तव शरीरं तथा सर्वेषामेव ज्ञेयमित्यर्थः । 'से' इति तच्छ्रोत्रबलं हीयते-हीनं स्यात् । तच्छब्दग्रहणाद्य-च्छब्दग्रहणं कर्तव्यम्, यत् श्रोत्रयोर्बलं तरुणावस्थायां स्यात्तद् वृद्धावस्थायां हीयत इत्यर्थः । अत्र पूर्वं श्रोत्रग्रहणं धर्मश्रवणकारणत्वख्यापनार्थम् । यतो हि धर्मश्रवणादेव धर्मकरणमतिः स्यादित्यर्थः । तस्मात् श्रोत्रबले सति धर्मश्रवणादरः कर्तव्यः तत्र समयमात्रमपि त्वं मा प्रमादीः ॥ २१ ॥

परिजूरइ ते सरीरयं, केसा पंडुरया हवंति ते ।
से चक्खुबले य हायई, समयं गोयम मा पमायए ॥ २२ ॥

गाथायाः पूर्वार्धस्यार्थः पूर्ववद् ज्ञेयः, तत्पूर्वसत्कं चक्षुर्बलं हीयते । तद्धानौ च धर्मकरणं दुर्लभं ज्ञात्वा मा प्रमादं कुर्याः ॥ २२ ॥

परिजूरइ ते सरीरयं, केसा पंडुरया हवंति ते ।
से घाणबले य हायई, समयं गोयम मा पमायए ॥ २३ ॥

तत्पूर्वसत्कमपि घ्राणबलं-नासबलं हीयते । तस्मान्नासाबले सति त्वया सुरभि-दुरभिगन्धग्रहणेन विषये राग-द्वेषकरणवेलायां प्रमादो न विधेयः ॥ २३ ॥

परिजूरइ ते सरीरयं, केसा पंडुरया हवंति ते ।
से जिब्भबले य हायई, समयं गोयम मा पमायए ॥ २४ ॥

तत् जिह्वाबलं हीयते । यादृशं तरुणावस्थायां भवेत्तादृशं वृद्धावस्थायां न स्यात् । तस्माज्जिह्वाबले सति [1]स्वाध्यायादिकरणे प्रमादं मा कुर्याः ॥ २४ ॥

परिजूरइ ते सरीरयं, केसा पंडुरया हवंति ते ।
से फासबले य हायई, समयं गोयम मा पमायए ॥ २५ ॥

तत्स्पर्शबलं शरीरबलं हीयते, यादृशं यौवने शरीरबलं भवेत्तादृशं जरायां न स्यात् । तस्माद्धर्मानुष्ठानादौ प्रमादं मा कुर्याः ॥ २५ ॥

परिजूरइ ते सरीरयं, केसा पंडुरया हवंति ते ।
से सव्वबले य हायई, समयं गोयम मा पमायए ॥ २६ ॥

तत्तरुणावस्थासत्कं सर्वबलं-कर-चरण-दन्तादीनां बलं हीयते । तस्मात्समयमात्रमपि त्वं मा प्रमादीः ॥ २६ ॥

अरईगंडं विसूइया, आयंका विविहा फुसंति ते ।
विवडइ विद्धंसइ ते सरीरयं, समयं गोयम मा पमायए ॥ २७ ॥

हे गौतम ! 'ते' तव विविधा नानाप्रकारा आतङ्का-रोगाः शरीरं स्पर्शन्ति । ते के चातङ्काः ? अरतिश्चतुरशीतिविधवातोद्भूतचित्तोद्वेगो वातप्रकोप इत्यर्थः । गण्डं रुधिरप्रकोपोद्भूतस्फोटकः, विशूचिकाऽजीर्णोद्भूतवमनाध्मातविरेचादिसद्यो-मृत्युकृत्रुक्, इत्यादयो रोगा आतङ्का देहं पीडयन्ति । तै रोगैः पीडिते शरीरे सति धर्माराधनं दुष्करम् । ते शरीरं रोगाभिभूतं सद्विपतति, विशेषेण बलापचयान्नश्यति । पुनः शरीरं ते तव विध्वस्यते, जीवमुक्तः सद्विशेषेणाधः पतति । अत्र सर्वत्र यद्यपि 'ते' तवेत्युक्तम्, गौतमे च केशपाण्डुरत्वादीन्द्रियाणां हानिश्च न सम्भवति । तथापि तन्निश्रयाऽ-परशिष्यादिवर्गं प्रतिबोधार्थमुक्तम्, दोषाय न भवति । तथा च प्रमादो न विधेयः ॥ २७ ॥

१ स्वाध्यायादिधर्मक्रियाया-मु. ॥

वुच्छिंद सिणेहमप्पणो, कुमुयं सारइयं व पाणियं ।
से सव्वसिणेहवज्जिए, समयं गोयम मा पमायए ॥ २८ ॥

हे गौतम ! आत्मनः स्नेहं मयि विषये रागं व्युच्छिन्धि-अपनय, स्नेहं-बन्धनं त्यजेत्यर्थः । किं किमिव ? कुमुदं-कमलं पानीयमिव, यथा कुमुदं पानीयं त्यक्त्वा पृथक्तिष्ठति, तथा त्वमपि स्नेहं त्यक्त्वा पृथग्भवेत्यर्थः । कीदृशं पानीयं ? शारदम्, शरदि ऋतौ भवं शारदम् । अत्र पानीयस्य शारदमिति विशेषणेन मनोरमत्वं स्नेहस्य दर्शितम्, स्नेहो हि संसारिणो जीवस्य मनोहरो लगति । से शब्दोऽथशब्दार्थः । अथ त्वं सर्वस्नेहवर्जितः सन् समयमात्रमपि प्रमादं मा कुर्याः ॥ २८ ॥

चिच्चा धणं च भारियं, पव्वइओ हि सि अणगारियं ।
मा वंतं पुणो वि आविए, समयं गोयम पमायए ॥ २९ ॥

हे गौतम ! यदि त्वमनगारितां - साधुत्वं प्रव्रजितोऽसि-प्रकर्षेण प्राप्तोऽसि, किं कृत्वा ? धनं च पुनर्भार्यां त्यक्त्वा, तदा पुनरपि वान्तं - त्यक्तं मा पिब, त्यक्ते वस्तुनि पुनर्ग्रहणादरं मा कुर्याः । एतस्मिन् विषये समयमात्रमपि मा प्रमादीः ॥ २९ ॥

अवउज्झिय मित्तबंधवं, विउलं चेव धणोहसंचयं ।
मा तं बिइयं गवेसए, समयं गोयम मा पमायए ॥ ३० ॥

हे गौतम ! मित्र-बान्धवं 'अवउज्झिय' अपोह्य-त्यक्त्वा, च पुनर्धनौघसञ्चयम्, धनस्यौघः समूहो धनौघस्तस्य सञ्चयो-राशीकरणम्, तदप्यपोह्य-त्यक्त्वा, 'बितीयमिति' द्वितीयवारं पुनरित्यर्थः, तन्मित्र-बान्धव-धनौघसञ्चयादि मा गवेषयेत्, तस्मात्समयमात्रमपि मा प्रमादीः ॥ ३० ॥

न हु जिणे अज्ज दिस्सई, बहुमए दिस्सई मग्गदेसिए ।
संपइ नेयाउए पहे, समयं गोयम मा पमायए ॥ ३१ ॥

पुनरपि गौतमादीन् दृढीकरोति श्रीमहावीरः-हे गौतम ! सम्प्रति-इदानीं मयि विद्यमाने प्रत्यक्षप्रमाणेन गृह्यमाणे सति नैयायिके - मुक्तिरूपे पथि - मार्गविषये मा प्रमादं भवान् कुर्यात्, यद्यपि तवेदानीं केवलज्ञानं नास्ति, तथाप्यहं विद्यमानोऽस्मीति साम्प्रतं संशयाभावेन प्रमादस्त्याज्यः । अग्रे तु मद्विरहेऽपि एतादृशा भाविनो-भव्यजीवा न भविष्यन्ति ये इति विचिन्त्य-इत्यनुमानप्रमाणं विधाय नैयायिके मार्गे-साधुधर्मे मयि च स्थिरा भविष्यन्ति, तत्किमनुमानं कृत्वाऽप्रमादिनः स्थिराश्च भविष्यन्ति तदाह-

मार्ग इव मुक्तिनगरं प्रति पन्था इव देशितः-कथितो मार्गदेशितः, अयं जीवदयाधर्मो मुक्तिमार्ग इव कथितो दृश्यते । अद्येदानीं जिनो न दृश्यते, कथम्भूतोऽयं मार्गदेशितः ?

बहुमतः, बहुभिर्बहूनां वा मतो बहुमतः, अथवा बहवो मता-नया यस्मिन् स बहुमतः, नैगम-संग्रह-व्यवहार्जुसूत्र-शब्द-समभिरूढैवंभूतादिसप्तनयात्मकः। ज्ञान-दर्शनचारित्राणि मोक्षमार्गः, अपरमते ह्येकान्तवादित्वम्, तस्मादयं जैनमतस्तु बहुमतः। एवंविधोऽयं मुक्ति-मार्गोऽतीन्द्रियार्थदर्शिनं जिनं केवलिनं विना न स्यात्। तस्मादस्य बहुमतस्य मुक्तिमार्गस्य, एवं भव्या ज्ञास्यन्ति-चेदयं मुक्तिमार्गोऽस्ति, जिनो नास्ति, तदास्य मार्गस्य कश्चिद्वक्ता-प्यासीत्, न च स कश्चिद्वक्तापि सामान्यः, किन्त्वस्य धर्मस्योपदेष्टा कश्चिदाप्तो जिन एव भवितुमर्हति। इति मद्विरहेऽप्यप्रमादिनो भविष्यन्ति। सम्प्रति मयि केवलिनि सत्यस्मि-न्नैयायिके पथि सर्वथा प्रमादस्त्याज्य एवेति भावः। निश्चित आयो-मुक्तिलक्षणो लाभो यस्मिन् स नैयायिको ज्ञान-दर्शन-चारित्ररूपरत्नत्रयात्मक इत्यर्थः। अथ पुनरप्यस्या गाथाया अयमर्थोऽप्यस्ति-हे गौतम ! अद्येदानीं भवान् जिनः केवली न दृश्यते, दृश्यत इति क्रियाबलाद्, भवानिति पदमनुक्तमपि गृह्यते। परं बहुभिर्मतो-मान्यो ज्ञातो वा बहुमतः, अर्थात्प्रसिद्धो मार्ग इव जिनत्वभवनमार्गो देशितो मया तवोपदिष्टः। स मार्गस्त्वया विलोक्यत एव, तस्मात् सम्प्रतीदानीं मयि-जिने सति नैयायिके मार्गे-मदुक्ते मार्गे समयमात्रमपि मा प्रमादीः। मयि विद्यमाने सति मयि विषये मोहाद्भवान् जिनो न वर्तसे, पश्चात्त्वं जिनो भावी, तस्मादिदानीं मद्वचने प्रामाण्यं विधेयमित्यर्थः ॥ ३१ ॥

अवसोहिय कंटयापहं, ओइन्नो सि पहं महालयं ।
गच्छसि मग्गं विसोहिया, समयं गोयम मा पमायए ॥ ३२ ॥

हे गौतम ! त्वं महालयं पन्थानमुत्तीर्णोऽसि-प्राप्तोऽसि। महान् सम्यग्ज्ञानदर्शन-चारित्रलक्षण आलय-आश्रयो यस्मिन् स महालयस्तं महालयम्, एतादृशं पन्थानं राजमार्गं प्राप्तोऽसि। किं कृत्वा ? कण्टकपथमवशोध्य, कण्टकानां बौद्ध-चरक-साङ्ख्यादीनां पन्थः कण्टकपन्थः, आकारः प्राकृतिकः। अथवा कण्टैः कुतीर्थिकैराकीर्णो-व्याप्तः कुत्सितपन्थाः कण्टकापथस्तं परिहृत्य सम्यग्मुक्तिमार्गं राजमार्गमिव प्राप्तोऽसि। हे गौतम ! यदि विशेषेण शोधिते निरवद्ये मार्गे गच्छसि तदा समयमात्रमपि प्रमादं मा कुर्याः ॥ ३२ ॥

अबले जह भारवाहए, मा मग्गे विसमेऽवगाहिया ।
पच्छा पच्छाणुतावए, समयं गोयम मा पमायए ॥ ३३ ॥

हे गौतम ! यथा कश्चिद्भारवाहको विषमं मार्गमवगाह्य विषमे मार्गे स्वर्णादिभारमु-त्पाट्य समे मार्गेऽबलः स्यात्, स च भारवाहकः पश्चाद् गृहमागतः पश्चादनुतप्यते-पश्चात्तापपीडितः स्यात्। कोऽर्थः ? यथा कश्चिद्भारवाहकः शिरसि कतिचिद्दिनानि यावद्विषमे मार्गे स्वर्णादिभारमुद्वहति। तदनन्तरं कुत्रचित् पाषाणादिसङ्कुले मार्गे भारेणाक्रान्तोऽहमिति ज्ञात्वा तं भारमुत्सृजति। स च भारवाहकः पश्चाद् गृहमागतः सन् निर्धनत्वेन पश्चादनुतप्यते, पश्चात्तापपीडितः स्यात्। तथा त्वमपि विषमं मार्गं तारुण्यादिवयोविशेषं महाव्रतभारमुद्वाह्य

समे मार्गे यौवनोत्तारे कुत्रचित्परीषहादिना स्खलन् महाव्रतभारं त्यजन्नबलो भवन् पश्चादन्त्ये वयस्यागतः संयमधनरहितो भूत्वा मा पश्चादनुतप्ये:-मा पश्चात्तापपीडितो भूया इति विचिन्त्य समयमात्रमपि मा प्रमादीः ॥ ३३ ॥

तीण्णो हु सि अण्णवं महं, किं पुण चिट्ठसि तीरमागओ ।
अभितुर पारं गमित्तए, समयं गोयम मा पमायए ॥ ३४ ॥

हे गौतम ! त्वमर्णवं भवसमुद्रं तीर्ण एवासि,उल्लङ्घितप्रायोऽसि । किं पुनस्तीरमागतः सन् तिष्ठसि ? औदासीन्यं भजसि ? हे गौतम ! भवार्णवस्य पारं गन्तुमभित्वरस्व-पारगमने उत्तालो भवेत्यर्थः । तीरमत्र मुक्तिपदमुच्यते, तस्मात्समयमात्रमपि मा प्रमादीः ॥ ३४ ॥

अकलेवरसेणिमुस्सिया, सिद्धिं गोयम लोयं गच्छसि ।
खेमं च सिवं अणुत्तरं, समयं गोयम मा पमायए ॥ ३५ ॥

हे गौतम ! त्वं सिद्धिं-सिद्धिनामकं लोकं-स्थानं गमिष्यसि-प्राप्स्यसि । किं कृत्वा ? अकलेवरश्रेणिमुत्सृज्य, न विद्यते कलेवरं शरीरं येषां तेऽकलेवराः सिद्धास्तेषां श्रेणिः-उत्तरोत्तरप्रशस्तमनः-परिणतिपद्धतिः क्षपकश्रेणिस्तामकलेवरश्रेणिमुत्सृज्य, उत्तरोत्तर-संयमस्थानप्राप्त्योन्नतामिव कृत्वा, कथम्भूतं सिद्धिं लोकं ? क्षेमं-परचक्राद्युपद्रवरहितम् । पुनः कीदृशं ? शिवं-सकलदुरितोपशमम्, पुनः कीदृशं ? अनुत्तरं सर्वोत्कृष्टमित्यर्थः ॥ ३५ ॥

बुद्धे परिनिव्वुडे चरे, गामगए नगरे च संजए ।
संतिमग्गं च बूहए, समयं गोयम मा पमायए ॥ ३६ ॥

हे गौतम ! परिनिर्वृतः-शान्तरससहितः सन् चर-संयमं सेवस्व । कीदृशः ? ग्रामे गतो ग्रामगतः, च पुनर्नगरे गतः, चशब्दाद्वने वा स्थितः । पुनः कीदृशः ? संयतः सम्यग्यत्नं कुर्वाणः, पुनः कीदृशः ? बुद्धो-ज्ञाततत्वः, च पुनर्हे गौतम ! शान्तिमार्गं त्वं बृंहयेः । भव्यजनानामुपदेशद्वारेण वृद्धिं प्रापयेः । अत्र कार्ये समयमात्रमपि मा प्रमादीः ॥ ३६ ॥

बुद्धस्स निसम्म भासियं, सुकहियमट्ठपओवसोहियं ।
रागं दोसं च छिंदिया, सिद्धिं गए गोयमे ॥ ३७ ॥ त्ति बेमि ॥

गौतमः सिद्धिं-मुक्तिस्थानं प्राप्तः, किं कृत्वा ? बुद्धस्य श्रीमहावीरदेवस्य सुष्ठु शोभनं भाषितं-सुभाषितं सम्यगुपदेशं निशम्य श्रोत्रद्वारेण हृद्यवधार्य, च पुना रागद्वेषं च छित्त्वा, कीदृशं सुभाषितं ? सुकथितम्, सुतरामतिशयेन-शोभनप्रकारेणोपमायोगेन कथितम् वाक्यप्रबन्धेन रचितमित्यर्थः । सुधर्मा स्वामी जम्बूस्वामिनः पुर आह । यथा श्री महावीरदेवेन गौतमादिशिष्याग्रे कथितं तथाहं तवाग्रे ब्रवीमीत्यर्थः ॥ ३७ ॥

इति द्रुमपत्राख्यं दशममध्ययनं सम्पूर्णम् ॥ १० ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यश्रीलक्ष्मीवल्लभगणि-विरचितायां दशमाध्ययनस्यार्थः सम्पूर्णः ॥

॥ अथैकादशं बहुश्रुतपूजाऽऽख्यमध्ययनं प्रारभ्यते ॥

अथ दशमेऽध्ययने प्रमादपरिहारार्थमुपदेशो दत्तः । स च विवेकिन एव स्यात् विवेकी च बहुश्रुतो भवेत् । अत एकादशमध्ययनं बहुश्रुताख्यं बहुश्रुतवर्णनमुच्यते ।

संजोगा विप्पमुक्कस्स, अणगारस्स भिक्खुणो ।
आयारं पाउकरिस्सामि, आणुपुव्विं सुणेह मे ॥ १ ॥

हे जम्बु ! संयोगाद् विप्रमुक्तस्य अनगारस्य भिक्षोराचारं साधुयोग्यक्रियां बहुश्रुत-पूजारूपं-बहुश्रुतस्वरूपज्ञानं आनुपूर्व्या-अनुक्रमेण प्रादुष्करिष्यामि-प्रकटीकरिष्यामि, 'मे' मम कथयिष्यतस्त्वं श्रृणु अथवा साधोराचारम् आकारम् बहुश्रुतस्य आकारम्, बहुश्रुतः कीदृग् स्यात् ? तत्प्रकटीकरिष्यामि ॥ १ ॥

प्रथमं तत्परिज्ञानार्थं अबहुश्रुतस्य लक्षणमाह-

जे यावि होइ निव्विज्जे, थद्धे लुद्धे अणिग्गहे ।
अभिक्खणं उल्लवइ, अविणीए अबहुस्सुए ॥ २ ॥

यश्च यो मनुष्यो निर्विद्यो भवति । अपिशब्दात् यः सविद्यो वा भवति । स चेत् स्तब्धोऽहङ्कारी भवति, पुनर्लुब्धो भवति, रसादिषु लोलुपो भवति । पुनर्योऽनिग्रह इन्द्रिय-दमरहितो भवति, पुनर्योऽभीक्ष्णं वारंवारमुल्लपति । उत्प्राबल्येन यथातथा अविचारितं लपति, वाचालो भवति । स पुरुषोऽविनीतो विनयधर्मरहितोऽबहुश्रुत उच्यते । सविद्योऽपि अबहुश्रुतः स्यात् चेत् सविद्यत्वस्य फलं न प्राप्नुयात् तद्विपरीतो बहुश्रुतः स्यात् ॥ २ ॥

अबहुश्रुतस्य कारणमाह-

अह पंचहिं ठाणेहिं, जेहिं सिक्खा न लब्भइ ।
थंभा कोहा पमाएणं, रोगेणाऽलस्सएण य ॥ ३ ॥

अथ श्रोतुः पुरुषस्य उत्कर्णताकरणे यैः पञ्चभिः स्थानैः- पञ्चभिः प्रकारैः शिक्षा-ग्रहणाऽऽसेवनारूपा न लभ्यते-न प्राप्यते । तानि पञ्च स्थानानि श्रृणु इत्यध्याहारः । स्तम्भः, क्रोधः, प्रमादः, रोगः, आलस्यं च स्तम्भात्-अहङ्कारात् शिक्षा योग्यो न भवति । तथा क्रोधादपि शिक्षा योग्यो न भवति । तथा पुनः प्रमादेन मद-विषय-कषाय-निद्रा-विकथारूपेण उपदेशयोग्यो न स्यात् । तथा रोगेण वात-पित्त-श्लेष्म-कुष्ठ-शूला-दिव्याधिना शिक्षाग्रहणार्हो न भवति । तथा आलस्येन-अनुद्यमेन, च शब्देन एतैः सर्वप्रकारैः । अथवा एतेषां स्थानानां मध्ये एकेनापि स्थानेन शिक्षा न प्राप्यते गुरूपदिष्ट-शास्त्रार्थाभ्यासं कर्तुं न शक्नोति । शिक्षालाभस्याभावात् अबहुश्रुतत्वं स्यात् ॥ ३ ॥

अथाग्रेतनगाथायां बहुश्रुतहेतूनाह-

अह अट्ठहिं ठाणेहिं, सिक्खासीलत्ति वुच्चइ ।
अहस्सिरे सया दंते, न य मम्ममुदाहरे ॥ ४ ॥

अथानन्तरमेतैरष्टभिः स्थानैरष्टभिः प्रकारैः शिक्षाशील इत्युच्यते । शिक्षां ग्रहणाऽऽसेवनारूपशास्त्रं शीलं ते धारयतीति शिक्षाशीलः । तानि अष्टप्रकाराणीमानि-'अहस्सिरे' अहसनशीलः, पुनः सदा दान्तो जितेन्द्रियः, पुनर्यो मर्म न उदाहरेत । य एतादृशो भवति, स गुरूणां शिक्षायोग्यो भवति । गुणिनो ग्रहणाद् गुणानां ग्रहणं कर्तव्यम् ॥ ४ ॥

नासीले न विसीले, न सिया अइलोलुए ।
अकोहणे सच्चरए, सिक्खासीलेत्ति वुच्चई ॥ ५ ॥

पुनरेतादृशः शिक्षाशील उच्यते । एतादृशः कः ? यः सर्वथा अशीलो न स्यात्, न विद्यते शीलं यस्य सः अशीलः- शीलरहित इत्यर्थः । पुनर्यो विशीलो न स्यात्, विरुद्धशीलो विशीलः, अतीचारैः कलुषितव्रतो न स्यात् । यः पुनरतिलोलुपोऽतिरसास्वादलम्पटो न स्यात्, अथवा अतिलोभसहितो न स्यात् । पुनर्योऽक्रोधनः क्रोधेन रहितः स्यात्, पुनर्यः सत्यरतिः स्यात्, स शिक्षाशीलः स्यादित्यर्थः । हास्यवर्जनम् १, दान्तत्वम् २, परममर्मानुद्घाटनम् ३, अशीलवर्जनम् ४, विशीलवर्जनम् ५, अतिलोलुपत्वनिषेधनं ६, क्रोधस्याकरणम् ७, सत्यभाषणम् ८, च एतैरष्टभिः प्रकारैर्बहुश्रुतत्वं स्यादिति भावः ॥ ५ ॥

अथ अबहुश्रुतत्व-बहुश्रुतत्वहेत्वोरविनीत-विनीतयोः स्वरूपमाह-

अह चउदसहिं ठाणेहिं, वट्टमाणे उ संजए ।
अविणीए वुच्चई सो उ, निव्वाणं च न गच्छइ ॥ ६ ॥

अथ चतुर्दशसु स्थानेषु वर्तमानः संयतोऽविनीत उच्यते । स चाविनीतो निर्वाणं मोक्षं च न गच्छति-न प्राप्नोति । अथवा निर्वाणं-निर्वाणकारणं ज्ञान-दर्शन-चारित्रलक्षणं रत्नत्रयं सुखकारणं न प्राप्नोति । अत्र 'चतुर्दशसु स्थानेषु' इति सप्तम्यर्थे प्राकृतत्वात्तृतीयाबहुवचनम् ॥ ६ ॥

अथ तानि चतुर्दशस्थानानि तिसृभिर्गाथाभिराह -

अभिक्खणं कोही हवइ, पबंधं च पकुव्वई ।
मित्तिज्जमाणो वमइ, सुयं लद्धूण मज्जइ ॥ ७ ॥

अवि पावपरिक्खेवि, अवि मित्तेसु कुप्पई ।
सुप्पियस्सावि मित्तस्स, रहे भासई पावगं ॥ ८ ॥

पइन्नवाई दुहिले, थद्ध लुद्धे अणिग्गहे ।
असंविभागी अचियत्ते, अविणीएति वुच्चई ॥ ९ ॥

अथ तानि चतुर्दश स्थानानि विभजति । य ईदृशो भवति स च पुमान् अविनीत इत्युच्यते । ईदृशः कीदृशः ? अभीक्ष्णं-वारंवारं क्रोधी भवति-क्रोधं करोति । च पुनः प्रबन्धं-क्रोधस्य वृद्धिम्, कुपितोऽपि कोमलवचनैरपि क्रोधस्यात्यजनम्-क्रोधस्य स्थिरीभावं प्रकुरुते । मित्रीयमाणोऽपि, 'मित्रं ममास्तु अयम्' इति विचिन्त्यमानोऽपि पश्चाद्वमति-त्यजति । कोऽर्थः ? पूर्वं हि मित्रभावं कृत्वा पश्चात्त्वरितं मित्रत्वं त्रोटयति । ननु साधवो हि कुत्रापि मित्रत्वं-स्नेहभावं केनापि सह न कुर्युः, संयोगाद्विप्रमुक्ता भवेयुः । तर्हि कथं 'मित्तिज्जमाणो वमइ' इत्युक्तम् ? अत्र हि षट्जीवनिकायेषु व्रतग्रहणसमये मैत्रीं विधाय शिथिलाचारित्वेन तां मैत्रीं त्यजेयुरित्यर्थः । अथवा केनापि धर्मशिक्षाशास्त्रार्थदानादिना उपकारः कृतः, स च हितकारत्वान्मित्रप्रायस्तत्र उपकारलोपत्वेन कृतघ्नत्वेन मित्रत्वं वमति । अविनीतस्यैतल्लक्षणमित्यर्थः । पुनर्यः श्रुतं लब्ध्वा माद्यति, ज्ञानाभ्यासादहङ्कारं करोति विद्यामदोन्मत्त इत्यर्थम् ॥ ७ ॥

अपिशब्दः सम्भावनायां, यः पापपरिक्षेपी, अपि-सम्भाव्यते पापैः समितिगुप्तिस्खलनैः परिक्षिपति तिरस्करोतीत्येवंशीलः पापपरिक्षेपी । समितिगुप्तिविराधकं प्रति तिरस्करोति । कोऽर्थः ? कदाचित् कश्चित् समितिगुप्तिष्वज्ञानितया स्खलति, तदा तं प्रति धिक्करोति, छिद्रं दृष्ट्वान्यं निन्दतीत्यर्थः । तथा मित्रेष्वपि कुप्यति, मित्रेभ्योऽपि शिक्षादातृभ्यः सङ्घेभ्यः क्रुध्यति, स्वयं क्रोधं करोति, तान् वा क्रोधयति । पुनः सुतरामतिशयेन प्रियस्य मित्रस्य हितवाञ्छकस्य गुर्वादेरपि रहसि-एकान्ते पापकं-पापमेव पापकमवर्णवादं भाषते । कोऽर्थः ? अग्रतः प्रियं वक्ति, पृष्ठतः दोषं वक्तीत्यर्थः ॥ ८ ॥

पुनः प्रकीर्णवादी, प्रकीर्णमसम्बद्धं वदति इति प्रकीर्णवादी । अथवा प्रतिज्ञया च इदं इत्थमेव इत्यादिनिश्चयभाषणशीलः । पुनर्दूहिलो द्रोग्धा द्रोहकरणशील इत्यर्थः । पुनः स्तब्धोऽहङ्कारी, अहं तपस्वी इत्यादिजल्पकः । पुनर्लुब्धो रसयुक्ताहारादौ लोभी, पुनरनिग्रहोऽवशीकृतेन्द्रियः । पुनरसंविभागी, संविभजति आनीताहारमन्येभ्यः साधुभ्यः प्रार्थयतीत्येवंशीलः संविभागी, न संविभागी असंविभागी, आहारेण स्वयमेवोदरं बिभर्त्तीत्यर्थः, अन्यस्मै न ददाति । 'अवियत्ते इति' अप्रीतिकरः, दर्शनेन वचनेनाप्रीतिमुत्पादयति, एतैर्लक्षणैरविनीत उच्यते । अथ चतुर्दशस्थानानां नामानि-क्रोधः १, क्रोधस्थिरीकरणम् २, मित्रत्वस्य वमनं-त्यजनम् ३, विद्यामदः ४, परच्छिद्रान्वेषणम् ५, मित्राय क्रोधस्योत्पादनम् ६, प्रियमित्रस्यैकान्ते दुष्टभाषणम्, मुखे मिष्टभाषणम् ७, अविचार्यभाषणम् ८, द्रोहकारित्वम् ९, अहङ्कारित्वं १०, लोभित्वम् ११, अजितेन्द्रियत्वम् १२, असंविभागित्वम् १३, अप्रीतिकरत्वम् १४, चतुर्दश स्थानानि-चतुर्दश हेतूनि-कारणानि अविनीतत्वोत्पादकानि ज्ञेयानि ॥ ९ ॥

अह पन्नरसहिं ठाणेहिं, सुविणीएत्ति वुच्चई ।
नीयावत्ती अचवले, अमाई अकुऊहले ॥ १० ॥

अथ पञ्चदशभिः स्थानैः सुविनीत इत्युच्यते । तानि पञ्चदश स्थानानि इमानि, य एतैः पञ्चदशभिर्लक्षणैर्युक्तो भवति स विनीत इत्यर्थः । प्रथमं यो नीचावर्ती, नीचम् अनुद्धतम्, गुरोः शय्यासनात् अनुच्चम्, तत्र वर्तितुं स्थातुं वा शीलं यस्य स नीचावर्ती । गुरोः शय्यातो गुरोरासनाद्वा नीचे शय्यासने शेते तिष्ठति वा इत्यर्थः १, पुनर्योऽचपलः, न चपलोऽचपलः, अचपलत्वं चतुर्धा भवति । गत्या अचपलः १ स्थित्या अचपलः २, भाषया अचपलः ३, भावेन अचपलः ४ । गत्या अचपलः शीघ्रचारी न भवती १, स्थित्या अचपलस्तिष्ठन्नपि शरीरहस्तपादादिकं अचालयन् स्थिरस्तिष्ठति २, भाषया अचपलोऽसत्यादिभाषी न स्यात् ३, भावेन अचपलः सूत्रे अर्थे अनागते-असमाप्ते सत्येव अग्रेतनं न गृह्णाति ४, इति अचपलस्यार्थः ५ । पुनर्योऽमायी, मायास्यास्तीति मायी, शुभमिष्टान्नाहारादौ आचार्यादीनामवञ्चकः ३ । पुनर्योऽकुतूहलः, न विद्यते कुतूहलं यस्य स अकुतूहलः, कुहकेन्द्रजाल-भगलविद्या-नाटकादीनां न विलोकक इत्यर्थः ४ ॥ १० ॥

अप्पं चाहिक्खिवई, पबंधं च न कुव्वई ।
मित्तिज्जमाणो भयई, सुयं लद्धुं न मज्जइ ॥ ११ ॥

पुनर्योऽल्पमधिक्षिपति, अल्पशब्दोऽत्र अभावार्थः, कमपि न अधिक्षिपति, कमपि कठिनैर्वचनैर्न निर्भर्त्सयतीत्यर्थः ५ । च पुनः प्रबन्धं न करोति, प्रचुरकालं क्रोधं न रक्षति, दीर्घरोषि न स्यादित्यर्थः ६ । मित्रीयमाणं भजते मित्रत्वकर्तारं सेवते । कोऽर्थः ? यः कश्चित् स्वस्मै विद्यादानाद्युपकारं कुर्यात्तस्मै स्वयमपि प्रत्युपकारं करोति, कृतघ्नो न स्यादित्यर्थः ७ । पुनः श्रुतं लब्ध्वा न माद्यति, मदं न करोति ८, इत्यष्टमस्थानम् ॥ ११ ॥

न य पावपरिक्खेवी, न य मित्तेसु कुप्पई ।
अप्पियस्सावि मित्तस्स, रहे कल्लाण भासई ॥ १२ ॥

च पुनः पापपरिक्षेपी न भवति, पापेन परिक्षिपति-तिरस्करोतीत्येवंशीलः पापपरिक्षेपी । समितिगुप्त्यादिषु स्वयं स्खलनं कृत्वा आचार्यादिभिः शिक्ष्यमाणः सन् आचार्यादीनामेव मर्मोद्घाटको न भवति ९ । न च मित्रेभ्यः कुप्यति, अपराधे सत्यपि मित्रोपरि क्रोधं न करोति १० । पुनर्यो मित्रस्य, मम मित्रमित्यङ्गीकृतस्य तस्याप्रियस्य च, अपराधे सत्यपि पूर्वकृतं सुकृतमनुस्मरन् रहस्यपि कल्याणमेव-भव्यमेव भाषते, न च तस्य दूषणं वदतीत्यर्थः ॥ १२ ॥

कलहडमरं वज्जेइ, बुद्धे य अभिजाइए ।
हिरिमं पडिसंलीणे, सुविणीएत्ति वुच्चई ॥ १३ ॥

पुनर्यः कलहडमरं वर्जयति, तत्र कलहं-वाक्ययुद्धं त्यजति । डमरं—चपेटा-मुष्टि-लत्तादिभिर्युद्धम्, तयोरुभयोर्वर्जको यो भवति १२ । पुनर्बुद्धिमान् बुद्धोऽवसरज्ञो भवति ।

पुनर्योऽभिजातिगो भवति, अभिजातिं-कुलीनतां गच्छति-प्राप्नोतीति अभिजातिगः, गुरुकुलवाससेवक इत्यर्थः १३ । पुनर्यो ह्रीमान्, ह्री विद्यते यस्य स ह्रीमान्, कलुषाध्यवसायाऽकार्यकरणे त्रपायुक्त इत्यर्थः १४ । प्रतिसंलीनः, गुरुसकाशेऽन्यत्र वा यतस्ततो न चेष्टते, चेष्टां न करोति स प्रतिसंलीन उच्यते १५ । य एतादृशो भवति स विनीत उच्यते ।

अथ पूर्वोक्तपञ्चदशस्थानानां सुविनीतत्वकारणानां नामान्याह-गुरोरासनाद् द्रव्यभावतो नीचासनोपसेवनम् १, अचपलत्वम् २, अमायित्वम् ३, अकुतूहलत्वम् ४, कस्यापि अनिर्भर्त्सनम् ५, अदीर्घरोषत्वम् ६, मित्रस्योपकारकरणम् ७, विद्यामदस्य अकरणम् ८, आचार्यादीनां मर्मस्यानुद्घाटनम् ९, मित्राय क्रोधस्य अनुत्पादनम् १०, अपराधे सत्यपि मित्रस्य अमित्रस्य वा परपृष्टे दूषणस्य अभाषणम् ११, कलहडमरवर्जनम् १२, गुरुकुलवाससेवनम् १३, लज्जावत्त्वम् १४, प्रतिसंलीनत्वम् १५, एतानि पञ्चदश स्थानानि सुविनीतस्य ज्ञेयानि ॥ १३ ॥

अथ सुविनीतः कीदृक् स्यादित्याह-

वसे गुरुकुले निच्चं, जोगवं उवहाणवं ।
पियंकरे पियंवाई, से सिक्खं लद्धुमरिहई ॥ १४ ॥

स मुनिः शिक्षां लब्धुमर्हति-शिक्षायै योग्यो भवति । स इति कः ? यो गुरुकुले नित्यं वसेत्, गुरोः पूज्यस्य विद्या-दीक्षादायकस्य वा, कुले गच्छे संघाटके वा नित्यं यावज्जीवं तिष्ठेत् । पुनर्यो मुनिर्योगवान्, योगो-धर्मव्यापारः, स विद्यते यस्य स योगवान्, अथवा योगोऽष्टाङ्गलक्षणस्तद्वानित्यर्थः । पुनर्यः साधुरुपधानवान्, उपधानमङ्गोपाङ्गादीनां सिद्धान्तानां पठनाराधनार्थमाचाम्लोपवासनिर्विकृत्यादिलक्षणं तपोविशेषः । स विद्यते यस्य स उपधानवान्, सिद्धान्ताराधनतपोयुक्त इत्यर्थः । पुनर्यः साधुः प्रियङ्करः, आचार्यादीनां हितकारकः । पुनर्यः प्रियवादी, प्रियो वादोऽस्यास्तीति प्रियवादी-प्रियभाषी । एतैर्लक्षणैर्युक्तो । मुनिः शिक्षां प्राप्तुं योग्यो भवति ॥ १४ ॥

अथ बहुश्रुतप्रतिपत्तिरूपमाचारं स्तवद्वारेणाह-

जहा - संखंमि पयं निहितं, दुहाओ वि विरायइ ।
एवं बहुस्सुए भिक्खू, धम्मो कित्ती तहा सुयं ॥ १५ ॥

यथा शङ्खे निहितं पयो-दुग्धं द्विधापि विराजते, उभयप्रकारेण शोभते, पयो धवलम्, अथ च पुनः शङ्खेऽपि धवलेऽत्यन्तधवलत्वेन वर्णो विराजते । एवममुना प्रकारेण शङ्खमध्यदुग्धदृष्टान्तेन बहुश्रुते भिक्षौ धर्मो-यतिधर्मस्तथा कीर्तिः श्रुतं च, एतत्पदार्थत्रयं स्वत एव भासते । बहु-प्रचुरं श्रुतं-श्रुतज्ञानं यस्य स बहुश्रुतः । तथा एवं गुरुकुलवासिनि साधौ बहुश्रुताश्रयविशेषादत्यन्तं शोभते । बहुश्रुते स्थितो धर्मः कीर्तिर्यशश्च मालिन्यं न प्राप्नोति । अत्र कीर्तिर्गुणश्लाघा, यशः सर्वत्र प्रसिद्धत्वम्, इत्यनयोः कीर्तियशसोर्लक्षणं ज्ञेयम् ॥ १५ ॥

जहा से कंबोयाणं, आइन्नो कंथए सिया ।
आसे जवेण पवरे, एवं हवइ बहुस्सुए ॥ १६ ॥

बहुश्रुतः साधुरेवं भवति, एतादृशो एवं विराजते । एवमिति कथं ? यथा कम्बोजानां काम्बोजदेशोद्भवानामश्वानां मध्ये य आकीर्णः-शीलादिगुणैर्व्याप्तो विशुद्धमाता-पितृ-योनिजत्वेन सम्यगाचारः, स्वामिभक्तादिशालिहोत्रशास्त्रोक्तगुणप्रयुक्तः । कीदृश आ-कीर्णः ? कन्थकः, लघुपाषाणभृतकुतपनिपतनसञ्जातशब्दान्न त्रस्यति अथवा शस्त्रादीनां प्रहाराद्रणे निर्भीकः कन्थक उच्यते । पुनः कीदृशः सः ? जवेन-वेगेन सम्यग्गत्या, प्रवरः प्रकर्षेण वरः-श्रेष्ठः । यथा हि सर्वेषु काम्बोजदेशोद्भवेषु अश्वेष्वाकीर्णः कन्थकोऽश्वो ग-मनेन अत्यन्तं प्रधानो भवेत्, राजादीनां वल्लभो भवेत् । तथा बहुश्रुतोऽपि सर्वेषां ज्ञान-क्रियावतां मुनीनां मध्ये परवादिनां वादैरत्रस्तः सम्यगाचारविहारेण विराजमानः स्यात्, सर्वेषां वल्लभो भवेदित्यर्थः ॥ १६ ॥

जहाइन्नसमारूढे, सूरे दढपरक्कमे ।
उभओ नंदिघोसेणं, एवं हवइ बहुस्सुए ॥ १७ ॥

पुनर्यथा शूर 'आइन्नसमारूढः' आकीर्णो जातिविशुद्धघोटकस्तत्र समारूढ आकी-र्णसमारूढः दृढपराक्रमः-स्थिरपराक्रमः स्थिरोत्साहः, केनाप्यन्यसुभटेन न अभिभूयते इत्य-ध्याहारः । न च तं प्रत्याश्रितोऽपि भृत्यादिवर्गः केनाप्यभिभूयते । कथम्भूतः स शूरः ? उ-भयतो वाम-दक्षिणतः, अथवा पृष्ठतोऽग्रतो वा नान्दीघोषेणोपलक्षितः, नान्दी-द्वादशतूर्याणि, तेषां द्वादशतूर्याणां घोषो नान्दीघोषस्तेनोपलक्षितः । अथवा त्वं चिरं जीया इत्यादिबन्दि-जनोच्चारिताशीर्वचनम्, तस्य घोषः- शब्दस्तेनोपलक्षितः । यथैतादृशः शूरः सर्वत्र विजयी स्यात् । एवं बहुश्रुतोऽपि साधुर्जिनप्रवचनाश्वारूढः, दृढपराक्रमो दृप्यत्परवादिदर्शनादत्रस्तः, परवादिजये समर्थः, उभयतो दिन-रजन्योः स्वाध्यायरूपेण नान्दीघोषेणोपलक्षितः । अथवा उभयतः पार्श्वद्वयोः शिष्याध्ययनरूपेण नान्दीघोषेणोपलक्षितः । अथवा प्रवचनोद्दीपकत्वेन स्वतीर्थ्यैश्चिरं जीवत्वसावित्याद्याशीर्वचनरूपेण नान्दीघोषेणोपलक्षितः । परतीर्थ्यैः परा-भवितुमशक्यो भवेत्, तदाश्रितोऽपि सङ्घः केनापि पराभवितुं न शक्यते ॥ १७ ॥

जहा करेणुपरिकिन्ने, कुंजरे सट्ठिहायणे ।
बलवंते अप्पडिहए, एवं हवइ बहुस्सुए ॥ १८ ॥

यथा षष्टिहायनः षाष्टिवार्षिकः कुञ्जरो बलवानप्रतिहतः स्यात् । प्रतिद्वन्द्विगजैः प्रतिहन्तुं शक्यो न स्यात्, तथा बहुश्रुतोऽपि । षष्टिवर्षाणि यावद्गजो वर्धमानबलः स्यात् । कथम्भूतो गजः ? करेणुभिर्हस्तिनीभिः परिकीर्णः- परिवृतः, षष्टिहायनतया कुञ्जरः स्थिरमतिश्च स्यात् ।

एवं बहुश्रुतोऽपि उत्पातिक्यादिचतसृभिर्बुद्धिभिर्विद्याभिर्वा सहितो वर्धमानशास्त्रार्थबलः केनापि प्रतिवादिना जेतुं न शक्यते ॥ १८ ॥

जहा से तिक्खसिंगे, जायखंधे विरायई ।
वसहे जूहाहिवई, एवं हवइ बहुस्सुए ॥ १९ ॥

यथा स इति वक्ष्यमाणो वृषभो यूथस्य-गोवर्गस्य अधिपो विराजते । एवं बहुश्रुतोऽपि विशेषेण राजते । कथम्भूतो वृषभः ? तीक्ष्णशृङ्गः । पुनः कथम्भूतः ? जातस्कन्ध उत्पन्नधूर्धरणभागः, एतादृशो बलीवर्द इव बहुश्रुतोऽपि शोभते । कथम्भूतो बहुश्रुतः ? परपक्षभेदकत्वेन तीक्ष्णे स्वमत-परमतज्ञानरूपे शास्त्रे एव शृङ्गे यस्य स तीक्ष्णशृङ्गः । पुनः कथम्भूतो बहुश्रुतः ? जात-उत्पन्नो गणस्य कार्यरूपधुरं प्रति धौरेयिकत्वेन पुष्टः स्कन्धो यस्य स जातस्कन्धः । पुनः कीदृशो बहुश्रुतः ? यूथाधिपतिः, यूथस्य चतुर्विधसङ्घस्य अधिपतिर्यूथाधिपतिः । एवं बहुश्रुतोऽपि यूथाधिपवृषभवदाचार्यादिपदवीं प्राप्तः सन् विराजते ॥ १९ ॥

जहा से तिक्खदाढे, उदग्गे दुप्पहंसए ।
सीहे मियाण पवरे, एवं हवइ बहुस्सुए ॥ २० ॥

यथा सिंहो मृगाणामरण्यजीवानां मध्ये प्रवरः-प्रधानः स्यात् । एवं बहुश्रुतोऽपि सिंह इव अन्यतीर्थीयमृगाणां मध्ये प्रकर्षेण श्रेष्ठः स्यात् । कथम्भूतः सिंहः ? तीक्ष्णदंष्ट्रः । पुनः कीदृशः सिंहः ? उदग्र-उत्कटः । पुनः कथम्भूतः ? दुष्प्रहंस्यको-दुरभिभवः, अन्यैर्जीवैर्दुर्धृष्यो-दुःसह इत्यर्थः । बहुश्रुतोऽपि सिंह इव । कथम्भूतो बहुश्रुतः ? तीक्ष्णदंष्ट्रः, तीक्ष्णाः सप्तनयविद्यारूपा दंष्ट्रा यस्य स तीक्ष्णदंष्ट्रः, अत एव उत्कटो दुर्जयः । पुनः कथम्भूतो बहुश्रुतः ? दुष्प्रहंस्यकः, अन्यतीर्थ्यैर्दुर्धृष्यः, कलितुमशक्य इत्यर्थः ॥ २० ॥

जहा से वासुदेवे, संखचक्कगयाधरे ।
अप्पडिहयबले जोहे, एवं हवइ बहुस्सुए ॥ २१ ॥

यथा स प्रसिद्धो वासुदेवोऽप्रतिहतबलः स्यात्, अप्रतिहतं केनाप्यनिवारितं बलं यस्य सोऽप्रतिहतबलः । एवं बहुश्रुतोऽपि केनापि परमतिना अनिवारितबलः स्यात् । कीदृशो वासुदेवः ? शङ्खचक्रगदाधरः, वासुदेवस्य हि रत्नसप्तकं स्यात्, यतः-

"चक्कं धणुहं खग्गो, मणी गया होइ तह य वणमाला ।
संखो सत्त इमाइं, रयणाइं वासुदेवस्स ॥ १ ॥" [बृ सं.-२४८]

अत्र त्रयाणामेव ग्रहणं बहुश्रुतेन साम्यार्थं, सप्तानां मध्ये त्रयाणामेव प्राधान्यमप्यस्ति । पुनः कीदृशो वासुदेवः ? योधः, युध्यति शत्रून् प्रति संहरतीति योधः, यदुक्तम्-

"युद्धसूरा वासुदेवा, खमासूरा अरिहंता ।
तपसूरा अणगारा, भोगसूरा चक्कवट्टी य ॥ १ ॥"

वासुदेवो हि स्वशरीरेण युद्धं कृत्वा शत्रून् जयतीत्यर्थः । एवं बहुश्रुतोऽपि वासुदेववत् । कीदृशो बहुश्रुतः ? शङ्खचक्रगदातुल्यानि रत्नत्रयाणि ज्ञान-दर्शन-चारित्ररूपाणि धरतीति शङ्खचक्रगदाधरः । पुनः कीदृशो बहुश्रुतः ? योधः- अन्तरङ्गशत्रु-घातकः । अत्र बहुश्रुतस्य वासुदेवोपमानम् ॥ २१ ॥

जहा से चाउरंते, चक्कवट्टी महिड्ढिए ।
चउद्दसरयणाहिवई, एवं हवइ बहुस्सुए ॥ २२ ॥

यथा स इति प्रसिद्धश्चक्रवर्ती विराजते इत्यध्याहारः, तथा बहुश्रुतोऽपि विराजते । कीदृशश्चक्रवर्ती ? चातुरन्तः चतुर्भिर्हय-गज-रथ-पदातिभिः सेनाङ्गैरन्तोऽरीणां विनाशो यस्य स चतुरन्तः, चतुरन्त एव चातुरन्तः, आसमुद्रं आहिमाचलं विविधविद्याधरवृन्दगीत-कीर्तितया एकछत्रं षट्खण्डराज्यपालकश्चातुरन्तः । पुनःकीदृशश्चक्रवर्ती ? महर्द्धिक, महती ऋद्धिर्यस्य स महर्द्धिकः, चतुःषष्टिसहस्रान्तःपुरनारीणां शय्यासु वैक्रियशक्तिं विधाय रममाणः, वैक्रियादिऋद्धिसहित इत्यर्थः, दिव्यानुकारिलक्ष्मीयुक्तो वा । पुनः कीदृश-श्चक्रवर्ती ? चतुर्दशरत्नाधिपतिः । चतुर्दशरत्नान्यमूनि-सेनापति १, गृहपति २, पुरोहित ३, गज ४, हय ५, सूत्रधार ६, स्त्री ७, चक्र ८, छत्र ९, चर्म १०, मणि ११, काकिनी १२, खड्ग १३, दण्ड १४, एतेषां रत्नानां स्वामी । एवं बहुश्रुतोऽपि । कीदृशो बहुश्रुतः ? चतुर्भि-र्दान-शील-तपो-भावलक्षणैर्धर्मैरन्तश्चतसृणां गतीनां यस्य स चतुरन्तः, चतुरन्त एव चातुरन्तः । चतुर्दशरत्नाधिपतिश्चतुर्दशपूर्वरूपाणि रत्नानि, तेषामधिप इत्यर्थः । पुनः कीदृशो बहुश्रुतः ? महर्द्धिकः, महत्य ऋद्धय आमर्षौषधिवप्रौषधिखेलौषध्यादयो यस्य स महर्द्धिको लब्ध्यृद्धिसहित इत्यर्थः । अथवा महती ऋद्धिर्ज्ञानसंपत्तिर्यस्य स महर्द्धिकः ॥ २२ ॥

जहा से सहस्सक्खे, वज्जपाणी पुरंदरे ।
सक्के देवाहिवई, एवं हवइ बहुस्सुए ॥ २३ ॥

यथा स इति प्रसिद्धः शक्र-इन्द्रो विराजते, तथा बहुश्रुतोऽपि विराजते । कीदृशः शक्रः ? सहस्राक्षः सहस्रमक्षीणि यस्य स सहस्राक्षः-सहस्रनेत्रः । पुनः कीदृशः ? वज्रपाणिर्वज्रशस्त्रहस्तः । पुनः कीदृशः ? पुरन्दरः, पुराणि दैत्यनगराणि दारयति-विध्वंसयतीति पुरन्दरः, दैत्यनगरविध्वंसकः । पुनः कीदृशः ? देवाधिपतिः, देवेषु अधिपतिर्देवाधिपतिः, देवेषु अधिककान्तिधारी । अथ कीदृशो बहुश्रुतशक्रः ? सहस्रमक्षीणि श्रुतज्ञानानि यस्य स सहस्राक्षः सहस्रसङ्ख्यैरक्षिभिर्नेत्रैरिव श्रुतज्ञानभेदैः पश्यतीत्यर्थः । पुनः कीदृशो बहुश्रुतशक्रः ? वज्रपाणिः, वज्रं-वज्राकारं पाणौ यस्य स वज्रपाणिः, विद्यावतः पूज्यस्य हस्तमध्ये वज्रलक्षणस्य सम्भवात् । पुनः कथम्भूतो बहुश्रुतशक्रः ? पुरन्दरः, पुरं-स्वतनुं दारयति-तपसा दुर्बलीकरोतीति पुरन्दरः, तपस्वी इत्यर्थः । पुनः

कथम्भूतो बहुश्रुतशक्रः ? देवताधिपतिः, देवेषु सर्वसाधुषु अधिपतिरधिकः, सर्वसाधूनधिकं यथास्यात्तथा पाति-रक्षतीति देवाधिपतिः ।

'रिसी हि देवा य समं विवित्ता' इत्युक्तेः ।

देवा अधिकं पान्ति-रक्षन्ति सेवां कुर्वन्त्युपद्रवेभ्यो रक्षन्ति हरिकेशबलसाधुवत् वैयावृत्यं कुर्वन्तीति देवाधिपतिः, देवैरपि पूज्यते इत्यर्थः ॥ २३ ॥

जहा से तिमिरविद्धंसे, उत्तिट्ठंते दिवायरे ।
जलंते इव तेएणं, एवं हवइ बहुस्सुए ॥ २४ ॥

यथा स इति प्रसिद्ध उत्तिष्ठन्-उद्गच्छन् दिवाकरः । सूर्यस्तेजसा ज्वलन् ज्वालाभिरुत्सर्पन्निव विराजते, तथा बहुश्रुतोऽपि राजते । कथम्भूतः सूर्यः ? तिमिरमन्धकारं विध्वंसत इत्येवं शीलस्तिमिरविध्वंसी, अथवा तिमिरस्य विध्वंसो यस्मात् स तिमिरविध्वंसः । अथ बहुश्रुत एव दिवाकरः कीदृग्स्यात् ? कथम्भूतो बहुश्रुतसूर्यः ? तिमिरं मिथ्यात्वान्धकारं विध्वंसयतीति तिमिरविध्वंसः । किं कुर्वन् ? उत्तिष्ठन् क्रियानुष्ठानादौ अप्रमादीभवन् । पुनः कीदृशो बहुश्रुतदिवाकरः ? किं कुर्वन्निव ? तेजसा द्वादशविधतपस्तेजसा माहात्म्येन वा ज्वलन् देदीप्यमानः, परवादिभिर्दुष्टुमप्यशक्य इत्यर्थः ॥ २४ ॥

जहा से उडुवई चंदे, नक्खत्तपरिवारिए ।
पडिपुन्ने पुण्णमासीए, एवं हवइ बहुस्सुए ॥ २५ ॥

यथा पूर्णमास्यां राकायां उडुपतिश्चन्द्रो भवति, जनाह्लादको भवति, चन्दति आह्लादयतीति चन्द्रः, अन्वर्थनामा भवति । तथा बहुश्रुतोऽपि पूर्णमास्यां सम्यक्त्वप्राप्तो प्रतिपूर्णः, उडुपतिरिव चन्द्रो भवति, भव्यजनाह्लदको भवति । कीदृश उडुपतिः ? नक्षत्रैर्ग्रह-तारकादिभिः परिवृतः, परिवारो जातोऽस्येति परिवारित इति वा । पुनः कीदृश उडुपतिः ? प्रतिपूर्णः षोडशकलाभिर्युक्तः पूर्णो मासः-संसारो यस्याः सा पूर्णमासी, सम्यक्त्वलब्धि-रूपायां पूर्णमास्यां बहुश्रुतरूप उडुपतिर्भव्यजनाह्लादको भवतीति भावः । पुनः कीदृशो बहुश्रुतोडुपतिः ? साधुभिर्नक्षत्रैरिव परिवारितः सहितः, पुनः कीदृशो बहुश्रुतोडुपतिः ? प्रतिपूर्णः सर्वधर्मकलाभिः सम्पूर्ण इत्यर्थः ॥ २५ ॥

जहा से सामाइयाणं, कुट्ठागारे सुरक्खिए ।
नाणाधन्नपडिपुण्णे, एवं हवइ बहुस्सुए ॥ २६ ॥

यथा स इति प्रसिद्धः सामाजिकानां-महागृहस्थानां कोष्ठागारो विराजते, तथा बहुश्रुतोऽपि विराजते । समाजो-जनसमूहस्तमर्हंतीति सामाजिकाः, तेषां सामाजिकानां-कौटुम्बिकानाम् । कथम्भूतः कोष्ठागारः ? सुरक्षितः, सुतरामतिशयेन चौरमूषकादिभ्य

उपद्रवेभ्यो रक्षितः सुरक्षितः । पुनः कीदृशः कोष्ठागारः ? नानाधान्यप्रतिपूर्णः, चतुर्विंशति-धान्यैः प्रतिपूर्णो भृतः । अथ बहुश्रुत कीदृशः ? सुरक्षितः, सुतरामतिशयेन गच्छसङ्घाटस्थ-मुनिभिर्यत्नेन रक्षितः । पुनर्नानाप्रकारैरङ्गोपाङ्गादिरूपैर्धान्यैः प्रतिपूर्ण इत्यर्थः ॥ २६ ॥

जहा से दुमाण पवरा, जंबूनाम सुदंसणा ।
अणाढियस्स देवस्स, एवं भवई बहुस्सुए ॥ २७ ॥

यथा दुमाणां मध्ये जम्बूनामा सुदर्शना इत्यपरनामा दुमो-वृक्षः प्रवरः-प्रधानः शोभते, तथा बहुश्रुतोऽपि सर्वमुनीनां मध्ये प्रधानो विराजते । स च जम्बूसुदर्शनानामा वृक्षोऽनादृतस्य जम्बूद्वीपाधिष्ठातृदेवस्य वर्तते । तस्य हि जम्बूद्वीपाधिपाश्रितत्वेन सर्ववृक्षेभ्यः प्रधानत्वं ज्ञेयमित्यर्थः । बहुश्रुताऽपि मिष्टफलसदृशसिद्धान्तार्थफलप्रदः, देवादिभिरगम्यः ॥ २७ ॥

जहा सा नईण पवरा, सलिला सागरंगमा ।
सीया नीलवंतप्पवहा, एवं हवइ बहुस्सुए ॥ २८ ॥

यथा 'सा' इति प्रसिद्धा नदीनां मध्ये सीतानाम्नी नदी प्रवरा-प्रधाना शोभते । तथा बहुश्रुतोऽपि शोभते । कथम्भूता सीता नदी ? सलिला, सलिलं पानीयमस्या अस्तीति सलिला, नित्यनीरा । पुनः कथम्भूता सीता ? सागरंगमा, सागरं गच्छतीति सागरंगमा । पुनः कीदृशा सीता ? 'नीलवंतप्पवाहा' नीलवतः पर्वतात् प्रवाहो यस्याः सा नीलवत्प्रवाहा, नीलवत्पर्वतादुत्तीर्णेत्यर्थः । बहुश्रुतोऽपि साधूनां मध्ये प्रधानः, निर्मलजलतुल्यसिद्धान्त-सहितः । पुनः सागरमिव मुक्तिस्थानंगामी । पुनर्बहुश्रुतो नीलवत्पर्वतसदृशोन्नतकुलात्प्रसूतः, उत्तमकुलप्रसूतो हि सद्विद्याविनयौदार्यगाम्भीर्यादिगुणयुक् स्यात् ॥ २८ ॥

जहा से नगाण पवरे, सुमहं मंदरे गिरी ।
नाणोसहिपज्जलिए, एवं हवई बहुस्सुए ॥ २९ ॥

यथा स इति प्रसिद्धो नगानां-पर्वतानां मध्ये सुतरामतिशयेन महानुच्चैस्तरो मन्दरो मेरु-गिरिर्मेरुपर्वतः शोभते, तथा बहुश्रुतोऽपि शोभते । कथम्भूतो मेरुः ? नानौषधीप्रज्ज्वलितः, नानाप्रकाराभिरौषधीभिः शल्य-विशल्या-संजीवनी-संरोहिणी-चित्रावल्ली-सुधावल्ली-विषापहारिणी-शस्त्रनिवारिणी-भूतनागदमन्यादिभिर्मूलीभिः प्रज्ज्वलितो-जाज्वल्यमानः, एवं बहुश्रुतः सर्वसाधूनां प्रवरो गुणैरुच्चैस्तरः, श्रुतस्य माहात्म्येनात्यन्तं स्थिरः, परवादिवा-दवात्या अचलः, अनेकलब्ध्यतिशयसिद्धिरूपाभिरौषधीभिर्मिथ्यात्वान्धकारेऽपि वज्रस्वामि-मानतुङ्ग-कुमुदचन्द्रादिवत् जैनशासनप्रभावनारूपप्रकाशकारकः ॥ २९ ॥

जहा से सयंभुरमणे, उदही अक्खओदए ।
नाणारयणपडिपुन्ने, एवं हवइ बहुस्सुए ॥ ३० ॥

यथा स इति प्रसिद्धः स्वयम्भूरमणनामा चरमोदधिर्विराजते, तथा बहुश्रुतोऽपि विराजते। कथम्भूतः स्वयम्भूरमणोदधिः ? अक्षयं शाश्वतमविनाशि उदकं-जलं यस्य सोऽक्षयोदकः। पुनः कथम्भूतः स्वयम्भूरमणसमुद्रः ? नानारत्नप्रतिपूर्णः, बहुप्रकारैरसङ्ख्यैर्माणिक्यैर्भृतः, तथा बहुश्रुतोऽपि स्वयम्भूरमण इव। कथम्भूतो बहुश्रुतः ? अक्षयज्ञानोद-कोऽक्षयज्ञानजलः, पुनर्बहुश्रुतः स्वयम्भूरमणसमुद्रवन्नानाप्रकारातिशयरूपरत्नैः सम्पूर्णः ॥ ३० ॥

समुद्दगंभीरसमा दुरासया, अचक्किया केणइ दुप्पहंसया ।
सुयस्स पुण्णा विउलस्स ताइणो, खवित्तु कम्मं गइमुत्तमं गया ॥ ३१ ॥

एतादृशाः श्रुतस्य पूर्णा बहुश्रुता उत्तमां गतिं गताः-प्रधानं स्थानं मुक्तिं प्राप्ताः। किं कृत्वा ? कर्माणि क्षपयित्वा। श्रुतस्य पूर्णा इत्यत्र तृतीयास्थाने षष्ठी, श्रुतेन-श्रुतज्ञानेन पूर्णाः। कीदृशस्य श्रुतस्य ? विपुलस्य-विस्तीर्णस्य, अनेक-हेतु-युक्ति-दृष्टान्तोत्सर्गा-ऽपवादनयाद्यनेकरहस्यार्थयुक्तस्य। कीदृशा बहुश्रुताः ? समुद्रगम्भीरसमाः समुद्रस्य गाम्भीर्येण तुल्याः समुद्रगम्भीरसमाः। पुनः कीदृशाः ? दुराश्रयाः, केनापि परवादिना कपटं कृत्वा न आश्रयणीयाः, केनापि ठगितुमशक्या इत्यर्थः। पुनः कथम्भूताः ? अचकिता-अत्रासिताः, परीषहैस्त्रासमप्रापिताः। पुनः कीदृशाः ? दुष्प्रहंस्याः परवादिभिः पराभवि-तुमशक्याः। एतादृशाः श्रुतज्ञानधरा मोक्षं गता गच्छन्ति गमिष्यन्ति च ॥ ३१ ॥

तम्हा सुअमहिट्ठिज्जा, उत्तमट्ठं गवेसए ।
जेणप्पाणं परं चेव, सिद्धिं संपाउणिज्जासे ॥ ३२ ॥ त्ति बेमि ॥

उत्तमार्थगवेषको मोक्षार्थी पुमान्, तस्मात् बहुश्रुतस्य मोक्षप्राप्तियोग्यत्वात् श्रुतं सिद्धान्तं अधितिष्ठेत्, उत्तमश्चासावर्थश्च उत्तमार्थो - मोक्षार्थस्तं गवेषते इति उत्तमार्थगवेषकः। येन श्रुतेन आत्मानं च पुनः परमपि सिद्धिं प्रापयेत्-मोक्षं गमयेत्। कोऽर्थः ? बहुश्रुतः स्वयमपि मोक्षं प्राप्नोति, अन्यमपि स्वसेवकं मोक्षं प्रापयतीत्यर्थः। इत्यहं ब्रवीमि। सुधर्मास्वामी जम्बूस्वामिनं प्रत्याह ॥ ३२ ॥

इति बहुश्रुतपूजाख्यमेकादशमध्ययनं सम्पूर्णम् ॥ ११ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यश्रीलक्ष्मीवल्लभगणि-विरचितायां बहुश्रुतपूजाख्यस्याध्ययनस्यार्थः सम्पूर्णः।

अथ द्वादशं हरिकेशीयमध्ययनं प्रारभ्यते ।

एकादशेऽध्ययने बहुश्रुतपूजा प्रोक्ता, अथ द्वादशे बहुश्रुतेनापि तपो विधेय इत्येकादशद्वादशयोः सम्बन्धः । अतोऽत्राध्ययने तपोमाहात्म्यमाह-हरिकेशबल साधुस्तपस्वी बभूव, तत्सम्बन्धो यथा-मथुरानगर्यां शङ्खो नाम राजा विषयसुखविरक्तः स्थविराणामन्तिके निष्क्रान्तः, कालक्रमेण गीतार्थो जातः, पृथ्वीमण्डले परिभ्रमन् हस्तिनागपुरे प्राप्तः, तत्र भिक्षानिमित्तं प्रविष्टः । तत्रैको मार्गोऽतिवोष्णोऽस्ति, उष्णकाले केनापि गन्तुं न शक्यते, ततस्तन्मार्गस्य हुतवह इति नाम सञ्जातम् । तेन मुनिनासन्नगवाक्षस्थितः सोमदेवाभिधानः पुरोहितः पृष्टः, किमेतेन मार्गेण व्रजामीति ? पुरोहितेन चिन्तितं यद्यसौ हुतवहमार्गे गच्छति, तदा दह्यमानममुं पश्यतो मम कौतुकमनोरथः पूर्णो भवतीति ।

अतस्तेन स एव मार्गो निर्दिष्टः, ईर्योपयुक्तो मुनिस्तेनैव मार्गेण गन्तुं प्रवृत्तः । लब्धिपात्रस्य तस्य पादप्रभावतस्तादृशोऽपि मार्गः शान्तो बभूव । तस्मिन्मार्गे शनैः शनैश्चलन्तं मुनिं वीक्ष्य स पुरोहितः स्वावासगवाक्षादुत्तीर्य स्वपदाभ्यां तं मार्गं स्पृष्टवान्, हिमवच्छीतलो मार्गः । तेन ज्ञातं मुनिपादमाहात्म्यम्, एवं च चिन्तितं-हा ! मया पापकर्मणा पुण्यात्मनोऽस्य कीदृशो मार्गः प्रकाशितः, परमयं पादस्पर्शादेव मार्गतापोपशान्तिर्जाता । ततो यद्यहमस्य शिष्योऽभूवं तदा मामेतत्प्रायश्चित्तं भवतीति चिन्तयित्वा तस्य मुनेः पुरः स्वपापं प्रकाशितम्, पादौ च प्रणतौ । मुनिनापि तस्य सम्यग्धर्मः प्रकाशितः । जातसंवेगेन तेन सोमदेवेन तस्य मुनेरन्तिके दीक्षा गृहीता, चारित्रं विशेषात् पालयति । परमहं ब्राह्मणत्वादुत्तमजातिरिति मदं कुरुते, परं नैवं भावयति ।

"गुणैरुत्तमतां याति, न तु जातिप्रभावतः ।
क्षीरोदधिसमुत्पन्नः, कालकूटः किमुत्तमः ॥ १ ॥" किञ्च-

"कौशेयं कृमिजं सुवर्णमुपलाद् दुर्वापि गोरोमतः,
पङ्कात्तामरसं शशाङ्कमुदधेरिन्दीवरं गोमयात् ।"
काष्ठादग्निरहेः फणादपि, मणिर्गोपित्ततो रोचना,
जाता लोकमहार्घतां निजगुणैः, प्राप्ताश्च किं जन्मना ॥ २ ॥ [ ]

एवं परमार्थमभावयन् स जातिमदस्तब्धः सोमदेवः कियत्कालं संयममाराध्य कालक्रमेण मृतो देवो जातः । तत्र चिरकालं वाञ्छितसुखानि भुक्तवान् । ततश्च्युतो गङ्गातीरे हरिकेशाधिपस्य बलकोष्ठाभिधानस्य चण्डालस्य भार्याया गौर्याः कुक्षौ समुत्पन्नः । सा च स्वप्ने फलितमाम्रवृक्षं ददर्श, स्वप्नपाठकानां च कथितवती । तैरुक्तं-तव प्रधानपुत्रो भविष्यतीति । कालमासे दारको जातः, जातिमदकरणेनास्य चण्डालकुलोत्पत्तिर्जाता । स बालः सौभाग्यरूपरहितो बान्धवानामपि हसनीयः, तस्य बल इति नाम प्रतिष्ठितम् । स च वर्धमानः प्रकामं क्लेशकारित्वेन सर्वेषामुद्वेगकारी जातः ।

अन्यदा वसन्तोत्सवे प्राप्ते चाण्डालकुटुम्बानि विविधखाद्यपानकरणाय पुराद् बहिर्मिलितानि सन्ति, स बलनामा बालकः परबालैः समं क्लेशं कुर्वन् ज्ञातिवृद्धैर्निर्यूढः। दूरस्थः स विलासक्रीडापराणि परबालानि पश्यति, परं मध्ये समायातुं न शक्नोति। तस्मिन्नवसरे तत्र सर्पो निर्गतः, सविष इति कृत्वा चाण्डालैर्मारितः। पुनस्तत्र प्रलम्बमलशिकं निर्गतं, निर्विषमिति कृत्वा तैर्न विनाशितम्। तादृशमरणं दृष्ट्वा तेन बलबालेन चिन्तितम्, निजेनैव दोषेण प्राणिनः पराभवं सर्वत्र प्राप्नुवन्ति। यद्यहं सर्पसदृशः सविषस्तदा पराभवपदं प्राप्तः, यद्यलशिकवन्निरपराधोऽभविष्यम्, तदा न मे कश्चित्पराभवोऽभविष्यदिति सम्यग्भावयतस्तस्य जातिस्मरणमुत्पन्नम्। विमानवाससुखं स्मृतिमार्गमागतम्। जातिमदविपाकोऽपि ज्ञातः। संवेगमागतेन दीक्षा गृहीता।

स हरिकेशीबलः शुद्धक्रियां पालयन् षष्ठा-ऽष्टम-दशम-द्वादश-मासार्ध-मासादितपस्तपन् क्रमेण विहारं कुर्वन् वाराणसीं नगरीं प्राप्तः। तत्र तिन्दुकवने मण्डिकयक्षप्रासादे स्थितो मासक्षपणादितपः करोति। तद्गुणावर्जितश्च यक्षस्तं महर्षिं निरन्तरं सेवते। अन्यदा तत्र वने एकोऽपरो यक्षः प्राघूर्णकः समागतः, तेन मण्डिकयक्षस्य पृष्टम्-कथं त्वं मद्वने साम्प्रतं नायासि? तेनोक्तमहमिहस्थितमिमं मुनिं सेवे, एतद्गुणावर्जितश्चान्यत्र गन्तुं नोत्सहे। सोऽप्यागन्तुको यक्षस्तद्गुणावर्जितो बभूव। आगन्तुकयक्षेण मण्डिकयक्षस्योक्तं-एतादृशा मुनयो मद्वनेऽपि सन्ति, तत्र गत्वा अद्य तान् सेवामहे, इत्युक्त्वा द्वावपि तौ तत्र गतौ। विकथादिप्रमादपरास्ते तत्र ताभ्यां दृष्टाः, तेभ्यो विरक्तौ तौ यक्षौ पश्चात्तत्रागत्य हरिकेशीबलं महामुनिं प्रणमतः, प्रत्यहं सेवते स्म।

अन्यदा तत्र यक्षायतने वाराणसीपतिकौशलिकराजपुत्री भद्रानाम्नी नानाविधपरिजनानुगता पूजासामग्रीं गृहीत्वा समायाता। यक्षप्रतिमां पूजयित्वा प्रदक्षिणां कुर्वन्ती मलक्लिन्नवस्त्रगात्रं दुस्सहतपःकरणकृशं कुरूपं तं महामुनिं दृष्ट्वा थूत्कृतं निससर्ज। यक्षेण चिन्तितम्-इयं महामुनिं तिरस्कुरुते, अतो मया शिक्षणीयेति। अधिष्ठिता तेन यक्षेण, असमञ्जसं प्रलपन्ती दासीभिरुत्पाट्य राजगृहं नीता। राज्ञा मान्त्रिका वैद्याश्चाकारिताः। तैश्चिकित्सायां कृतायामपि न तस्याः कश्चिद्विशेषो जातः। अथ तस्या मुखे सङ्क्रान्तो यक्षः स्पष्टमेवमाह-अनया मदायतनस्थितो महानुभावः संयमी निन्दितः, यदीयं तस्य संयमिनः पाणिग्रहणं कुरुते तदा मयास्या वपुर्मुच्यते, नान्यथेति। चिन्तितं राज्ञा, ऋषिपत्नी भूत्वापीयं जीवत्विति विमृश्य यक्षवचनं राज्ञा प्रतिपन्नम्। सा स्वस्थशरीरा जाता, सर्वालङ्कारभूषिता गृहीतविवाहोपकरणा महाविभूत्या यक्षायतने गता, तस्य महर्षेः पादौ प्रणम्यैवं विज्ञप्तिं चकार। हे महर्षे! त्वं मत्करं करेण गृहाण। मुनिना भणितं-भद्रे! बुधजननिन्दितयानया सङ्कथयालम्। अपि च ये साधव एकस्यां वसतौ स्त्रीभिः समं वासमपि नेच्छन्ति, तेन साम्प्रतं करं करेण कथं गृह्णन्ति? सिद्धिवधूबद्धरागाः साधवः कथमशुचिपूर्णासु युवतीषु रज्यन्ते? अथ तेन यक्षेण तस्य महर्षेः शरीरं प्रच्छाद्य तत्सदृशं भिन्नरूपं विकुर्व्य करं करेण जगृहे।

एकरात्रिं यावद्रक्षिता, प्रभाते यक्षो दूरीभूतः, स्वाभाविकरूपो यतिस्तामाह-भद्रे ! अहं संयमी नैव स्त्रीस्पर्शं त्रिधा शुद्ध्या करोमि, न मया त्वत्करः करेण गृहीतः, किन्तु मद्भक्तेन यक्षेणैव त्वं विडम्बिता, स च साम्प्रतं दूरे गतः, मत्तस्त्वं दूरे भव। महर्षिणेत्युक्ता सा प्रभाते सर्वं स्वप्नमिव मन्यमाना भृशं विखिन्ना राज्ञो गृहे गता। सर्वं तत्स्वरूपं राज्ञ आचख्यौ। तदानीं राज्ञः पुर उपविष्टेन रुद्रदेवपुरोहितेनोक्तम् राजन्नियमृषिपत्नी, तेन मुक्ता ब्राह्मणाय दीयते, ततो राज्ञा सा तस्यैव दत्ता। पुरोहितोऽपि तया सह विषयसुखमनुभवन् कियन्तं कालं निनाय।

अन्यदा तस्या यज्ञपत्नीत्वकरणार्थं यज्ञस्तेन कर्तुमारब्धः। तत्र यज्ञमण्डपे देशान्तरेभ्योऽनेकभट्टाः समायाताः। तदर्थं भोजनसामग्री तत्र प्रगुणीकृता। अस्मिन्नवसरे तत्र स महर्षिर्मासोपवासपारणके गोचर्यां भ्रमन् यज्ञमण्डपे समायातः, इत्यादि कथानकं हरिकेशीबलस्योक्तम्, शेषकथानकं सूत्रादेवावसेयम्-

सोवागकुलसंभूओ, [१]गुणत्तयधरो मुणी।
हरिएसबलो नाम, आसी भिक्खू जिइंदिओ ॥ १ ॥

स हरिकेशीबलो नाम प्रसिद्धो भिक्षुरासीत्। कीदृशः स साधुः ? जितेन्द्रियः, जितानी इन्द्रियाणि येन स जितेन्द्रियो-विषयजेता। पुनः कीदृशः ?श्वपाककुलसम्भूतः, श्वपाकचाण्डालस्तस्य कुले सम्भूतः। पुनः कीदृशः ? मुनिर्मन्यते जिनाज्ञामिति मुनिर्जिनाज्ञापालक इत्यर्थः। पुनः कीदृशः ? गुणत्रयधरः, गुणत्रयं ज्ञान-दर्शन-चारित्राख्यं धरतीति गुणत्रयधरः ॥ १ ॥

इरिएसणभासाए, उच्चारसमिईसु य।
जओ आयाणनिक्खेवे, संजओ सुसमाहिओ ॥ २ ॥

पुनः कथम्भूतो हरिकेशीबलो मुनिः ? ईर्यैषणाभाषोच्चारसमितिषु 'जओ' इति यतो-यत्नवान्। ईर्या च एषणा च भाषा च उच्चारश्च ईर्यैषणाभाषोच्चारास्तेषां समितयः सम्यग्व्यवहारा ईर्यैषणाभाषोच्चारसमितयस्तासु ईरणं-ईर्या गमना-ऽऽगमनम्, तस्य समितौ गमना-ऽऽगमनव्यवहारे यत्नवान्। एषणमेषणा आहारग्रहणम्, तत्र समितिरेषणासमितिस्तत्र यत्नवान्। एवं भाषासमितौ-भाषाव्यवहारे यत्नवान्। 'भासाऐ' इत्यत्र एकार आर्षत्वात् तिष्ठति। उच्चारसमितौ — मूत्र-पुरीषादिपरिष्ठापनविधौ यत्नवान्। पुनः कीदृशो हरिकेशीबलः साधुः ? आदाननिक्षेपे— वस्त्र-पात्राद्युपकरणग्रहण-मोचने सं-सम्यक् प्रकारेण यतः संयतः संयमी। पुनः कीदृशः ? सुतरामतिशयेन समाधितः समाधिसहितः, चित्तस्थैर्यसहित इत्यर्थः। पञ्चसमितियुक्तः स साधुरस्तीत्यर्थः ॥ २ ॥

---

१ गुणुत्तरधरो-L.D.। अन्यसंस्करणेऽपि। तत्र वृत्तिरपि एवं गुणोत्तरान् प्रधानान् ज्ञानादीन् धारयतीति गुणोत्तरधरो मुनिः-" इत्युक्तं सर्वार्थसिद्धिवृत्यां पृ. २३७ B. ॥

मणगुत्तो वयगुत्तो, कायगुत्तो जिइंदिओ ।
भिक्खट्ठा बंभइज्जंमि, जन्नवाडमुवट्ठिओ ॥ ३ ॥

पुनः कीदृशः ? मनोगुप्त्या गुप्तो मनोगुप्तः, पुनर्वचनगुप्त्या गुप्तो वचोगुप्तः, पुनः कायगुप्त्या गुप्तः कायगुप्तः, इत्यत्र सर्वत्र मध्यमपदलोपी समासः । पुनर्जितेन्द्रियः, एतादृशो हरिकेशीबलः साधुर्भिक्षार्थं ब्राह्मणानाम् ईज्या ब्राह्मणेज्या, तस्यां ब्राह्मणेज्यायां-ब्राह्मणयज्ञपाटके उपस्थितः । यत्रब्राह्मणा यज्ञं कुर्वन्ति तत्र यज्ञपाटकान्तिके प्राप्तः ॥ ३ ॥

तं पासिउणमेज्जंतं, तवेण परिसोसियं ।
पंतोवहिउवगरणं, उवहसंति अणारिया ॥ ४ ॥

तं हरिकेशीबलं साधुम् 'एज्जंतं' आयान्तं 'पासिउण' दृष्ट्वा अनार्या दुष्टा ब्राह्मणा उपहसन्ति-उपहासं कुर्वन्ति । कीदृशं तं ? तपसा परिशोषितम्, तपसा दुर्बलीकृतम् । पुनः कीदृशं तं ? प्रान्तोपध्युपकरणं-जीर्णवस्त्रोपधिधारकम्, प्रान्तं - जीर्णं मलिनत्वादिनासारम्, उपधिर्वर्षाकल्पादिः, स एव उपकरणं धर्मोपष्टम्भहेतुरस्येति प्रान्तोपध्युपकरणस्तं प्रान्तोपध्युपकरणम् ॥ ४ ॥

जाइमयपडिथद्धा, हिंसगा अजिइंदिया ।
अबंभचारिणो बाला, इमं वयणमब्बवी ॥ ५ ॥

ते ब्राह्मणा विवेकविकला इदं वचनमब्रुवन् । कीदृशास्ते ? जातिमदप्रतिस्तब्धाः, जातिमदेन ब्राह्मण-ब्राह्मण्युद्भवत्वेन यो मदोऽहङ्कारस्तेन प्रतिस्तब्धा-अनम्रा जातिमद-प्रतिस्तब्धाः । पुनः कीदृशाः ? हिंस्त्रका जीवहिंसाकरणशीलाः । पुनः कीदृशाः ? अजि-तेन्द्रिया-विषयासक्ताः । पुनः कीदृशाः ? अब्रह्मचारिणो-मैथुनाभिलाषिणः, अब्रह्मणि-कामसेवनायां चरन्ति-रमन्त इत्यब्रह्मचारिणः कुशीला इत्यर्थः ॥ ५ ॥

ते ब्राह्मणाः किमब्रुवन्नित्याह-

कयरे आगच्छइ दित्तरूवे, काले विकराले फोक्कनासे ।
ओमचेलए पंसुपिसायभूए, संकरदूसं परिहरिय कंठे ॥ ६ ॥

कतरः कोऽयमागच्छति ? अतिशयेन क इति कतरः, एकारः प्राकृतत्वात् । परमयं कीदृशः ? दीप्तरूपो-बीभत्सरूपो, दीप्तवचनं बीभत्सार्थवाचकम् । पुनः कीदृशः ? कालः-कालवर्णः । पुनः कीदृग् ? विकरालो विकृताङ्गोपाङ्गधरः, लम्बोष्ठदन्तुरत्वादिविकारयुक्तः । पुनः कीदृशः ? पोक्कनाशः, पोक्का-अग्रे स्थूलोन्नता, मध्ये निम्ना चिप्पट्टा नासा यस्य स पोक्कनासः । पुनः कीदृग् ? अवमचेलः, अवमान्यसाराणि चेलानि वस्त्राणि यस्य सोऽवमचेलः, मलाविलत्वेन जीर्णत्वेन त्याज्यप्रायवस्त्रधारीत्यर्थः । पुनः कीदृशः ?

पांशुपिशाचभूतः, पांशुना-रजसा पिशाचभूतः पांशुपिशाचभूतः, धूल्यावगुण्ठितशरीरत्वेन मलिनवस्त्रत्वेन भूततुल्य इत्यर्थः । एतादृशः कोऽयं [1]शं (सं) करदूष्यं कण्ठे परिधृत्यात्रागच्छति ? समीपे आगतं दृष्ट्वा एवमूचुरित्यर्थः । शं(सं) कर-उत्करटकस्तत्रस्थः दूष्यं-वस्त्रं शं (सं)-करदूष्यम् । यद्यपि तस्य साधोर्वस्त्रमुत्करटकस्य नास्ति, तथापि तेषामत्यन्तघृणोत्पादकत्वेन तैरुक्तम्, कोऽयमुत्करटकस्य वस्त्रं कण्ठे परिधृत्य पिशाचसदृशो भ्रमन्नत्रागच्छति ? स हि हरिकेशी साधुः कुत्रापि आत्मीयमुपकरणं न मुञ्चति, सर्वं वस्त्रोपध्युपकरणादिकं गृहीत्वैव भिक्षाद्यर्थं भ्रमतीति भावः ॥ ६ ॥

पुनस्ते किमूचुरित्याह-

कयरे तुमं इय अदंसणिज्जे, का एव आसा इहमागओसि ।
ओमचेलगा पंसुपिसायभूया, गच्छ खलाहि किमिहं ठिओसि ॥ ७ ॥

'रे' इति नीचामन्त्रणे अवमचेलकः- सटितपटितवस्त्रधारी धूलीधूसरभूतकल्पस्त्वं कोऽसि ? कया आशया इह यज्ञपाटके आगतोऽसि ? 'का एव आसा' इति प्राकृतत्वात्, वकारोऽपि लाक्षणिकः । कीदृशस्त्वं ? 'इय अदंसणिज्जे' अनेन मलिनवस्त्रादिधारणेन अदर्शनीयः, द्रष्टुमयोग्यः, त्वद्दर्शनादेवास्माकं धर्मो विलीयते । अत्र गाथायां 'ओमचेलगा पंसुपिसायभूया' इति पुनरुक्तिरत्यन्तनिर्भर्त्सनार्था । रे भूतप्राय ! गच्छ-इतो यज्ञस्थानाद् व्रज । 'खलाहित्ति' देशीयभाषया अपसर दूरं दृष्टिमार्गात् । किमिह स्थितोऽसि ? त्वया सर्वथाऽत्र न स्थातव्यमित्यर्थः । तैर्ब्राह्मणैरित्युक्ते सति स साधुस्तु किमपि न अवादीत्, तदा तद्भक्तस्य यक्षस्य कृत्यमाह- ॥ ७ ॥

जक्खो तर्हि तिंदुयरुक्खवासी, अणुकंपओ तस्स महामुणिस्स ।
पच्छायइत्ता नियगं सरीरं, इमाइ वयणाइमुदाहरित्था ॥ ८ ॥

तस्मिन् काले तिन्दुकवृक्षवासी यक्ष इमानि वक्ष्यमाणानि वचनान्युदाहार्षीदवोचदित्यर्थः । किं कृत्वा ? निजकं शरीरं प्रच्छाद्य, स्वशरीरं प्रच्छन्नं विधाय, साधुशरीरे प्रवेशं कृत्वा, कथम्भूतः स यक्षः ? तस्य मुनेरनुकम्पकः, अनुरूपं कम्पते चेष्टते इत्यनुकम्पकः, साधोः सेवक इत्यर्थः । तिन्दुकवनमध्ये एको महान् तिन्दुकवृक्षोऽस्ति । तस्य वृक्षस्याधस्तस्य चैत्यमस्ति । तत्र साधुः कायोत्सर्गेण तिष्ठति । तस्य साधोर्धर्मानुष्ठानं दृष्ट्वा गुणरागी सेवकः सञ्जातोऽस्तीति भावः । स यक्ष इत्यवादीत् ॥ ८ ॥

स यक्षः किमवोचत् तदाह -

समणो अहं संजओ बंभयारी, विरओ धणपयणपरिग्गहाओ ।
परप्पवित्तस्स उ भिक्खकाले, अन्नस्स अट्ठा इहमागओमि ॥ ९ ॥

---

१ "सङ्कर-उत्कुरुडिका तत्र दूष्यं - वस्त्रं सङ्करदूष्यम्"-इति उत्त० सर्वार्थसिद्धिवृत्तौ पृ० २३८ B. ।

भो ब्राह्मणाः ! भवद्भिरुक्तं कोऽसि रे त्वं ? तस्योत्तरम्-अहं श्रमणोऽस्मि, श्राम्यति तपसि श्रमं करोतीति श्रमणस्तपस्वी । पुनरहं संयतः सावद्यव्यापारेभ्यो निवर्तितः । पुनरहं ब्रह्मचारी, ब्रह्मणि-भोगत्यागे चरति-रमते इत्येवंशीलो ब्रह्मचारी । पुनरहं धनपचनपरिग्रहाद्विरतः, तत्र धनं-गोमहिष्यश्वादिचतुष्पदरूपम्-पचनमाहारादिपाकः, परिग्रहो गणिम-धरिम-मेय्य-परिच्छेद्यादिद्रव्यरूपः । कया आशया इहागतोऽसि ? अस्योत्तरं-भो ब्राह्मणाः ! भिक्षाकाले-भिक्षावसरेऽन्नस्यार्थायात्रागतोऽस्मि । कीदृशस्यान्नस्य ? परप्रवृत्तस्य, परस्मै-परार्थं प्रवृत्तं पक्वं परप्रवृत्तम्, गृहस्थेनात्मार्थं राद्धम् ॥ ९ ॥

वियरिज्जइ खज्जइ भुज्जइ य, अन्नं पभूयं भवयाणमेयं ।
जाणाहि मे जायणजीविणुत्ति, सेसावसेसं लहओ तवस्सी ॥ १० ॥

अत्र 'भवयाणं' इति भवतामेतत् समीपतरवर्त्त्यन्नं प्रभूतम्, अद्यते इत्यन्नं-भक्ष्यं प्रभूतं-प्रचुरं विद्यते, तदेव प्रचुरत्वं प्रदर्श्यते । 'वियरिज्जइ' इति वितीर्यते दीन-हीना-ऽनाथेभ्यः सर्वेभ्यो वितीर्यते विशेषेण दीयते । पुनः खाद्यते खज्जकघृतपूरादिकं सशब्दं भक्ष्यते । पुनर्भुज्यते तन्दुल-मुद्गदाल्यादि सघृतमाकण्ठमभ्यवहार्यते । इत्यनेन अत्र काचित्कस्यापि भक्ष्यवस्तुनो न्यूनता न दृश्यते । यूयं 'मे' इति मां याचनजीविनं जानीत । याचनेन-भिक्षया जीविनं जीवितव्यं अस्येति याचनजीवितम्, इति अस्मात्कारणात् तपस्वी मल्लक्षणो मुनिरपि, अत्र शेषावशेष शेषादपि शेषं शेषावशेषमुद्धरितं प्रान्तप्रायमाहारं लभतां-प्राप्नोतु, इत्यपि यूयं जानीत । कोऽर्थः ? स मुनिरवादीत्, अत्रान्न यत्र तत्र परिष्ठाप्यते, भवद्भिरेतादृशी बुद्धिः करणीया, अयं तपस्वी आहारार्थमागतोऽस्ति, अयमपि शेषावशेषमाहारं प्राप्नोतु, इति विचार्य मह्यं शुद्धमाहारं दीयताम् ॥ १० ॥

इति यक्षेणोक्ते सति ते ब्राह्मणाः किं प्राहुरित्याह-

उवक्खडं भोयणमाहणाणं, अत्तट्ठियं सिद्धमिहेगपक्खं ।
न उ वयं एरिसमन्नपाणं, दाहामु तुज्झं किमिहं ठिओ सि ॥ ११ ॥

रे भिक्षो ! इहास्मिन् यज्ञपाटके भोजनं यदुपस्कृतं घृत-हिंग्वा-धान्यक-मिरच-लवण-जीरकादिभिः कृतोपस्कारं शाकादिकम् । पुनरिह सिद्धं चतुर्विधाहारं राद्धं वर्तते । तद् रे भिक्षो ! आहारमेकपक्षं वर्तते एकः पक्षो ब्राह्मणो यस्य तत् एकपक्षम्, एतदाहारं शूद्रेभ्यो न देयमस्ति, ब्राह्मणानां वर्तते, पुनरिदमाहारमात्मार्थिकम्, आत्मार्थे भवमात्मार्थिकम्, ब्राह्मणैरप्यात्मनैव भोज्यम्, न त्वन्यस्मै कस्मैचिद् देयमित्यर्थः । 'तु' इति तेन हेतुना वयमेतादृशं ब्राह्मणभोज्यमन्नपानं तुभ्यं न दास्यामः । इह त्वं किं स्थितोऽसि ? अस्माकं धर्मशास्त्रे उक्तमस्ति-

न शूद्राय मतिं दद्या-न्नोच्छिष्टं न हविष्कृतम् ।
न चास्योपदिशेद्धर्मं, न चास्य व्रतमादिशेत् ॥ १ ॥ [११]

तदा यक्षः पुनरवादीत्-

थलेसु बीयाइं ववंति कासगा, तहेव निन्नेसु य आससाए ।
एयाइ सद्धाए दलाहि मज्झं, आराहए पुन्नमिणं खु खित्तं ॥ १२ ॥

एतया-अनया उपमया श्रद्धया-भावनया मह्यं ददध्वं । 'खु' इति निश्चयेनेदं मल्लक्षणं पुण्यं-शुभं क्षेत्रमाराधयत । एतया इति कया उपमया ? तामुपमामाह—कर्षकाः-क्षेत्रीकारका नरा आशंसया-विचारणया काले-वर्षाकाले स्थलेषु-उच्चप्रदेशेषु, तथैव निम्नेषु-निम्न-भूमिप्रदेशेषु बीजानि वपन्ति । कोऽर्थः ? वर्षाकाले क्षेत्रीकारका बीजं वपन्त एवं चिन्तयन्ति । यदि प्रचुरा वर्षा भविष्यन्ति, तदा स्थलेषु फलावाप्तिर्भविष्यति, यदि चाल्पा वर्षा भविष्यति, तदा निम्नप्रदेशेषु फलावाप्तिर्भविष्यति । उभयत्रोच्च-नीचप्रदेशेषु बीजं वपन्ति, न पुनरेकत्रैव बीजं वपन्ति । यदि यूयं ब्राह्मणा निम्नभूमिसदृशास्तदाहं स्थलभूमि-सदृशो गण्यः, मह्यमपि दातव्यम्, न केवलं यूयमेव क्षेत्रप्रायाः, किन्त्वहमपि पुण्यक्षेत्र-मस्मीति भावः ॥ १२ ॥

इति श्रुत्वा ते ब्राह्मणास्तं प्रत्यूचुस्तदाह-

खित्ताणि अम्हं विइयाणि लोए, जहिं पकिन्ना विरुहंति पुन्ना ।
जे माहणा जाइविज्जोववेया, ताइं तु खित्ताइ सुपेसलाई ॥ १३ ॥

अरे पाखण्डपाश ! तानि क्षेत्राण्यस्माभिर्विदितानि वर्तन्त इत्यध्याहारः । 'जहिं' इत्यत्र क्षेत्रेषु प्रकीर्णान्युप्तानि बीजानि प्रदत्तानि दानानि पूर्णानि विरुहन्ति विशेषेणोद्गच्छन्ति, फलदानि भवन्ति । विभक्तिलिङ्गव्यत्ययस्तु प्राकृतत्वात् । ये ब्राह्मणा जातिविद्योपपेतास्ते तु ब्राह्मणाः सुतरामतिशयेन पेशलानि-मनोहराणि क्षेत्राणि ज्ञेयानि । तत्र जातिर्ब्राह्मणत्वम्, विद्या वेदाध्ययनम्, जातिश्च विद्या च जातिविद्ये, ताभ्यामुपपेताः सहिता जातिविद्योपपेताः । 'उपअपइताः' इत्यत्र शकंध्वादिषु पररूपमि [१/१/६४ पाणिनीयवार्त्तिकः] त्यनेनोप-शब्दस्याकारलोपे पश्चाद्गुणेन सिद्धिः । यदुक्तम्-

"सममश्रोत्रिये दानं, द्विगुणं ब्राह्मणं ब्रुवे ।
सहस्रगुणमाचार्यं, अनंतं वेदपारगे ॥ १ ॥"

इत्युक्तत्वाद्वेदपारगा ब्राह्मणाः पुण्यक्षेत्राणि ॥ १३ ॥

अथ यक्षः प्राह-

कोहो य माणो य वहो य जेसिं, मोसं अदत्तं च परिग्गहं च ।
ते माहणा जाइविज्जाविहूणा, ताइं तु खित्ताइं सुपावयाइं ॥ १४ ॥

भो ब्राह्मणाः ! येषां भवतां मध्ये क्रोधो वर्तते, च पुनर्मान-माया-लोभाश्च वर्तन्ते, चकारान्मानादीनां ग्रहणम् । च पुनर्वधो-जीवहिंसा वर्तते, मृषावादश्चास्ति, अदत्तमदत्ता-दानमप्यस्ति, च शब्दान्मैथुनं कामासक्तिरस्ति, च पुनः परिग्रहो वर्तते । ते यूयं के ब्राह्मणाः ? जाति-विद्याविहीनाः ।

'क्रियाकर्मविशेषेण चातुर्वर्ण्यं व्यवस्थितमि'ति वचनात् ।

ब्राह्मणत्वजातिमान् ब्राह्मणः, ब्राह्मण-ब्राह्मणीभ्यामुत्पन्नो ब्राह्मणो नोच्यते, किन्तु ब्राह्मणत्वेन ब्राह्मणक्रियानिष्ठत्वेन ब्राह्मणस्थितेन जातिधर्मेण विशिष्टो ब्राह्मण उच्यते । तस्माद्युष्मासु ब्रह्मक्रियानिष्ठत्वब्राह्मणत्वस्याभावान्न जातिरस्ति । ब्राह्मणा ब्रह्मचर्येणेति लक्षणोक्तित्वात् । न पुनर्यूयं विद्यायुक्ताः विद्यायास्तु विरतिरूपफलभावात् । विद्यावानपि यावद् विरतिमान् सन्नाश्रवान् संवरद्वारेण न रुणद्धि तावत्स विद्यावान्नोच्यते, विद्या अपि परमार्थतस्ता एवोच्यन्ते, यासु पञ्चाश्रवपरिहार उक्तः । तस्मान्न भवन्तो विद्यावन्तः, भवत्सु भवदुक्तमेव जाति, विद्योपपेतत्वं ब्राह्मणलक्षणं सर्वथा नास्त्येव । तस्मात्तानि सुपापकान्येव क्षेत्राणि भवन्तः, न पुण्यक्षेत्राणि यूयं ॥ १४ ॥

अथ कदाचित्ते एवं वदेयुः, वयं वेदविदो वर्तामहे इत्याह-

तुब्भेत्थ भो भारहरा गिराणं, अट्ठं न जाणाह अहिज्ज वेए ।
उच्चावयाइं मुणिणो चरंति, ताइं तु खित्ताइं सुपेसलाइं ॥ १५ ॥

भो इत्यामन्त्रणे, भो ब्राह्मणाः ! यूयं गिरां-वेदवाणीनां भारहरा-भारोद्वाहकाः । यतो यूयं वेदानधीत्य वेदानामर्थं न जानीथ । तथाहि-"[1]आत्मा रे ज्ञातव्यो मन्तव्यो निदिध्यासितव्यः" पुनरयं 'समो मशके नागे च,' 'न हिंस्यात् सर्वभूतानी' त्यादिवेदवाक्यान्यधीतानि । अथ पुनर्भवद्भिर्जीवहिंसास्वेव प्रवर्त्यते । तस्मादत्र यागः पृथक् एव उच्यते, यत्र चात्मनामग्नौ दाहः । स चात्र वेदे याग एव न स्यात् । यदि च स एव - आत्मा एव भवद्भिर्न ज्ञातस्तदा किमर्थं यागं कुर्वीध्वं ? प्रथमं यागोऽपि न भवद्भिर्ज्ञायते । कानि तर्हि क्षेत्राणीत्याह-हे ब्राह्मणाः ! मुनीन् सुपेशलान्यत्यन्तं सुन्दराणि क्षेत्राणि जानीथ । ये मुनय उच्चावचानि गृहाण्युत्तमाधमानि कुलानि भिक्षार्थं चरन्ति, अथवा उच्चावयाइं 'उच्चानि महान्ति व्रतान्युच्चव्रतानि येषां तान्युच्चव्रतानि । अकारः प्राकृतत्वात्, महाव्रतधराणि तानि क्षेत्राणि भव्यानि ज्ञेयानीत्यर्थः ॥ १५ ॥

तदा छात्राः किं प्राहुः-

अज्झावयाणं पडिकूलभासी, पभाससे किं तु सगासि अम्हं ।
अवि एयं विणस्सउ अन्नपाणं, न य णं दाहामु तुमं नियंठा ॥ १६ ॥

किन्त्विति शब्दौ निन्दा-क्रोधवाचकौ । अरे 'नियंठा' अरे दरिद्र ! त्वमुपाध्यायानां प्रतिकूलभाषी सन्, अस्मत्पाठकानां सन्मुखवादी सन्नस्माकं सकाशेऽस्माकं प्रत्यक्षं प्रभासषे, प्रकर्षेण यथा तथा भाषसेऽसम्बद्धं वचनं ब्रूषे, तस्मादरे एतदन्नपानं विनश्यतु, एतदाहारं सटतु, पतत्वपि परमेतदाहारं तुभ्यमुपाध्यायप्रतिकूलवादिने न दद्मः ॥ १६ ॥

तदा यक्ष आह-

समिइहिं मज्जं सुसमाहियस्स, गुत्तिहिं गुत्तस्स जिइंदियस्स ।
जइ मे न दाहित्थ अहेसणिज्जं, किमज्ज जन्नाण लब्भित्थ लाभं ॥ १७ ॥

---

१ अयं उपनिषदः पाठः ॥

यदि 'मे' ममेहास्मिन् यज्ञपाटके एषणीयं-शुद्धमाहारमद्यावसरे न दास्यथ, तदा यज्ञानां लाभं पुण्यप्राप्तिरूपं फलं किं लप्स्यथ ? अपि तु न किमपीत्यर्थः । पात्रदानं विना किमपि न फलमित्यर्थः । कथम्भूतस्य मम ? तिसृभिर्गुप्तिभिर्गुप्तस्य । पुनः कीदृशस्य मम ? पञ्चभिः समितिभिः सु अत्यन्तं समाहितस्य युक्तस्य । पुनः कीदृशस्य मम ? जितेन्द्रियस्य, जितानीन्द्रियाणि येन स जितेन्द्रियस्तस्य, अत्र चतुर्थीस्थाने षष्ठी । एतादृशाय पात्राय मह्यं चेत् यूयं प्रासुकमाहारं न दास्यथ तदा भवतां सर्वमपि वृथा, फलस्याभावात् ॥ १७ ॥

अथोपाध्याय आह -

के इत्थ खत्ता उवजोइया वा, अज्झावया वा सह खंडिएहिं ।
एयं तु दंडेण फलेण हंता, कंठंमि घित्तूण खलिज्ज जो णं ॥ १८ ॥

केचिदत्रास्मिन् यज्ञपाटके क्षत्राः-क्षत्रिया, उपज्योतिषः अग्नेरुप-समीपेऽग्निसमीपवर्तिनः पाकस्थानस्थाः, वाथवाध्यापका-वेदपाठकाः सन्तीत्यध्याहारः । कथम्भूताः पाठकाः ? खण्डिकैश्छात्रैः सहिताः, ये एनं मुण्डं दण्डेन-वंशयष्ट्या फलेन-बिल्वादिना हत्वा, कण्ठं गृहीत्वा-गलहस्तं दत्वा स्खलयेयुः-इतो यज्ञस्थानान्निष्कासयेयुः । तत्प्राकृतत्वात् ये इति वक्तव्यम् । प्राकृतत्वाद्वचनव्यत्ययः ॥ १८ ॥

अज्झावयाणं वयणं सुणित्ता, उद्धाइया तत्थ बहूकुमारा ।
दंडेहिं वित्तेहिं कसेहिं चेव, समागया तं इसिं ताडयंति ॥ १९ ॥

तत्र - तस्मिन् यज्ञपाटके बहवः कुमारास्तरुणाश्छात्रा दण्डैर्वंशयष्टिभिर्वेत्रैर्जलवंशैः कसैश्चर्मदवरकैस्तमृषिं ताडयन्ति । कीदृशास्ते कुमाराः ? समागताः सम्मील्यैकत्रीभूयागता अहो क्रीडनकं समागतमिति भसन्तः सम्भूय यष्ट्यादि सर्वं गृहीत्वा समागता इत्यर्थः । तं मुनिं ताडयन्ति । किं कृत्वा ? उपाध्यायानां वचनं श्रुत्वा ॥ १९ ॥

रण्णो तहिं कोसलियस्स धूआ, भद्दत्ति नामेण अणिंदियंगी ।
तं पासिया संजय-हम्ममाणं, कुद्धे कुमारे परिनिव्ववेइ ॥ २० ॥

तत्र कौशलिकस्य राज्ञः 'धूआ' इति सुता भद्रा वर्तते, सा भद्रा तं साधुं तैर्ब्राह्मणकुमारैर्हन्यमानं दृष्ट्वा क्रुद्धान् मारणोद्यतान् कुमारान् ब्राह्मणछात्रान् परिनिर्वापयति, वचनैरुपशमयतीत्यर्थः । कीदृशं तं साधुं ? संयतं संयमावस्थायां स्थितम् । कीदृशी सा भद्रा ? अनिन्दिताङ्गी, अनिन्दितमङ्गं यस्याः साऽनिन्दिताङ्गी शोभनशरीरा ॥ २० ॥

सा भद्रा किमवादीत्तदाह -

देवाभिओगेण निओइएणं, दिन्नामु रन्ना मणसा न झाया ।
नरिंददेविंदभिवंदिएणं, जेणम्हि वंता इसिणा स एसो ॥ २१ ॥

भो ब्राह्मणाः ! एष स ऋषिर्वर्तते येनर्षिणाहं वान्तास्मि - त्यक्तास्मि कथम्भूते-नर्षिणा ? नरेन्द्रदेवेन्द्राभिवन्दितेन । कीदृश्यहं ? राज्ञा दत्तास्मै अर्पिता, अनेनर्षिणाहं राज्ञा दीयमानास्मि, तदा मनसापि न ध्याता, नाभिलषिता । कीदृशेन राज्ञा ? देवाभियोगेन नियोजितेन, देवस्य यक्षस्याभियोगो-बलात्कारो देवाभियोगस्तेन यक्षदेवहठेन नियोजितेन, प्रेरितेनेत्यर्थः । एतादृशोऽयं त्यागी मुनिरस्ति, तस्माद्भवद्भिर्न कदर्थ्यः । इति भद्रा राजकन्या ब्राह्मणान-वादीत् ॥ २१ ॥

पुनः सा किमाह -

एसो हु सो उग्गतवो महप्पा, जिइन्दियो संजओ बंभयारी ।
जो मे तया नेच्छइ दिज्जमाणिं, पिउणा सयं कोसलिएण रन्ना ॥ २२ ॥

'हु' इति निश्चयेनोपलक्षितो मयैषः । स उग्रतपा महात्मा वर्तते, उग्रं तपो यस्य स उग्रतपाः । महान् प्रशस्य आत्मा यस्य स महात्मा-महापुरुषः । स इति कः ? यस्तपस्वी कौशलिकेन पित्रा - मम जनकेन राज्ञा स्वयमात्मना तदा दीयमानां मां नैच्छत्, न वाञ्छति स्म । कीदृश एषः ? जितेन्द्रियः, पुनः कीदृशः ? संयतः सप्तदशविधसंयमधारी । पुनः कीदृशः ? ब्रह्मचारी ब्रह्मचर्यवान् ॥ २२ ॥

महायसो एस महाणुभागो, घोरव्वओ घोरपरक्कमो य ।
मा एयं हीलह अहीलणिज्जं, मा सव्वे तेएण भे निद्दहेज्जा ॥ २३ ॥

पुनरेष साधुर्महायशो वर्तते । पुनर्महानुभागोऽचिन्त्यातिशयः । पुनरेष घोरव्रतो दुर्धरमहा-व्रतधारी । पुनर्घोरपराक्रमो - रौद्रमनोबलः । क्रोधादिचतुःकषायाणां जये रौद्रसामर्थ्यस्त-स्मादेनं तपस्विनं मा हीलयथ । कथंभूतमेनम् ?' अहीलणियं ' अवगणनायायोग्यं स्तवनार्ह-मित्यर्थः । एष ' भे ' इति भवतो-युष्मान् सर्वान् मा निर्धाक्षीन्न भस्मसात्कार्षीत् ॥ २३ ॥

इति यदा नृपपुत्र्योक्तम्, तदा यक्षः किमकार्षीदित्याह-

एयाइ तीसे वयणाइ सुच्चा, पत्तीइ भद्दाइ सुभासियाइं ।
इसिस्स वेयावडियट्ठयाए, जक्खा कुमारे विणिवारयंति ॥ २४ ॥

यक्षाः परिवारसहिता ऋषेर्वैयावृत्त्यर्थं कुमारान् ब्राह्मणबालकान् विशेषेण निवारयन्ति । किं कृत्वा ? तस्याः सोमदेवस्य यज्ञाधिपस्य पुरोहितस्य पत्न्या भद्राया वचनानि श्रुत्वा । कीदृशानि वचनानि ? सुभाषितानि - सुष्ठु भाषितानि, ब्राह्मणेभ्यः शिक्षारूपाणि प्रकाशितानि ॥ २४ ॥

ते घोररूवा ठिअ अंतलिक्खे, असुरा तहिं तं जणं तालयंति ।
ते भिन्नदेहे रुहिरं वमंते, पासित्तु भद्दा इणमाहु भुज्जो ॥ २५ ॥

ते यक्षास्तदा - तस्मिन् काले तान् जनांस्तान् ब्राह्मणांस्ताडयन्ति चपेटादिभिर्घ्नन्ति । कीदृशास्ते यक्षाः ? घोररूपाः । पुनः कीदृशास्ते ? अन्तरिक्षे-आकाशे स्थिताः । पुनः कीदृशास्ते ? असुरा-असुर परिणामयुक्ताः, उत्प्रेक्षंतेऽसुरा इवेत्यर्थः । तर्हि-तस्मिन् यज्ञपाटके 'ते' इति तान् भग्नदेहान् दृष्ट्वा भद्रा भूयः- पुनरपीदं वचनमाहुरित्याह - ब्रूते, प्राकृतत्वाद्व-चनव्यत्ययः । तान् किं कुर्वतः ? रुधिरं वमत इति ॥ २५ ॥

गिरिं नहेहिं खणह, अयं दंतेहिं खायह ।
जायतेयं पाएहिं हणह, जे भिक्खुं अवमन्नह ॥ २६ ॥

अरे वराका इत्यध्याहारः, यूयं नखैः- करजैर्गिरिं-पर्वतं खनथ इव, इवशब्दस्य ग्रहणं सर्वत्र कर्तव्यम् । पुनर्दन्तैरयो-लोहं खादथ-भक्षयथ इव । पुनर्जातवेदसमग्निं पादैर्हणथ इव, अग्निं चरणैः स्पर्शथ इव, ये - यूयं भिक्षुं साधुमवमन्यथ, अस्य भिक्षोरपमानं कुरुथ । गिरिलोहाग्नीनामुपमानमनर्थफलहेतुत्वादुक्तम् ॥ २६ ॥

पुनः भद्राऽऽह -

आसीविसो उग्गतवो महेसी, घोरव्वओ घोरपरक्कमो य ।
अगणिं व पक्खंद पयंगसेणा, जे भिक्खुयं भत्तकाले वहेह ॥ २७ ॥

भो मूर्खा ! इति अध्याहारः, एषस्तपस्वी आशीविषः, शापदाने समर्थः । आशीविषः सर्प उच्यते । यथा सर्पः पादादिना अवमन्यमानो मारणाय स्यात्, तथा अयमपि शापविषेण मारयति । पुनरयमुग्रतपा महर्षिः, पुनरसौ घोरव्रतः, पुनर्घोरपराक्रमः । ये पुनर्यूयं भक्तकाले-भोजनकाले भिक्षुकं-पूर्वोक्तलक्षणं मुनिं वध्यथ, यष्ट्यादिभिस्ताडयथ, ते यूयं पतङ्गसेनाः- शलभसमूहा अग्निं प्रस्कन्दथ इव, आक्रमथ इव । कोऽर्थः ? यथा पतङ्गसेना अग्निं प्रविश्य-माना म्रियन्ते, तथा यूयं मरिष्यथ इत्यर्थः ॥ २७ ॥

सीसेण एयं सरणं उवेह, समागया सव्वजणेण तुब्भे ।
जइ इच्छह जीवियं वा धणं वा, लोगंपि एसो कुविओ डहिज्जा ॥ २८ ॥

भो ब्राह्मणाः ! 'तुब्भे' इति यूयं सर्वजनेन - सर्वकुटुम्बेन समागताः- संमिलिताः सन्त एनं तपस्विनं शीर्षेण-मस्तकेन शरणं उपेत, शिरःप्रणामपूर्वं सर्वेऽप्यागत्यायमेवास्माकं शरणमित्युक्त्वा अभ्युपागच्छत । यदि यूयं जीवितं वाथवा धनमिहेच्छथ । यत एष साधुस्तपस्वी कुपितः सन् लोकं समस्तं नगरादिकं दहेत् ॥ २८ ॥

अवहेडियपिट्ठिसउत्तमंगे, पसारिया बाहु अकम्मचिट्ठे ।
निब्भेरियच्छे रुहिरं वमंते, उड्ढंमुहे निग्गयजीहनित्ते ॥ २९ ॥

ते पासिआ खंडिए कट्ठभूए, विमणो विसण्णो अह माहणो सो ।
इसिं पसाएइ सभारियाओ, हीलं च निंदं च खमाह भंते ॥ ३० ॥

अथानन्तरं स ब्राह्मण ऋषिं प्रसादयति । कीदृशः स ब्राह्मणः ? सभार्यः- पत्नी-सहितः, सह भार्यया भद्रया वर्तत इति सभार्यः । कथं प्रसादयति ? तदाह-हे भदन्त-हे पूज्य ! हीलामस्मत्कृतमपमानम्, च पुनर्निन्दाम्, हास्माभिर्भवतां निन्दा कृता, तां निन्दां यूयं क्षमध्वं । कीदृशो ब्राह्मणः ? विमना-विदूनमनाः । पुनः कीदृशः ? विखिन्नो-विशेषेण दीनः । किं कृत्वा ? तान् खण्डिकान्-च्छात्रान् काष्टभूतान्-काष्टसदृशान्निश्चेष्टितान् दृष्ट्वा । पुनः कीदृशान् तान् ? अवहेठितपृष्ठिसदुत्तमाङ्गान्, अवहेठितानि पृष्ठिं यावत् नामितानि, पृष्ठिं गत्वा लग्नानि सन्ति शोभनान्युत्तमाङ्गानि-मस्तकानि येषां ते अवहेठितपृष्ठिसदुत्त-माङ्गास्तान्, पश्चाद्लग्नपृष्ठिदेशसंलग्नमस्तकान् । पुनः कीदृशान् ? प्रसारितबाह्वकर्मचेष्टान्. प्रसारिताः प्रलम्बीकृता बाहवो यैस्ते प्रसारितबाहवः । न विद्यते कर्मणि-अग्निविषय इन्धन-घृतादिनिक्षेपणे चेष्टा सामर्थ्यं येषां ते अकर्मचेष्टाः । प्रसारितबाहवश्च ते अकर्मचेष्टाश्च प्रसारितबाह्वकर्मचेष्टास्तान्, बाहुप्रसारणत्वेन दूरे पतितेन्धनदर्वीकानित्यर्थः । पुनः कीदृशान् ? निर्भेरिताक्षान्, निर्भेरितानि प्रसारितानि अक्षीणि यैस्ते निर्भेरिताक्षास्तान्, तरलितनेत्रान् । पुनस्तान् किं कुर्वतः ? रुधिरं वमतो-मुखाद्रक्तं श्रवतः । पुनः कीदृशान् ? उर्ध्वमुखानूर्ध्ववदनान् । पुनः कीदृशान् ? निर्गतजिह्वानेत्रान्, जिह्वा च नेत्रं च जिह्वानेत्रे, निर्गते जिह्वानेत्रे येषां ते निर्गतजिह्वानेत्रास्तान् ॥ २९ ॥ ३० ॥

अथ स ब्राह्मणो हरिकेशर्षिं कीदृशैर्वचनैः प्रसादयति ? तानि वचनान्याह-

बालेहिं मूढेहिं अयाणएहिं, जं हीलिया तस्स खमाह भंते ।
महप्पसाया इसिणो हवंति, न हु मुणी कोवपरा हवंति ॥ ३१ ॥

भो पूज्याः ! भो भदन्तः ! एभिर्बालैः- शिशुभिर्मूढैः कषायमोहनीयवशगैर्मूर्खै-र्हिताहितविवेकविकलैः 'जं' इति यस्मात्कारणात् यूयमवहीलिता-अवगणिताः 'तस्स' इति तस्य अवहीलनस्यापराधं क्षमध्वं ।ऋषयो महाप्रसादा भवन्ति, अतीवनिर्मलचेतसो भवन्ति । न पुनर्मुनयः कोपपराः- क्रोधपरायणा भवन्ति, मुनयः क्षमावन्तो भवन्ति ॥ ३१॥

तदा मुनिः किमवादीत्याह-

पुव्विं च इण्हिं च अणागयं च, मणप्पओसो न मे अत्थि कोइ ।
जक्खा उ वेयावडियं करेंति, तम्हा हु एए निहया कुमारा ॥ ३२ ॥

भो ब्राह्मणाः ! 'मे' मम पूर्वमतीतकाले, च पुनः 'इण्हिं' इदानीं - वर्तमाने काले, च पुनरनागते - आगामिनि काले मनःप्रद्वेषो नास्ति, अतीतकाले नासीत्, इदानीं प्रद्वेषो नास्ति, अग्रेऽपि न भविष्यतीत्यर्थः । कोऽप्यल्पोऽपि नास्ति । 'हु' पुनरर्थे, येन यक्षा वैयावृत्त्यं-साधुतर्जकनिवारणां साधुभक्तिं कुर्वन्ति, तस्मात् 'हु' इति निश्चयेन एते कुमारा यक्षैर्निहताः ॥ ३२ ॥

अथ सर्वे उपाध्यायादयस्तद्गुणाकृष्टचित्ता एवमाहुः-

अत्थं च धम्मं च वियाणमाणा, तुब्भे नवि कुप्पह भूइपन्ना ।
तुब्भं तु पाए सरणं उवेमो, समागया सव्वजणेण अम्हे ॥ ३३ ॥

हे स्वामिनः ! यूयमपि निश्चयेन न कुप्यत, कोपं न कुरुत । कथम्भूता यूयम् ? अर्थं-सर्वशास्त्राणां तत्त्वम्, च पुनर्धर्मं-वस्तूनां स्वभावम्, अथवा धर्मं - दशविधं साध्वाचारं विजानानाः, अर्थ-धर्मज्ञा इत्यर्थः । पुनः कथम्भूता यूयं ? भूतिः-सर्वजीवरक्षा, तत्र प्रज्ञा येषां ते भूतिप्रज्ञाः । तस्माद्वयं 'तुब्भं' इति युष्माकं शरणमुपेम-उपागताः स्म । 'अम्हे' शब्देन वयमिति ज्ञेयम् । कीदृशा वयं ? सर्वजनेन समागताः- सर्वकुटुम्बपरिवारेण समागता मिलिताः ॥ ३३ ॥

अच्चेमु ते महाभाग, न ते किंचि न अच्चिमो ।
भुंजाहि सालिमं कूरं, नाणावंजणसंजुयं ॥ ३४ ॥

हे महाभाग ! 'ते' तव सर्वमप्यर्चयामः । 'ते' तव सर्वमपि श्लाघयामः । न 'ते' तव वयं किमपि - चरणधूल्यादिकमपि यद्वयं नार्चयामः । के वयं ? ये त्वां नार्चयामः । त्वं तु देवानां पूजार्हः । वयं तव कां पूजां कुर्मः ? एतादृशी का पूजास्ति ? या तव योग्या, परन्तु वयं दासभावं कुर्म इत्यर्थः । 'सालिमं' इति शालिमयं - सम्यग्जातिशुद्धं शालिनिष्पन्नं कूरं तन्दुलभोज्यं भुञ्जाहि-भुंक्ष्व । कथंभूतं कूरं ? नानाव्यञ्जनसंयुतम्, बहुविधैर्व्यञ्जनैर्दध्यादिभिः सहितम् ॥ ३४ ॥

इमं च मे अत्थि पभूयमन्नं, तं भुंजसु अम्ह अणुग्गहट्ठा ।
बाढं ते पडिच्छइ भत्तपाणं, मासस्स ऊ पारणए महप्पा ॥ ३५ ॥

हे स्वामिन् ! 'मे' ममेदं प्रत्यक्षं खण्डमण्डकादिकमन्नं प्रभूतं वर्तते - प्रचुरं वर्तते । पूर्वमपि शालिमयं कूरग्रहणं कृतम्, अत्र च पुनरन्नग्रहणं तत्सर्वान्नप्राधान्यख्यापनार्थम् । तद्भोज्यं भुंक्ष्व, इति ब्राह्मणैः प्रोक्ते सति मुनिः प्राह-बाढम् इत्युक्त्वा, तथास्तु, बाढं शब्दोऽङ्गीकारे, एवमेव करोमि गृहीष्यामीत्युक्त्वा साधुर्मासस्य पारणके भक्त-पानमाहार-पानीयं प्रतीच्छत्यङ्गीकरोति । कथम्भूतः स मुनिः ? महात्मा, महान् निर्मलो - निष्कषाय आत्मा यस्य स महात्मा - महापुरुषः ॥ ३५ ॥

तहिं य गंधोदयपुप्फवासं, दिव्वा तहिं वसुहारा य वुट्ठा ।
पहयाओ दुंदुहिओ सुरेहिं, आगासे अहो दाणं च घुट्ठं ॥ ३६ ॥

'तहिं' तस्मिन् यज्ञपाटके मुनिना आहारे गृहीते सति गन्धोदक-पुष्पवर्षमभूदिति शेषः । सुगन्धपानीय-कुसुमवर्षा आसन्नित्यर्थः । च पुनस्तस्मिन् स्थाने दिव्या प्रधाना देवैः कृता वसुधारा वृष्टा, स्वर्णदीनाराणां वृष्टिरभूत् । वसु-द्रव्यं तस्य धारा-सततपातजनिता

वसुधारा, सा वृष्टा देवैः पातिता इत्यर्थः । तु पुनराकाशे सुरैर्दुन्दुभयः प्रहताः, देवैराकाशे वादित्राणि वादितानि । च पुनराकाशे अहोदानमहोदानमिति घुष्टं-देवैः शब्दितम् ॥ ३६ ॥

तदा च द्विजा विस्मिताः किमाहुस्तदाह-

सक्खं खु दीसइ तवोविसेसो, न दीसई जाइविसेसो कोई ।
सोवागपुत्तं हरिएससाहुं, जस्सेरिसा इड्ढि महाणुभागा ॥ ३७ ॥

'खु' इति निश्चयेन तपोविशेषः साक्षाद् दृश्यते, जातिविशेषः कोऽपि न दृश्यते । तपोमाहात्म्यं दृश्यते, जातिमाहात्म्यं किमपि न दृश्यते । श्वपाकपुत्रं - चाण्डालपुत्रं तं हरिकेशसाधुं पश्यत इति शेषः । तमिति कं ? यस्य हरिकेशस्य साधोरेतादृशी सर्वजन-प्रसिद्धर्द्धिर्वर्तते, देवसाहाय्यरूपा संपद्वर्तते । कीदृश्यृद्धिः ? महानुभागा - महाननुभागोऽतिशयो यस्याः सा महानुभागा, महामाहात्म्यसहिता इत्यर्थः ॥ ३७ ॥

अथ मुनिस्तान् ब्राह्मणानुपशान्तमिथ्यात्वान् दृष्ट्वा धर्मोपदेशमाह-

किं माहणा जोइसमारभंता, उदएण सोहिं बहिया विमग्गह ।
जं मग्गहा बाहिरियं विसोहि, न तं सुदिट्ठं कुसला वयंति ॥ ३८ ॥

किमितिशब्दोऽधिक्षेपे । भो ब्राह्मणा ! यूयं श्रृणुत । ज्योतिरग्निं समारभन्तः अग्नीनां समारम्भं कुर्वन्तः किं ब्राह्मणा भवन्ति ? अपि तु न भवन्ति । भो ब्राह्मणाः ! उदकेन शोधिं कुर्वन्तो बाह्यां शुद्धिं विमार्गयथ-जानीथ । यागं कुर्वन्तः स्नानं कुर्वन्तश्च ब्राह्मणा न भवन्तीत्यर्थः । यां यागस्नानादिकां बाह्यां विशुद्धिं विमार्गयथ-विचारयथ, तां बाह्यां विशुद्धिं कुशला - ज्ञाततत्त्वाः सुदृष्टं - सम्यग्दृष्टं न वदन्ति, यत् यज्ञादावग्नीनां - तेजस्काय-स्थजीवानां विराधना । अथ च स्नानादावप्कायस्थजीवानां विराधना विशुद्ध्यर्थं विधीयते तत्तत्त्वज्ञैर्न सम्यग्दृष्टम्, सम्यग् न कथितमित्यर्थः । यदुक्तम् -

"स्नानं मनोमलत्यागो, यागश्चेन्द्रियरोधनम् ।
अभेददर्शनं ज्ञानं, ध्यानं निर्विषयं मनः ॥ १ ॥" इति ॥ ३८ ॥

कुसं च जूवं तणकट्ठमग्गिं, सायं च पायं उदयं फुसंता ।
पाणाइं भूयाइं वहेडयंता, भुज्जो वि मंदा पकरेह पावं ॥ ३९ ॥

भो ब्राह्मणाः ! मन्दा यूयं भूयोऽपि - पुनरपि शुद्धिकरणप्रस्तावेऽपि पापं प्रकुरुथ-पूर्वमपि संसारकार्यकरणप्रस्तावे आरम्भं कृत्वा प्राणान्-भूतानि विनाश्य पातकमुपार्जितम्, पुनर्धर्मकरणप्रस्तावे तदेव क्रियते इत्यर्थः । किं कुर्वन्तः ? कुशं-दर्भम्, यूपं-यज्ञस्तम्भम्, तृणं-वीरणादिनडादिकम्, काष्ठं-शमीवृक्षस्येन्धनम्, अग्निं च, एतत्सर्वं प्रतिगृह्णतः, एतत्सायं-सन्ध्याकाले, च पुनःप्रातः-प्रभाते उदकं-पानीयं स्पृशन्त-आचमनं कुर्वन्तः, अत एव प्राणान् द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रियान् भूतान्, असून् पृथिव्यादीनपि

तदाधारभूतान् विहेडयन्तो - विशेषेण हिंसन्त इत्यर्थः । एतेषामेव प्राणभूतसत्त्वानां विराधनेन हिंसा भवति । पुनरेतेषामेव शुद्धिकरणकालेऽपि विराधना विधीयते, कुतोऽस्माकं शुद्धिर्भवित्री ? इति न जानन्ति, अत एव मन्दा मूर्खाः । यत उक्तम्-

"दृष्टिपूतं चरेन्मार्गं, वस्त्रपूतं पिबेज्जलम् ।
ज्ञानपूतं सृजेद्धर्मं, सत्यपूतं वदेद्वचः ॥ १ ॥" ३९ ॥

अथ प्रत्युत्पन्नशङ्कास्ते ब्राह्मणा धर्मं पप्रच्छुः-

कहं चरे भिक्खु वयं यजामो, पावाइं कम्माइं पणुल्लयामो ।
अक्खाहि णे संजयजक्खपूइया, कहं सुजुट्ठं कुसला वयंति ॥ ४० ॥

हे भिक्षो ! वयं कथं चरेमहि ? कस्यां क्रियायां प्रवर्त्तेमहि ? हे भिक्षो ! पुनर्वयं कथं यजामो-यागं कुर्मः ? पुनर्वयं पापानि-पापहेतूनि कर्माणि कथं पणुल्लयामः-प्रणुदामः-प्रकर्षेण स्फेटयामः ? हे यक्षपूजित ! हे संयत ! जितेन्द्रिय ! कुशला - धर्ममर्मज्ञा विद्वांसः कथं - केन प्रकारेण 'सुजुट्ठं' इति सुष्ठु शोभनम् इष्टं, स्विष्टं शोभनयजनं वदन्ति ? तत् शोभनयज्ञं नोऽस्मान् आख्याहि-कथय, इत्यर्थः ॥ ४० ॥

अथ मुनिराह-

छज्जीवकाये असमारभंता, मोसं अदत्तं च असेवमाणा ।
परिग्गहं इत्थिओ माणमायं, एयं परिन्नाय चरंति दंता ॥ ४१ ॥

पूर्वं ब्राह्मणैरयं प्रश्नो विहितः, कथं वयं प्रवर्तेमहि ? तस्योत्तरं-भो ब्राह्मणाः ! दान्ता - जितेन्द्रिया एतत्पूर्वोक्तं पापहेतुकं परिज्ञाय चरन्ति-प्रवर्तन्ते । साधवो ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया आरम्भान्निवर्तन्ते इति भावः । दान्ताः किं कुर्वाणाः ? षट्जीवकायान् असमारम्भमाणा अनुपमर्दयन्तः, पुनर्मृषावादं च पुनरदत्तमसेवमानाः, पुनः परिग्रहं - उपकरणमूर्च्छाम्, सचित्ताऽचित्तद्रव्यग्रहणरक्षणात्मकम्, पुनः स्त्रीम्, तु पुनर्मानमभिमानम्, पुनर्मायां परवञ्चनात्मिकामसेवमानाः । मान-मायायोः सहकारित्वेन क्रोध-लोभयोरपि त्यागो ज्ञेयः । एतान् सर्वान् पापहेतून् ज्ञात्वा, पुनस्त्यक्त्वा साधवो यतनया चरन्ति । अतो भवद्भिरपि एवं चरितव्यमित्यर्थः ॥ ४१ ॥

अथ द्वितीयप्रश्नस्य कथं यजाम इत्यस्य उत्तरमाह-

सुसंवुडा पंचहिं संवरेहिं, इह जीवियं अणवकंखमाणा ।
वोसट्ठकाया सुइचत्तदेहा, महाजयं जयई जन्नसिट्ठं ॥ ४२ ॥

भो ब्राह्मणाः ! पञ्चभिः संवरैर्हिंसा-मृषा-ऽदत्त-मैथुन-परिग्रहविरमणैः सुसंवृताः सुतरामतिशयेन संवृता-आच्छादिताश्रवा निरुद्धपापागमनद्वाराः सुसंवृताः संयमिनः 'जन्नसिट्ठं' यज्ञश्रेष्ठं यजन्ति-कुर्वन्तीत्यर्थः । यज्ञेषु श्रेष्ठो - यज्ञश्रेष्ठस्तं, अथवा श्रेष्ठो यज्ञः श्रेष्ठयज्ञस्तम्, प्राकृतत्वात् यज्ञश्रेष्ठमिति ज्ञेयम् । कीदृशं श्रेष्ठयज्ञं ? महाजयं महान् जयः

कर्मारीणां विनाशो यस्मिन् स महाजयस्तम्। कीदृशाः सुसंवृताः ? इहास्मिन् मनुष्यजन्मनि जीवितम्, प्रस्तावादसंयमजीवितव्यं अनवकाङ्क्षमाणाः, असंयममनीप्सन्त इत्यर्थः। पुनः कीदृशाः सुसंवृताः ? व्युत्सृष्टदेहाः, विशेषेण परीषहोपसर्गसहने उत्सृष्टः कल्पितः कायो यैस्ते व्युत्सृष्टदेहाः। पुनः कीदृशाः ? शुचयो निर्मलव्रताः। पुनः कीदृशाः ? त्यक्तदेहाः, त्यक्तो निर्ममत्वेन परिचर्याभावेन अवगणितो देहो यैस्ते त्यक्तदेहाः। एतादृशाः साधवः स्विष्टं यज्ञं कुर्वन्ति। एष एव कर्मप्रस्फेटनोपाय इत्युक्तम्। ततो भवन्तोऽप्येवं यजतामिति भावः ॥ ४२ ॥

यजमानस्य कान्युपकरणानीति पुनर्ब्राह्मणाः पृच्छन्ति स्म-

के ते जोई के च ते जोईठाणं, का ते सुया किं च ते कारिसंगं ।
एहा य ते कयरा संति भिक्खु, कयरेण होमेण हुणासि जोइं ॥ ४३ ॥

हे मुने ! 'ते' तव किं ज्योतिः ? - कोऽग्निः ? च पुनः 'ते' तव किं ज्योतिःस्थानमग्निस्थानं ? अग्निकुण्डं किमस्ति ? 'ते' तव काः पुनः शुचो घृतादिप्रक्षेपका दर्व्यः ? च पुनः 'ते' तव करीषाङ्गं-अग्न्युद्दीपनकारणं किमस्ति ? विध्याप्यमानोऽग्निर्येनोद्दीप्यते सन्धुक्ष्यते तत्करीषाङ्गं तव किं विद्यते ? च पुनरेधाः कतराः काः समिधः ? याभिरग्निः प्रज्वाल्यते ताः का सन्धि ? च पुनः शान्तिर्दुरितोपशमहेतुरध्ययनपद्धतिस्तव कतरा कास्ति ? हे भिक्षो ! त्वं कतरेणेति केन होमेन-हवनविधिना ज्योतिरग्निं जुहोषि ? अग्निं प्रीणयसि ? षड्जीवनिकायविराधनां विना हि यज्ञो न स्यात्। हे भिक्षो ! भवता षड्जीवनिकायविराधना तु पूर्वं निषिद्धा। एवं ते ब्राह्मणा मुनये यज्ञं यज्ञोपकरणसामग्रीं पप्रच्छुः ॥ ४३ ॥

अथ मुनिर्मुनियोग्यं यज्ञमाह-

तवो जोई जीवो जोइठाणं, जोगा सुया सरीरं कारिसंगं ।
कम्मं एहा संजमजोगसंती, होमं हुणामी इसिणं पसत्थं ॥ ४४ ॥

भो ब्राह्मणाः ! अस्माकं तपो ज्योतिः, तप एवाग्निरस्ति, कर्मेन्धनदाहकत्वात्। द्वादशविधं हि तपः सकलकर्मकाष्ठानि प्रज्वालयति, जीवो ज्योतिःस्थानम्, जीवोऽग्निकुण्डं, तपस आधारत्वात्। मनो-वाक्काययोगास्ते शुचो दर्व्यो ज्ञेयाः, मनो-वाक्काययोगैः शुभव्यापारा, घृतस्थानीयास्तपोऽग्निप्रज्वलनहेतवो वर्तन्ते। शरीरं करीषाङ्गं, तेनैव शरीरेण तपोऽग्निर्दीप्यते, शरीर साहाय्येन तपः स्यादित्यर्थः।

'शरीरमाद्यं खलु धर्मसाधनमि'त्युक्तेः [ ]

कर्माण्येधा इन्धनानि कर्मेन्धनानि तपोऽग्निः प्रज्वालयति, महादुष्टकर्मकारिणोऽपि तपसा निर्मला सञ्जाताः। संयमयोगः शान्तिः, संयमस्य सप्तदशविधस्य योगः- सम्बन्धः स शान्तिः, सर्वजीवानामुपद्रवनिवारकत्वात्। अनेन होमेनाहं तपोऽग्निं जुहोमि। कथम्भूतेन होमेन ? ऋषीणां प्रशस्तेन-मुनीनां योग्येन, साधवो ह्येतादृशं यज्ञं कुर्वन्ति, न अपरे एतादृशं यज्ञं कर्तुं समर्था भवन्ति ॥ ४४ ॥

यज्ञस्वरूपं तु साधुनोक्तम्, अथ ब्राह्मणाः स्नानस्वरूपं पृच्छन्ति-

के ते हरए के य ते संतितित्थे, कहिंसि ण्हाओ व रयं जहासि ।
आइक्ख णे संजय जक्खपूइया, इच्छामु नाउं भवओ सगासे ॥ ४५ ॥

हे ऋषे ! यक्षपूजित ! त्वं नोऽस्मान् आचक्ष्व - ब्रूहि । वयं भवतः सकाशाद् ज्ञातुमिच्छामः । हे मुने ! ते तव को ह्रदः ? - कः स्नानकरणयोग्यजलाधारः ? किं पुनस्तव शान्तितीर्थं ? शान्त्यै पापशान्तिनिमित्तं तीर्थं शान्तितीर्थं - पुण्यक्षेत्रम्, यस्मिन् तीर्थे दानादिबीजमुप्तं पातकशमनं पुण्योपार्जकं च स्यात् । कुरुक्षेत्रादिसदृशं किं तीर्थं वर्तते ? पुनर्हे मुने ! त्वं कस्मिन् स्थाने स्नातः सन् रजः- कर्ममलं जहासि-त्यजसि ? त्वं निर्मलो भवसि ? एतत्सर्वेषां प्रश्नानामुत्तरं वदेत्यर्थः ॥ ४५ ॥

इति पृष्टे मुनिराह-

धम्मे हरए बंभे संतितित्थे, अणाविले अत्तपसन्नलेसे ।
जहिंसि ण्हाओ विमलो विसुद्धो, सुसीइभूओ पजहामि दोसं ॥ ४६ ॥

भो ब्राह्मणाः ! धर्मो हिंसाविरमणो दया-विनयमूलो ह्रदो वर्तते, कर्ममलापहारकत्वात् । ब्रह्मचर्यं-मैथुनत्यागः शान्तितीर्थम्, तस्य तीर्थस्य सेवनात् सर्वपापमूलं रागद्वेषौ निवारितावेव । यदुक्तं-

"ब्रह्मचर्येण सत्येन, तपसा संयमेन च ।
मातङ्गर्षिर्गतः शुद्धिं, न शुद्धिस्तीर्थयात्रया ॥ १ ॥"

कीदृशे ब्रह्मचर्यतीर्थे ? अनाविले-निर्मले । पुनः कीदृशे ब्रह्मचर्यतीर्थे ? आत्मप्रसन्नलेश्ये, आत्मनः प्रसन्ना निर्मलत्वकारणं लेश्या यस्मिन् स आत्मप्रसन्नलेश्यस्तस्मिन्, आत्मनिर्मलत्वकारणं तेजःपद्मशुक्लादिलेश्यात्रयम्, तेन सहिते इत्यर्थः । यत्र यस्मिन् ब्रह्मचर्यतीर्थे स्नातोऽहं विमलो - भावमलरहितो विशुद्धो - गतकलङ्कः सुशीतीभूतो - रागद्वेषादिरहितः सन् दोषं - कर्म ज्ञानावरणीयादिकमष्टप्रकारकं प्रकर्षेण जहामि-त्यजामि ॥ ४६ ॥

एयं सिणाणं कुसलेहिं दिट्ठं, महासिणाणं इसिणं पसत्थं ।
जहिंसि ण्हाया विमला विसुद्धा, महारिसी उत्तमं ठाणं पत्त ॥ ४७ ॥ त्ति बेमि ॥

पूर्वमुक्तं कर्मरजोविनाशकं स्नानं, तस्योत्तरमाह-भो ब्राह्मणाः ! कुशलैस्तत्वज्ञैः केवलिभिरेतत् स्नानं दृष्टं, परेभ्यश्च प्रोक्तं । कथम्भूतमेतत्स्नानं ? महास्नानं सर्वेषु स्नानेषूत्तमं । पुनः कीदृशं तत्स्नानम् ? ऋषीणां प्रशस्तम्, मुनीनां योग्यम्, येन स्नानेन स्नाताः कृतशौचा विमलाः- कर्ममलरहिताः, अत एव विशुद्धा - निष्कलङ्का महर्षयो - मुनीश्वरा उत्तमं-प्रधानं स्थानमर्थान्मोक्षस्थानं प्राप्ता इति अहं ब्रवीमि, जम्बूस्वामिनं प्रति श्रीसुधर्मास्वामी प्राह ॥ ४७ ॥

इति हरिकेशीयमध्ययनं द्वादशं सम्पूर्णम् ॥ १२ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां हरिकेशीयाध्ययनस्यार्थः सम्पूर्णः ॥ १२ ॥

।। अथ त्रयोदशं चित्रसम्भूतीयमध्ययनं प्रारभ्यते ।।

तपः कुर्वता पुरुषेण निदानं न कार्यमित्याह, इति द्वादश-त्रयोदशयोः सम्बन्धः । चित्र-सम्भूतसाध्वोः सम्बन्धमाह-साकेतनगरे चन्द्रावतंसकस्य राज्ञः पुत्रो मुनिचन्द्रनामा बभूव । स च निवृत्तकाम-भोग-तृष्णः सागरचन्द्रस्य मुनेः समीपे प्रव्रजितः । गुरुभिः समं विहरन्नन्यदा एकस्मिन् ग्रामे प्रविष्टः । सार्थेन सह सर्वेऽपि साधवश्चलिताः, सार्थभ्रष्टोऽसौ मुनिचन्द्रोऽटव्यां पतितः । तत्र चत्वारो गोपालदारकास्तं क्षुत्तृषाक्रान्तं पश्यन्ति, शुद्धैरशनादिभिः प्रतिजाग्रति । यतिना तेषां पुरो देशना कृता । ते गोपालदारकाः प्रतिबुद्धास्तदन्तिके प्रव्रज्यां गृहीतवन्तः । तैः सर्वैः शुद्धा दीक्षा पालिता । द्वाभ्यां तु दीक्षा पालितैव, परं मलक्लिन्नवस्त्रादिजुगुप्सा कृता, ते चत्वारोऽपि देवलोकं गताः । तत्र जुगुप्साकारकौ द्वौ देवलोकच्युतौ दशपुरनगरे साण्डिल्यब्राह्मणस्य यशोमत्या दास्याः पुत्रत्वेनोत्पन्नौ युग्मजातौ बभूवतुः । अतिक्रान्तबालभावौ तौ यौवनं प्राप्तौ ।

अन्यदा क्षेत्ररक्षणार्थं तावटव्यां गतौ, रात्रौ च वटपादपाधः सुप्तौ । तत्रैको दारको वटकोटरान्निर्गतेन सर्पेण दष्टः । द्वितीयः सर्पोपलम्भनिमित्तं भ्रमंस्तेनैव सर्पेण दष्टः । ततो द्वावपि मृतौ कालिञ्जरपर्वते मृगीकुक्षौ समुत्पन्नौ युग्मजातौ मृगौ जातौ । कालक्रमेण तौ द्वौ मात्रा समं भ्रमन्तावेकेन व्याधेनैकशरेणैव हतौ मृतौ । ततस्तौ द्वावपि गङ्गातीरे एकस्या राजहंस्याः कुक्षौ समुत्पन्नौ, जातौ क्रमेण हंसौ, मात्रा समं भ्रमन्तावेकेन मत्स्यबन्धकेन गृहीतौ मारितौ च । ततो वाराणस्यां नगर्यां महर्द्धिकस्य भूतदिन्नाभिधस्य चाण्डालस्य पुत्रत्वेन समुत्पन्नौ, क्रमेण जातयोस्तयोः चित्रश्च सम्भूतिश्चेति नामनी कृते । तौ चित्र-सम्भूतौ मिथः प्रीतिपरौ जातौ ।

इतश्च तस्मिन्नवसरे वाराणस्यां नगर्यां शङ्खनामा राजा, तस्य नमुचिनामा मन्त्री, अन्यदा तस्य किञ्चित् क्षूणं जातम् । कुपितेन राज्ञा स वधार्थं भूतदिन्नचाण्डालस्य दत्तः, भूतदिन्न-चाण्डालेन तस्यैवमुक्तम्-भो मन्त्रिन् ! त्वामहं रक्षामि, यदि मद्गृहान्तर्भूमिगृहस्थितौ मत्पुत्रौ पाठयसि, जीवितार्थिना तेन तत्प्रतिपन्नम् । भूमिगृहस्थः स चित्र-सम्भूतौ पाठयति, चित्र-सम्भूतमाता तु मन्त्रिपरिचर्यां कुरुते । मन्त्री तु तस्यामेव व्यासक्तोऽभूत् निजपत्नीव्यभिचारिचरितं चाण्डालेन ज्ञातम् । नमुचिमारणोपायस्तेन चिन्तितः । पितुरध्यवसायस्ताभ्यां ज्ञातः । उपकार-प्रीतिरताभ्यां स नमुचिर्नाशितः । ततो नष्टः स क्रमेण हस्तिनागपुरे सनत्कुमारचक्रिणो मन्त्री जातः । इतश्च ताभ्यां मातङ्गदारकाभ्यां चित्रसम्भूताभ्यां रूप-यौवन-लावण्य-नृत्य-गीत-कलाभिर्वाराणसीनगरीजनः प्रकामं चमत्कारं प्रापितः ।

अन्यदा तत्र मदनमहोत्सवो जातः, सर्वेषु लोकेषु गीत-नृत्यवादित्रादिविनोदप्रवृत्तेषु सत्सु तौ मातङ्गदारकौ वाराणसीनगर्यन्तः समागत्य सर्वाः स्वकलाः दर्शयितुं प्रवृत्तौ । तयोर्विशेषकलाचमत्कृता लोकास्तरुणीप्रमुखास्तत्समीपे गताः । एकाकारो जातः ।

अस्पृश्यत्वादिकं न जानन्ति सर्वेऽपि लोकास्तन्मयतां गताः । ततश्चतुर्वेदविद्भिर्ब्राह्मणैर्नगरस्वामिन एवं विज्ञप्तम्-राजन्नेताभ्यां चित्र-सम्भूताभ्यां चाण्डालाभ्यां सर्वोऽपि नगरीलोक एकाकारं प्रापितः, राज्ञा तयोर्नगरीप्रवेशो वारितः । कियत्कालानन्तरं पुनस्तत्र कौमुदीमहोत्सवो जातः, तदानीं कौतुकोत्तालौ तौ राजशासनं विस्मार्य नगरीमध्ये प्रविष्टौ, तत्र स्वच्छवस्त्रेण मुखमाच्छाद्य प्रेक्षणानि प्रेक्षमाणयोस्तयो रसप्रकर्षोद्भवेन मुखाद् गीतं निर्गतम्, सर्वे लोका वदन्ति । केन किन्नराणुकारेणेदं कर्णसुखमुत्पादितमिति वस्त्रं पराकृत्य लौकैस्तयोर्मुखमीक्षितम्, उपलक्षितौ तौ मातङ्गदारकौ, राज्ञोऽनुशासनभञ्जकत्वेन जनैर्यष्टिमुष्ट्यादिभिर्हन्यमानौ तौ नगर्या बहिर्निष्कासितौ, प्राप्तौ बहिरुद्याने ।

भृशं खिन्नावेवं चिन्तयतः- धिगस्त्वस्माकं रूप-यौवन-सौभाग्य-लावण्य-सर्वकला-कौशल्यादिगुणकलापस्य, यतोऽस्माकं मातङ्गजत्वेन सर्वं दूषितम् । लोकपराभवस्थानं वयं प्राप्ताः । एवं गुरुवैराग्यमागतौ तौ स्वबान्धवादीनामनापृच्छ्यैव दक्षिणदिगभिमुखौ चलितौ । दूरं गताभ्यां ताभ्यामेको गिरिवरो दृष्टः । तत्र भृगुपातकरणार्थमधिरूढौ । तत्र तौ शिलातलोपविष्टं तपःशोषिताङ्गं शुभध्यानोपगतमातापनां गृह्णन्तमेकं श्रमणं ददृशतुः । हर्षितौ तौ तत्समीपे जग्मतुः । भक्तिबहुमानपूर्वं ताभ्यां स वन्दितः । साधुना धर्मलाभकथनपूर्वकं तयोः स्वागतं पृष्टम् । ताभ्यां पूर्ववृत्तान्तकथनपूर्वकं स्वाभिप्रायः साधोः कथितः । साधुना कथितम्-न युक्तमनेकशास्त्रावदातबुद्धिनां भवादृशानां गिरिपतनमरणम् । सर्वदुःखक्षयकारणं श्रीवीतरागधर्मं गृह्णन्तु । इति पञ्चमहाव्रतरूपः श्रीवीतरागधर्मस्तयोः कथितः । ततस्ताभ्यां तस्य मुनेः समीपे दीक्षा गृहीता । कालक्रमेण तौ गीतार्थौ जातौ । ततः स्वगुर्वाज्ञया षष्ठा-ष्टम-दशम-द्वादशाऽर्धमास-मासक्षपणादितपोभिरात्मानं भावयन्तौ ग्रामानुग्रामं विहरन्तौ कालान्तरेण हस्तिनागपुरं प्राप्तौ बहिरुद्याने च स्थितौ ।

अन्यदा मासक्षपणपारणके सम्भूतसाधुर्नगरमध्ये भिक्षार्थं प्रविष्टः । गृहानुगृहं भ्रमन् राजमार्गानुगतो गवाक्षस्थेन नमुचिमन्त्रिणा दृष्टः, प्रत्यभिज्ञातश्च । चिन्तितं च स एष मातङ्गदारको मदध्यापितो मच्चरित्रमशेषमपि जानन्नस्ति । कदाचिच्च लोकाग्रे वक्ष्यते, तदा मन्महत्वभ्रंशो भविष्यतीति मत्वा दूतैः स मुनिर्यष्टिमुष्ट्यादिभिर्मारयित्वा नमुचिना नगराद्बहिर्निष्कासयितुमारब्धः, निरपराधस्य हन्यमानस्य तस्य कोपकरालितस्य मुखान्निर्गतः प्रथमं धूमस्तोमः, तेन सर्वमपि नगरमन्धकारितम् - भयकौतूहलाक्रान्ता नागरास्तत्रायाताः । क्रोधाध्मातं तं मुनिं दृष्ट्वा सर्वेऽपि प्रसादयितुं प्रवृत्ताः । सनत्कुमारचक्रवर्त्यपि तत्रायातः । तं प्रसादयितुं प्रवृत्त एवं बभाण-भगवन् ! यदस्माद्दशैरज्ञानैरपराद्धं तद्भवद्भिः क्षमणीयम् । संहरन्तु तपस्तेजःप्रभावम् । कुर्वन्तु ममोपरि प्रसादं सर्वनागरिकजीवितप्रदानेन । पुनरेवंविधमपराधं न करिष्यामः । इत्यादि चक्रिणाप्युक्तोऽसौ यावन्न प्रशाम्यति, तावदुद्यानस्थश्चित्रसाधुर्जनापवादात्तं कुपितं ज्ञात्वा तस्य समीपमागत एवमुवाच । भो सम्भूतसाधो ! उपशामय कोपानलम्, उपशमप्रधानाः श्रमणा भवन्ति । अपराधेऽपि न कोपस्यावकाशं ददति । क्रोधः सर्वधर्मानुष्ठाननिष्फलीकारकोऽस्ति, यत उक्तम् -

"[1]मासुववासु करेइ, निच्चं वणवासु निसेवे।
पढइ नाणु सुज्झाणु, निच्चं अप्पाणं भावइ ॥ १ ॥
[2]धारइ दुद्धरबंभचेरं, भिक्खासणं भुंजइ ।
जासु रोस तासु सयलु, धम्म निप्फलु संपज्जइ ॥ २ ॥"

इत्यादिकैश्चित्रसाधूपदेशैः सम्भूतस्योपशान्तः क्रोधः, तेजोलेश्या संहृता । ततस्तौ द्वावपि तत्प्रदेशान्निवृत्तौ, गतौ तदुद्यानम् । चिन्तितं चैताभ्यामावाभ्यां संलेखना कृता, साम्प्रतमावयोर्युक्तमनशनं कर्तुं, इति विचार्य ताभ्यामनशनं विहितम् । सनत्कुमारचक्रिणा नमुचिमन्त्रिणो वृत्तान्तो ज्ञातः, दूतैः सह रज्जुबद्धः कृतः । प्रापितश्च तदुद्याने तयोः समीपे, ताभ्यां स मोचितः, सनत्कुमारोऽपि तयोर्वन्दनार्थं सान्तःपुरपरिवारस्तत्रायातः । सर्वलोकसहितश्चक्री तयोः पादयुग्मे प्रणतः । चक्रिणः स्त्रीरत्नं सुनन्दापि औत्सुक्यात्तयोः पादे प्रणता, तस्या अलकस्पर्शानुभवेन सम्भूतयतिना निदानं कर्तुमारब्धम् । तदानीं चित्रमुनिनैवं चिन्तितमहो दुर्जयत्वं मोहस्य ! अहो दुर्दान्ततेन्द्रियाणाम् । येन समाचरितविकृष्टतपोनिकरोऽपि विदितजिनवचनोऽप्ययं युवतीवालाग्रस्पर्शेणेत्थमध्यवस्यति ।

ततः प्रतिबोधितुकामेन चित्रमुनिना तस्य सम्भूतमुनेरेवं भणितम् । भ्रातरेतदध्यवसायान्निवृत्तिं कुरु । एते हि भोगा असाराः, परिणामदारुणाः, संसारपरिभ्रमणहेतवः सन्ति । एतेषु मा निदानं कुरु । निदानात्तव घोरानुष्ठानं नैव तादृक् फलदं भविष्यति । एवं चित्रमुनिना प्रतिबोधितोऽपि सम्भूतो न निदानं तत्याज । यद्यस्य तपसः फलमस्ति, तदाहं भवान्तरे चक्रवर्ती भूयासमिति निकाचितं निदानम् । ततो मृत्वा सौधर्मदेवलोके तौ द्वावपि देवौ जातौ । ततश्च्युतश्चित्रजीवः पुरिमतालनगरे इभ्यपुत्रो जातः । सम्भूतजीवस्ततश्च्युतः काम्पिल्यपुरे ब्रह्मनामा राजा, तस्य चुलनीनाम्नी भार्या, तस्याः कुक्षौ चतुर्दशस्वप्नसूचित उत्पन्नः । क्रमेण जातस्य तस्य ब्रह्मदत्त इति नाम कृतम् । देहोपचयेन कलाकलापेन च वृद्धिं गतः ।

तस्य ब्रह्मराज्ञ उत्तमवंशसम्भूताश्चत्वारः सुहृदः सन्ति, तद्यथा-काशीविषयाधिपः कटकः, गजपुराधिपः कणेरदत्तः, कौशलदेशाधिपतिर्दीर्घः, चम्पाधिपतिः पुष्पचूलश्चेति । तेऽत्यन्तस्नेहेन परस्परविरहमनिच्छन्तः समुदिताश्चैव एकमेकं वर्षं परिपाट्या विविधक्रीडाविलासैरेकस्मिन् राज्ये तिष्ठन्ति । अन्यदा ते चत्वारोऽपि समुदिताश्चैव ब्रह्मराज्ये स्थिताः सन्ति । तस्मिन्नवसरे ब्रह्मराज्ञो मन्त्रतन्त्रौषधाद्यसाध्यः शिरोरोग उत्पन्नः । ततस्तेन कटकादिचतुर्णां मित्राणामुत्सङ्गे ब्रह्मदत्तो मुक्तः । उक्तं च यथैष मद्राज्यं सुखेन पालयति तथा

---

१ मासोपवासः करोति, नित्यं वनवासं निसेवते ।
पठति ज्ञानं सद्ध्यानं, नित्यमात्मानं भावयति ॥ १ ॥
२ धारयति दुर्धरब्रह्मचर्यं, भिक्षाऽशनं भुनक्ति ।
यावत् रोषस्तावत् सकलो धर्मो निष्फलो संपद्यति ॥ २ ॥

युष्माभिः कर्तव्यमिति राज्यचिन्तां कारयित्वा ब्रह्मराजा कालं गतः । मित्रैस्तस्य प्रेत्यकर्म कृतम्, मिथश्चैवं भणितम्, एष कुमारो यावद्राज्यधुरार्हो भवति तावदस्माभिरेतद्राज्यं रक्षणीयमिति विचार्य सर्वसम्मतं दीर्घराजानं तत्र स्थापयित्वा कटक-कणेरुदत्त-पुष्पचूलाः स्वस्वराज्ये जग्मुः । स दीर्घराजा सकलसामग्रीकं तद्राज्यं पालयति, भाण्डागारं विलोकयति, प्रविशत्यन्तःपुरम्, चुलिन्या समं मन्त्रयति । तत इन्द्रियाणां दुर्निवारत्वेन ब्रह्मराज्ञो मैत्रीमवगणय्य, वचनीयतामवमन्य चुलन्या समं संलग्नः । एवं प्रवर्धमानविषयसुखरसयोस्तयोर्गच्छन्ति दिनाः । ततो ब्रह्मराजमन्त्रिणा धनुर्नाम्ना तयोस्तत्स्वरूपं ज्ञातम् । चिन्तितं च य एवंविधमकार्यमाचरति, स किं कुमारब्रह्मदत्तस्य हिताय भविष्यति ? एवं चिन्तयित्वा तेन धनुर्नाम्ना मन्त्रिणा स्वपुत्रस्य वरधनुनाम्नः कुमारस्यैवं भणितम्, यथा पुत्र ! ब्रह्मदत्तस्य माता व्यभिचारिणी जातास्ति, दीर्घराज्ञा भुज्यमानास्ति । अयं समाचार एकान्ते त्वया ब्रह्मदत्तकुमारस्य निवेदनीयः, तेन च तथा कृतम् ।

ब्रह्मदत्तकुमारोऽपि मातुर्दुश्चरितमसहमानस्तयोर्ज्ञापनार्थं काक-कोकिलामिथुनं शूलाप्रोतं कृत्वा चुलनीमातृ-दीर्घनृपयोर्दर्शितम् । एवं प्रोक्तं च, य ईदृशमनाचारं करिष्यति, तस्याहं निग्रहं करिष्यामीत्युक्त्वा कुमारो बहिर्गतः । एवं द्वित्रिभिर्दृष्टान्तैर्दिनत्रयं यावदेवं चकार उवाच च । ततो दीर्घनृपेण शङ्कितेन चुलन्या एवमुक्तम्-कुमारेणावयोः स्वरूपं ज्ञातम्, अहं काकस्त्वं कोकिलेति दृष्टान्तः कुमारेण ज्ञापितः . तयोक्तं बालोऽयं यत्तदुल्लपति । नात्रार्थे काचिच्छङ्का कार्या । ततो दीर्घपृष्टेनोक्तम् त्वं पुत्रवात्सल्येन न किमपि स्वहितं वेत्सि, अयमवश्यमावयोरतिविघ्नकरः, तदवश्यमयं मारणीयः, मयि स्वाधीने तवान्ये पुत्रा बहवो भविष्यन्ति । एतादृशं दीर्घनृपवचस्तयाङ्गीकृतम् । यत उक्तं-

"[1]महिला आलकुलहरं, महिला लोयंमि दुच्चरियखित्तं ।
महिला दुग्गइदारं, महिला जोणी अणत्थाणं ॥ १ ॥
मारेइ य भत्तारं, हणे सुअं तह पणासए अत्थं ।
नियगेहंपि पीलावै, णारी रागाउरा पावा" ॥ २ ॥

चुलन्या भणितम्, कथमेष मारणीयः ? कथं च लोकापवादो न भवति ? दीर्घनृपेणोक्तं साम्प्रतमस्य विवाहः क्रियते । पश्चात्सर्वमावयोश्चिन्तितं भविष्यति । ततस्ताभ्यां ब्रह्मदत्तस्य मित्रस्य कस्यश्चिद्राज्ञः कन्यायाः पाणिग्रहणं कारितम् । तयोः शयनार्थमनेकस्तम्भशतसन्निविष्टं गूढनिर्गमद्वारं जतुगृहं कारितम् ।

इतश्च धनुर्मन्त्रिणा दीर्घनृपायैवं विज्ञप्तम् । एष मम पुत्रो वरधनुरेतद्राज्यकार्यकरणसमर्थो वर्तते, अहं पुनः परलोकहितं करोमि । दीर्घनृपेणोक्तमिह स्थित एव त्वं दानादिधर्मं

---

१ महिला आलकुलघरं, महिला लोके दुश्चरित्रक्षेत्रम् ।
महिला दुर्गतिद्वारं, महिला योनी अनर्थानाम् ॥ १ ॥
मारयति च भर्तारं, घ्नन्ति सुतं तथा प्रनाशयति अर्थम् ।
निजगृहमपि पीडापयति, नारी रागातुरा पापा ॥ २ ॥

कुरु । तस्यैतद्वचःप्रतिपद्य धनुर्मन्त्रिणा गङ्गातीरे महती प्रपा कारिता, तत्र पथिकपरिव्राजकादीनां स यथेष्टदानं दातुं प्रवृत्तः । दानोपचारावर्जितैः परिव्राजिकादिभिर्द्विगव्यूतप्रमाणा सुरङ्गा जतुगृहं यावत्खानिता । जतुगृहान्तः सुरङ्गाद्वारि शिला दत्ता । इतश्च चुलन्या महताडम्बरेण वधूसहितः कुमारस्तत्र प्रवेशितः । ततः समग्रः परिवारो विसर्जितः, वरधनुः कुमारपार्श्वे स्थितः । एवं स्वपित्रा गदितवृत्तान्तानुसारेण स सावधानो जाग्रन्नेव सुप्तः । ब्रह्मदत्तकुमारस्त्वेकशय्यायां तया वध्वा सह सुप्तः । गतं रात्रिप्रहरयुग्मम् । तदा तत्र चुलन्या स्वहस्तेन अग्निकन्दुको न्यस्तः । तेन तद्गृहं समन्ताद्दह्यमानं दृष्ट्वा विनिद्रो ब्रह्मदत्तः स्वमित्रं वरधनुं पप्रच्छ, किमेतदिति । वरधनुना सर्वं चुलनीस्वरूपं कथितम् । पुनः कथितमियं च कन्या राजपुत्री न, किन्तु काप्यन्या, तस्मादस्यां मोहो मनागपि न कार्यः । त्वमस्यां शिलायां पादप्रहारं कुरु, येनावां निर्गच्छावः । वरधनूक्तं सर्वं ब्रह्मदत्तेन कृतम् ।

ततो द्वावपि निर्गत्य सुरङ्गाद् बहिर्देशे समायातौ । तत्र च धनुमन्त्रिणा पूर्वमेव द्वौ तुरङ्गमौ पुरुषौ च मुक्तौ स्तः । ताभ्यां पुरुषाभ्यां तयोः सङ्केतः कथितः, तुरङ्गाधिरूढौ तौ द्वावपि कुमारौ ततश्चलितौ । एकेन दिवसेन पञ्चाशद्योजनमात्रं भूभागं गतौ । दीर्घमार्गखेदेन तुरङ्गमौ व्यापन्नौ । ततः पादचारेण गच्छन्तौ तौ [1]कोट्टाभिधानग्रामं गतौ, कुमारेण वरधनुर्भणितः, मां क्षुधा बाधते । वरधनुः कुमारं बहिरेवोपवेश्य स्वयं ग्राममध्ये प्रविष्टः । नापितं गृहीत्वा तत्रायातः । कुमारस्य मस्तकं मुण्डापितम्, परिधापितानि कषायवस्त्राणि, चतुरङ्गुलप्रमाण-पट्टबन्धः कुमारस्य श्रीवत्सालङ्कृते हृदि बद्धः, वरधनुनापि वेषपरावर्तनः कृतः ।

तादृशवेषधरौ द्वावपि ग्राममध्ये प्रविष्टौ । तावता एको द्विजः स्वमन्दिरान्निर्गत्याभिमुखमागत्य तौ कुमारौ प्रत्येवमाह । आगच्छतामस्मद्गृहे, भुञ्जतां च । तेनेत्युक्ते तौ द्वावपि तद्गृहे गतौ । ब्राह्मणेन राजरूपप्रतिपत्तिपूर्वकं तौ भोजितौ । भोजनान्ते चैका प्रवरमहिला बन्धुमतीं नाम्नीं कन्यामुद्दिश्य ब्रह्मदत्तकुमारमस्तकेऽक्षान् प्रक्षिपति । भणति चैषोऽस्याः कन्याया वरोऽस्त्विति । वरधनुना भणितम् किमेतस्य मूर्खस्य बटुकस्य कृते एतावानायासः क्रियते ? ततो गृहस्वामिना भणितं श्रूयतामस्मदायासवृत्तान्तः-

पूर्वं सुवृत्तनैमित्तिकेनाख्यातं यथास्या बालिकायाः पट्टाच्छादितवक्षःस्थलः समित्रो भवद्गृहे भोजनकारी वरो भविष्यति । सोऽयमस्या योग्यो वर इति । तस्मिन्नेव दिने तस्याः कन्यायाः कुमारेण पाणिग्रहणं कारितम् । मुदितो गृहस्वामी, कुमारस्त्वेकरात्रौ तत्र स्थितः । द्वितीयदिने वरधनुना कुमारस्योक्तमावाभ्यां दूरे गन्तव्यम् । दीर्घराजासन्नत्वेनात्र स्थातुमावयोरयुक्तमिति तौ द्वावपि बन्धुमत्याः स्वरूपं कथयित्वा निर्गतौ ।

गच्छन्तौ तावेकदा कस्मिंश्चिद् दूरग्रामे गतौ । तृषाक्रान्तं कुमारं बहिरुपवेश्य वरधनुः सलिलमानेतुं ग्राममध्ये प्रविष्टः । त्वरितमेव पश्चादागत्यैवं कुमारस्योक्तवान् । अत्र ईदृशो जनापवादो मया श्रुतः, यद्दीर्घनृपेण ब्रह्मदत्तमार्गः सर्वत्र सैन्यैर्बन्धितोऽस्ति ।

---

१ कोष्टकसंज्ञक°-भावविजयगणिवृत्त्याम् ॥

ततः कुमार ! आवामितो नश्यावः । नष्टौ ततो द्वावपि उन्मार्गेण व्रजन्तौ महाटवीं प्राप्तौ । तत्र कुमारं वटाध उपवेश्य वरधनुः जलमानेतुमितस्ततो बभ्राम । दिनावसाने वरधनुः दीर्घपृष्टनृपभट्टैर्दृष्टः, प्रकामं यष्टिमुष्ट्यादिभिर्हन्यमानः कुमारं दर्शयेति प्रोच्यमानः कुमारासन्नप्रदेशे प्रापितः । तावता वरधनुना कुमारस्य केनाप्यलक्षिता संज्ञा कृता । भट्टैरदृष्ट एव ब्रह्मदत्तो नष्टः । पतितश्च दुर्गमे कान्तारे क्षुधा-तृषा-श्रमार्त्तः कुमारस्तृतीये दिने तामटवीमतिक्रान्तस्तापसमेकं ददर्श । दृष्टे च तस्मिन् कुमारस्य जीविताशा जाता । कुमारेण स तापसः पृष्टः, भगवन् ! क्व भवदाश्रमः ? तेनासन्न एवास्मदाश्रम इत्युक्त्वा कुलपतिसमीपं नीतः, कुमारेण प्रणतः कुलपतिः । कुलपतिना भणितम्-वत्स ! कुत इह भवदागमनम् ? कुमारेण सकलोऽपि स्ववृत्तान्तः कथितः । कुलपतिनोक्तं-अहं भवज्जनकस्य क्षुल्लभ्राता, ततस्त्वं निजं चैवावासं प्राप्तोऽसि, सुखेनात्र तिष्ठ । इत्यभिप्रायं तापसस्य ज्ञात्वा कुमारस्तत्रैव सुखं तिष्ठन्नास्ति ।

अन्यदा तत्र वर्षाकालः समायातः । तदानीं निश्चिन्तितेन कुमारेण तत्र तापसान्तिके सकला धनुर्वेदादिकाः कला अभ्यस्ताः । अन्यदा शरत्काले फलमूलकन्दादिनिमित्तं तापसेषु गच्छत्सु ब्रह्मदत्तकुमारोऽपि तैः समं वने गतः । वनश्रियं पश्यता तेन एक महाहस्ती दृष्टः । कुमारस्तदभिमुखं चलितः । कुमारं दृष्ट्वा हस्तिना गलगर्जारवः कृतः । कुमारेण तस्य पुरो निजमुत्तरीयं वस्त्रं निक्षिप्तम् । करिणापि तत्क्षणात् शुण्डादण्डेन गृहीतम्, क्षिप्तं च गगनतले । यावत्स क्रोधान्धो जातस्तावत् कुमारेण बलं कृत्वा तद्वस्त्रं स्वकराभ्यां गृहीतम्, ततस्तेन नानाविधक्रीडया परिश्रमं नीत्वा करी मुक्तः । स पश्चाद् गन्तुं प्रवृत्तः । तत्पृष्ठौ कुमारोऽपि चलितः । इतश्चाग्रे गच्छन् कुमारः पूर्वापरदिग्विभागे परिभ्रमन् गिरिनदीतटसन्निविष्टं जीर्णभवनभित्तिमात्रोपलक्षितं जीर्णं नगरमेकं ददर्श । तन्मध्ये प्रविष्टश्चतुर्दिक्षु दृष्टिं क्षिपन् पार्श्वपरिमुक्तखेटकखड्गं विकटवंशकुडङ्गं ददर्श । कुमारेण तत्खड्गं तथैव कौतुकाद्गाहितम् । एकप्रहारेण निपतितं वंशकुडङ्गं, वंशान्तरालस्थितं च निपतितं रुंडमेकम्, स्फुरदोष्ठं मनोहराकारं शिरःकमलं दृष्ट्वा संभ्रान्तेन कुमारेणैवं चिन्तितम् । हा ! धिगस्तु मे व्यवसितस्य, धिग्मे बाहुबलस्येति कुमारः स्वं निनिन्द । पश्चात्तापाक्रान्तेन तेन कुमारेण दृष्टं धूमपानलालसं कबन्धं, समधिकमधृतिस्तस्य पुनर्जाता ।

इतस्ततः पश्यता कुमारेण पुनः प्रवरमुद्यानं दृष्टम्, तत्र भ्रमन्नशोकतरुपरिक्षिप्तमेकं सप्तभूमिकमावासं कुमारो दृष्टवान् । तन्मध्ये प्रविष्टः कुमारः क्रमेण सप्तभूमिकामारूढः । तत्र विकसितकमलदलाक्षीं प्रवरां महिलां पश्यति स्म । कुमारेण सा पृष्टा-काऽसि त्वमिति ? ततः सा स्वसद्भावं कथयितुं प्रवृत्ता । महाभाग ! मम व्यतिकरो महान् वर्तते, ततस्त्वमेव प्रथमं स्ववृत्तान्तं वद । कस्त्वं ? कुतः समायातः ? एवं तया पृष्टे कुमार आख्यत्-अहं पञ्चालाधिपति-ब्रह्मराजपुत्रो ब्रह्मदत्तोऽस्मीति । कुमारोक्तिश्रवणानन्तरं हर्षोत्फुल्लनयना सा [1]अभ्युत्थाय तस्यैव चरणे निपत्य रोदितुं प्रवृत्ता । ततः कारुण्यहृदयेन कुमारेण सा पुनरेवं भणिता, मुखमुन्नतं कुरु, मा रुदेति चाश्वासिता सा ।

---

१ अभ्युत्थिता-D-L. ॥

ततः कुमारेण त्वं स्ववृत्तान्तं वदेत्युक्ता सा आचख्यौ-कुमार ! अहं तव मातुलस्य पुष्पचूलस्य राज्ञः पुत्री, तवैव पित्रा दत्ता, विवाहदिवसं प्रतीक्ष्यमाणा निजगृहोद्यानदीर्घिका-पुलिने क्रीडन्ती दुष्टविद्याधरेणात्रानीता । यावद्दहं स्वजनविरहाग्निसन्तप्ता इह तिष्ठामि, तावत्त्वमतर्कितवृष्टिसमोऽत्रायातः । अथ मम जीविताशा सञ्जाता, यत्त्वं मया दृष्टः । कुमारेणोक्तं-स मम शत्रुः क्वास्ति ? येन तद्बलं पश्यामि । तया भणितं-स्वामिन् । ममानेन शङ्करीनाम्नी विद्या दत्ता । कथितं चेयं विद्या प्रठितमात्रा तव दासदासीसखीपरिवाररूपा भूत्वा आदेशं करिष्यति । तवान्तिकमागतं प्रत्यनीकं निवारयिष्यति । दूरस्थस्यापि मम चेष्टितं पृष्टा सती इयं तव कथयिष्यति । साद्य मया प्राप्ता, स्मृता सती मम तच्चेष्टितं प्राह । यथा स उन्मत्तनामा विद्याधरः पूर्णपुण्यायास्तव बलात्स्पर्शं तेजश्च सोढुमशक्तस्त्वामत्र मुक्त्वा निजभगिनीं ज्ञापनाय ज्ञापिकीं विद्यां प्रेषयित्वा च स्वयं विद्यां साधयितुं वंशकुडङ्गे गतोऽस्ति । ततो निर्गतमात्रस्त्वां परिणेष्यतीति ममाद्य तया विद्यया कथितम् । एतत्तस्या वचः श्रुत्वा ब्रह्मदत्तेनोक्तं वंशकुडङ्गस्थस्य तस्य विद्याधरस्य मया साम्प्रतमेव शिरच्छिन्नम्, तयोक्तमार्य-पुत्र ! शोभनं कृतम्, यत्स दुरात्मा निहतः । ततः सा कुमारेण गन्धर्वविवाहेन परिणीता, तया समं विलसन् कुमारः कियत्कालं तत्र स्थितः ।

अन्यदा कुमारेण तत्र दिव्यवलयानां शब्दः श्रुतः । कुमारेणोक्तं-कोऽयं शब्दः श्रूयते ? तयोक्तं-कुमार ! एषा एव वैरिभगिनी खण्डशाखानाम्नी विद्याधरकुमारीपरिवृता स्वभ्रातृ-निमित्तं विवाहोपकरणानि गृहीत्वा समायाता । त्वमितस्त्वरितमपक्रम ? यावदेतासामहमभिप्रायं वेद्मि । यद्येतासां तवोपरि रागो भविष्यति, तदाहं प्रासादोपरि स्थिता रक्तां पताकां चालयिष्यामि । अन्यथा तु श्वेतामिति ।

कुमारस्तद्गृहाद् बहिर्गत्वा दूरे स्थित ऊर्ध्वं विलोकते, तावच्चालितां धवलपताकां दृष्ट्वा शनैः शनैस्तत्प्रदेशादपक्रान्तः कुमारः प्राप्तो गिरिनिकुञ्जमध्ये । तत्र भ्रमता कुमारेणैकं सरोवरं दृष्टम् । तत्र स्नानं कृत्वा सरःपश्चिमतीरे उत्तीर्णेन कुमारेण दृष्टैका वरकन्या, चिन्तितं चाहो ! मे पुण्यपरिणतिः, येनैषा कन्या मे दृग्गोचरमागता । तयाप्यसौ कुमारः स्नेहनिर्भरं विलोकितः, कुमारं विलोकयन्ती सा अग्रे प्रस्थिता । स्तोकया वेलया तया कन्यया एका दासी प्रेषिता । तया कुमाराय वस्त्रयुगलं पुष्पताम्बूलादिकं च दत्तम्, उक्तं च, या युष्माभिः सरस्तीरे कन्या दृष्टा, तया सर्वमिदं प्रेषितम्, लावण्यलतिकानाम्न्यहं तस्या दासी अस्मि । तया च ममेदमादिष्टम्-एनं महानुभावं कुमारं मम तातमहामन्त्रिणो मन्दिरे शरीरस्थितिं कारय । ततस्तत्र कुमार ! यूयमागच्छत ।

ततः कुमारस्तया सह तदैवामात्यमन्दिरे गतः । तत्र दास्या मन्त्रिण एवमुक्तम् मन्त्रिन् ! त्वत्स्वामिपुत्र्यायं प्रेषितोऽस्ति, प्रकाममस्यादरः कर्तव्यः, मन्त्रिणा तथैव कृतम् । द्वितीयदिने कुमारो मन्त्रिणा राज्ञः सभायां नीतः, अभ्युत्थितेन राज्ञा कुमारस्य धुरि आसनं दत्तम्, पृष्टश्च वृत्तान्तः, कुमारेण सर्वोऽपि कथितः ।

अथ विविधभङ्ग्या भोजितस्य कुमारस्य एवमुक्तं राज्ञा । कुमार ! तव भक्तिरस्मादृशैः कापि कर्तुं न पार्यते । परमियमेवास्माकं भक्तिः, यदियं कन्या तव प्राभृतीकृता । सुमुहूर्ते तयोर्विवाहो जातः । कुमारस्तया समं विलासं कुर्वन् सुखेन तत्र तिष्ठति । अन्यदा कुमारेण तस्याः प्रियायाः पृष्टम् । किमर्थमेकाकिने मह्यं त्वं नृपेण दत्ता ? सा उवाच आर्यपुत्र ! एष मदीयः पिता बलवत्तरवैरिसन्तापित इमां विषमपल्लिं समाश्रितः । अत्र तातपत्न्याः श्रीमत्याश्चतुर्णां पुत्राणामुपर्यहं पुत्री जाता । अहमतीव पितुर्वल्लभा, यौवनस्था अन्यदा पित्रा उक्ता । पुत्रि ! मम सर्वेऽपि राजानो विरुद्धाः सन्ति । तेन त्वमिह स्थितैव योग्यं वरं गवेषय ।

ततोऽहं ग्रामाद् बहिस्तस्य सरसस्तीरे समायातान् पथिकान् विलोकयन्ती स्थिता । तदानीं त्वं तत्रायातो मया भाग्यात् प्राप्तश्चेति परमार्थः । ततस्तया श्रीकान्तया समं विषय-सुखमनुभवतस्तस्य सुखेन वासरा यान्ति ।

अन्यदा स पल्लीपतिः कुमारेण समं निजसैन्यवेष्टितः स्वविरोधिनृपदेशभङ्गाय चलितः । मार्गे गच्छतस्तस्य क्वचित्सरस्तीरे वरधनुर्मिलितः । कुमारेणोपलक्षितः । कुमारं दृष्ट्वा स रोदितुं प्रवृत्तः, कुमारेण बहुप्रकारं वारितः स्थितः । कुमारेण पृष्टं-मत्तो दूरीभूतेन त्वया किमनुभूतं ? वरधनुः प्राह-कुमार ! तदानीं त्वां वटाध उपवेश्याहं जलार्थं गतः, सर एकं च दृष्टवान् । ततो जलं गृहीत्वा तवान्तिके यावदहमागन्तं प्रवृत्तस्तावत्सन्नद्धबद्धकवचैर्दीर्घ-नृपभटैः सहसान्मिलितैरहमुपलक्षितस्ताडितश्च, उक्तं च क्व ब्रह्मदत्त इति । मयोक्तमहं न जानामि । ततो दृढतरं ताडितोऽहमवदं - ब्रह्मदत्तो व्याघ्रेण भक्षितः । तैरुक्तं तं देशं दर्शय ? तैर्मार्यमाणोऽहं तवान्तिकदेशमागत्य तदानीं तां संज्ञामकार्षम् । त्वयि ततो नष्टेऽहं पुनस्तैर्भृशं ताड्यमानः स्वमुखे परिव्राजकदत्तां गुटिकां क्षिप्तवान् । तत्प्रभावादहं निश्चेष्टो जातः । ततस्ते मृतोऽयमिति ज्ञात्वा सर्वेऽपि भटा गताः । तेषां गमनानन्तरं चिरकालेन मया गुटिका मुखान्निष्कासिता । ततः सचेतनोऽहं त्वां गवेषयितुं प्रवृत्तः । न मया दृष्टस्त्वम्, ततोऽहमेकं ग्रामं गतः, तत्र दृष्ट एकः परिव्राजकः । तेनोक्तमहं तव तातस्य मित्रं सुभगनामा, तव पिता धनुर्नष्टः, माता तु दीर्घेण गृहीता । मातङ्गपाटके च क्षिप्तास्तीति श्रुत्वाहमतीव दुःखितः काम्पिल्यपुरे गतः । कापालिकवेषं कृत्वा मातङ्गमहत्तरं च वञ्चयित्वा मातङ्गपाटकान्मातरं निष्कासितवान् । एकस्मिन् ग्रामे पितृमित्रस्य देवशर्मब्राह्मणस्य गृहे मातरं मुक्त्वा त्वामन्वेषयन्नहमिहायातः । इत्थं यावत्तौ वरधनु - ब्रह्मदत्तौ वार्तां कुरुतस्तावदेकः पुरुषस्तत्रागत्यैवमुवाच, यथा-महाभाग ! भवता क्वचिदितस्ततो न पर्यटितव्यम्, त्वद्गवेषणार्थं दीर्घनियुक्ता नरा इहागताः सन्तीति श्रुत्वा तौ द्वावपि ततो वनान्नष्टौ, भ्रमन्तौ च कौशाम्ब्यां गतौ ।

तत्र बहिरुद्याने द्वयोः श्रेष्ठिसुतयोः सागरदत्त-बुद्धिलनाम्नोः कुर्कुटयुगलं लक्षपणकरणपूर्वकं योद्धुं प्रवृत्तम्, द्रष्टुं कौतुकेन तौ तत्रैव स्थितौ । बुद्धिलकुर्कुटेन सागरदत्तकुर्कुटः प्रहारेण जर्जरीकृतो भग्नः । सागरदत्तेन प्रेर्यमाणोऽपि स्वकुर्कुटो बुद्धिलकुर्कुटेन समं

पुनर्योध्धुं नाभिलषति । हारितं लक्षं सागरदत्तेन । अत्रान्तरे वरधनुनोक्तं-भो सागरदत्त ! एष सुजातिरपि कुर्कुटः कथं भग्नः ? ममात्रार्थे विस्मयोऽस्ति । यदि कोऽपि कोपं न करोति तदा बुद्धिलकुर्कुटमहं पश्यामि । सागरदत्तो भणति-भो महाराज ! विलोकय । नास्त्यत्र मम कोऽपि द्रव्यलोभः, किन्त्वभिमानसिद्धिमात्रप्रयोजनमस्तीति । ततो वरधनुना विलोकितः स कुर्कुटः, तच्चरणनिबद्धः सूचीकलापो दृष्टः, बुद्धिलोऽपि वरधनुं प्रति शनैरेवमाह-यदि त्वं सूचीकलापं न वक्ष्यसि, तदाहं तव लक्षार्धं दास्यामि । ततो वरधनुनोक्तं-विलोकितो यत्कुर्कुटो नात्र किञ्चिद् दृश्यते । एवमुक्त्वापि यथा बुद्धिलो न जानाति तथा सूचीकलापमपाकृत्य सागरदत्तस्य तद्व्यतिकरः कथितः । सागरदत्तेन पुनः स्वकुर्कुटः प्रेरितो बुद्धिलकुर्कुटेन समं युद्धं प्रववृते । सागरदत्तकुर्कुटेन जितो बुद्धिलकुर्कुटः, हारितं बुद्धिलेन लक्षम् । तुष्टः सागरदत्त एवमाह-आर्यपुत्र ! गृहे गम्यते, इत्युक्त्वा द्वावपि कुमारौ रथे निवेश्य सागरदत्तः स्वगृहे गतः । सागरदत्तस्तौ परमप्रीत्या पश्यति । सागरदत्तस्नेहनियन्त्रितौ तावतीवाग्रहात्तद्गृह एव तस्थतुः ।

कियद्दिनान्तरमेको दासस्तत्रायातः, तेनैकान्ते वरधनुराकारितः, उक्तं च वरधनु-कुमाराय, तव तदानीं सूचीव्यतिकरद्रव्यं स्वमुखोक्तं बुद्धिलेन तद्द्रव्यार्पणायायं हारः प्रेषितोस्ति । इत्युक्त्वा हारकरण्डिका तेन वरधनवे दत्ता, दासः स्वगृहे गतः । वरधनुरपि हारकरण्डिकां गृहित्वा ब्रह्मदत्तान्तिके गतः, स्वरूपं कथयित्वा हारकरण्डिकातो हारं निष्कास्य दर्शितवान् । हारं पश्यता ब्रह्मदत्तेन हारैकदेशस्थो ब्रह्मदत्तनामाङ्कितो लेखो दृष्टः । पृष्टं च मित्र ! कस्यैष लेखः ? वरधनुर्भणति को जानाति । ब्रह्मदत्तनामकाः पुरुषा बहवः सन्ति । ततो दूरे गत्वा वरधनुनोत्कीर्णो लेखः । तन्मध्ये इयं गाथा दृष्टा-

[1]पत्थिज्जइ जइ वि जए, जणेण संजोयजणियजत्तेणं ।
तहवि तुमं चिय धणिअं, रयणवई मुणे माणेउं ॥ १॥

उपदेशपदे षष्ठश्लोकवृत्त्यां इयं गाथा एवमस्ति-'पत्थिज्जइ जइ हियए, जणेण संजोग-जणिय-जत्तेणं । तहवि तुमं चिय धणिअं रयणवई महइ मुणे माणेउं' ॥ २५४ ॥ सूक्ष्मबुद्ध्या ध्यायता वरधनुनास्या गाथाया अर्थोऽवगतः । द्वितीयदिने एका परिव्राजिका तत्रायाता । सा कुमारशिरसि कुसुमाक्षतानि प्रक्षिप्य-कुमार ! त्वं शतसहस्रायुर्भवेत्याशिषं ददौ । ततः सा वरधनुमेकान्ते नयति स्म । तेन समं किञ्चिन्मन्त्रयित्वा सा प्रतिगता । कुमारेण वरधनुर्जल्पितः, अनया किमुक्तं ? वरधनुर्भणति अनयैवमुक्तं यत्तव बुद्धिलेन करण्डे हारः प्रेषितोऽस्ति, तेन समं च यो लेखः समागतोऽस्ति, तत्प्रतिलेखं समर्पय । मयोक्तमेष लेखो ब्रह्मदत्तराजनामाङ्कितो वर्तते । ततस्त्वमेव वद, कोऽसौ ब्रह्मदत्तः ? तयोक्तं श्रूयताम्, परं कस्यापि त्वया न वक्तव्यम् ।

---

१ प्रार्थ्यते य यद्यपि जये, जनेन संयोगजनितयत्नेन ।
तथापि त्वां चैव धनिकं, रत्नवती जानाति मानयितुं ॥ १ ॥

इह नगर्यां श्रेष्ठिपुत्री रत्नवतीनाम्नी कन्यकास्ति । सा बालभावादारभ्यातीव मम स्नेहानुरक्ता यौवनमनुप्राप्ता । अन्यदिने सा किञ्चिद्ध्यायन्ती मया दृष्टा, पृष्टा च पुत्रि ! त्वं किं ध्यायसीति । सा किमपि नैव बभाण । परिजनेनोक्तमियं बहून् प्रहरान् यावदीदृश्येव किञ्चिदार्त्तध्यानं कुर्वन्ती दृश्यते । परमस्या हार्दं न ज्ञायते । ततः पुनरपि तस्याः पृष्टम्, परं सा किञ्चिन्नोवाच । तत्सख्या प्रियङ्गुल्या उक्तम्-हे भगवति ! तव पुरः सा लज्जया किञ्चिद्वक्तुं न शक्नोति, अहं तावत्कथयामि । इयं गतदिने क्रीडार्थमुद्याने गता । तत्रानया स्वभ्रातुर्बुद्धिलश्रेष्ठिनः कुर्कुटयुद्धं कारयतः समीपे एको वरकुमारो दृष्टः, तं दृष्ट्वैषा एतादृशी जाता । कुमारीसख्याः प्रियङ्गुलतिकाया एतद्वचः श्रुत्वा मयोक्तं-पुत्रि ! कथय सद्भावम्, पुनः पुनरेवं मयोक्ता सा कथमपि सद्भावमुक्त्वा प्राह-भगवति ! त्वं मम जननीसमानासि, न किञ्चित्तवाकथनीयम् । अनया प्रियङ्गुलतिकया कथितो यो ब्रह्मदत्तः कुमारः, स मे पतिर्भविष्यति तदा वरम्, अन्यथाहं मरिष्यामि । सा मया भणिता-वत्से ! धीरा भव । अहं तथा करिष्ये, यथा तव समीहितं भविष्यति । ततः सा किञ्चित् स्वस्था जाता । कल्यदिने पुनरेवं मया तस्या विशेषाश्वासनाकरणार्थं कल्पितमेवोक्तम्, वत्से ! स ब्रह्मदत्तकुमारो मया दृष्टः । तयापि समुच्छ्वसितरोमकूपया भणितम्-भगवति ! तव प्रसादेन सर्वं भव्यं भविष्यति । किन्तु तस्य विश्वासनिमित्तं बुद्धिलव्यपदेशेनेमं हाररत्नं करण्डके प्रक्षिप्य ब्रह्मदत्तराजनामाङ्कितलेखसहितं कृत्वा कस्यचिद्धस्ते प्रेषय । ततो मया कल्ये तथा विहितम् । एष लेखव्यतिकरः सर्वोऽपि मया तव कथितः । साम्प्रतं प्रतिलेखं देहि ? ततो मयापि तस्याः प्रतिलेखो दत्तः । तन्मध्ये चेदृशी गाथा लिखितास्ति-

"[1]गुरुगुणवरधणुकलिओ, तं माणिओ मुणइ बंभदत्तोवि ।
रयणवई रयणमई, चंदोवि य चंदिमा जोगो ॥ १ ॥"

इदं वरधनूक्तमाकर्ण्य अदृष्टायामपि रत्नवत्यां परमप्रेमवान् कुमारो जातः । तद्दर्शनसङ्गमोपायमन्वेषमाणस्य कुमारस्य गतानि कतिचिद्दिनानि ।

अन्यदिने समागतो नगरबाह्याद्वरधनुरेवं वक्तुं प्रवृत्तः, यथा एतन्नगरस्वामिनो दीर्घनृपेण स्वकिङ्करा आवां गवेषणाय प्रेषिताः सन्ति । नगरस्वामिना चावां ग्रहणोपायः कारितोऽस्ति । एतादृशी लोकवार्ता बहिः श्रुता । सागरदत्तेन एतद्व्यतिकरं श्रुत्वा तौ द्वावपि भूमिगृहे गोपितौ । रात्रिः पतिता, कुमारेण सागरदत्तस्य भणितं-तथा कुरु, यथावामपक्रमावः । एतदाकर्ण्य सागरदत्तस्ताभ्यां द्वाभ्यां सह नगराद्बहिर्निर्गतः । स्तोकां भूमिं गत्वाऽनिच्छन्तमपि सागरदत्तं बलान्निवर्त्य कुमारवरधनू द्वावपि गन्तुं प्रवृत्तौ । पथि गच्छद्भ्यां ताभ्यां यक्षायतनोद्यानपादपान्तरालस्थिता प्रहरणसमन्वितरथवरसमीपस्था एका प्रवरमहिला दृष्टा, ततस्तया समुत्थाय सादरं तौ भणितौ, किमियत्यां वेलायां भवन्तौ समायातौ ? इति तस्या वचः श्रुत्वा कुमारः प्राह-भद्रे ! कौ आवां ? तयोक्तं त्वं स्वामी ब्रह्मदत्तोऽयं च

१ गुरुगुणवरधनुकलितः, तं मानितो जानाति ब्रह्मदत्तोऽपि ।
रत्नवती रत्नमयी, चन्द्रोऽपि च चन्द्रिकायोगः ॥ १ ॥

वरधनुः कुमार इति । कुमार उवाच-कथमेतदवगतं त्वया ? सा उवाच श्रूयताम्-इहैव नगर्यां धनप्रवरो नामा श्रेष्ठी वर्तते, तस्य धनसञ्चया भार्या वर्तते, तया अष्टपुत्राणामुपर्येका पुत्री प्रसूता, सा चाहमेव । मम च कोऽपि पुरुषो न रोचति, ततो मातुरनुज्ञयाहं यक्षमाराधितुं प्रवृत्ता । तुष्टेन यक्षेणैवमुक्तम्-वत्से ! तव भर्ता भविष्यच्चक्रवर्ती ब्रह्मदत्तो भविष्यति । मया भणितं-स मया कथं ज्ञातव्यः ? तेन उक्तम्-बुद्धिल-सागरदत्तयोः कुर्कुटयुद्धमध्ये यो दृष्टः तवानन्दं जनयिष्यति स वरधनुमित्रसहितो ब्रह्मदत्तकुमार उपलक्ष्यः । ततः परं मया हारलेखप्रेषणादिकं यत्कृतम्, तत्सर्वं तव सुप्रतीतमेवास्तीति कुमारीवाक्यमाकर्ण्य सानुरागः कुमारस्तया सह रथमारूढः । सा कुमारेण पृष्टा इतः क्व गन्तव्यं ?

रत्नवत्या भणितम् । अस्ति मगधपुरे मम पितुः कनिष्ठभ्राता धनसार्थवाहनामा श्रेष्ठी, स ज्ञातव्यतिकरो युवयोर्मम च समागमनं सुन्दरं ज्ञास्यति, ततस्तत्र गमनं क्रियते । पश्चाद्यथा युवयोरिच्छा तथा कार्यमिति रत्नवतीवचसा कुमारो मगधपुराभिमुखं गन्तुं प्रवृत्तः । वरधनुस्तदा सारथिर्बभूव । ग्रामानुग्रामं गच्छन्तौ तौ कौशाम्बीदेशान्निर्गतौ । अन्यदा गतौ गिरिगुहाटव्याम् । तत्र कण्टक-सुकण्टकाभिधानौ द्वौ चौरसेनापती तं प्रवरं रथम्, विभूषितं स्त्रीरत्नं च प्रेक्ष्य, तद्रक्षकं च कुमारद्वयमेव प्रेक्ष्य सन्नद्धौ सपरिवारौ प्रहन्तुमायातौ । अत्रावसरे कुमारेण तथा प्रहरणशक्तिर्दर्शिता, यथा सर्वेऽपि चौरसुभटाः कुमारप्रहाराज्जर्जराः सर्वासु दिक्षु गताः । कुमारस्ततो रथारूढश्चलितः । वरधनुनोक्तं-कुमार ! यूयं दृढश्रान्ताः, ततो मुहूर्त्तमात्रमत्रैव रथे निद्रासुखमनुभवत ।

ततो रत्नवत्या सह कुमारः प्रसुप्तः, गिरिनदी एका मार्गे समायाता, तावत्तुरङ्गमाः श्रमखिन्ना नाग्रे चलन्ति । ततः कथञ्चित्प्रतिबुद्धः कुमारः श्रमखिन्नांस्तुरङ्गमान् पश्यन् रथाग्रे च वरधनुमपश्यन् जलनिमित्तं वरधनुर्गतो भविष्यतीति चिन्तितवान् । इतस्ततः पश्यन् कुमारो रथाग्रभागं रुधिरावलिप्तं ददर्श । ततो व्यापादितो वरधनुरिति ज्ञात्वा हाहा ! हतो मे सुहृदिति शोकार्त्तः कुमारो रथोत्सङ्गात्पपात, मूर्छा च प्राप्तवान् । पुनरपि लब्धचैतन्यः स एवं विललाप । हा भ्रातः ! हा वरधनुमित्र ! त्वं क्व गतोऽसीति विलपन् कुमारः कथमपि रत्नवत्या रक्षितः । कुमारो रत्नवतीं प्रत्येवमाह-सुन्दरि ! न ज्ञायते वरधनुर्मृतो जीवन् वास्तीति । ततोऽहं तदन्वेषणार्थं पश्चाद्व्रजामि । तया भणितमार्यपुत्र ! अवसरो नास्ति पश्चाद्वलनस्य, येनाहमेकाकिनी, चौरश्वापदादिभीमं चारण्यमिदम्, अत्र च निकटवर्ती सीमावकाशोऽस्ति, येन परिम्लानाः कुशकण्टका दृश्यन्ते । एतद्रत्नवतीवचः प्रतिपद्य रत्नवत्या सह कुमारः पथि गन्तुं प्रवृत्तः, मगधदेशसन्धिसंस्थितमेकं ग्रामं च प्राप्तः । तत्र प्रविशन् कुमारः सभामध्यस्थितेन ग्रामाधिपतिना दृष्टः । दर्शनानन्तरमेव एष न सामान्यः पुरुष इति ज्ञात्वा सोपचारः प्रतिपत्त्या पूजितो नीतश्च स्वगृहम्, दत्तस्तत्र सुखावासः ।

तत्र सुखं तिष्ठन् स एकदा ग्रामाधिपतिना भणितः-कुमार ! त्वं विखिन्न इव किं लक्ष्यसे ? कुमारेणोक्तम्-मम भ्राता चौरेण सह भण्डनं कुर्वन् न जाने कामप्यवस्थां

प्राप्तः, ततो मया तदन्वेषणार्थं तत्र गन्तव्यम् । ग्रामाधिपेनोक्तमलं खेदेन, यद्यस्यामटव्यां स भविष्यति तदावश्यमिह प्राप्स्यामः । इति भणित्वा तेन प्रेषिता निजपुरुषा अटव्यां गत्वा समायाताः कथयन्ति, यदस्माभिः सर्वत्र स पुरुषो गवेषितः, परं क्वचिन्न दृष्टः । किन्तु प्रहारापतितो बाण एवैष दृष्टः । ततः कुमारो वरधनुर्मृत इति चिरकालं शोकं चकार । एकदा रात्रौ तस्मिन् ग्रामे चौरधाटिः पतिता, सा च बाणैः कुमारेण जर्जरीकृता नष्टा । अथ हर्षितो ग्रामाधिपतिर्ग्रामश्च ।

अथ ग्रामाधिपतिमापृच्छ्य, ततश्चलितः कुमारः क्रमेण राजगृहं प्राप्तः । तत्र नगराद्बहिः परिव्राजकाश्रमे रत्नवतीं मुक्त्वा स्वयं नगराभ्यन्तरे गतः । तत्रैकस्मिन् प्रदेशे तेन धवलगृहं दृष्टम् । तदन्तः प्रविष्टेन कुमारेण द्वे कन्ये दृष्टे, ताभ्यां कुमारं दृष्ट्वा प्रकटितानुरागाभ्यां भणितम् कुमार ! युष्मादृशामपि पुरुषाणां रक्तजनमुत्सृज्य भ्रमितुं किं युक्तं ? कुमारेणोक्तं स जनः कः ? येनैवं यूयं भणथ । ताभ्यामुक्तं प्रसादं कृत्वासने निविशन्तु भवन्तः । तत उपविष्ट आसने कुमारः । ताभ्यां कुमारस्य मज्जनस्नानाद्युपचारं कृत्वोक्तम्, कुमार ! श्रूयतामस्मद्वृत्तान्तः-

इहैव भरतक्षेत्रे वैताढ्यगिरिदक्षिणश्रेणिमण्डिने शिवमन्दिरे नगरे ज्वलनशिखो राजा, तस्य विद्युच्छिखानाम्नी देवी, तस्या आवां द्वे पुत्र्यौ । अस्मद्भ्राता उन्मत्तो नाम वर्तते । अन्यदास्मत्पितागिनशिखाभिधानेन मित्रेण समं यावद्गोष्ठ्यां प्रविष्टस्तिष्ठति, तस्मिन्नवसरेऽष्टापदपर्वताभिमुखं व्रजन्तं सुरासुरसमूहं पश्यति । राजापि पुत्रीसहितस्तत्र गन्तुं प्रवृत्तः, अष्टापदे प्राप्तो जिनप्रतिमाश्च वन्दिताः, कर्पूरा-ऽगरुधूपाद्युपचारो महान् कृतः । प्रदक्षिणात्रयं कृत्वा निर्गच्छता राज्ञाऽशोकपादपस्याध उपविष्टं चारणमुनियुगलं दृष्टं प्रणतं च । तत्रोपविष्टस्य राज्ञः पुरस्ताद् गुरुणैवं धर्मदेशना कर्तुमारब्धा-असारः संसारः, शरीरं भङ्गुरम्, शरदभ्रोपमं जीवितम्, तडिद्विलसितानुकारि यौवनम्, किम्पाकफलोपमा भोगाः, सन्ध्यारागसमं विषयसुखम्, कुशाग्रजलबिन्दुचञ्चला लक्ष्मीः, सुलभं दुःखम्, दुर्लभं सुखम्, अनिवारितप्रसरो मृत्युः, तस्मादेवं स्थिते सति भो भव्याः ! मोहप्रसरं छिन्दन्तु, जिनेन्द्रधर्मे मनो नयन्तु । एवं चारणश्रमणदेशनां श्रुत्वा सुरादयो यथाऽऽगतास्तथा गताः । तदा लब्धावसरेणाग्निशिखिना भणितम्-यथैतासां बालिकानां को भर्ता भविष्यति ? चारणश्रमणाभ्यामुक्तमेते द्वे कन्ये भ्रातृवधकारिणो नार्यौ भविष्यतः । तयोरेतद्वचः श्रुत्वा राजा श्याममुखो जातः ।

अस्मिन्नवसरे आवाभ्यामुक्तम्, तात ! साम्प्रतमेव साधुभ्यामुक्तं संसारस्वरूपम् । तत आवयोरलमेवंविधावसानेन विषयसुखेन, आवयोरेतद्वचस्तातेन प्रतिपन्नं, आवाभ्यां च भ्रातृस्नेहेन स्वदेहसुखकारणानि त्यक्तानि । भ्रातुरेव स्नानभोजनादिचिन्तां कुर्वन्त्यावावां तिष्ठावः । अन्यदास्मद्भ्रात्रा पृथिवीं भ्रमता दृष्टा कुमार ! भवन्मातुलपुत्री पुष्पवती कन्यका । तद्रूपाक्षिप्तचित्तस्तां हृत्वा आगतः । परं तद्दृष्टिं सोढुमक्षमः स विद्यां साधयितुं गतः । अतः

परं वृत्तान्तो युष्माकं ज्ञानगोचरोऽस्ति । तस्मिन् काले भवदन्तिकादागत्य पुष्पवत्या आवयोर्भ्रातृवधवृत्तान्तः कथितः । ततः शोकभरेण आवां रोदितुं प्रवृत्ते, मधुरवचनैश्च पुष्पवत्या रक्षिते । तदा आवां शङ्करीविद्या एवं वक्तुं प्रवृत्ता, असौ भ्रातृवधकारी ब्रह्मदत्त-श्चक्रवर्ती भविष्यति, युवां मुनिवचनं किं न स्मरथः ? एतद्वचनमाकर्ण्य आवाभ्यां जातानु-रागाभ्यां मानितम् । परं पुष्पवत्या बालिकया स्नेहरससम्भ्रान्तया रक्तपताकां विहाय श्वेतपताका चालिता । तद्दर्शनानन्तरं त्वमन्यत्र कुत्रापि गतः । नानाविधग्रामा-ऽऽकर-नगरादिषु भ्रमन्तीभ्यामावाभ्यां त्वं क्वचिन्न दृष्टः । ततो विखिन्ने आवामिहागते । साम्प्रतम-तर्कितहिरण्यसमं तव दर्शनं जातम् । ततो हे महाभाग ! पुष्पवतीव्यतिकरं स्मृत्वा कुरु अस्मत्समीहितम् । एवं श्रुत्वा कुमारेण सहर्षं मानितम् । गन्धर्वविवाहेन तयोः पाणिग्रहणं कृतम् । एकरात्रौ ताभ्यां सममुषित्वा प्रभाते कुमारस्तयोरेवमुवाच-युवां पुष्पवत्या समं गच्छतम् । तया समं च तावत्स्थातव्यम्, यावन्मम राज्यलाभो भवति । एवं श्रुत्वा ते गते । तावत्कुमारो न तद्धवलगृहं, न तं परिजनं च पश्यति, चिन्तितवांश्च एषा विद्याधरीमायेति चिन्तयन् रत्नवतीगवेषणानिमित्तं स तापसाश्रमाभिमुखं गतः । न च तत्र तेन रत्नवती दृष्टा, न चान्यः कोऽपि पुरुषो दृष्टः । ततः कं पृच्छामीति विचार्य स इतस्ततः पश्यति । तावदेको भद्राकृतिः पुरुषस्तत्रायातः । कुमारेण स पृष्टः, भो महाभाग ! एवंविधरूप-नेपथ्या एका स्त्री मयात्र मुक्ता, कल्येऽद्य वा त्वया सा दृष्टा ? तेन भणितं पुत्र ! त्वं किं तस्या रत्नवत्या भर्त्ता ? कुमारो भणति एवम् । तेन भणितम्-कल्ये सा मया रुदन्ती दृष्टा, अपराह्णकाले च तस्याः समीपे गतः । पृष्टा च सा मया पुत्रि ! कासि त्वं ? कुतः समागता ? किं ते शोककारणं ? क्व वा त्वया गन्तव्यं ? तया किञ्चित्कथिते सा मया प्रत्यभिज्ञाता, मम त्वं दौहित्री भवसीत्युदित्वा मया तस्य लघु पितुः समीपे गत्वा शिष्टा । तेनाप्युपलक्ष्य सा विशेषादरेण स्वमन्दिरे प्रवेशिता । सर्वत्र त्वं गवेषितः परं न क्वचिद् दृष्टः । साम्प्रतं सुन्दरं जातं यत्त्वं लब्धः । एवमुक्त्वा नीतः कुमारस्तद्गृहे, उपचारः कृतः । तत्र महोत्सवेन रत्नवतीपाणिग्रहणं कुमारः कृतवान् । तया सह विषयसुखमनुभवंश्च कियत्कालं तस्थौ ।

अन्यदा वरधनुवर्षदिवसोऽद्येत्युक्त्वा तद्गृहे कुमारेण ब्राह्मणादयो भोजिताः । अस्मिन्नवसरे वरधनुः कृतब्राह्मणवेषो भोजननिमित्तमागतः एवं भणितुं प्रवृत्तश्च । भो ज्ञापयन्तु तस्य भोज्यकारिणो यथा-यदि मम भोज्यं प्रयच्छथ तदा तस्य परलोकवर्तिन उदरे भोज्यं सङ्क्रामति । गृहपुरुषैस्तद्वचः कुमाराय शिष्टम्, कुमारोऽपि गृहाद्बहिर्निर्गतः । दृष्टो वरधनुः प्रत्यभिज्ञातश्च । गाढं कुमारेणालिङ्गितो गृहमध्ये प्रवेशितः । स्नान-मज्जन-भोजनादिभिः सत्कृतश्च अनन्तरं कुमारेण पृष्टो वरधनुः स्ववृत्तान्तं जगौ । यथा तस्यां रात्रौ निद्रावशमुपागतेषु युष्मासु सत्सु पृष्टतो धावित्वा चौरेणैकेन [१]कुडङ्गान्तरितेन मम पादे बाणप्रहारः कृतः । तद्वेदनापरवशोऽहं निपतितो महीतले, परमपायभीरुत्वेन मया युष्माकं

१ लतागृहान्तरितेन ।

न निवेदितम्, रथस्त्वग्रे चलितः । अहं तु शनैः शनैः पतितवृक्षान्तराले चलन् महता कष्टेन तस्मिन् ग्रामे प्राप्तो यत्र यूयं स्थिताः । तेन ग्रामाधिपतिना सत्कृतः । युष्माकं प्रवृत्तिं श्रुत्वाहमद्य प्रगुणीभूतो भोजनप्रस्तावे समागतः । यूयमद्य मद्भाग्यान्मिलिताः । अथ तयोस्तत्राऽवियुक्तयोः सहर्षं दिवसा यान्ति ।

अन्यदा ताभ्यां परस्परमेवं विचारितम् । यथावाभ्यां कियत्कालं मुक्तपुरुषाकाराभ्यां स्थातव्यं ? एवं च चिन्तयतोस्तयोर्गतः कियान् कालः । अन्यदा तत्र समायातो मधुमासः, मदनमहोत्सवे जायमाने सर्वलोको नगराद्बहिः क्रीडितुमायातः । वरधनु-कुमारावपि कौतुकेन नगराद्बहिर्गतौ निर्भरक्रीडारसनिमग्ने लोकेऽतर्कित एव पातितमिण्ठो निरंकुशो राज्ञो हस्ती तत्रायातः, समुच्छलितकोलाहलो भग्नक्रीडारसो नष्टः समन्तान्नारीनिकरः । एका च बालिका समुन्नतपयोधरा नश्यन्ती तस्य हस्तिनो दृष्टौ पतिता, सा शरणं मार्गयन्ती इतस्ततः पश्यति, तस्याः परिजनाः पूत्कुर्वन्ति । भयभ्रान्तायास्तस्याः पुरो भूत्वा कुमारेण स करी हक्कितः, एषा च मोचिता । सोऽपि करी तां मुक्त्वा रोषवशविस्तारितलोचनः प्रसारित-शुण्डादण्डः शीघ्रं कुमाराभिमुखं धावितः, कुमारेणाप्युत्तरीयवस्त्रं गजाभिमुखं प्रक्षिप्तम् । गजेन तद्वस्त्रं शुण्डया गृहीत्वा गगने प्रक्षिप्तम् । गगनाच्च पुनर्भूमौ निपतितम्, तद्ग्रहणाय यावत्करी पुनर्भूम्यभिमुखं परिणमति, तावदुत्प्लुत्य कुमारस्तत्स्कन्धमारूढः, स्वकरतलाभ्यां तत्कुम्भस्थलमास्फालितवान् । मधुरवचनैश्च सन्तोषितः सन् करी स्ववशं नीतः । समुच्छलितः साधुकारः, जयति कुमार इति पठितं बन्दिजनैः । कुमारेण स करी आलानस्तम्भसमीपं नीतो बद्धश्च । नरपतिस्तमनन्यसदृशं दृष्ट्वा परमं विस्मयं प्राप्तः स्वमन्त्रिणं पप्रच्छ । क एषः ? ततः कुमारस्वरूपाभिज्ञेन मन्त्रिणोक्तम् । एव ब्रह्मराज्ञः पुत्रो ब्रह्मदत्तकुमार इति । ततस्तुष्टेन राज्ञा नीतः कुमारः स्वभुवनम् । सत्कृतश्च स्नान-मज्जन-भोजनादिभिः । ततः कुमारस्याष्टौ स्वपुत्र्यो दत्ताः । महोत्सवपूर्वकं तासां पाणिग्रहणं कुमारेण कृतम् । तत्र कियद्दिनानि वरधनुकुमारौ सुखेन स्थितौ ।

अन्यदा एका स्त्री कुमारसमीपमागत्य भणितुं प्रवृत्ता यथा-कुमार ! अस्ति किञ्चिद्वक्तव्यं तव, कुमारेणोक्तं वद, सा उवाच-अस्यामेव नगर्यां वैश्रमणो नामा सार्थवाहः, तस्य पुत्री श्रीमत्यस्ति, सा मया बालभावादारभ्य पालिता, या त्वया तदानीं हस्तिसम्भ्रमाद्रक्षिता । हस्तिसम्भ्रमोद्धरिता सा तदानीं जीवितदायकं त्वां स्नेहेन विलोकितवती साम्प्रतं त्वदेकचित्ता त्वद्रूप-लावण्य-कलाकौशलमोहिता त्वामेव स्मरन्ती परिजनेन कथमपि स्वमन्दिरं नीता । तत्रापि सा न मज्जन-भोजनादिदेहस्थितिं करोति । तदानीं मया तस्या उक्तम्-कथं त्वमकाण्डे ईदृशी जाता ? यावन्ममापि प्रतिवचनं न ददासि ? हसित्वा सा एवमुवाच । हे अम्ब ! भवत्याः किमकथनीयं ? परं लज्जया किञ्चिद्वक्तुं न शक्नोमि । पुनर्मया साग्रहं पृष्टा सोवाच-येनाहं हस्तिसम्भ्रमाद्रक्षिता, तेन समं यदि मम पाणिग्रहणं न स्यात्, तदा मेऽवश्यं मरणम् । एवमुक्त्वा तयाहं तव समीपे प्रेषिता, अङ्गीकुरुतां बालिकाम् । कुमारेण तद्वचोऽङ्गीकृतम् । प्रशस्तदिवसे तस्याः पाणिग्रहणं कुमारेण कृतम् । वरधनुना तु

सुबुद्धिनामामात्यपुत्र्या नन्दानाम्न्याः पाणिग्रहणं कृतम् । एवं च द्वयोरपि विषयसुखमनुभवतोस्तयोर्गताः कियन्तो वासराः, तयोः सर्वत्र प्रसिद्धिर्जाता ।

तावन्यदा गतौ वाराणस्याम्, ब्रह्मदत्तं बहिः स्थापयित्वा वरधनुर्नगरस्वामिकटकसमीपं गतः । एष हर्षितः सबलवाहनः सम्मुखो निर्गतः, कुमारं च हस्तिस्कन्धे समारोप्य नगरीप्रवेशोत्सवो महान् कृतः । स्वभवने नीतस्य कुमारस्य स्नान-मज्जन-भोजनादिसामग्रीं कृत्वा, प्रकामं सत्कारं कृत्वा च स्वपुत्री कनकवती अनेकहय-गज-रथ-द्रव्यकोशसहिता दत्ता । प्रशस्तविवाहो जातः । तया समं विषयसुखमनुभवतस्तस्य सुखेन कालो याति । ततो दूतसम्प्रेषणेनाकारिताः सबलवाहनाः पुष्पचूलराज-धनुमन्त्रि-कणेरदत्त-भवदत्तादयोऽनेके राजमन्त्रिणः समायाताः । तैः सर्वैः कुमारो राज्येऽभिषिक्तः, वरधनुस्तु सेनापतिः कृतः । ब्रह्मदत्तः सर्वसैन्यसहितो दीर्घनृपोपरि चलितः । अविच्छिन्नप्रयाणैश्च काम्पिल्यपुरे प्राप्तः । दीर्घनृपेणापि कटकादीनां दूतः प्रेषितः । परं तैस्तु निर्भर्त्सितः दूतः स्वस्वामिसमीपे गतः । ब्रह्मदत्तसैन्येन काम्पिल्यपुरं समन्ताद्वेष्टितम् । ततो दीर्घनृपेणैवं चिन्तितम्, कियत्कालमस्माभिर्बिलप्रविष्टैरिव स्थेयं ? साहसमवलम्ब्य नगरात्स्वसैन्यपरिवृतो दीर्घनृपो निर्गत्य सम्मुखमायातः । ब्रह्मदत्तदीर्घनृपसैन्ययोर्घोरः सङ्ग्रामः प्रवृत्तः । क्रमाद् ब्रह्मदत्तसैन्येन दीर्घनृपसैन्यं भग्नम् । अथ दीर्घनृपः स्वयमुत्थितः । ब्रह्मदत्तोऽपि तमायातं वीक्ष्य प्रदीप्तकोपानलस्तदभिमुखं चलितः । तयोर्द्वयोर्युद्धं लग्नम् । अनेकैरायुधैर्निक्षिप्तैर्न तयोः सङ्ग्रामरसः सम्पूर्णो बभूव । ब्रह्मदत्तेन ततश्चक्रं मुक्तम् । चक्रेण दीर्घनृपमस्तकं च्छिन्नम् । ततो जयत्येष चक्रवर्तीत्युच्छलितः कलकलः, सिद्धगन्धर्वदेवैर्मुक्ता पुष्पवृष्टिः, उक्तं च उत्पन्नोऽयं द्वादशश्चक्री । ततो जनपदलोकैः स्तूयमानो नारीवृन्दकृतमङ्गलः कुमारः स्वमन्दिरे प्रविष्टः । कृतश्च सकलसामन्तैर्ब्रह्मदत्तस्य चक्रवर्त्यभिषेकः । चक्रवर्तित्वं पालयन् ब्रह्मदत्तः सुखेन कालं निर्गमयति ।

अन्यदा चक्रवर्तिनः पुरो नटेन नाट्यं कर्तुमारब्धम् । स्वदास्या अपूर्वं कुसुमदामगण्डं हस्ते ढौकितम् । तच्च प्रेक्षतो गीतविनोदं श्रृण्वतश्चक्रवर्तिन एवं विमर्शो जातः । एवंविधो नाट्यविधिर्मया क्वचिद् दृष्टः, क्वचिच्चैतादृशं पुष्पदामगण्डमपि घ्रातम् । एवं चिन्तयतस्तस्य जातिस्मरणमुत्पन्नम् । दृष्टाः पूर्वभवाः, तत्र सौधर्मे पद्मगुल्मविमानेऽनुभूतं नाट्यदर्शनदिव्यपुष्पाघ्राणादिकं तस्य स्मृतिपथमाययौ । देवसुखस्मरणेन मूर्च्छां गतः पतितो भूमौ चक्री । पार्श्ववर्तिभिर्वातोत्क्षेपादिना स्वस्थीकृतः । ततश्चक्रवर्तिना पूर्वभवभ्रातृशुद्ध्यर्थं श्लोकार्धमिदं रचितम्, यथा-

"आस्व दासौ मृगौ हंसौ, मातंगावमरौ तथा ॥" इदं श्लोकार्धं कृत्वा चक्रिणा वरधनुसेनापतेरुक्तम्, इदं श्लोकार्धं सर्वत्र निर्घोषय, एतत्पश्चिमार्धं यः पूरयति तस्य राजा राज्यार्धं ददाति । इदं श्लोकार्धं सर्वैर्लोकैः शिक्षितम्, ते यत्र तत्र निर्घोषयन्ति । अत्रावसरे स पूर्वभवसम्बन्धी भ्राता चित्रजीवः पुरिमतालनगरे इभ्यपुत्रो भूत्वा सञ्जातजातिस्मरणो

गृहीतव्रतस्तत्र नगरे मनोरमाभिधाने आरामे समवसृतः । तत्र प्रासुके भूभागे पात्रोपकरणानि निक्षिप्य धर्मध्यानोपगतः कायोत्सर्गेण स्थितः । अत्रान्तरे आरघट्टिकेन पठ्यमानं तत् श्लोकार्धं मुनिना श्रुतम् । ज्ञानोपयोगेन स्वभ्रातृस्वरूपं सर्वमवगम्य मुनिनोत्तरचरणद्वयं पूरितम्-

"एषा नौ षष्ठिका जाति-रन्योन्याभ्यां वियुक्तयोः ॥ १ ॥" ततोऽसावारघट्टिकस्तत् श्लोकार्धं लिखित्वा प्रफुल्लास्यपङ्कजो गतो राजकुलम्, पठितश्चक्रिणः पुरः सम्पूर्णः श्लोकः । ततः पूर्वभवभ्रातृस्नेहातिरेकेण चक्री मूर्च्छां गतः । क्षुभिता सभा । रोषवशंगतेन सेवकवर्गेण आरघट्टिकश्चपेटाभिर्हन्तुमारब्धः, हन्यमानेन तेनोचे, इदं पदद्वयं मया न पूरितम्, किन्तु वनस्थेन मुनिनेति विलपन्नसौ मोचितः । गतमूर्च्छेन चक्रिणा पूर्वभवभ्रातृमुनिं समागतं श्रुत्वा तद्भक्तिस्नेहाकृष्टचित्तो ब्रह्मदत्तचक्री सपरिकरो निर्ययौ । उद्याने तं मुनिं ददर्श, वन्दित्वा चाग्रे उपविष्टः । मुनिना प्रारब्धा धर्मदेशना । दर्शिता भवनिर्गुणता, वर्णिताः कर्मबन्धहेतवः, श्लाघितो मोक्षमार्गः, ख्यापितः शिवसौख्यातिशयः । इमां देशनां श्रुत्वा पर्षत्संविग्ना जाता । ब्रह्मदत्तस्त्वभावित एवमाह-भगवन् ! यथा स्वसङ्गसुखेन वयमाह्लादितास्तथा राज्यस्वीकारेण साम्प्रतमस्मानाह्लादयन्तु, पश्चादावां तपः स्वयमेव करिष्यावः । एतदेव वा तपसः फलम् । मुनिराह-युक्तमेवेदं वचो भवतामुपकारोद्यतानाम् । परमियं मानुष्यता दुर्लभा, सततं पतनशीलमायुः, श्रीश्च चञ्चला, अनवस्थिता धर्मबुद्धिः, विषया विपाककटवः, विषयासक्तानां च ध्रुवो नरकपातः, दुर्लभं पुनर्मोक्षबीजं विरतिरत्नम्, तत्त्यागान्नरकपातहेतुः, कतिपयदिनभावि राज्याश्रयणं न विदुषां चित्तमाह्लादयति ।

ततः परित्यज्य कदाशयं प्राग्भवानुभूतदुःखानि स्मर । पिब जिनवचनामृतरसम् । सञ्चर तदुक्तमार्गेण । सफलीकुरु मनुष्यजन्मेति । स प्राह-भगवन्नुपनतत्यागेनाऽदृष्टसुखवाञ्छाऽज्ञानतालक्षणम्, तन्मैवमादिश, कुरु मत्समीहितं । मुनिराह संसारसुखं भुङ्क्तं परभवे महते दुःखाय भावीति तत्त्यागः कार्यते । एवं मुनिना वारंवारमुक्तोऽपि यदा चक्रवर्ती न प्रतिबुध्यते । तदा मुनिना चिन्तितम् । आः ज्ञातम्, पूर्वभवे सनत्कुमारचक्रिस्त्रीरत्नकेशसंस्पर्शनजाताभिलाषातिरेकेण सम्भूतभवेऽमुना मया निवार्यमाणेनापि चक्रवर्तिपदवीप्राप्तिनिदानं कृतम् । तस्येदृशं फलम् । अतः कारणादसौ दुष्टाध्यवसायो जिनवचनानामसाध्य इत्युपेक्षितम् । मुनिस्ततो विजहार, क्रमेण च मोक्षं गतः । चक्रिणोऽपि प्रकामं सुखमनुभवतः कियान् कालोऽतीतः ।

अन्यदैकेन पूर्वपरिचितेन द्विजातिनोक्तोऽसौ, भो राजाधिराज ! ममेदृशी वाञ्छा समुत्पन्नास्ति, यच्चक्रिभोजनं भुञ्जे । चक्रिणोक्तम्, भो द्विज ! मामकं भोजनं भोक्तुं त्वमक्षमः, यतो मां विहाय मद्भोजनमन्यस्य न परिणमति, ततो ब्राह्मणेनोक्तम् धिगस्तु ते राज्यलक्षीमाहात्म्यम्, यदन्नमात्रदानेऽप्यालोचयसि । ततश्चक्रिणा तस्य भोजनमङ्गीकृतम् । स्वगृहे निमन्त्र्य स्वभोजनदानेन भोजितश्चासौ भार्या-पुत्र-स्नुषा-दुहितृ-पौत्रादिकुटुम्बा-

न्वितः भोजनं कृत्वा स स्वगृहे गतः । रात्रावत्यन्तजातोन्मादप्रसरोऽनपेक्षितमातृ-स्नुषा-भगिनी-व्यतिकरो महामदनवेदनानष्टचित्तः प्रवृत्तोऽकार्यमाचरितुं द्विजः । द्वितीये दिने मदनोन्मादोपशान्तः परिजनस्य निजमास्यं दर्शितुमपारयन् निर्गतो नगरात्स द्विज एवं चिन्तयामास । अनिमित्तवैरिणा चक्रिणाहं विडम्बितः । अमर्षं वहता तेन द्विजेन वने भ्रमता एकोऽजापालको दृष्टः, स कर्करिकाभिरश्वत्थपत्राणि काणीकुर्वन् लक्ष्यवेधी वर्तते । द्विजेन चिन्तितं मद्विवक्षितकार्यकरोऽयमिति कृत्वोपचरितस्तेन दानसन्मानादिभिः । कथितस्तेन स्वाभिप्रायोऽस्य रहसि । तेनापि प्रतिपन्नः ।

अन्यदा गृहान्निर्गच्छतो ब्रह्मदत्तस्य कुड्यन्तरिततनुनानेन अमोघवेधिना निक्षिप्तगोलिकया समकालमुत्पाटिते लोचने । राज्ञा तद्वृत्तान्तमवगम्य उत्पन्नकोपेनासौ सपुत्रबान्धवो घातितः । ततश्चक्रिणान्येऽपि द्विजा घातिताः । अशान्तकोपेन च चक्रिणा मन्त्रिण एवमुक्तम्, यथा ब्राह्मणानामक्षीणि कर्षयित्वा स्थाले निक्षिप्य स्थालं मम पुरो निधेहि, यतोऽहं तानि स्वहस्तेन मर्दयित्वा वैरवालनसुखमनुभवामि । मन्त्रिणा तस्य चक्रिणः क्लिष्टकर्मोदयवशतामवगम्य शाखोटतरुफलानि स्थाले निक्षिप्य अर्पितानि । सोऽपि रौद्राध्यवसायस्तानि । फलान्यक्षिबुद्ध्या मर्दयित्वा सुखमनुभवति । एवं स प्रत्यहं करोति । ततः सप्तशतानि षोडशोत्तराणि वर्षाणि आयुरनुपाल्य प्रवर्धमानरौद्राध्यवसायः सप्तमनरकपृथिव्यां त्रयस्त्रिंशत्सागरोपमायुर्नारको बभूव ।

साम्प्रतं सूत्रमनुष्ठीयते -

जाईपराजिओ खलु, कासि नियाणं तु हत्थिणपुरंमि ।
चुलनीइ बंभदत्तो । उववन्नो पउमगुम्माओ ॥ १ ॥

'खलु', इति निश्चये अलङ्कारे वा । जात्या चाण्डालाख्यया पराजितः- पराभूतः, सर्वतो निर्घाटितो गृहीतदीक्षः सम्भूतश्चित्रस्य लघुभ्राता हस्तिनागपुरे चक्रवर्तिस्त्रीरत्नवन्दनात् केशपाशसंस्पर्शात् चक्रवर्तिपदप्रार्थनारूपनिदानमकार्षीत् । ततः स सम्भूतसाधुः पद्मगुल्मविमाने - नलिनगुल्मविमाने उत्पन्नः । ततश्च नलिनगुल्मविमानात् सम्भूतजीवो ब्रह्मराज्ञो भार्या चुलनी, तयोः पुत्रत्वेन ब्रह्मदत्त इति नाम्ना उत्पन्नः इति ॥ १ ॥

कंपिल्ले संभूओ चित्तो, पुण जाओ पुरिमतालंमि ।
सिट्ठिकुलंमि विसाले, धम्मं सोऊण पव्वइओ ॥ २॥

काम्पिल्ये नगरे ब्रह्मराजा, तद्भार्या चुलनी, तयोः पुत्रः सम्भूतजीवो ब्रह्मदत्तः सञ्जातः । चित्रश्चित्रजीवः पुनः पुरीमतालनगरे विशाले - विस्तीर्णे एकस्मिन् श्रेष्ठिनः कुले श्रेष्ठिपुत्रः सञ्जातः । स च चित्रजीवस्तत्र श्रेष्ठिपुत्रत्वेन समुत्पद्यानुक्रमेण तारुण्ये धर्मं श्रुत्वा प्रव्रजितः- प्रव्रज्यामग्रहीत् ॥ २ ॥

कंपिल्लंमि य नयरे, समागया दोवि चित्तसंभूया ।
सुहदुक्खफलविवागं कहंति ते इक्कमिक्कस्स ॥ ३ ॥

अथ स चित्रजीवो गृहीतदीक्षः समुत्पन्नजातिस्मृत्यादिज्ञानो विहरन् काम्पिल्ये नगरे समागतः। तत्रैव काम्पिल्ये नगरे ब्रह्मदतोऽपि लब्धचक्रवर्तिपदस्तिष्ठति। एकदा सदेवोपनीत-मन्दारकल्पवृक्षाणां मालासाधर्म्यं दृष्ट्वा समुत्पन्नजातिस्मृतिरभूत। तदा च ब्रह्मदत्तेन -

"आस्व दासौ मृगौ हंसौ, मातंगावमरौ तथा ॥" इति श्लोकार्धं स्वबन्धुसम्बन्ध-गर्भितं कृत्वा नगरे उद्घोषणा कारिता। यः कश्चिदग्रेतनं श्लोकार्धं पूरयति, तस्मै वाञ्छितं ददामि। राज्यार्धं दद्मि। अस्मिन्नेवावसरे भ्रातृबोधनार्थं समागतेन चित्रजीवसाधुना -

"इमा नौ षष्ठिका जाति-रन्योन्याभ्यां वियुक्तयोः ॥ १ ॥" इति श्लोकोत्तरार्धं पूरितम्। तद्वनमध्ये अरघट्टभ्रामकेण आरामिकेण साधुमुखेन श्रुत्वा राज्ञोऽग्रे उक्तम्। राजापि श्रुत्वा मूर्छां प्राप। ततो राज्ञा पृष्टेन कुट्टितेन च तेनोक्तं मया श्लोकार्धं पूरितं नास्ति। किन्त्वारामे कायोत्सर्गस्थितेन एकेन साधुना पूरितम्। ब्रह्मदत्तचक्रधरेण श्लोकपूरणात् ज्ञातोऽयं साधुर्मम भ्राता। ततो राजा मुनिसमीपे गतः। अत एव सूत्रकारेणोक्तम्-काम्पिल्ये नगरे द्वावपि चित्र-सम्भूतौ, चित्र-सम्भूतजीवौ, चक्रवर्ति-मुनीश्वरौ समागतौ। एकत्र मिलितौ तौ च सुख-दुःखफलविपाकं सुकृत-दुष्कृतकर्मानुभावरूपं एकैकस्य परस्परं कथयतः स्म इत्यध्याहार्यम् ॥ ३ ॥

चक्कवट्टी महड्ढिओ, बंभदत्तो महायसो ।
भायरं बहुमाणेणं, इयं वयणमब्बवी ॥ ४ ॥

ब्रह्मदत्तचक्रवर्ती भ्रातरं बहुमानेन मनसो रागेणेदं वचनमब्रवीत्। कथम्भूतः चक्रवर्त्ती ? महर्द्धिकः सम्प्राप्तषट्खण्डराज्यः। पुनः कथम्भूतो ब्रह्मदत्तः ? महायशाः, महद् यशो यस्य स महायशा भुवनत्रयप्रसिद्धः ॥ ४ ॥

आसि मो भायरा दोवि, अन्नमन्नवसाणुगा ।
अन्नमन्नमणुरत्ता, अन्नमन्नहिएसिणो ॥ ५ ॥

'मो' इति आवां द्वावपि भो ! भ्रातर्भ्रातरौ आसि-आस्व, पूर्वजन्मन्यावामुभौ भ्रातरावभवावेत्यर्थः। कथंभूतौ द्वौ ? अन्योन्यवशानुगौ, अन्योन्यं परस्परं वशमनुगच्छत इत्यन्योन्यवशानुगावन्योन्यवशवर्तिनावित्यर्थः। पुनः कथंभूतौ ? अन्योन्यमनुरक्तौ-परस्परं स्नेहवन्तौ। पुनः कीदृशौ ? अन्योन्यं हितैषिणौ - परस्परं हितवाञ्छकौ। एतादृशावभवावेत्यर्थः। अत्र मुहुर्मुहुरन्योन्यग्रहणं चित्ततुल्यतात्यादरख्यापनार्थम् ॥ ५ ॥

क्व च अभूतां तत्स्थानमाह-

दासा दसन्ने आसी, मिया कालिंजरे नगे ।
हंसा मयंगतीराए, सोवागा कासिभूमिए ॥ ६ ॥

आवां दशार्णदेशे दासौ आस्व, कालिञ्जरनाम्नि नगे-पर्वते मृगौ आस्व, पुनर्मृतौ, गङ्गा-नदीतटे हंसावावां आस्व, काशीभूम्यां - वाराणस्यां चाण्डालावभूव ॥ ६ ॥

देवा य देवलोगंमि, आसि अम्हे महिड्ढिया ।
इमा णो छट्ठिया जाई, अन्नमन्नेण जा विणा ॥ ७ ॥

पुनस्ततश्चाण्डालजन्मनः परं भो भ्रातः ! 'अम्हे' आवां देवलोके-सौधर्मदेवलोके महर्द्धिकौ देवावभूव । हे भ्रातः ! 'णो' इत्यावयोरन्योन्ययावनिका-परस्परसाहित्यरहिता परस्परवियोगसहिता षष्ठिका जातिरियं प्रत्यक्षा जाता ॥ ७ ॥

इति श्रुत्वा मुनिराह -

कम्मा नियाणप्पगडा, तुमे राय विचिंतिया ।
तेसिं फलविवागेणं, विप्पओगमुवागया ॥ ८ ॥

हे राजन् ! त्वया कर्माणि विचिन्तितानि, आर्त्तध्यानरूपाणि ध्यानानि ध्यातानि, आर्त्तध्यानहेतुभूतानि कर्माणि विचिन्तितानीत्यर्थः निदानेनोपार्जितानि । कीदृशानि कर्माणि ? निदानप्रकृतानि निदानेन-भोगप्रार्थनावशेन प्रकृतानि निदानप्रकृतानि प्रकर्षेण बद्धानि । तेषां कर्मणां फलविपाकेन-फलोदयेन आवां विप्रयोगमुपागतौ-वियोगं प्राप्तौ ॥ ८ ॥

अथ चक्री प्रश्नं करोति-

सच्चसोअप्पगडा, कम्मा मए पुरा कडा ।
ते अज्ज परिभुंजामो, किं नु चित्तेवि से तहा ॥ ९ ॥

हे साधो ! हे भ्रातर्मया पुरा-पूर्वजन्मनि कर्माणि कृतानि । कथंभूतानि कर्माणि ? सत्यशौचप्रकटानि, सत्यं मिथ्यारहितम्, शौचमात्मशुद्धिकारकं धर्ममयमनुष्ठानम् । सत्यं च शौचं च सत्यशौचे, ताभ्यां प्रकटानि-प्रसिद्धानि । एतादृशानि यानि मया सुकर्माणि कृतानि, तानि शुभकर्माणि अद्यास्मिन् जन्मनि परिसमन्तात् भुञ्जे, स्त्रीरत्नभोगद्वारेण तेषां फलं विषयसुखान्यनुभवामि । हे चित्र ! यथाहं राज्यसुखं भुञ्जे, तथा किं चित्रोऽपि-भवानपि 'नु' भुङ्क्ते ? 'नु' इति वितर्के । कोऽर्थः ? चक्री वदति यथाहमिदानीं पूर्वोपार्जितानां सुकृतानां फलानि परिभुञ्जे, तथा किं चित्र, भवान् परिभुङ्क्ते ? अपि तु भवान् न परिभुङ्क्ते एव । भवतस्तु भिक्षुकत्वात् तानि सुकृतानि किं निष्फलानि जातानीत्याशयः ॥ ९ ॥

अथ मुनिराह -

सव्वं सुचिन्नं सफलं नराणं, कडाण कम्माण न मुक्ख अत्थि ।
अत्थेहिं कामेहिं य उत्तमेहिं, आया ममं पुन्नफलोववेए ॥ १० ॥

हे राजन् ! नराणां सुचीर्णं-सम्यक्प्रकारेण कृतं संयमतपःप्रमुखं सर्वं सफलमेव वर्तते । नराणामित्युपलक्षणत्वात् सर्वेषामपि सफलं भवति यतः कृतेभ्यः कर्मभ्यो मोक्षो नास्ति, जीवैः कृतानि कर्माण्यवश्यं भुज्यन्ते, प्राकृतत्वात् पञ्चमीस्थाने षष्ठी । कृतानां कर्मणां मोक्षो नास्ति, यदुक्तम्

कृतकर्मक्षयो नास्ति, कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाशुभं ॥ १ ॥

तस्मान्ममाप्यात्मा अर्थैर्द्रव्यैः पुनः कामैर्विषयसुखैः पुण्यफलैरुपपेतो वर्तते । कीदृशैरर्थैः कामैः ? उत्तमैर्मनोहरैः । अथवा कीदृशैः कामैः ? अर्थ्यैः-प्राथनीयैः, अर्थ्यन्ते-प्रार्थ्यन्ते जनैरित्यर्थ्याः, तैरर्थ्यैरित्यनेन-चित्रजीवेन साधुनोक्तं मयापि सर्वेन्द्रियाणां सुखानि द्रव्याणि च पुण्यफलानि प्राप्तानीति । इति त्वया न ज्ञातव्यं यदनेन किमपि सुकृतफलं न लब्धमस्तीति भावः ॥ १० ॥

तदेव सूत्रकारो गाथया आह-

जाणाहि संभूय महागुणभागं, महिड्ढियं पुण्णफलोववेयं ।
चित्तंपि जाणाहि तहेव रायं, इड्ढी जुई तस्सवि य प्पभूया ॥ ११ ॥

पूर्वनाम्नार्षिर्वदति-हे सम्भूतमहाराज ! यथा त्वमात्मा महानुभागं तथा महर्द्धिकं तथा पुण्यफलोपपेतं जानासि, तथा चित्रमपि-मामपि तादृशमेव जानीहि । महान् अनुभागो यस्य स महानुभागस्तं महानुभागं बृहन्माहात्म्यम् । तथा महत्यृद्धिर्यस्य स महर्द्धिः, महर्द्धिरेव महर्द्धिकस्तं महर्द्धिकं-विशाललक्ष्मीकम्, पुण्यफलेन उपपेतस्तं एतादृशम् । ऋद्धिर्द्विपद-चतुष्पद-धन-धान्यादिसम्पत्तिः, द्युतिर्दीप्तिस्तस्य चित्रस्यापि, अर्थान्ममापि प्रचुरा वर्तते इति जानीहि । चशब्दोऽत्र यस्मादर्थे । इह वृद्धसम्प्रदायः-यथा निदानसहितः सम्भूतसाधुश्च-क्रवर्त्यभूत्, तथा चित्रसाधुर्निदानरहित एकस्य श्रेष्ठिमहर्द्धिकस्य कुले पुत्रत्वेनोत्पन्नः, तत्र चक्रवर्तिवत्तस्य ऋद्धिरासीत् प्रतिदिनं सुवर्णदीनाराणां कोटिं याचकेभ्यो ददान आसीत् । निरन्तरं च षट्ऋतुसुखदायकेषु मनोहरोच्चैस्तरप्रासादेषु भोगान् भुञ्जानोऽनेकगज-तुरग-रथ-यानादिकर्द्धिमान् सुरूपकामिनीनां परिकरेण परिवृत्तो द्वात्रिंशद्विधं नाटकं पश्यन् सदा सुखनिमग्नो बहुधा भोगरसयुक्तो बभूवेति कथानकं ज्ञेयम् ॥ ११ ॥

महत्थरूवा वयणप्पभूआ, गाहाणुगीया नरसंघमज्झे ।
जं भिक्खुणो सीलगुणोववेया, इहं जयंते समणो मि जाओ ॥ १२ ॥

अथ चेदेतादृश्यृद्धिस्तव आसीत्, तर्हि कथं त्यक्ता ? हे भ्रातः सा गाथा साधुभिर्न-रसङ्घमध्ये, नराणां-मनुष्याणां सङ्घे नरसङ्घस्तस्य मध्ये मनुष्यसभामध्येऽनुगीता उक्ता, मया श्रुतेति शेषः । गीयते इति गाथा धर्माभिधायिनी सूत्रपद्धतिर्मया स्थविरमुखात्कर्णगोचरी-कृता । कथंभूता गाथा ? महार्थरूपा, महान् द्रव्य-पर्यायभेदसहितो निश्चय-व्यवहारसहितश्च अर्थो यस्य तन्महार्थम्, तादृशं रूपं यस्याः सा महार्थरूपा । पुनः कीदृशा गाथा ? 'वयणप्पभूआ,' वचनैर्नयभेदैः प्रभूता वचनाप्रभूता, अल्पाक्षरा बह्वर्थेत्यर्थः । सा इति का गाथा ? यां गाथां श्रुत्वा, इत्यध्याहारः, यां धर्माभिधायिनीं सूत्रपद्धतिं श्रुत्वा भिक्षवः-साधवः शीलगुणोपपेताः सन्त इह जिनप्रवचने यतन्ते मुनयः । शीलं-चारित्रम्, गुणो-

ज्ञानम्, शीलं च गुणश्च शीलगुणौ, ताभ्यामुपपेताः शीलगुणोपपेताः क्रियाज्ञानसहिताः सन्तोऽर्हन्मते स्थिरा भवन्तीत्यर्थः । तां गाथां श्रुत्वाहमपि श्रमणस्तपसि निरतो जातोऽस्मि, न तु दुःखात्साधुः सञ्जातोऽस्मीति भावः ॥ १२ ॥

उच्चोदए महु कक्के य बंभे, पवेइया आवसहा य रम्मा ।
इमं गिहं चित्तधणप्पभूयं, पसाहि पंचालगुणोववेयं ॥ १३ ॥

अथ ब्रह्मदत्तः पुनः साधुं निमन्त्रयति, पूर्वनाम्ना सम्बोधनं कृत्वा वदति । हे चित्र ! त्वमिममिदं प्रभूतधनं गृहम्, प्रचुरधनसहितं गृहं प्रसाधि-प्रतिपालय । गृहे स्थित्वा सुखं भुङ्क्ष्वेत्यर्थः । अथवा 'चित्तधणप्पभूयं, इत्येकमेव पदं गृहविशेषणम् । चित्रं-नानाप्रकारम् प्रभूतं-प्रचुरं धनं यस्मिन् तच्चित्रप्रभूतधनं, एतादृशं मम मन्दिरं गृहाणेत्यर्थः । पुनः कीदृशं गृहं ? पञ्चालदेशानां गुणा इन्द्रियविषयाः शब्द-रूप-रस-गंध-स्पर्शास्तैरुपपेतं पाञ्चाल-गुणोपपेतम् । च पुना रम्या-रमणीया ममावसथाः-प्रासादाः प्रवेदिताः- प्रकर्षेण वेदिताः प्रवेदिताः, प्रकटाः सन्ति । तानपि त्वं प्रसाधीति शेषः । मम वार्धकिरत्नपुरस्सरैर्देवैरुपनीताः प्रासादाः, ते के प्रासादाः ? उच्च १, उदय २, मधु ३, कर्क ४, ब्रह्म ५, एते पञ्च प्रासादा यत्र चक्रिणो रोचन्ते तत्रैव स्युः । वार्धकिरत्नेन-चक्रिसूत्रधारेण विधीयन्ते इति वृद्धा आहुः । तस्मादत्रेदं गृहमिति पृथगुक्तमस्ति । पाञ्चालानां गुणग्रहणं तु अत्युदीर्णत्वात् । अन्यथा भरतक्षेत्रस्य सारं तद्गृहेऽस्त्येव ॥ १३ ॥

नट्टेहिं गीएहिं य वाइएहिं, नारीजणाइं परिवारयंतो ।
भुंजाहि भोगाइं इमाइं भिक्खु, मम रोयई पव्वज्जा हु दुक्खं ॥ १४ ॥

भो चित्र ! हे भिक्षो ! हे साधो ! ममैतद्वोचते, एतद् हृदये प्रतिभाति । 'हु' इति निश्चयेन प्रव्रज्या दुःखं वर्तते इति शेषः । दीक्षायां सुखं किमपि नास्ति । तस्मात् हे साधो ! त्वमिमान् प्रत्यक्षं दृश्यमानान् भोगान् भुङ्क्ष्व । कथंभूतः सन् ? नाटकैर्द्वात्रिंशद्विधैः, गीतैर्गान्ध-र्वशास्त्रोक्तैः, वादित्रैर्भरतशास्त्रोक्तैर्मृदङ्गादिभिस्तथा नारीजनैः परिवृतः सन् विषय-सुखान्यनुभव । अत्र नारीजनानामेव ग्रहणं कृतम्, अन्येषां गजाऽश्व-वस्त्राऽऽसन-द्रव्यादीनां ग्रहणं न कृतम्, तत्तु तस्य स्त्रीलोलुपत्वात्, सर्वविषयेषु स्त्रीणामेव प्राधान्यात् ॥ १४ ॥

तं पुव्वनेहेण कयाणुरागं, नराहिवं कामगुणेसु गिद्धं ।
धम्मस्सिओ तस्स हियाणुपेही, चित्तो इमं वयणमुदाहरित्था ॥ १५ ॥

यदा तु ब्रह्मदत्तेन-सम्भूतजीवेन चित्रजीवं साधुं प्रत्युक्तम्, तदा चित्रजीवः- साधुश्चित्र इदं वचनं तं ब्रह्मदत्तनराधिपं चक्रिणं प्रति उदाजहार-अवादीत् । कथंभूतं तं ब्रह्मदत्तं ? पूर्वस्नेहेन कृतानुरागम्, पूर्वभवबान्धवप्रेम्णा विहितप्रीतिभावम् । पुनः कथंभूतं नराधिपं ? कामगुणेषु-विषयसुखेषु गृद्धं-लोलुपम् । कीदृशश्चित्रजीवसाधुः ? धर्माश्रितो-धर्ममाश्रितः ।

पुनः कीदृशश्चित्रः ? तस्य ब्रह्मदत्तस्य हितानुप्रेक्षी - हितवाञ्छकः, हितमनुप्रेक्षते इत्येवंशीलो हितानुप्रेक्षी ॥ १५ ॥

किमुदाजहारेत्याह -

सव्वं विलवियं गीयं, सव्वं नट्टं विडंबियं ।
सव्वे आभरणा भारा, सव्वे कामा दुहावहा ॥ १६ ॥

हे राजन् ! गीतं सर्वं विलपितं - विलापतुल्यम् । सर्वं नाट्यं-नाटकं विडम्बितम्, भूतावेष्टितपीतमद्यादिजनाङ्गविक्षेपतुल्यम् । सर्वाण्याभरणानि भारतुल्यानि । सर्वे कामा दुःखावहा-दुःखदायकाः, गज-पतङ्ग-भृङ्ग-मीन-कुरङ्गादीनामिव बन्धनमरणादिकष्टदा इत्यर्थः ॥ १६ ॥

बालाभिरामेसु दुहावहेसु, न तं सुहं कामगुणेसु रायं ।
विरत्तकामाण तवोहणाणं, जं भिक्खुणं सीलगुणे रयाणं ॥ १७ ॥

हे राजन् ! विरक्तकामानां विरक्ता कामेभ्य इति विरक्तकामास्तेषां निर्विषयिणां भिक्षूणां-साधूनां यत्सुखं वर्तते, तत्सुखं कामगुणेषु - शब्दादिषु इन्द्रियसुखेषु कामिनां पुरुषाणां नास्ति । कीदृशेषु कामगुणेषु ? बालाभिरामेषु बालानां निर्विवेकाणामभिरामा बालाभिरामास्तेषु, मूर्खा हि विषयेषु रज्यन्ते । पुनः कीदृशेषु कामगुणेषु ? दुःखावहेषु-दुःखदायकेषु । कीदृशानां भिक्षूणां ? तपोधनानां, तप एव धनं येषां ते तपोधनास्तेषाम् । पुनः कीदृशानां ? शीलगुणे रतानाम्, शीलस्य गुणा गुणकारिणो नवविधगुप्तयस्तेषु रता आसक्तास्तेषाम् ॥ १७ ॥

नरिंद जाई अहमा नराणं, सोवागजाइं दुहओ गयाणं ।
जहिं वयं सव्वजणस्स वेसा, वसीय सोवागनिवेसणेसु ॥ १८ ॥

हे नरेन्द्र ! नराणां-मनुष्याणां मध्ये अधमा निन्द्या जातिः श्वपाकस्य-चाण्डालस्य जातिर्वर्तते, सा जातिर्द्वयोरपि आवयोर्गता-प्राप्ता, 'णं' इति वाक्यालङ्कारे, यस्यां जातौ आवां सर्वजनस्य द्वेष्यौ अभूव । श्वपाकनिवेसनेषु - चाण्डालगृहेषु वसीय-आवामवसाव ॥ १८ ॥

तीसे य जाईइ उ पावियाए, वुच्छामु सोवागनिवेसणेसु ।
सव्वस्स लोगस्स दुगंच्छणिज्जा, इहं तु कम्माइं पुरे कडाइं ॥ १९ ॥

तस्यां च जातौ तु पापिकायां-पापिष्ठायां श्वपाकनिवेशनेषु-चाण्डालगृहेषु 'वुच्छामु' इति उषितौ निवासमकार्ष्व । कीदृशौ आवां ? सर्वस्य लोकस्य जुगुप्सनीयौ-हीलनीयौ, इह तु अस्मिन् जन्मनि पुराकृतानि कर्माणि प्रकटीभूतानीत्यर्थः । प्राचीनजन्मनि सम्यगनुष्ठान-रूपाणि कृतानि, तेषां फलानि जाति-कुल-बलैश्वर्यरूपाणि इह प्रकटितानि । तस्माद्धर्म-करणे प्रमादो न विधेय इत्यभिप्रायः ॥ १९ ॥

सोदाणिसिं राय महाणुभागो, महिड्ढिओ पुन्नफलोववेओ ।
चईत्तु भोगाइ असासयाइं, आदाणहेउं अभिनिक्खमाहिं ॥ २० ॥

हे राजन् ! यस्त्वं सम्भूतः पुरा आसीः, 'सोदाणिसिं' स त्वमिदानीं राजा चक्रधरो महानुभागो माहात्म्यसहितो जातोऽसि । कीदृशो राजा ? महर्द्धिको - विशाललक्ष्मीकः, पुनः कीदृशः ? पुण्यफलोपपेतः-पुण्यफलसहितः तस्मादादानहेतोः आदानस्य-चारित्रधर्मस्य हेतोः, आदीयते सविवेकैरित्यादानं चारित्रधर्मस्तस्य हेतोः 'अभिनिक्खमाहि' अभिनिष्क्रम, अभि-समन्तान्निःक्रम, गृहपाशात्त्वं निस्सर, साधुर्भवेत्यर्थः । किं कृत्वा ? अशाश्वतान्-अनित्यान् भोगान् त्यक्त्वा । पुराकृतस्य धर्मस्य फलं चेत्त्वयेदानीं भुज्यते तदेदानीमपि धर्ममङ्गीकुरु । यतोऽग्रे शाश्वतसुखभाक् स्यादिति भावः ॥ २० ॥

धर्मस्य अकरणे दोषमाह-

इह जीविए राय असासंयमि, धणियं तु पुन्नाइं अकुव्वमाणो ।
से सोअई मच्चु मुहोवणीए, धम्मं अकाऊण परम्मि लोए ॥ २१ ॥

हे राजन् ! इहास्मिन् मनुष्यजीविते-मनुष्यायुषि पुण्यान्यकुर्वाणो मनुष्यः सुकृतानि न करोति, स दुष्कर्मभिर्मृत्युमुखमुपनीतः सन् धर्ममकृत्वा परस्मिन् लोके गतः शोचते-पश्चात्तापं कुरुते । मरणसमये एवं जानाति हा मया मनुष्यजन्म प्राप्य धर्मो न कृतः, इति चिन्तां करोति । कथंभूते जीविते ? 'धणियं' तु अत्यन्तमशाश्वते ॥ २१ ॥

जहेह सीहो य मियं गहाय, मच्चू नरं नेइ हु अंतकाले ।
न तस्स माया व पिया व भाया, कालंमि तम्मि सहरा भवंति ॥ २२ ॥

यथेह संसारे सिंहो मृगं गृहीत्वा, स्ववशं नयति । अत्र चशब्दः पादपूरणे, एवमनेनैव प्रकारेण, अनेनैव दृष्टान्तेन मृत्युर्मरणम्, 'हु' इति निश्चयेनान्तकाले नरं-मनुष्यं गृहीत्वा स्ववशं नयति । तस्मिन् मनुष्यस्य मरणकाले माता, च पुनः पिता, च पुनर्भ्राता, एते सर्वे अंशधरा न भवन्ति, अंशं-स्वजीवितव्यभाग धारयन्ति । मृत्युना नीयमानं नरं रक्षन्तीत्यंश-धराः, स्वजीवितव्यदायका न भवन्तीत्यर्थः ॥ २२ ॥

पुनर्दुःखादपि न त्रायन्ते इत्याह-

न तस्स दुक्खं विभयंति नाइओ, न मित्तवग्गा न सुया न बंधवा ।
इक्को सयं पच्चणुहोइ दुक्खं, कत्तारमेवं अणुजाइ कम्मं ॥ २३ ॥

पुनः हे राजन् ! तस्य मनुष्यस्य अर्थात् दुःखार्त्तस्य नरस्य दुःखं-शारीरिकं मानसिकं दुःखं ज्ञातयः- स्वजना न विभजन्ति, दुःखस्य विभागिनो न भवन्ति । पुनर्मित्रवर्गा-मित्रसमूहाः, पुनः सुता - अङ्गजाः, पुनर्बान्धवा-भ्रातरोऽपि न दुःखं विभजन्ति । तदा किं भवतीत्याह-एकोऽयं जीवोऽसहायी स्वयमेव दुःखं प्रत्यनुभवति, एकाकी स्वयमेव दुःखं

असातावेदनीयं भुङ्क्ते । कथं स्वजनादिवर्गे सति एको दुःखं भुङ्क्ते ? तत्राह-कर्म शुभाशुभरूपं कर्तारमेव अनुयाति-अनुगच्छति । यः कर्मणां कर्ता स एव कर्मणां भोक्ता स्यादिति भावः । यदुक्तम्

"यथा धेनुसहस्रेषु, वत्सो विन्दति मातरम्।
तथा पुरा कृतं कर्म, कर्तारमनुगच्छति ॥ १ ॥" ॥ २३ ॥

चिच्चा दुपयं च चउप्पयं च, खित्तं गिहं धणं धन्नं च सव्वं ।
सकम्मप्पबीओ अवसो पयाइ, परं भवं सुंदरं पावगं वा ॥ २४ ॥

अशरणभावनामुक्त्वा एकत्वभावनां वदति-अयं स्वकर्मात्मद्वितीयो जीवः, स्वस्य कर्म स्वकर्म, स्वकर्म एवात्मनो द्वितीयं यस्य स स्वकर्मात्मद्वितीयः, स्वकर्मसहितोऽयं जीवः सुन्दरं देवलोकादिस्थानं वाऽथवा पापकं नरकादिस्थानम् एवंविधं परं भवमन्यलोकं अवशः सन् प्रयाति । किं कृत्वा ? द्विपदं-भार्यादि, च पुनश्चतुःपदं-गजाश्वादि, क्षेत्रं-ईक्षुक्षेत्रादि, गृहं-सप्तभौमिकादि, धनं-दीनारादि रजतस्वर्णादि, धान्यं-तन्दुलगोधूमादि, चशब्दाद्वस्त्राभरणसाररत्नादि, एतत्सर्वं त्यक्त्वा - हित्वा जीवः परभवे व्रजतीत्यर्थः ॥ २४ ॥

अथ मरणादनन्तरं - पश्चात्तस्य पुत्रकलत्रादयः किं कुर्वन्तीत्याह-।

तं इक्कगं तुच्छसरीरगं से, चिईगयं दहिय उ पावगेणं ।
भज्जा य पुत्तोवि य नायओ य, दायारमन्नं अणुसंकमंति ॥ २५ ॥

'से' इति तस्य मृतस्य पुरुषस्य तत् एककं जीवरहितम्, अत एव तुच्छम् असारं शरीरम्, किं ? चितीगतं-श्मशानाग्निप्राप्तं पावकेन दग्ध्वा भस्मसात् कृत्वा, पश्चात्तस्य भार्या, च पुनः पुत्रोऽपि, च पुनर्ज्ञातयः-स्वजनाः, एते सर्वेऽपि अन्यं दातारं अनुसङ्क्रमन्ति । कोऽर्थः ? यदा कश्चित्पुरुषो म्रियते, तदा तच्छरीरं प्रज्वाल्य तस्य स्त्री-पुत्र-बान्धवा अन्यं स्वनिर्वाहकर्तारं धनादिदायकं सेवन्ते, सर्वेऽपि स्वार्थसाधनपरायणा भवन्ति ॥ २५ ॥

उवणिज्जइ [1]जीवियमप्पमायं, वन्नं जरा हरइ नरस्स रायं ।
पंचालराया वयणं सुणाहि, मा कासि कम्माइं महालयाइं ॥ २६ ॥

हे राजन् ! नरस्य - प्राणिनो जीवितमायुःप्रमाणमप्रमादं यथा स्यात्तथा कर्मभिर्मृत्यवे उपनीयते । पुनर्जीविते सत्यपि नरस्य वर्णं - शरीरसौन्दर्यं जरा हरति, वृद्धावस्था रूपं विनाशयति । तस्माद्धे पञ्चालराज ! हे पञ्चालदेशाधिप ! वचनं-मम वाक्यं शृणु । महालयानि महान्ति मांसभक्षणादीनि कर्माणि त्वं मा कार्षीः ॥ २६ ॥

---

१ अस्य व्याख्या-"तथाविधकर्मभिर्जीवितम् अप्रमादं, प्रमादं विनैव आवीचिमरणेनेति भावः" । इति भावविजयगणिवृत्त्याम् ॥

अथ नृपतिराह-

अहंपि जाणामि जहेह साहू, जं मे तुमं साहसि वक्कमेयं ।
भोगा इमे संगकरा भवंति, जे दुज्जया अज्जो अम्हारिसेहिं ॥ २७ ॥

हे साधो ! इह जगति यथा वर्तते तथाहमपि जानामि, यत्त्वं 'मे' मम एतद्वाक्यं साधयसि-शिक्षयसि, शिक्षारूपेण साधु कथयसि, परं किं करोमि ? इमे प्रत्यक्षं भुज्यमाना भोगाः सङ्गकरा भवन्ति - बन्धनकरा भवन्ति । कीदृशा इमे भोगाः ? हे आर्य ! ये भोगा अस्मादृशैर्गुरुकर्मभिर्दुर्जया - दुस्त्याज्याः ॥ २७ ॥

हत्थिणपुरंमि चित्ता, दट्ठूणं नरवइं महिड्ढियं ।
कामभोगेसु गिद्धेणं, नियाणमसुहं कडं ॥ २८ ॥

हस्तिनागपुरे भो चित्र ! मया निदानं कृतम् । कीदृशं निदानम् ? अशुभं भोगाभिलाषत्वादशुभम् । किं कृत्वा ? नरपतिं सनत्कुमारचक्रिणं दृष्ट्वा । कीदृशं चक्रिणं ? महर्द्धिकम्, कीदृशेन मया ? कामभोगेषु गृद्धेन, इन्द्रियसुखलोलुपेन ॥ २८ ॥

तस्स मे अप्पडिक्कंतस्स, इमं एयारिसं फलं ।
जाणमाणो वि जं धम्मं, कामभोगेसु मुच्छिओ ॥ २९ ॥

तस्य निदानस्य - प्राग्भवकृतभोगाभिलाषस्य इमं प्रत्यक्षं भुज्यमानं एतादृशं वक्ष्यमाणं फलं जातम् । कथंभूतस्य तस्य निदानस्य ? अप्रतिक्रान्तस्य - अनालोचितस्य । यस्मिन्नवसरे हस्तिनागपुरे आवामनशनं कृत्वा प्रसुप्तौ, तदा चक्रधरस्य स्त्रीरत्नस्य केशपाशो मम चरणे लग्नः, तदा मया निदानं कृतम्, तदा त्वयाहं निवारितः भो भ्रातस्त्वं निदानं मा कार्षीः । चेन्निदानं कृतं स्यात्तदा मिथ्यादुष्कृतं दातव्यम्, त्वया इत्युक्तेऽप्यहं निदानान्न निवृत्त इत्यर्थः । 'जं' इति यस्मात्कारणात् अहं जिनोक्तं धर्मं जानन्नपि कामभोगेषु सुतराम्-तिशयेन मूर्च्छितोऽस्मि, इन्द्रियसुखेषु लुब्धोऽस्मि । नो चेद् ज्ञानस्य एतदेव फलं, ज्ञानी विषयेभ्यो विरक्तः स्यात्, अहं ज्ञाने सत्यपि विषयेषु रमामि, तन्निदानस्यैव फलमित्यर्थः ॥ २९ ॥

नागो जहा पंकजलावसन्नो, दट्ठुं थलं नाभिसमेइ तीरं ।
एवं वयं कामगुणेसु गिद्धा, न भिक्खुणो मग्गमणुव्वयामो ॥ ३० ॥

हे साधो ! यथा नागो - हस्ती पङ्कजलावसक्तः, अल्पजले बहुपङ्के अवसन्नोऽत्यन्तं निमग्नस्तीरं दृष्ट्वापि नाभिसमेति, तीरस्य-तटस्य अभिमुखं गतोऽपि तटं न प्राप्नोति, तीरं तु दूरतः परन्तु स्थलमपि दृष्ट्वा न उच्चभूमिं प्राप्नोति । एवममुना प्रकारेण अनेन दृष्टान्तेन वयमित्यस्मादृशाः कामगुणेषु शब्दरूपरसगन्धस्पर्शादिषु गृद्धाः-लोभिनो भिक्षोर्मार्गं साधुमार्गं साध्वाचारं नानुव्रजामो-न प्राप्नुमः । तस्मात्किं कुर्मः ? वयं विषयिणो जानन्तोऽप्यजानन्त इव जाता इत्यर्थः ॥ ३० ॥

अथ मुनिः संसारस्य अनित्यत्वेन उपदेशं ददाति ।

अच्चेइ कालो तुरियंति राईओ, न यावि भोगा पुरिसाण निच्चा ।
उविच्च भोगा पुरिसं चयंति, दुमं जहा खीणफलं व पक्खी ॥ ३१ ॥

हे राजन् ! कालोऽत्येति - अतिशयेन गच्छति । कालस्य किं याति ? आयुर्यातीत्यर्थः । रात्रयस्त्वरयन्ति-उत्तालतया व्रजन्ति । हे राजन् ! पुरुषाणां भोगा अपि अनित्याः, भोगाः पुरुषमुपेत्य स्वेच्छया आगत्य पुरुषं त्यजन्ति, पुरुषा यद्यपि भोगांस्त्यक्तुं नेच्छन्ति, तथापि भोगाः स्वयमेव पुरुषांस्त्यजन्तीत्यर्थः । के किं यथा ? पक्षिणः क्षीणफलं वृक्षं यथा त्यजन्ति ॥ ३१ ॥

जइ तं सि भोगे चइउं असत्तो, अज्जाइं कम्माइं करेहि रायं ।
धम्मे ठिओ सव्वपयाणुकंपी, तो होहिसि देवो इओ विउव्वी ॥ ३२ ॥

हे राजन् ! यदि त्वं भोगांस्त्यक्तुमशक्तोऽसि, असमर्थोऽसि, तदा हे राजन् ! आर्याणि शिष्टजनयोग्यानि कर्माणि कुरु। पुनर्धर्मे स्थितः सर्वप्रजानुकम्पी भवेति शेषः । सर्वप्रजा-पालको भव । सर्वाश्च ताः प्रजाश्च सर्वप्रजाः, तास्वनुकम्पते इत्येवंशीलः सर्वप्रजानुकम्पी । हे राजन् ! आर्यकर्मकरणात् त्वं 'वेउव्वी' वैक्रियशक्तिमान् देवो - निर्जर इतो भवादग्रे भविष्यसि ॥ ३२ ॥

न तुज्झ भोगे चइऊण बुद्धी, गिद्धोसि आरंभपरिग्गहेसु ।
मोहं कओ इत्तिउ विप्पलावो, गच्छामि रायं आमंतिओ सि ॥ ३३ ॥

हे राजन्नहं गच्छाम्यहं व्रजामि, मया त्वमामन्त्रितोऽसि, मया त्वं पृष्टोऽसि, धातूनामने-कार्थत्वात् । हे राजन् ! 'तुज्झ' इति तव भोगांस्त्यक्तुं बुद्धिर्नास्ति, अनार्यकार्याणां भोगा एव कारणानि सन्ति । अतो भोगाननार्यकार्याण्यपि त्यक्तुं मतिर्नास्ति । पुनरारम्भपरिग्रहेषु त्वं गृद्धोऽसि-लुब्धोऽसि, आरम्भपरिग्रहान्न त्यजसीत्यर्थः । एतावान् विप्रलापो-विविधवच-नोपन्यासो मोघः कृतो-निरर्थकः कृतः, जलविलोडनवद्व्यर्थो जातः । तस्मात्कारणादथाहं त्वत्तः सकाशादन्यत्र व्रजामि । तवाज्ञास्तीत्युक्त्वा मुनिर्गतः ॥ ३३ ॥

अथ मुनौ गते सति ब्रह्मदत्तस्य किमभूत्तदाह-

पंचालराया वि य बंभदत्तो, साहुस्स तस्स वयणं अकाउं ।
अणुत्तरे भुंजिय कामभोए, अणुत्तरे सो नरए पविट्ठो ॥ ३४ ॥

पञ्चालदेशानां राजा पाञ्चालराजो ब्रह्मदत्तश्चक्रवर्तिरप्यनुत्तरे-सकलनरकावासेभ्य उत्कृष्टे अप्रतिष्ठाननाम्नि प्रविष्टस्तत्रोत्पन्न इत्यर्थः । किं कृत्वा ? अनुत्तरान्-सर्वोत्कृष्टान्

कामभोगान् भुङ्क्त्वा । पुनः किं कृत्वा ? तस्य चित्रजीवसाधोर्वचनमुपदेशवाक्यमकृत्वा, निदानकारकस्य नरकगतिरेव । तस्य गुरुकर्मत्वान्न साधोरुपदेशावकाशो जात इत्यर्थः ॥ ३४ ॥

चित्तो वि कामेहिं विरत्तकामो, उदग्गचारित्ततवो महेसी ।
अणुत्तरं संजमं पालइत्ता, अणुत्तरं सिद्धिगइं गओ ॥ ३५ ॥ त्ति बेमि ॥

चित्रोऽपि-पूर्वभवचित्रजीवसाधुरपि महर्षिर्महामुनिरनुत्तरं सर्वोपरिवर्तिसिद्धिस्थानं गतः । किं कृत्वा ? अनुत्तरं जिनाज्ञाविशुद्धं सप्तदशविधं संयमं पालयित्वा । कथंभूतः स साधुः ? कामेभ्यो विरक्तकामः, भोगेभ्यो विरक्ताभिलाषः, पुनः कीदृशः सः ? उदग्रचारित्र-तपाः, उदग्रं-प्रधानं साध्वाचारे सर्वविरतिलक्षणं दशविधरूपं चारित्रम्, तपो द्वादशविधं यस्य स उदग्रचारित्रतपाः । एतादृशः सन् मोक्षं प्राप्तश्चित्रजीवमुनिरिति सुधर्मास्वामी जम्बूस्वामिनं ब्रवीति । हे जम्बू ! अहं तवाग्रे इति ब्रवीमि ॥ ३५ ॥

इति चित्रसम्भूतीयं त्रयोदशमध्ययनं सम्पूर्णम् ॥ १३ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायाम् उपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणि-विरचितायां चित्रसम्भूतीयमध्ययनं सम्पूर्णम् ॥ १३ ॥

।। अथ चतुर्दशमिषुकारीयमध्ययनं प्रारभ्यते ।।

त्रयोदशेऽध्ययने हि निदानस्य दोष उक्तः, चतुर्दशेऽध्ययने हि निर्निदानस्य गुणमाह-अत्र मुख्यतस्तु निदानराहित्यमेव मुक्तेः कारणमित्युच्यते ।

तत्र सम्प्रदायः-यौ तौ गोपदारकौ चित्रसम्भूतपूर्वभवमित्रौ साधुसेवाकरौ देवलोकं गतौ, ततश्च्युत्वा क्षितिप्रतिष्ठिते नगरे इभ्यकुले द्वावपि भ्रातरौ जातौ । तत्र तयोश्चत्वारः सुहृदो जाताः । तत्र भोगान् भुङ्क्त्वा, स्थविराणामन्तिके च धर्मं श्रुत्वा सर्वेऽपि प्रव्रजिताः । सुचिरकालं संयममनुपाल्य भक्तं प्रत्याख्यातम् । कालं कृत्वा सौधर्मे कल्पे पद्मगुल्मविमाने षडपि सुहृदः पल्योपमायुष्का देवत्वेनोत्पन्नाः । तत्र ये ते गोपजीववर्जा देवाश्चत्वारस्तत-श्च्युत्वा कुरुजनपदे इषुकारपुरे अवतीर्णास्तत्र प्रथम इषुकारराजा जातः । द्वितीयस्तस्यैव राज्ञः पट्टदेवी कमलावती जाता, तृतीयस्तस्यैव राज्ञो भृगुनामा पुरोहितः संवृत्तः । चतुर्थ-स्तस्यैव पुरोहितस्य भार्या संवृत्ता । तस्या वासिष्ठं नाम गोत्रम्, यशा इति नाम जातम् । स च भृगुपुरोहितः प्रकामं सन्तानलाभमभिलषति, अनेकदेवोपयाचनं कुरुते, नैमित्तिकान् प्रश्नयति । तौ द्वावपि पूर्वभवगोपदेवौ वर्धमानावधिना एवं ज्ञातवन्तौ, यथा आवामेतस्य भृगुपुरोहितस्य पुत्रौ भविष्यावः । ततः श्रमणरूपं कृत्वा द्वावपि भृगुगृहे समायातौ, सभार्येण भृगुणा वन्दितौ, सुखासनस्थौ धर्मं कथयतः । तयोरन्तिके सभार्येण भृगुणा श्रावकव्रतानि गृहीतानि । पुरोहितेन कथितम् भगवन् ! अस्माकमपत्यं भविष्यति न वा इति ? साधुभ्यामुक्तं भवतां द्वौ दारकौ भविष्यतः, तौ च बालावस्थायामेव प्रव्रजिष्यतः, तयोर्भवद्भ्यां व्याघातो न कार्यः । तौ प्रव्रज्य घनं लोकं प्रतिबोधयिष्यतः । इति भणित्वा तौ देवौ स्वस्थानं गतौ।

ततोऽचिरेण च्युत्वा पुरोहितभार्याया उदरेऽवतीर्णौ । ततोऽसौ पुरोहितः सभार्यो नगरान्निर्गत्य [1]प्रत्यन्तग्रामे स्थितः, तत्रैव सा ब्राह्मणी प्रसूता, दारकौ जातौ, लब्धसंज्ञौ तौ ताभ्यां मुनिमार्गविरक्तताकरणार्थमेवं शिक्षितौ, य एते मुण्डितशिरस्काः साधवो दृश्यन्ते, ते बालकान् मारयित्वा तन्मांसं खादन्ति, तत एतेषां समीपे श्रीमद्भिर्न कदापि स्थेयम् । अन्यदा तस्माद् ग्रामादेतौ क्रीडन्तौ बहिर्निर्गतौ, तत्र पथश्रान्तान् साधूनागच्छतः पश्यतः । ततो भयभ्रान्तौ तौ दारकावेकस्मिन् वटपादपे आरूढौ । साधवस्तु तस्यैव वटपादपस्याधः पूर्वंगृहीताशनादिभोजनं कर्तुं प्रवृत्ताः । वटारूढौ तौ कुमारौ स्वाभाविकमन्नपानं पश्यतः । ततश्चिन्तितुं प्रवृत्तौ, नैते बालमांसाशिनः, किन्तु स्वाभाविकाहारकारिणः, क्वचिदेतादृशः साधवोऽस्माभिर्दृष्टा इति चिन्तयतोस्तयोर्जातिस्मरणमुत्पन्नम् । ततः प्रतिबुद्धौ तौ साधून् वन्दित्वा गतौ मातृ-पितृसमीपम् । अध्ययनोक्तवाक्यैस्ताभ्यां मातापितरौ प्रतिबोधितौ । तद्धनलिप्सुं राजानं च राज्ञी प्रतिबोधितवती । एवं षडपि जीवा गृहीतप्रव्रज्याः केवल-ज्ञानमासाद्य मोक्षं गताः ।

---

१ समीपग्रामे

अथ सूत्रं व्याख्यायते-

देवा भवित्ताण पुरे भवंमि, केई चुआ एगविमाणवासी ।
पुरे पुराणे उसुयारनामे, खाए समिद्धे सुरलोअरम्मे ॥ १ ॥
सकम्मसेसेण पुराकएण, कुलेसु दग्गेसु य ते पसूया ।
निव्विन्नसंसारभया जहाय, जिणिंदमग्गं सरणं पवन्ना ॥ २ ॥

-गाथाद्वयेन सम्बन्धः । केचिज्जीवाः, येषां केनापि नाम न ज्ञायते । यतो हि पूर्वं चतुर्णामपि गोपजीवानां नाम नोक्तम् । यौ पुनर्द्वौ चित्रसम्भूताभ्यामवशेषावभूतौ, ताविभ्य-व्यवहारिणः सुतत्वेनोत्पन्नौ, तयोः पुनश्चत्वारो मित्रजीवाः, तेषामपि नाम केनापि न ज्ञायते । एवं षडपि जीवाः पूर्वमनिर्दिष्टनामानोऽभूवन् । अहो ! पश्यत धर्मस्य माहात्म्यं ! जीवानां भव्यकर्मपरिपाकत्वं च ! केचिज्जीवाः पूर्वस्मिन् भवे देवीभूय-देवत्वं प्राप्य सौधर्मदेवलोके नलिनीगुल्मविमाने एकत्र निवासं कृत्वा स्वकर्मशेषेण, स्वस्य कर्मणः- पुण्यप्रकृति-लक्षणस्य शेषेण ते षडपि जीवा इषुकारनाम्नि पुरे पुराणे-पुरातने नगरे, पुनः ख्याते-सर्वत्र प्रसिद्धे, पुनः समृद्धे-धनधान्यपूर्णे, पुनः सुरलोकवत् रम्ये, उदग्रे-उत्कटे क्षत्रियादिके कुले प्रसूता उत्पन्नाः । कथंभूतेन स्वकर्मशेषेण ? पुरातनेन - पूर्वजन्मोपार्जितेन, ते जीवा इषुकारपुरे समुत्पद्य, तत्र संसारभयात् निर्वेद्य-निर्वेदं प्राप्य, चतुर्गतिभ्रमणभयादुद्वेगमासाद्य, तदा 'जहाय' इति भोगान् त्यक्त्वा, जिनेन्द्रमार्गं, जिनेन्द्रेणोक्तो मार्गो जिनेन्द्रमार्गस्तं ज्ञानदर्शनचारित्ररूपं मोक्षस्य मार्गं शरणं - जन्मजरामृत्युभयापहं प्रपन्नाः-प्राप्ता इति गाथाद्वयार्थः ॥ १-२ ॥

पुमत्तमागम्म कुमारदोवि, पुरोहिओ तस्स जसा य पत्ती ।
विसालकित्ती य तहेसुयारो, रायत्थ देवी कमलावई य ॥ ३ ॥

तेषां षण्णामपि पृथक् भेदं दर्शयति सूत्रकारः-तेषां षण्णां मध्ये द्वौ जीवौ गोपौ तु पुंस्त्वमागम्य-पुरुषवेदत्वं प्राप्य कुमारौ जातौ । भृगुब्राह्मणस्य पुत्रौ समुत्पन्नौ । अत्र कुमारत्वेन एवमुक्तौ, यौ हि अपरिणीतावेव दीक्षां जगृहतुः । तृतीयो जीवः पुरोहितो भृगुनामा ब्राह्मणश्चासीत् । तद्भार्या यशानाम्नी चतुर्थो जीवः । तथा विशाला-विस्तीर्णा कीर्त्तिर्यस्य स विशालकीर्तिः, एतादृश इषुकारनामा राजा पञ्चमो जीवः । च पुनरिह राज्ञो भवे एव तस्यैव राज्ञो देवी-राज्ञी कमलावती जातेति षष्ठो जीवः । एते षडपि जीवाः स्वस्वायुःक्षये च्युत्वा केचिदग्रतः, केचित्पश्चात्पूर्वसम्बन्धेन एकत्र नगरे मिलिता इत्यर्थः ॥ ३ ॥

जाईजरामच्चुभयाभिभूया, बहिंविहाराभिनिविट्ठचित्ता ।
संसारचक्कस्स विमोक्खणट्ठा, दट्ठूण ते कामगुणे विरत्ता ॥ ४ ॥

तौ द्वौ कुमारौ कामगुणेभ्यः- शब्दरूपरसगन्धस्पर्शेभ्यो विरक्तौ जातौ । किं कृत्वा ?

'दट्ठूण' इति दृष्ट्वा - साधून् विलोक्य, अथवा शब्दादिविषयान् मोक्षप्राप्तिविघ्नभूतान् दृष्ट्वा, किमर्थं ? संसारचक्रस्य विमोक्षार्थम्, संसारस्य चातुर्गतिकस्य यच्चक्रं योनि-कुलभेदात् समूहः चक्रवद्भ्रमणं वा, तस्य विमोक्षणार्थं - निवारणार्थम् । कीदृशौ तौ कुमारौ ? जातिजरामृत्युभयाभिभूतौ-जन्मजरामरणभयेन पीडितौ । पुनः कीदृशौ तौ कुमारौ? बहिर्विहाराभिनिविष्टचित्तौ, बहिः संसाराद्विहारः स्थानं बहिर्विहारो - मोक्षस्तस्मिन्नभिनिविष्टं बद्धादरं चित्तं ययोस्तौ बहिर्विहाराभिनिविष्टचित्तौ ॥ ४ ॥

पियपुत्तगा दुन्निवि माहणस्स, सकम्मसीलस्स पुरोहियस्स ।
सरित्तु पोराणिय तत्थ जाइं, तहा सुचिन्नं तवसंजमं च ॥ ५ ॥

ब्राह्मणस्य भृगुनाम्नः पुरोहितस्य राज्ञः पूज्यस्य द्वौ प्रियपुत्रकौ लघुवल्लभपुत्रौ यावास्ताम्, ताभ्यां द्वाभ्यां पुरोहितस्य वल्लभपुत्राभ्यां तथा तेन प्रकारेण तपो-द्वादशविधम्, च पुनः संयमं-सप्तदशविधं सुचीर्णं सुतरामतिशयेन निदानादिशल्यरहितेनाचरितं सञ्चरितम् । किं कृत्वा ? तत्र तस्मिन् ग्रामे एव पुरातनीं जातिं स्मृत्वा, जातिस्मरणं प्राप्य । कीदृशस्य पुरोहितस्य ? स्वकर्मशीलस्य, स्वकीयं ब्राह्मणस्य यजनादिकं षड्विधं कर्म स्वकर्म, तदेव शीलमाचारो यस्य स स्वकर्मशीलस्तस्य, राज्ञः शान्तिपुष्ट्यादिकारकस्य ॥ ५ ॥

ते कामभोगेसु असज्जमाणा, माणुस्सएसुं जे आवि दिव्वा ।
मुक्खाभिकंखी अभिजायसड्ढा, तायं उवागम्म इमं उदाहु ॥ ६ ॥

तौ द्वौ पुरोहितकुमारौ तातं - स्वजनकमुपागम्य तातसमीपे आगत्य इदमग्रे वक्ष्यमाणं वचनमुदाजहृतुः, वाक्यमूचतुरित्यर्थः । कीदृशौ तौ कुमारौ ? मानुष्यकेषु कामभोगेषु 'असज्जमाणा' इति असज्जौ - अनादरौ । अपि तु पुनर्ये दिव्याः कामभोगास्तेष्वप्यसज्जौ । एतावता मनुष्यदेवसम्बन्धिकामसुखेषु त्यक्तोद्यमौ । पुनः कीदृशौ तौ ? मोक्षाभिकाङ्क्षिणौ सकलकर्मक्षयाभिलाषिणौ इत्यर्थः । पुनः कीदृशौ तौ ? अभिजातश्रद्धौ - उत्पन्नतत्त्वरुची इत्यर्थः ॥ ६ ॥

किं ऊचतुरित्याह -

असासयं दट्ठु इमं विहारं, बहु अंतरायं न य दीहआउं ।
तम्हा गिहंसिं न रइं लभामो, आमंतयामो चरिस्सामु मोणं ॥ ७ ॥

भो तात ! आवां गृहे रतिं-सुखं न लभावहे । तस्मात्कारणात् आवां भवन्तमामन्त्र-यावहे - त्वां पृच्छावहे, आवां द्वावपि मौनं चरिष्यावः मुनेर्भावो मौनं-साधुधर्ममङ्गीकरिष्याव इत्यर्थः । आवां गृहे रतिं न लभावहे । तत् किं कृत्वा ? इमं विहारं, इमं मनुष्यत्वावस्थानम-शाश्वतमनित्यं दृष्ट्वा इति । कीदृशं विहारं ? बह्वन्तरायम्, बहवोऽन्तराया यस्मिन् स बह्वन्तरायस्तम् । च पुनस्तत्र विहारे - मनुष्यभवे दीर्घं पल्योपमसागरोपमादिकमायुर्नास्ति, मनुष्याणां हि स्वल्पमेवायुर्बहवोऽन्तरायाः सन्ति । तस्माद् गृहे आवयोः सर्वथा प्रीतिर्ना-स्तीत्यर्थः ॥ ७ ॥

अह तायगो तत्थ मुणीण तेसिं, तवस्स वाघायकरं वयासी ।
इमं वयं वेयविओ वयंति, जहा न होई असुयाण लोगो ॥ ८ ॥

अथ पुत्राभ्यामेवमुक्ते सति तद्वाक्यानन्तरं तातकस्तयोर्जनको भृगुपुरोहितस्तत्रावसरे तत्र ग्रामे वा 'तेसिमि' ति तयोस्तपसो व्याघातकरमिदं वचनमवादीत् । कथंभूतयोस्तयोः ? मुन्योर्भावश्रमणयोः, द्रव्यतस्तु ब्राह्मणपुत्रावगृहीतवेषौ, भावतस्तु धृतसंयमोद्यमौ तौ, तस्माद्भावमुन्योरित्यर्थः । किमवादीदित्याह-हे पुत्रौ ! वेदविदो-वेदज्ञा इदं वचनं वदन्ति, यथा - येन कारणेनासुतानां जनानां लोको गतिर्नास्ति । न विद्यते सुतो येषां ते असुताः, तेषामसुतानामपुत्राणाम् । यतो हि पुत्रं विना पिण्डप्रदानाद्यभावात् । क्षुधया म्रियमाणत्वेनार्त्तध्यान-परायणत्वेनाऽगतित्वं पितृणां स्यात् । यदाह स्मृतिः-

"अपुत्रस्य गतिर्नास्ति, स्वर्गो नैव च नैव च ।
तस्मात्पुत्रमुखं दृष्ट्वा, पश्चाद्धर्मं समाचरेत् ॥ १ ॥" ॥ ८ ॥

अहिज्ज वेए परिविस्स विप्पे, पुत्ते परिट्ठप्प गिहंसि जाया ।
भोच्चाण भोगे सह इत्थियाहिं, आरण्णगा होह मुणी पसत्था ॥ ९ ॥

हे पुत्रौ ! युवामारण्यकौ भूत्वा तदनन्तरं प्रशस्तौ मुनी भूयास्तम् । परं किं कृत्वा ? पूर्वं वेदान् चतुरोऽधीत्य - पठित्वा, पुनर्विप्रान् परिवेष्य - ब्राह्मणान् भोजयित्वा, पुनः पुत्रान् परिष्ठाप्य - कलासु निपुणान् कृत्वा, गृहभारयोग्यान् पुत्रान् गृहं भलाप्य, पुनः स्त्रीभिः सह भोगान् भुङ्क्त्वा, इति भृगुपुरोहितेनोक्तम् ॥ ९ ॥

सोयग्गिणा आयगुणिंधणेणं, मोहानिला पज्जलणाहिएणं ।
संतत्तभावं परितप्पमाणं, लालप्पमाणं बहुहा बहुं च ॥ १० ॥
पुरोहियं तं कमसोऽणुणंतं, निमंतयंतं च सुए धणेणं ।
जहक्कमं कामगुणेसु चेव, कुमारगा ते पसमिक्ख वक्कं ॥ ११ ॥

युग्मं द्वाभ्यां गाथाभ्यां ॥

तौ पुत्रौ भृगुपुरोहितं स्वजनकमाहतुः, तौ कुमारौ तं पुरोहितं स्वजनकं वाक्यमूचतुरित्यध्याहारः । किं कृत्वा ? 'पसमिक्ख' प्रकर्षेण अज्ञानाच्छादितमतिं समीक्ष्य - दृष्ट्वेति द्वितीयगाथया सम्बन्धः । किं कुर्वन्तं तं पुरोहितं ? क्रमशोऽनुक्रमेणानुनयन्तम्, स्वाभिप्रायेण शनैः शनैस्तौ पुत्रौ प्रति ज्ञापयन्तम् । पुनः किं कुर्वन्तं ? धनेन सुतौ प्रति निमन्त्रयन्तम् । च पुनर्यथाक्रमं कामगुणैर्भोगैर्निमन्त्रयन्तम्, यथाक्रममिति यथावसरम्, पूर्वमित्युक्तम्, वेदानधीत्य, ब्राह्मणान् भोजयित्वा, भोगान् भुङ्क्त्वा, इत्याद्यवसरं दर्शयन्तमित्यर्थः । इति द्वितीयगाथार्थः ।

अथ पूर्वगाथाया अर्थः-'सोयग्गीति' पुनः कीदृशं पुरोहितं ? शोकाग्निना सन्तप्तभावं शोकवह्निना सन्तप्तभावम्, शोकवह्निना प्रज्वलितचित्तम् । अत एव परितप्यमानं समन्ताद्धस्मसाज्जायमानम् । पुनः कीदृशं पुरोहितं ? बहुधा-बहुप्रकारेण वेदादिवचोयुक्त्या बहुवारंवारं यथास्यात्तथा लालप्यमानम्, मोहवशाद्दीनहीनवचांस्यतिशयेन भाषमाणम् । कीदृशेन शोकाग्निना ? आत्मगुणेन्धनेन, आत्मनः-स्वस्य शोकाग्नेरेव सहचारित्वेन तद्गुणकारित्वात् शोकाग्नेरेवोद्दीपकत्वाद् गुणा रागादय आत्मगुणास्ते एवेन्धनमुद्दीपनं यस्य स आत्मगुणेन्धनस्तेन । पुनः कीदृशेन ? मोहानिलप्रज्वलनाधिकेन, मोहानिलादज्ञानपवनादधिकं प्रज्वलनमस्येति मोहानिलाधिकप्रज्वलनस्तेनाज्ञानपवनाधिकजाज्वल्यमानेन, प्राकृतत्वादधिकशब्दस्य परनिपातः ॥ ११ ॥

अथ तौ कुमारावुत्तरं वदतः-

वेया अहीया न हवंति ताणं, भुत्ता दिया निंति तमंतमे णं ।
जाया य पुत्ता न हवंति ताणं, को णाम ते अणुमन्निज्ज एयं ॥ १२ ॥

पूर्वोक्तस्य वेदानधीत्य प्रव्रजितव्यमित्येतस्योत्तरं-भो तात ! वेदा अधीतास्त्राणं-शरणं न भवन्ति । वेदा मरणाद्वेदपाठिनं न त्रायन्ते । यदुक्तं वेदविद्भिरेव-

शिल्पमध्ययनं नाम, वृत्तं ब्राह्मणलक्षणम् ।
वृत्तस्थं ब्राह्मणं प्राहु-र्नेतरान् वेदजीवकान् ॥ १ ॥

पुनर्भो तात ! द्विजा-ब्राह्मणा भुक्ता-भोजिताः 'तमंतमे' इति तमस्तमसि नरकभूमिभागे रौद्र-रौरवकादिके नयन्ति-प्रापयन्ति । 'ण' मिति वाक्यालङ्कारे । तमसोऽपि यत्तमस्तमस्तमस्तस्मिन् तमस्तमसि । ते हि ब्राह्मणा भोजिताः कुमार्गपशुवधाश्रवसेवनादौ प्रवर्तन्ते । अतस्तद्भोजनदानं नरकहेतुकम् । च पुनः पुत्रा जाता-उत्पन्नास्त्राणं-शरणं न भवन्ति, नरकपातान्न रक्षन्तीत्यर्थः । उक्तं च वेदानुगैरेव-

"यदि पुत्राद्भवेत् स्वर्गो, [1]दानधर्मो निरर्थकः ।
धनधान्यव्ययं कृत्वा, रिक्तं कुर्यान्न मंदिरं ॥ १ ॥
बहुपुत्रा दुली गोधा-स्ताम्रचूडा तथैव च ।
तेषां च प्रथमं स्वर्गः, पश्चाल्लोको गमिष्यति ॥ २ ॥"

तदा भो तात ! तव तद्वचनं को नाम पुरुषोऽनुमन्येत । सविवेकः पुमान् कः सम्यक् कृत्वा जानीते इत्यर्थः । इत्यनेन वेदाध्ययनम्, ब्राह्मणानां भोजनम्, पुत्राणां गृहे स्थापनमेतत्त्रयस्योत्तरं दत्वा भोगान् भुङ्क्त्वा इत्यस्योत्तरं ददतः ॥ १२ ॥

---

१ दानं धर्मो-मु ॥

खणमित्तसुक्खा बहुकालदुक्खा, पगामदुक्खा अनिगामसुक्खा ।
संसारमोक्खस्स विपक्खभूया, खाणी अणत्थाण उ कामभोगा ॥ १३ ॥

हे तात ! कामभोगा अनर्थानां खानिसदृशा वर्तन्ते, अनर्थानामैहिकपारलौकिक-दुःखानामुत्पत्तिस्थानसदृशा भवन्तीत्यर्थः । तदेवाह-कीदृशाः कामभोगाः ? क्षणमात्रसुखाः क्षणमात्रं सेवनकाले एव सुखयन्तीति क्षणमात्रसुखाः । पुनः कीदृशाः ? बहुकालदुःखाः, बहुकालं नरकादिषु दुःखं येभ्यस्ते बहुकालदुःखाः । पुनः कीदृशाः ? प्रकामदुःखाः, प्रकाममत्यन्तं दुःखं येभ्यस्ते प्रकामदुःखाः । पुनः कीदृशाः ? अनिकामसुखाः, अप्रकृष्ट-सुखास्तुच्छसुखा इत्यर्थः । पुनः कीदृशाः ? संसारस्य भवभ्रमणस्य मोक्षः संसारमोक्षस्तस्य विपक्षभूताः-शत्रुभूताः, संसारभ्रमणवृद्धिकारिण इत्यर्थं ॥ १३ ॥

परिव्वयंते अनियत्तकामे, अहो अ राओ परितप्पमाणे ।
अण्णप्पमत्ते धणमेसमाणे, पप्पुत्ति मच्चुं पुरिसो जरं च ॥ १४ ॥

एतादृशः पुरुषो मृत्युं प्राप्नोति, च पुनर्जरां प्राप्नोति । कीदृशः सन् ? परिव्रजन्, परि-समन्ताद्विषयसुखलाभार्थमितस्ततो भ्रमन् । पुनः कीदृशः ? अनिवृत्तकामः, न निवृत्तः कामोऽभिलाषो यस्य सोऽनिवृत्तकामोऽनिवृत्तेच्छ इत्यर्थः । पुनः कीदृशः ? 'अह' इति अहनि 'राओ' इति रात्रौ परितप्यमानः, आर्षत्वात् 'अहो अ राओ' इति स्थितिः । अहोरात्रेऽ-प्राप्तवस्तुप्राप्तिनिमित्तं चिंतामग्नश्चिंतया दग्धः । पुनः कीदृशः ? अन्यप्रमत्तः, अन्ये स्वजनमाता-पितृ-पुत्र-कलत्र-भ्रात्रादयस्तदर्थं प्रमत्तस्तत्कार्यकरणासक्तोऽन्यप्रमत्तः । पुनः कीदृशः ? धनमेषयन्, विविधोपायैर्धनं वाञ्छन्नित्यर्थः । एवमेव मूढः पुमान् म्रियते, स्वार्थं किमपि न करोति । पुनः स्थितौ पूर्णायामेकदा मृत्युर्वा जरा वा अवश्यं प्राप्नोत्येवेति भावः ॥ १४ ॥

पुनः पूर्वोक्तमेव दृढयति ।

इमं च मे अत्थि इमं च नत्थि, इमं च मे किच्चं इमं अकिच्चं ।
तमेवमेवं लालप्पमाणं, हरा हरंति त्ति कहं पमाए ॥ १५ ।

हराः- कालास्तं मनुष्यं हरन्ति, हरन्ति प्राणिनामायुरिति हराः, दिवसरजन्यादयः कालाः, तं किं कुर्वन्तं ? एवमेव लालप्यमानम्, व्यक्तं वचनं वदन्तम् । एवमेवमिति किं ? इदं च 'मे' ममास्ति, इदं प्रत्यक्षं धान्यादिकं मम गृहे वर्तते, पुनरिदं च रजत-स्वर्णाभरणादिकं च 'मे' मम नास्ति । च पुनरिदं मम कृत्यं षड्ऋतुसुखं गृहादिकं करणीयं वर्तते, इदं च 'मे' ममाकृत्यं वाणिज्यादिकमकरणीयम्, अस्मिन् वाणिज्ये लाभो नास्ति, तस्मान्न कृत्य-मकृत्यमित्यर्थः । इति हेतोर्भो तात ! कथं प्रमादीत् ? कथं प्रमादं कुर्यात् ? प्रमादः कर्तुं कथमुचित इत्यर्थः ॥ १५ ॥

अथ पुनः पुरोहितस्तौ लोभयितुमाह-

धणं पभूयं सह इत्थीयाहिं, सयणा तहा कामगुणा पगामा ।
तवं कए तप्पइ जस्स लोगो, तं सव्वसाहीणमिहेव तुब्भं ॥ १६ ॥

भो पुत्रौ ! यस्य कृते - यदर्थं लोको - जनस्तपस्तप्यते, तत्सर्वमिहास्माकं गृहे 'तुब्भ' इति युवयोः स्वाधीनं वर्तते । तत् किं किमित्याह-धनं प्रभूतं-प्रचुरं वर्तते, धनार्थं हि लोको बहुदुःखं भुङ्क्ते, तद्धनं प्रभूतं स्त्रीभिः सहितमस्ति, धनादेव स्त्रियः स्वाधीना एव स्युः । तथा स्वजना ज्ञातयोऽपि वर्तन्ते, यस्य हि कुटुम्बं प्रचुरं भवति स केनापि धर्षितुं न शक्यत इत्यर्थः । पुनः प्रकामा - भूयांसः प्रचुराः कामगुणा रूप-रस-गन्ध-स्पर्शादय इन्द्रिय-विषया वर्तन्ते, तस्मात्किमर्थं तपस्तपनीयम् ? ॥ १६ ॥

धणेण किं धम्मधुराहिगारे, सयणेण वा कामगुणेहिं चेव ।
समणा भविस्सामु गुणोहधारी, बहिं विहारा अभिगम्म भिक्खं ॥ १७ ॥

अथ पुत्रौ वदतः-भो तात ! धर्मधुराधिकारे - दशविधयतिधर्मधूर्वहनाधिकारे आवां श्रमणौ भविष्यावः । कीदृशौ श्रमणौ ? गुणौघधारिणौ ज्ञान-दर्शन-चारित्र-रूपगुणसमूह-धारिणौ । किं कृत्वा ? बहिर्विहारमधिगम्य, द्रव्यतो बहिर्ग्रामाकरनगरादिभ्य एकान्तमाश्रित्य, भावतो बहिः क्वचिदप्रतिबद्धत्वमाश्रित्य । तस्मादावयोर्धनेन किं ? अथवा स्वजनेन किं ? च पुनः कामगुणैरिन्द्रियसुखैः किं ? धनस्वजनविषया हि न परलोकसुखाय स्युरित्यर्थः । यदुक्तं वेदेऽपि-

"न प्रजया धनधान्येन त्यागेनैकेनामृतत्वमानंशुरित्यादि" ॥ १७ ॥

अथ भृगुस्तयोर्धर्मनिराकरणाय परलोकनिराकरणाय च आत्मनोऽभावमाह-

जहा य अग्गी अरणीओ असंतो, खीरे घयं तिल्लमहातिलेसु ।
एमेव जाया सरीरंमि सत्ता, संमुच्छई नासइ नावचिट्ठे ॥ १८ ॥

हे जाया ! हे पुत्रौ ! सत्त्वा-जीवा एवमेव-अमुना दृष्टान्तेन शरीरे असंतः- पूर्वमविद्यमाना एव सम्मूर्च्छन्ति - उत्पद्यन्ते । पृथिव्यप्तेजोवाय्वाकाशानां समुदायसंयोगाच्चैतन्यरूपो जीव उत्पद्यते इत्यर्थः । बदरीबल्लिगुडमधूकपुष्पपानीयादिद्रव्याणां मेलपात् मदशक्तिरिव पूर्वमसत् उत्पद्यते, तथाभूतानां संयोगाच्चेतना उत्पद्यते । पुनः स जीवो नश्यति नावतिष्ठते । शरीरनाशे तन्नाशः, शरीरे सति पञ्चभूतमेलापे सति स भवेत्, पञ्चभूतानां पृथग्भावे तस्यापि नाश एव । एवमिति केन प्रकारेण जीवाः पूर्वमविद्यमाना उत्पद्यन्ते ? तद्दृष्टान्तमाह-यथा एव, चशब्दोऽत्र एवार्थे, अग्निः 'अरणीओ' अरणीतोऽग्निमथनकाष्टतः पूर्वमदृश्यमानोऽपि संयोगादुपरित-नारणिकाष्टेन, अधो वंशार्कादिकाष्टसंयोगादग्निरुत्पद्यते, न त्वेकाकिनि अरणिकाष्टे पूर्वमग्निर्दृष्टः । एवं क्षीरे घृतम्, क्षीरमपि पूर्वमुष्णीकृत्य पश्चात्तन्मध्ये तक्रं स्तोकं प्रक्षिप्य चतुर्यामं स्त्यानीकृत्य पश्चान्मन्थानेन विलोड्यते, तदा ततः पूर्वमसदेव घृतमुत्पद्यते । एवं

महातिलेषूत्तमतिलेषु, यन्त्रादिमथनसंयोगात्तिलेभ्यस्तैलं पूर्वमप्रत्यक्षमविद्यमान-मप्युत्पद्यते। अरणिकाष्टादधः काष्टसंयोगाभावे चैतन्यरूपजीवाभाव इत्यर्थः ॥ १८ ॥

अथैतस्योक्तस्योत्तरं तावाहतुः-

नो इंदियगिज्झु अमुत्तभावा, अमुत्तभावावि य होइ निच्चो ।
अज्झत्थहेऊं नियस्स बंधो, संसारहेउं च वयंति बंधं ॥ १९ ॥

हे तात ! अयमात्मा अमूर्त्तभावादिन्द्रियग्राह्यो 'नो' इति नास्ति । शब्दरूपरसगन्ध-स्पर्शादीनामभावत्वममूर्तत्वम्, तस्मादमूर्तत्वादिन्द्रियग्राह्यो नास्ति । योऽमूर्तो भवति स इन्द्रियग्राह्योऽपि न भवति, य इन्द्रियग्राह्यो भवति सोऽमूर्तोऽपि न सम्भवति, यथा घटादिः । पुनरयं जीवोऽमूर्तभावादपि नित्यो भवति । यद् द्रव्यत्वे सत्यमूर्तं तन्नित्यम्, यथा व्योम । अथ कदाचित् कश्चिद्वक्ष्यति चेदयममूर्त आत्मा तदा कथमस्य बन्धः ? तत्रोत्तरं वदतः- अस्य जीवस्य शरीरे बन्धो नियतो निश्चितोऽध्यात्महेतुर्वर्तते । कोऽर्थः ? आत्मन्यधीकृत्य भवतीत्यध्यात्मं मिथ्यात्वाविरतिकषाययोगादिकम्, तदेव हेतुः कारणं यस्य सोऽध्यात्महेतुः । अस्य जीवस्य यः शरीरे बन्धो भवति स मिथ्यात्वादिभिर्हेतुभिरेव स्यादिति । यथा अमूर्तस्या-प्याकाशस्य घटादाविव घटोत्पादनकारणैर्घटे आकाशस्य बन्धो जायते, तथात्मनः शरीरे बन्ध इत्यर्थः । च पुनर्बुधाः संसारस्य हेतुं - भवभ्रमणस्य कारणं सम्बन्धं वदन्ति । यावच्छरीरेण बद्धस्तावदयं जीवो भवभ्रमणं करोतीत्यर्थः । यदुक्तं वेदान्तेऽपि-

"कर्मबद्धो भवेज्जीवः, कर्ममुक्तो भवेच्छिवः ॥" इति ॥ १९ ॥

जहा वयं धम्ममयाणमाणा, पावं पुरा कम्ममकासि मोहा ।
ओरुज्झमाणा परिरक्खियंता, तं नेव भुज्जो वि समायरामो ॥ २० ॥

हे तात ! यथा पुरा - पूर्वं मोहात्तत्त्वस्याऽज्ञानादावामर्थे वयं पापं-पापहेतुकं कर्माकार्ष्म । आवां किं कुर्वाणौ ? धर्मं सम्यक्त्वादितत्त्वमजानानौ । पुनः कथंभूतौ ? अवरुध्यमानौ - गृहान्निःसरणमप्राप्यमाणौ । पुनरावां कथंभूतौ ? परिरक्ष्यमाणौ साधुदर्शनाद्वार्यमाणौ, पुरा ईदृशावावामज्ञाततत्त्वौ पापकर्मपरायणावभूव, तत्पापं कर्म भूयः पुनर्नैव समाचरावो, न कुर्व इत्यर्थः ॥ २० ॥

अब्भाहयंमि लोगंमि, सव्वओ परिवारिए ।
अमोहाहिं पडंतीहिं, गिहंसि न रइं लभे ॥ २१ ॥

भो तात ! अस्मिन् लोके - जगत्यावां गृहे-गृहवासे रतिं न लभावहे । कथंभूते लोके ? अमोघाभिरवश्यं भेदिकाभिः शस्त्रधाराकाराभिः पतन्तीभिरागच्छन्तीभिः शस्त्रधाराभिः कदर्थिते । पुनः कथंभूते लोके ? अभ्याहते - आभिमुख्येन पीडिते । पुनः कथंभूते लोके ? सर्वतः- सर्वासु दिक्षु परिवारिते-परिवेष्टिते, वागुरादौ पतितमृगवद् दुःखितौ स्वः ॥ २१ ॥

तदा पुरोहितोऽपृच्छत्-

केण अब्भाहओ लोओ, केण वा परिवारिओ ।
का वा अमोहा वुत्ता, जाया चिंतापरो हुमि ॥ २२ ॥

हे पुत्रौ ! केन लोकोऽभ्याहतः ? वाऽथवा केनायं लोकः परिवेष्टितः ? वाऽथवा का अमोघा अवश्यं भेदिका शस्त्रधारोक्ता ? हे पुत्रावहमिति चिन्तापरो भवामि ॥ २२ ॥

तदा पुत्रौ प्रत्येक प्रश्नानामुत्तरं वदतः-

मच्चुणाब्भाहओ लोओ, जराए परिवारिओ ।
अमोहा रयणी वुत्ता, एवं ताय वियाणह ॥ २३ ॥

हे तात ! त्वमेवममुना प्रकारेण जगज्जानीहि । एवमिति कथं ? तदाह-लोकोऽयं मृगरूपो मृत्युना व्याधेनाभ्याहतः-पीडितः, स च मृत्युर्हि सर्वस्य जन्तोः पृष्ठे धावति । जरया - वृद्धत्वेन परिवेष्टितः । जीर्यते शरीरमनयेति जरा, पलितमात्रमिह जरा नोच्यते, बल - वीर्य-पराक्रमाणां हानिरेव जरा, तया सर्वं जगत् परिवेष्टितमस्ति । तयैव मृत्युर्जगज्जन्तुं घातयति । अमोघाः शस्त्रधारा रात्रय उक्ताः, न केवला रात्रय एव भवन्ति किन्तु दिनान्यपि भवन्ति । परमत्र रात्रिग्रहणं भयोत्पादनार्थम् । स्त्रीलिङ्गशब्दस्य अमोघा इत्यस्योपमार्थं ज्ञेयम् ॥ २३ ॥

जा जा वच्चइ रयणी, न सा पडिनियत्तई ।
अहम्मं कुणमाणस्स, अफला जंति राईओ ॥ २४ ॥

हे तात ! या या रजन्यस्तत्सम्बन्धा दिवसाश्च व्युत्क्रामन्ति - व्रजन्ति, तास्ता रजन्यो न प्रतिनिवर्तन्ते, पुनर्व्याघुट्य नायान्ति । अधर्मं कुर्वतः पुरुषस्य रात्रयो दिवसाश्चाफला-निरर्थका यान्ति तस्माद्धर्माचरणेन सफला विधेया इत्यर्थः ॥ २४ ॥

तदेव पुनरप्याहतुः-

जा जा वच्चइ रयणी, न सा पडिनियत्तई ।
धम्मं च कुणमाणस्स, सफला जंति राईओ ॥ २५ ॥

पूर्वार्धस्यार्थस्तथैव, हे तात ! धर्मं कुर्वाणस्य पुरुषस्य रात्रयो दिवसाश्च सफला यान्ति, धर्माचरणं विना निष्फला इत्यर्थः । प्राकृतत्वाद्वचनव्यत्ययः । नृजन्मनः फलं धर्माचरणम्, धर्माचरणं हि व्रतं विना न स्यात्, अतश्चावां व्रतं गृहीष्यावः । नृजन्मनि रात्रिदिवसान् सफलान् करिष्याव इति भावः ॥ २५ ॥

तद्वचनाल्लब्धबोधौ भृगुपुरोहितः पुत्रौ प्रत्याह-

एगओ संवसित्ताणं, दुहओ समत्तसंजुया ।
पच्छा जाया गमिस्सामो, भिक्खमाणा कुले कुले ॥ २६ ॥

हे पुत्रौ ! द्वयं च द्वयं च द्वये, आवां युवां च सर्वेऽपि सम्यक्त्वसंयुताः सन्त एकत-एकत्र गृहवासे सम्यक् सुखेनोषित्वा गृहस्थाश्रमं संसेव्य पश्चाद् वृद्धावस्थायां गमिष्यामः, ग्रामनगरारण्यादिषु मासकल्पादिक्रमेण प्रव्रजिष्याम इत्यर्थः । किं कुर्वाणाः ? कुले कुले गृहे गृहे अज्ञाते उञ्छवृत्त्या गोचर्यया भिक्ष्यमाणा भिक्षां गृह्णन्तो भिक्षवो भविष्याम इत्यर्थः ॥ २६ ॥

तदा तौ पुत्रौ जनकं प्रत्याहतुः-

जस्सत्थि मच्चुणा सक्खं, जस्स वत्थि पलायणं ।
जो जाणे न मरिस्सामि, सो हु कंखे सुए सिया ॥ २७ ॥

हे तात ! 'हु' इति निश्चयेन स एव पुरुष इति काङ्क्षतीति प्रार्थयति । 'सुए' इति श्व आगामिदिने प्रभाते इदं स्यात्, अद्य न जातं तर्हि किं ? कल्ये स्यादित्यर्थः । इति स चिन्तयति । स इति कः ? यस्य पुरुषस्य मृत्युना सह - कालेन सह सख्यं - मित्रत्वमस्ति, य एवं जानाति मृत्युर्मम सखा वर्तते । चशब्दः पुनरर्थे, पुनर्यस्य पुरुषस्य मृत्योः पलायनमस्ति, यः पुरुष एवं जानाति मृत्युर्मे - मम किं करिष्यति । यदा मृत्युरायास्यति तदाहं प्रपलाय्य कुत्रचिदन्यत्र यास्यामि, अहं मृत्युगोचरो न भविष्यामि । पुनर्य एवं जानाति, अहं न मरिष्यामि, अहं चिरंजीव्यस्मि ॥ २७ ॥

अज्जेव धम्मं पडिवज्जयामो, जहिं पवन्ना न पुणब्भवामो ।
अणागयं नेव य अत्थि किंचि, सद्धाखमं ने विणइत्तु रागं ॥ २८ ॥

भो तात ! अद्यैव तं धर्मं वयं प्रतिपद्यामहे, आर्षत्वात् । किं कृत्वा ? रागं स्नेहं स्वजनादिषु प्रेम, 'विणइत्तु' इति विनीय - स्फोटयित्वा, कीदृशं धर्मं ? 'ने' इति नोऽस्माकं श्रद्धाक्षमं श्रद्धया-तत्त्वरुच्या क्षमो-योग्यस्तम् । यतो हि साधुधर्मे स्नेहः सर्वथा निवार्यः, तत्त्वरुचिश्च कार्या, तया हीनो हि साधुधर्मो निष्फलः, यत्तदोर्नित्याभिसम्बन्धात्, तं कं धर्मं ? 'जहिं' इति यस्मिन् धर्मे प्रपन्नाः सन्तो न पुनर्भवामः, पुनः संसारे नोत्पत्स्यामः । यद्भवता पुरोक्तं भोगान् भुक्त्वा पश्चात्प्रव्रजिष्यामः । तस्योत्तरं शृणु-हे तात ! अनागतमप्राप्तवस्तुविषयादिसुखं किञ्चिन्न चैवास्य जीवस्यास्ति, सर्वेषां भावानामनन्तशः प्राप्तत्वात् ॥ २८ ॥

इति स्वपुत्रयोरुपदेशं श्रुत्वा भृगुः प्रतिबुद्धः सन् ब्राह्मणीं प्रत्याह-

पहीणपुत्तस्स हु नत्थि वासो, वासिट्ठि भिक्खायरियाइ कालो ।
साहाहिं रुक्खो लहइ समाहिं, छिन्नाहिं साहाहिं तमेव खाणुं ॥ २९ ॥

हे वाशिष्ठि ! वशिष्ठमुनिगोत्रोत्पन्ने ब्राह्मणि प्रिये ! प्रहीणपुत्रस्य-पुत्राभ्यां त्यक्तस्य 'हु' इति निश्चयेन मम वासो-गृहे वसनं नास्ति । ममेति पदमध्याहार्यम् । हे प्रिये ! भिक्षाचर्याया अयं कालोऽयमवसरोऽस्तीति शेषः । उक्तमर्थमर्थान्तरन्यासेन दृढयति-वृक्षः

शाखाभिरेव समाधिं - स्वास्थ्यं शोभां वा लभते, छिन्नाभिः शाखाभिस्तमेव वृक्षं जनाः स्थाणुं कील वदन्ति । शाखाहीनस्य वृक्षस्य स्थाणुत्वं स्यात्, तथा ममापि पुत्राभ्यां वियुक्तस्य गृहे-वासे स्थितस्य समाधिर्नास्तीत्यर्थः ॥ २९ ॥

पंखाविहूणो व्व जहेव पक्खी, भिच्चविहूणो व्व रणे नरिंदो ।
विवन्नसारो वणिओव्व पोए, पहीणपुत्तो मि तहा अहंपि ॥ ३० ॥

व्व शब्दो दृष्टान्तसमुच्चये, हे प्रिये ! इहास्मिन् लोके पक्षाभ्यां विहीनः पक्षी यादृशः स्यात्, पक्षहीनो हि पक्षी आकाशमार्गोल्लङ्घनायाऽशक्तो येन केनापि हिंस्रेण पराभूयते । पुना रणे - सङ्ग्रामे भृत्यैः- सेवकैर्विहीनो नरेन्द्रो - नृपतिरिव रिपुभिः पराभूयते । पुनर्वणिक्-व्यापारीव, यथा पोते-प्रवहणे भग्ने सतीत्यध्याहारः, विपन्नसारो - विगतसर्वद्रव्यभाण्डो विषादं करोतीति शेषः । तथाहमपि प्रहीणपुत्रः-प्रव्रजितपुत्रो विषादवान् भवामीति शेषः ॥ ३० ॥

इति पुरोहितप्ररूपितं वचनं श्रुत्वा वासिष्ठ्याह-

सुसंभिया कामगुणा इमे ते, संपिंडिया अग्गरसप्पभूया ।
भुंजामु ता कामगुणे पगामं, पच्छा गमिस्सामु पहाणमग्गं ॥ ३१ ॥

हे स्वामिन् 'ते' तवेमे प्रत्यक्षं दृश्यमाणाः कामगुणाः- पञ्चेन्द्रियसुखदाः पदार्थाः सद्वस्त्रसरसमिष्टान्नपुष्पचन्दननाटकगीततालवेणुवीणादयः सुसंभृताः सन्ति, सम्यक् संस्कृताः सज्जीकृताः सन्ति । पुनः कामगुणाः सम्पिण्डिताः- पुञ्जीकृताः सन्ति, न तु यतस्ततः पतिताः सन्ति, किन्त्वेकत्र राशीकृता एव तिष्ठन्ति । पुनः कीदृशाः कामगुणाः ? अग्ररसप्रभूताः, अग्रः-प्रधानो रसो येभ्यस्तेऽग्ररसाः, शृङ्गाररसोत्पादका इत्यर्थः । यदुक्तम्-

रतिमाल्यालङ्कारैः, प्रियजनगन्धर्वकामसेवाभिः ।
उपवनगमनविहारैः, शृङ्गाररसः समुद्भवति ॥ १ ॥

इत्युक्ते, अग्ररसाश्च ते प्रभूताश्चाग्ररसप्रभूताः प्रचुरा इत्यर्थः । अथवाग्ररसेन-शृङ्गार-रसेन प्रचुरास्तान् कामगुणान् प्रकामं यथेच्छं भुञ्जीवहि, पश्चाद् भुक्तभोगसुखौ भूत्वा वृद्धत्वे प्रधानमार्गं-प्रव्रज्यारूपं मोक्षमार्गं गमिष्यावः ॥ ३१ ॥

अथ भृगुर्ब्राह्मणीं प्रत्याह-

भुत्ता रसा भोइ जहाइ णे वओ, न जीवियट्ठा पजहामि भोए ।
लाभं अलाभं च सुहं च दुक्खं, संविक्खमाणो चरिस्सामि मोणं ॥ ३२ ॥

भो इति हे भवति ! हे ब्राह्मणि ! रसाः शृङ्गारादयो भोगाश्च भुक्ताः सन्तो 'णे' इति नोऽस्मान् जहति-त्यजन्ति, वयो-यौवनमपि त्यजति । हे ब्राह्मणि ! भोगान् जीवितव्यार्थं न प्रजहामि, किन्तु लाभम्, च पुनरलाभम्, च पुनः सुखम्, च पुनर्दुःखं संविक्खमाणाः समतयेक्षमाणः समभावेन पश्यन्नहं मौनं चरिष्यामि । मुनेः कर्म मौनं, मुनयो हि-

"लाभालाभे सुखे दुःखे, जीविते मरणे तथा ।
शत्रौ मित्रे तृणे स्त्रैणे, साधवः समचेतसः ॥ १ ॥"

यस्मिन् साधुधर्मे रसेषु भोगेषु जीवितव्येषु निःस्पृहत्वं तन्मुनित्वमङ्गीकरिष्यामि ॥ ३२ ॥

अथ पुनर्ब्राह्मणी प्राह-

मा हु तुमं सोयरियाण संभरे, जुन्नो व हंसो पडिसोत्तगामी ।
भुंजाहि भोगाइ मए समाणं, दुक्खं खु भिक्खायरियाविहारो ॥ ३३ ॥

हे पुरोहित ! त्वं मया समं भोगान् भुङ्क्ष्व । 'हु' इत्यलङ्कारे, 'णं' इत्यपि । हे स्वामिंस्त्वं पुनः सौदर्याणां - सहोदराणां भ्रातॄणां स्वजनसम्बन्धिनां गृहे स्थितानां मा स्मार्षीः । कोऽर्थः ? त्वं मुनिर्भूत्वा पश्चाद् दुःखितः सन् गृहस्थान् स्वबन्धून् स्मरिष्यसि, तस्मान्मया सार्धं विषयसुखं भुञ्जानो गृहे तिष्ठेत्यर्थः । 'खु' इति निश्चयेन भिक्षाचर्याविहारो दुःखं-दुःखहेतुरेवास्ति । भिक्षाचरत्वमसहमानस्त्वं गृहवासं स्मरिष्यसीति भावः । त्वं क इव [1]सोदरान् स्मरिष्यसि ? जीर्णो हंस इव, वृद्धो हंसो यथा प्रतिश्रोतोगामी सन्मुखजलप्रवाहं तरंस्तत्र तरणाशक्तः पश्चादनुश्रोतोजलतरणं स्मरति । मनसि खिन्नः सन्निति जानाति मया किमर्थं सन्मुखजलप्रवाहतरणमारब्धम् ? जलवहनमार्गेण सह तरमेव मम श्रेयस्तथा त्वमपि मा भूरित्यर्थः ॥ ३३ ॥

अथ भृगुपुरोहित आह-

जहा य भोई तणुअं भुअंगो, निम्मोयणिं हिच्च पलेइ मुत्तो ।
एमेए जाया पयहंति भोए, तेऽहं कहं नाणुगमिस्समिक्को ॥ ३४ ॥

'भोई' इति हे भवति ! हे ब्राह्मणि ! भुजङ्गः सर्पस्तनुजां-शरीरादुत्पन्नां निर्मोचनीं -निर्मोकं कञ्चुकं हित्वा मुक्तः सन् प्रयाति, एवमेतौ जातौ पुत्रौ भोगान् प्रजहीतः । तौ भोगत्यागिनौ पुत्रौ प्रत्यहमेकाकी सन् कथं नानुगमिष्यामि ? पुत्राभ्यां विहीनस्यैकाकिनो मम कीदृशो गृहवासः ? धन्यौ तौ पुत्रौ, यौ तरुणावेव कञ्चुकमिव विषयसुखं त्यक्त्वा भुजङ्गमवद् व्रजत इत्यर्थः ॥ ३४ ॥

छिंदित्तु जालं अबलं व रोहिया, मच्छा जहा कामगुणे पहाय ।
धोरेयसीला तवसा उदारा, धीरा हु भिक्खायरियं चरंति ॥ ३५ ॥

हे ब्राह्मणि ! धीरा - धैर्यवन्तो जना 'हु' इति निश्चयेन भिक्षाचर्यां-भिक्षावृत्तिं साधुधर्मं चरन्ति । कीदृशा धीराः ? तपसा उदाराः, अथवा कीदृशीं भिक्षाचर्यां ? तपसा उदाराम्, तपसा प्रधानाम्, प्राकृतत्वाद्विभक्ति-लिङ्गव्यत्ययः । पुनः कीदृशा धीराः ? धौरेयशीलाः, धौरेयाणां धुरंधराणामिव शीलमुद्वोढभारोद्वहनसामर्थ्यं येषां ते धौरेयशीलाः ।

---

१ सोदरान् स्मरसि मनसि खिन्नः सन्निति जानाति मया स्मरिष्यसि : L.D. ॥

किं कृत्वा धीरा भिक्षाचर्यां चरन्ति ? कामगुणान् प्रहाय-प्रकर्षेण हित्वा । के किं यथा ? यथाशब्द इवार्थे, के किमिव ? रोहिता-मत्स्या रोहितजातीयमीना अबलं जीर्णं जालमिव, यथा बलिष्ठमत्स्या जीर्णं जालं छित्त्वा निर्भयस्थाने चरन्ति, तथा धीराः कामगुणान् पाशसदृशांस्त्यक्त्वा भिक्षाचर्यामादियन्ते, अहमपीत्थमेव चरिष्यामीति भावः ॥ ३५ ॥

इति भृगुवचनं श्रुत्वा ब्राह्मण्याह-

नहेव कुंचा समइक्कमंता, तयाणि जालानि दलित्तु हंसा ।
पलिंति पुत्ता य पई य मज्झं, तेहं कहं नाणुगमिस्समेक्का ॥ ३६ ॥

पुत्रौ द्वावपि, पतिर्भृगुः पुरोहितः, एते त्रयोऽपि मह्यमिति मां दलयित्वा मत्सम्बन्धि-स्नेहजालं भोगाभिष्वङ्गजालं छित्त्वा पलिन्ति-परियान्ति, परि-समन्ताद्यान्ति संयमाध्वनि चरन्तीत्यर्थः । एते के इव ? क्रौञ्चाः क्रौञ्चपक्षिणः हंसा हंसपक्षिणो वा, ते इव, यथा क्रौञ्चपक्षिणो हंसपक्षिणश्च तानि विस्तीर्णानि जालानि दलयित्वा-भित्वा समतिक्रामन्तो नानाप्रदेशानुल्लङ्घयन्तो नभसि परियान्ति-गगने परियान्ति, स्वेच्छया विचरन्ति । अत्र हि विषयसुखं जालोपमम्, निरुपलेपत्वात्साधुवर्त्म नभःकल्पम्, उत्तमजीवानां क्रौञ्चविहङ्ग-हंसविहङ्गोपमानम् । यदैते त्रयोऽपि मां त्यक्त्वा व्रजन्ति, तदाहमेकाकिनी तान् कथं नानुगमिष्यामि ? अपि त्वनुगमिष्याम्येव ॥ ३६ ॥

अथ यदा चतुर्णां प्रव्रज्यायां मनोऽभूत् तदा किं समभूदित्याह-

पुरोहियं तं ससुयं सदारं, सुच्चाऽभिनिक्खम्म पहाय भोए ।
कुडुंबसारं विउलुत्तमं तं, रायं अभिक्खं समुवाय देवी ॥ ३७ ॥

राजानं तमिषुकारिणं देवी कमला अभीक्ष्णं-वारंवारं समुवाच, सम्यक् प्रकारेण शिक्षापूर्वकमुवाच । किं कृत्वा ? पुरोहितं भृगुं ससुतं-पुत्रसहितम्, सदारं-सपत्नीकं भोगान् प्रहाय-प्रकर्षेण त्यक्त्वा, पुनर्विपुलं विस्तीर्णमुत्तमं तं कुटुम्बसारम् प्रहाय-त्यक्त्वा, कुटुम्बं स्वजनवर्गं, सारं धनधान्यादिकम्, उभयमपि त्यक्त्वा, अभिनिष्क्रम्य गृहान्निर्गत्य प्रव्रजितमिति श्रुत्वा; तस्य पुरोहितस्य धनादिकं गृह्णन्तं राजानं राज्ञी प्राहेत्यर्थः ॥ ३७ ॥

राज्ञी किमुवाचेत्याह-

वंतासी पुरिसो रायं, न सो होइ पसंसिओ ।
माहणेण परिच्चत्तं, धणं आयाउमिच्छसि ॥ ३८ ॥

हे राजन् ! यो वान्ताशी स पुरुषः प्रशंसनीयो न भवेत्-श्लाघ्यो न भवेत् । हे राजन् ! ब्राह्मणेन परित्यक्तं धनं त्वमादातुमिच्छसि, ब्राह्मणेन त्यक्तं धनं वान्ताहारसदृशं गृहित्वा त्वं श्लाघ्यो न भविष्यसीत्यर्थः । वान्तं वदनादुद्गतमाहारमश्नातीत्येवंशीलो वान्ताशी वान्ताहारभोक्तेत्यर्थः ॥ ३८ ॥

सव्वं जगं जई तुम्हं, सव्वं वावि धणं भवे ।
सव्वंपि ते अपज्जत्तं, नेव ताणाय तं तव ॥ ३९ ॥

हे राजन् ! यदि सर्वं जगत् समस्तोऽपि भूलोकस्तव भवेत्, तवायत्तः स्यात्, वा अथवा सर्वमपि धनं रजतस्वर्णरत्नादिकमपि तव भवेत् । तत्सर्वं जगत्, पुनः सर्वमपि धनं ते तवाऽपर्याप्तं भवेत्, तवेच्छापूरणायाऽसमर्थं स्यात्, यत इच्छाया अनन्तत्वात्, पुनस्तत्सर्वं जगत्, तत्सर्वं धनं च त्राणाय मरणभयाद्रक्षणाय तव न भवेत्, यदि जगद्धनं चेच्छापूरणाय, मरणाद्रक्षणायाऽसमर्थम्, तदा किं ब्राह्मणपरित्यक्तधनग्रहणेनेत्यर्थः ॥ ३९ ॥

मरिहिसि रायं जया तया वा, मणोरमे कामगुणे पहाय ।
एक्को हु धम्मो नरदेव ताणं, न विज्जई अन्नमिहेह किंचि ॥ ४० ॥

हे राजन् ! यदा तदा - यस्मिंस्तस्मिन् काले मनोरमान्-मनोहरान् कामगुणान् प्रहाय प्रकर्षेण त्यक्त्वा मरिष्यसि, म्रियमाणस्य पुरुषस्य धनादि सार्थे न भवति । हे नरदेव ! 'हु' इति निश्चयेनैको धर्म एव त्राणं - शरणं विद्यते । इह जगति, इह मृत्यौ वा जीवस्यान्यत्किञ्चित् त्राणं न विद्यते ॥ ४० ॥

नाहं रमे पक्खिणि पंजरे वा, संताणछिन्ना चरिस्सामि मोणं ।
अकिंचणा उज्जुकडा निरामिसा, परिग्गहारंभनिअत्तदोसा ॥ ४१ ॥

अहमित्यध्याहारः । हे राजन्नहं न रमे, रतिं न प्राप्नोमि, वाशब्द इवार्थे, पक्षिणी पञ्जरे इव, यथा पक्षिणी पञ्जरे रतिं न प्राप्नोति, अहं सन्तानछिन्ना सती मौनं मुनीनामाचारं चरिष्याम्यङ्गीकरिष्यामि । छिन्नः सन्तानः स्नेहसन्ततिर्यया सा छिन्नसन्ताना, पुनः कथंभूता सत्यहम् ? अकिञ्चना सचित्ता-ऽचित्तद्विविधपरिग्रहरहिता । पुनरहं कथंभूता सती ? ऋजु-मायारहितं कृतं तपो-धर्मं यया सा ऋजुकृता । पुनः कथंभूता सती ? निरामिषा सती, निःक्रान्ता आमिषा-विषयादिपदार्था यस्मात् सेति निरामिषा, विषयादयः पदार्था हि विषयिजीवानां गृद्धि हेतुत्वादामिषोपमा एव, तस्मादहं निर्विषया सती, पुनः कथंभूता सत्यहं ? परिग्रहारम्भनिवृत्त-दोषा, परिग्रहश्चारम्भश्च परिग्रहारम्भौ, तौ निवृत्तौ दोषौ यस्याः सा परिग्रहारम्भनिवृत्तदोषा ॥ ४१ ॥

दवग्गिणा जहा रण्णे, डज्झमाणेसु जंतुसु ।
अन्ने सत्ता पमोयंति, रागद्दोसवसं गया ॥ ४२ ॥

अपरं च यथारण्ये दवाग्निना जीवेषु दह्यमानेषु सत्स्वन्येऽदग्धाः सत्त्वाः प्रमोदन्ते-हर्षिता भवन्ति, मनस्येवं जानन्त्येते ज्वलन्तु, वयमदग्धास्तिष्ठामः । कथंभूतास्ते ? रागद्वेषयोर्वशं गता - रागद्वेषग्रस्ताः ॥ ४२ ॥

एवमेव वयं मूढा, कामभोगेसु मुच्छिया ।
डज्झमाणं न बुज्झामो, रागद्दोसग्गिणा जगं ॥ ४३ ॥

एवममुनैव दृष्टान्तेन वयं मूढा अविवेकिनः कामभोगेषु मर्च्छिताः सन्तो रागद्वेषाग्निना जगद्दह्यमानं न बुध्यामहे, न जानीमहे वयमिति बहुवचनाद्बहवोऽस्मादृशा जीवा इति ज्ञापनार्थं ॥ ४३ ॥

भोगे भुच्चा वमित्ता य, लहुभूय विहारिणो ।
आमोयमाणा गच्छंति, दिया कामकमा इव ॥ ४४ ॥

धन्यास्ते जीवा इत्यध्याहारः । ये जीवा भोगान् भुङ्क्त्वा, पुनरुत्तरकाले वान्त्वा त्यक्त्वा, अर्थात् साधवो भूत्वा, आमोदमानाः साध्वाचरणीयानुष्ठानेन सन्तुष्टाः सन्तो गच्छन्ति-विचरन्ति, वाञ्छितं स्थानं व्रजन्ति ते जीवाः । के इव ? कामक्रमा द्विजा इव पक्षिण इव, कामं स्वेच्छया क्रमो विचरणं येषां ते कामक्रमाः स्वेच्छाचारिणः । यथा द्विजाः स्वेच्छया अप्रतिबद्धविहारत्वेन यत्र यत्र रोचन्ते तत्र तत्रामोदमाना भ्राम्यन्ति, एवमेतेऽप्यनभिष्वङ्गभावा यत्र यत्र संयमनिर्वाहस्तत्र तत्र यान्तीत्याशयः । पुनः कथंभूतास्ते जीवाः ? लघुभूतविहारिणः, लघुर्वायुस्तद्भूतास्तदुपमाःसन्तो विहरन्तीत्येवंशीला लघुभूतविहारिणः । अथवा लघुश्चासौ भूतश्च लघुभूतो वायुस्तद्वद्विहरन्तीत्येवंशीला लघुभूतविहारिणः, वायुरिवाऽप्रतिबद्धविहारिणः ॥ ४४ ॥

इमे य बद्धा फंदंति, मम हत्थज्जमागया ।
वयं च सत्ता कामेसु, भविस्सामो जहा इमे ॥ ४५ ॥

हे आर्य ! इमे च प्रत्यक्षाः शब्दरूपरसगन्धस्पर्शादयः पदार्था बद्धा नियन्त्रिताः सुदृढीकृता मम हस्ते पुनस्तव हस्ते आगता अपि फन्दन्ति - स्पन्दन्ति, अस्थितिधर्मतया गत्वरा दृश्यन्ते, सुरक्षिता अपि यान्तीत्यर्थः । एतादृशेषु । च गत्वरेषु कामेष्वज्ञा वयं सक्ताः सञ्जाता-लिप्ता जाताः । तस्मादेतेषु गत्वरेषु कः स्नेहः ? हे स्वामिन्नावां यथेमे पुरोहितादयश्चत्वारो जातास्तथा भविष्यामः ॥ ४५ ॥

सामिसं कुललं दिस्स, बज्झमाणं निरामिसं ।
आमिसं सव्वमुज्झित्ता, विहरिस्सामि निरामिसा ॥ ४६ ॥

हे राजन्नहं सर्वमामिषमभिष्वङ्गहेतुं धनधान्यादिकं 'उज्झित्ता' त्यक्त्वा निरामिषा त्यक्तसङ्गा सत्यप्रतिबद्धविहारतया विहरिष्यामि । किं कृत्वा ? सामिषमामिषसहितं कुललं गृद्धमपरं पक्षिणं वा परैरित्यन्यैर्बध्यमानं पीड्यमानं दृष्ट्वा । सामिषः पक्षी ह्यामिषाहारिपक्षिभिः पीड्यते, अथवा सामिषं सस्पृहं भोजनाद्यर्थे लुब्धं कुललं-पक्षिणं परैर्बध्यमानं

पीड्यमानं दृष्ट्वा । यतो हि पक्षिणो यदा गृह्यन्ते, तदा तान् भक्ष्यं दर्शयित्वा पाशादिना बध्यन्ते आमिषाहारी शकुनिस्तु आमिषदर्शनेनैव लोभयित्वा मीनवद्बध्यते । सह आमिषेण आमिषरसास्वादलोभेन वर्तते इति सामिषस्तं सामिषम् ॥ ४६ ॥

गिद्धोवमे उ नच्चा णं, कामे संसारवड्ढणे ।
उरगो सुवन्नपासे व्व, संकमाणो तणुं चरे ॥ ४७ ॥

हे राजन् ! त्वमपि विषयेभ्यः शङ्कमानः सन् तनुं स्वल्पं यतनया चरेरिति-चरस्व । विषयेभ्यो भीतिः पदे पदे विधेयेत्यर्थः । किं कृत्वा ? गृद्धोपमान् पूर्वोक्तसामिषकुल-लोपमान् विषयलोलुपान् जनान् ज्ञात्वा । तु पुनः कामान् संसारवर्द्धिकान् ज्ञात्वा, विषयलोलुपाः कामैः पीडिताः संसारे भ्रमन्तीति ज्ञात्वा । त्वं क इव शङ्कमानः सन् ? सुपर्णपार्श्वे - गरुडसमीपे, उरग इव-सर्प इव । यथा गरुडपार्श्वे सर्पः शनैः शनैः शङ्कमानः सन् चरति, यथा गरुडो न जानाति तथा अविश्वासी सन् स्वल्पं तनु यथास्यात्तथा चलति, तथा त्वमपि गरुडोपमानां विषयाणां विश्वासं मा कुर्याः । अत्र हि विषयाणां गरुडोपमानं संयमरूपजीवितापहारकत्वात् । नरस्य हि भोगलोलुपत्वादुरगोपमानम्, यत उरगो भोग्येवोच्यते, विषयास्तु दृश्यमानाः सुन्दरा गरुडाकाराः, भोगिनां हि विषयेभ्य एव मृत्युं स्यात्, तस्माद्विषयेभ्यः शङ्कनीयमित्यर्थः ॥ ४७ ॥

नागु व्व बंधणं छित्ता, अप्पणो वसहिं वए ।
एयं पत्थं महारायं, उसुयारि त्ति मे सुयं ॥ ४८ ॥

हे राजन् ! नाग इव हस्तीव बन्धनं छित्वाऽऽत्मनोः वसतिं स्वकीयस्थानं विन्ध्याटवीं याति, तथा त्वमपि बलवत्त्वान्नागो विषयशृङ्खलां छित्वात्मनः स्थानं मुक्तिं व्रजेः, धीरपुरुषा गजतुल्याः विषयाः शृङ्खलातुल्याः, मुक्तिर्विन्ध्याटवीवात्मगजस्य स्थानमुक्तम् । हेइषुकारि-महाराज ! मया साधुमुखादिति पथ्यं हितं श्रुतमस्ति, नाहं स्वबुद्धया ब्रवीमीत्यर्थः ॥ ४८ ॥

चइत्ता विउलं रज्जं, कामभोगे य दुच्चए ।
निव्विसया निरामिसा, निन्नेहा निप्परिग्गहा ॥ ४९ ॥

सम्मं धम्मं वियाणित्ता, चिच्चा कामगुणे वरे ।
तवं पगिज्झऽहक्खायं, घोरं घोरपरक्कमा ॥ ५० ॥

एवं ते कमसो बुद्धा, सव्वे धम्मपरायणा ।
जम्ममच्चुभउव्विग्गा, दुक्खस्संतगवेसिणो ॥ ५१ ॥

तिसृभिः कुलकम् ।

एवममुना प्रकारेण ते सर्वेऽपि क्रमशोऽनुक्रमेण षडपि जीवा बुद्धाः- प्रतिबोधं प्राप्ताः, किं कृत्वा ? विपुलं - विस्तीर्णं राज्यं त्यक्त्वा, च पुनर्दुस्त्यजान् कामभोगांस्त्यक्त्वा। कथंभूतास्ते ? सर्वे निर्विषया विषयाभिलाषरहिताः, पुनः कथंभूताः ? निरामिषाः स्वजनादिसङ्गरहिताः, पुनः कीदृशाः ? निष्परिग्रहा बाह्याभ्यन्तरपरिग्रहरहिताः ॥ ४९ ॥ पुनस्ते जीवाः किं कृत्वा प्रतिबोधं प्राप्ताः ? 'सम्मं' सम्यक् प्रकारेण धर्मं साधुधर्मं विज्ञाय, पुनर्वरान् दुर्लभान् प्रधानान् कामगुणांस्त्यक्त्वा, कामस्य मदनस्य गुणकारित्वात्काम-वृद्धिकरत्वाद्गुणाः कामगुणास्तान् कामगुणान् स्त्रक्चन्दनवनितादीन् कामोद्दीपनौषधा-दींस्त्यक्त्वा । अत्र पुनः कामगुणग्रहणं तेषामतिशयख्यापनार्थम् । पुनः किं कृत्वा ? घोरमधीरपुरुषैर्दुरनुचरं, यथाख्यातं तीर्थकरोद्दिष्टं द्वादशविधं तपः प्रगृह्य - भावतोङ्गीकृत्य । पुनः कथंभूतास्ते सर्वे ? घोरपराक्रमाः, घोरः पराक्रमः धर्मानुष्ठानविधिर्येषां ते घोरपराक्रमाः । पुनः कीदृशास्ते सर्वे ? धर्मपरायणा धर्मध्याने तत्परा इत्यर्थः । पुनः कीदृशास्ते ? जन्ममृत्यु-भयोद्विग्ना जन्ममरणभीतिभीताः । पुनस्ते सर्वे किं कर्तुमिच्छवः ? दुःखस्यान्तं मोक्षं गवेषिणो मोक्षाभिलाषिण इत्यर्थः ॥ ५१ ॥

सासणे विगयमोहाणं, पुव्वि भावण भाविया ।
अचिरेणेव कालेणं, दुक्खस्संतमुवागया ॥ ५२ ॥

पुनस्ते षडपि जीवा अचिरेणैव कालेन स्तोककालेन दुःखस्य संसारस्यान्तमवसान-मर्थान्मोक्षमुपागता-मोक्षं प्राप्ताः । कीदृशास्ते ? विगतमोहानां वीतरागाणां शासने-तीर्थे पूर्वं - पूर्वस्मिन् भवे भावनया - सम्यक्क्रियाभ्यासरूपया द्वादशविधमनःपरिणतिरूपया भाविता रञ्जितात्मानः ॥ ५२ ॥

अथ तेषां सर्वेषां षण्णामपिजीवानां नामान्याह-

राया य सह देवीए, माहणो य पुरोहिओ ।
माहणी दारगा चेव, सव्वे ते परिनिव्वुडे ॥ ५३ ॥ त्तिबेमि ॥

राजा इषुकारी, देव्या पट्टराज्ञ्या कमलया सह, ब्राह्मणो भृगुनामा पुरोहितो राज्ञः पूज्यः, पुनर्ब्राह्मणी पुरोहितस्य पत्नी यशा, च पुनर्दारकौ ब्राह्मणब्राह्मण्योः पुत्रौ, एते सर्वे परिनिर्वृता मोक्षं प्राप्ताः । इत्यहं ब्रवीमि । इति सुधर्मास्वामी जम्बूस्वामिनं प्राह ॥ ५३ ॥

इतीषुकारीयमध्ययनं चतुर्दशं सम्पूर्णम् ॥ १४ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविर-चितायामिषुकारीयस्याध्ययनस्यार्थः सम्पूर्णः ॥ १४ ॥

॥ अथ पञ्चदशं भिक्षुलक्षणाख्यमध्ययनं प्रारभ्यते ॥

चतुर्दशेऽध्ययने निर्निदानस्य गुणः प्रोक्तः, स च निर्निदानगुणो हि मुख्यवृत्त्या भिक्षोरेव भवति, अतो भिक्षोर्लक्षणमाह-

मोणं चरिस्सामि समिच्च धम्मं, सहिए उज्जुकडे नियाणछिन्ने ।
संथवं जहिज्ज अकामकामे, अन्नायएसी परिव्वए स भिक्खू ॥ १ ॥

य एतादृशः सन् परिव्रजेत्, अनियन्तमप्रतिबद्धं यथास्यात्तथा विहरेद्विहारं कुर्यात् स भिक्षुरुच्यते । स इति कः ? पूर्वं मनस्येवं जानाति, अहं मौनम्, मुनीनां कर्म मौनं साधुधर्मं चरिष्यामि, श्रामण्यमङ्गीकरिष्यामि, किं कृत्वा ? धर्मं दशविधं पञ्चमहाव्रतदीक्षां समेत्य-प्राप्य, पुनर्यो दीक्षां गृहीत्वा संस्तवं पूर्वपश्चात्संस्तवं परिचयं कुटुम्बस्नेहं जह्यात्-त्यजेत् । परं कीदृशः सन् ? 'सहिए' इति सहितः स्थविरैर्बहुश्रुतैः साधुभिः सहितः साधुर्ह्येकाकी न तिष्ठेत् ।

'[1]इकस्स कओ धम्मो' [ ] इत्युक्तत्वात् ।

अथवा कथंभूतः सन् ? स्वहितः सन्, स्वस्य हितं यस्य स स्वहित आत्महिताभिलाषी । पुनः कीदृशः ? 'उज्जुकडे' ऋजु-सरलं कृतं मायारहितं तपो येन स ऋजुकृतः, अशठानुष्ठा-नकारीत्यर्थः । पुनः कीदृशः ? 'नियाणछिन्ने' छिन्ननिदानो निदानशल्यरहित इत्यर्थः । पुनः कीदृशः ? 'अकामकामे' न विद्यते कामस्य कामोऽभिलाषो यस्य सोऽकामकामः कामाभिलाषरहितः । पुनः कीदृशः ? 'अन्नाएसी' अज्ञातैषी, यत्र कुले तस्य साधोस्तपोनि-यमादिगुणो न ज्ञातस्तत्रैषयते ग्रासादिकं गृहितुं वाञ्छते इत्येवंशीलोऽज्ञातैषी । य एवंविधः स भिक्षुरित्युच्यते । अनेन सिंहतया निष्क्रम्य सिंहतया विहरणं भिक्षुत्वनिबन्धनं प्रोक्तं साधूनाम् । चतुर्भङ्गी यथा-

"[2]सिंहत्ताए निक्खमंति, सिंहत्ताए विहरंति,
सियालत्ताए निक्खमंति सियालत्ताए विहरंति ।
सिंहत्ताए निक्खमंति, सियालत्ताए विहरंति,
सियालत्ताए निक्खमंति, सिंहत्ताए विहरंति ॥"

एवं चतुर्भङ्गयुक्ता । तत्र सर्वोत्तमा सिंहतया निःक्रमणं सिंहतया च पालनम्, तच्च यथा स्यात्तथा ॥ १ ॥

पुनराह-

राओवरयं चरिज्ज लाढे, विरए वेयवियायरक्खिए ।
पन्ने अभिभूय सव्वदंसी, जे कम्हिवि न मुच्छिए स भिक्खू ॥ २ ॥

---

१ एकस्य कृतो धर्मः ॥ २ सिंहतया निष्क्रमन्ति सिंहतया विहरन्ति, शृगालतया निष्क्रमन्ति शृगालतया विहरन्ति, सिंहतया निष्क्रमन्ति शृगालतया विहरन्ति, शृगालतया निष्क्रमन्ति सिंहतया विहरन्ति ॥

पुनः स भिक्षुरित्युच्यते । स इति कः ? यो रागोपरतं यथा स्यात्तथा राग रहितं यथा स्यात्तथा चरेत् । परं कीदृशः सन् ? विरतोऽसंयममार्गान्निवृत्तः, पुनः कीदृशः सन् ? वेदविदात्मरक्षितः, वेद्यते ज्ञायतेऽर्थोऽनेनेति वेदः सिद्धान्तस्तस्य वेदनम्, विद् ज्ञानं वेदवित् सिद्धान्तज्ञानम्, तेनात्मा रक्षितो दुर्गतिपतनाद्येन स वेदविदात्मरक्षितः । पुनः कीदृशः ? 'पन्ने' प्राज्ञो हेयोपादेयबुद्धिमान्, पुनर्योऽभिभूय - परीषहान् जीत्वा तिष्ठतीत्यध्याहारः । पुनः कीदृशः ? सर्वदर्शी, सर्वं प्राणिगणमात्मवत्पश्यतीति सर्वदर्शी । पुनर्यः कस्मिंश्चित्सचित्ताचित्तवस्तुनि न मूर्च्छितोऽलोलुप इत्यर्थः ॥ २ ॥

अक्कोसवहं विइत्तु धीरे, मुणी चरे लाढे निच्चमायगुत्ते ।
अव्वग्गमणे असंपहिट्ठे, जे कसिणं अहियासए स भिक्खू ॥ ३ ॥

पुनः स भिक्षुरित्युच्यते । स इति कः ? य आक्रोशश्च वधश्चानयोः समाहारआक्रोशवधं वाक्तर्जनताडनं विदित्वा स्वकर्मफलं ज्ञात्वा धीरस्तदाक्रोशवधादिसहनशीलो मुनिर्वाग्गुप्तियुक्तः सन् चरेत्, साधुवर्त्मनि विहरेत् । पुनः कीदृशः सन् ? लाढः साध्वनुष्ठाने तत्परः । पुनः कीदृशः ? नित्यमात्मगुप्तः, गुप्तोऽसंयमस्थानेभ्यो रक्षित आत्मा येन स गुप्तात्मा, प्राकृतत्वाद्विपर्ययः । पुनः कीदृशः ? अव्यग्रमना-अनाकुलचित्तः, पुनः कीदृशः ? असम्प्रहृष्ट-आक्रोशादिषु न प्रहर्षवान्, कश्चित्कदाचित्कस्मैचिद्दुर्वचनैर्निर्भर्त्सयति तदा हर्षितो न भवतीत्यर्थः । पुनर्यः कृत्स्नं समस्तमाक्रोशवधमध्यास्ते-सहते समवृत्तिर्भवति स साधुरित्यर्थः ॥ ३ ॥

पंतं सयणासणं भइत्ता, सीउण्हं विविहं च दंसमसगं ।
अव्वग्गमणे असंपहिट्ठे, जे कसिणं अहियासए स भिक्खू ॥ ४ ॥

पुनर्यः प्रान्तमसारमप्रधानं शयनमासनम्, उपलक्षणात्वाद्भोजनाच्छादनादिकं भजित्वा सेवयित्वा, पुनः शीतोष्णम् च पुनर्विविधं दंशमशकं रुधिरपानकरं जन्तुगणं सकलं प्राप्य अव्यग्रमना भवेत्-स्थिरचित्तो भवेत् । पुनर्यः सम्यक् शयनासनभोजनाच्छादनलाभात्, शीताद्युपद्रवरहितस्थानलाभात्, तथा दंशमशकादिरहितस्थानलाभादसम्प्रहृष्टो भवति हर्षितो न भवति, समदुःखसुखो भवति, एतादृशः सन्नेतत् सर्वमध्यास्ते स भिक्षुरित्युच्यते ॥ ४ ॥

नो सक्कियमिच्छई न पूयं, नो वि य वंदणगं कओ पसंसं ।
से संजए सुव्वए तवस्सी, सहिए आयगवेसए स भिक्खू ॥ ५ ॥

स भिक्षुर्भवेत् । स इति कः ? यः सत्कृतं सत्कारमात्मनः सन्मुखं जनानामागमनमभ्युत्थानादिकम्, विहारं कुर्वतोऽनुगमनेन सम्प्रेषणम्, इत्यादिकं नो इच्छति । पुनर्यः पूजां वस्त्रपात्राहारादिभिरर्चां नेच्छति । अपि च पुनर्वन्दनकं द्वादशावर्त्तपूर्वकं नमनम्, तदपि न वाञ्छति । कुतश्चित्पुरुषात्प्रशंसामपि नो इच्छति । स संयतः, सम्यग् यतते साध्वनुष्ठाने यत्नं कुरुते इति संयतः । पुनः कीदृशः ? सुव्रतः शोभनव्रतधारकः । पुनर्यः

सहितः सर्वजीवेषु हितान्वेषी, अथवा ज्ञानदर्शनाभ्यां सहितः । पुनर्य आत्मानं कर्ममलापहारेण शुद्धं गवेषयतीत्यात्मगवेषकः, पुनर्यस्तपस्वी ॥ ५ ॥

[1]जे पुण जहाइ जीवियं, मोहं वा कसिणं निअच्छइ ।
नरनारिं पजहे सया तवस्सी, न य कोऊहलं उवसेवई[2] स भिक्खू ॥ ६ ॥

यः पुनस्तं हेतुं जहाति । तं कं ? येन हेतुना येन कृतेन जीवितं संयमजीवितव्यं जहाति । पुनर्येन कृत्वा मोहं वा मोहनीयकर्म कषायनोकषायरूपं कृत्स्नं सम्पूर्णं नियच्छति-बध्नाति । तादृशं नरं नारीं - स्त्रीं सदा - सर्वदा प्रजह्यात् । कोऽर्थः ? येन पुरुषस्त्र्यादिना कृत्वा संयमं याति, येन कृत्वा मोहकर्मोदयः स्यात्, तं प्रति यस्त्यजेत् स भिक्षुरित्यर्थः । पुनर्यस्तपस्वी तपोनिरतः पुनर्यः कौतूहलं स्त्र्यादिविषयम्, अथवा नाटकेन्द्रजालादिकौतुकं न चोपसेवते, स भिक्षुरित्युच्यते ॥ ६ ॥

छिन्नं सरं भोममंतरिक्खं, सुमिणं लक्खणदंडवत्थुविज्जं ।
अंगवियारं सरस्स विजयं, जो विज्जाहिं न जीवई स भिक्खू ॥ ७ ॥

पुनः स भिक्षुरित्युच्यते । स कः ? य इत्यादिभिर्विद्याभिर्न जीवत्याजीविकां न करोति । ताः का विद्याः ? छिद्यते इति छिन्नम्, वस्त्रादीनां मूषकादिना दर्शनम्, अग्न्यादि-प्रज्वलनम्, कज्जलकर्दमादिना लिम्पनं स्पटनमित्यादिशुभाशुभविचारसूचिका विद्या छिन्नमित्युच्यते । यदा हि वस्त्रे नूतने किञ्चिद्विकारे सति विचारः क्रियते, यदुक्तं रत्नमालायां-

निवसंत्यमरा हि वस्त्रकोणे, मनुजाः पार्श्वदशान्तमध्ययोश्च ।
अपरेऽपि च रक्षसां त्रयोशाः, शयने चासनपादुकासु चैवं ॥ १ ॥
कज्जलकर्दमगोमयलिप्ते, वाससि दग्धवति स्फुटिते वा ।
चिन्त्यमिदं नवधा विहितेऽस्मि-न्निष्टमनिष्टफलं च सुधीभिः ॥ २ ॥
भोगप्राप्तिर्देवतांशे नरांशे, पुत्राप्तिः स्याद्राक्षसांशे च मृत्युः ।
प्रान्ते सर्वांशेऽप्यनिष्टं फलं स्यात्, प्रोक्तं वस्त्रे नूतने साध्वसाधु ॥ ३ ॥

वस्त्रपरिधानशुभाशुभफलसूचकयंत्रं ।

देवः	रक्षः	देवः
मनुजः	रक्षः	मनुजः
देवः	रक्षः	देवः

इत्यादिविद्यया जीविकां न कुर्यात्स साधुः । पुनर्यः 'सरं' इति स्वरविद्यां न प्रयुङ्क्ते, स्वरं हि-

षड्जऋषभगान्धार-मध्यमः पञ्चम-स्तथा ।
धैवतो निषधः सप्त, तन्त्रीकण्ठोद्भवाः स्वराः ॥ १ ॥

"षड्जं रौति मयूरो, पञ्चमरागेण जल्पते परभृत् ।" इत्यादि-विद्या इत्यादिसंगीतशास्त्रम् पुनर्भौमम्, भूमौ भवं भौमं भूकम्पादि । ऋतुं

१ जेण-इति अन्यसंस्करेण ॥ २ उवेइ-इति अन्यसंस्करणे-तत्र उपैति व्याख्या कृता ॥

विना वृक्षादिफलनमित्यादिलक्षणा विद्या । पुनरान्तरिक्षम् अन्तरिक्षे आकाशे भवमान्तरिक्षमुल्कापातधूमकेतुप्रमुखाणामुदयविचार-विद्या । स्वप्नं स्वप्नगतं शुभाशुभलक्षणं स्वप्नविद्या । लक्षणं स्त्रीपुरुषाणां सामुद्रिकशास्त्रोक्तम्, तुरङ्गगजादीनां शालिहोत्रगजपरीक्षादिशास्त्रोक्तम् । दण्डं दण्डविद्या, वंशदण्डादिपर्वसङ्ख्याफलकथनम् । वास्तुविद्या प्रासादानां गृहाणां विचारकथनं वास्तुशास्त्रोक्तम् । अङ्गविद्या शरीरस्पर्शनस्य नेत्रादीनां स्फुरणस्य वा विचारोऽङ्गविचारशास्त्रम् । पुनः स्वरस्य विजयो दुर्गाश्रृगालीवायसतित्तरादीनां स्वरस्य विजयस्तस्य स्वरस्य शुभाशुभनिरूपणाभ्यासः । य एताभिर्विद्याभिराजीविकां न करोति स भिक्षुरित्यर्थः ॥ ७ ॥

मंतं मूलं विविहं विज्जचिंतं, वमणविरेयणधूमणेत्तसिणाणं ।
आउरे सरणं तिगच्छियं च, तं परिन्नाय परिव्वए स भिक्खू ॥ ८ ॥

पुनः स भिक्षुरित्युच्यते । स इति कः ? य एतत् सर्वं परिज्ञाय, परि-समन्ताद् ज्ञात्वा परिज्ञाय परिव्रजेत् साधुमार्गे चरेत्, 'जाणियव्वा नो समायरियव्वा' इत्युक्तेः । एतत् किं किं मन्त्रं ॐ ह्रीं प्रभृतिकं स्वाहान्तं देवाराधनम् । मूलं मूलिका राजहंसीशङ्खपुष्पीशरपुङ्खादिगुणसूचकं शास्त्रम् । पुनर्विविधं नानाप्रकारं वैद्यचिन्तं वैद्यकशास्त्रस्यौषधचिकित्सालक्षणस्य चिन्तनं वर्जयेत् । विदलं शूली कुष्ठी मांसं ज्वरी घृतमित्यादि । पुनर्वमनं वमनादिकरणोपायम्, अथवा वमनफलम्, ज्वरादौ वमनं श्रेष्ठम्, तथा विरेचनं विरेचगुणकथनं तदौषधप्रयोगचिन्तनम्, धूमो मनःशिलादिसम्बन्धी भूतवासनादिकः, नेत्रशब्देन नेत्रसंस्कारकं गुटीचूर्णादिकम्, स्नानमपत्यार्थं मन्त्रौषधीभिः संस्कृतजलैर्मूलादिस्नानम्, अथवा रोगमुक्तस्नानं वा । पुनरातुरे इति आतुरस्य रोगादिपीडितस्य हा मातरित्यादिस्मरणम्, आत्मनश्चिकित्सितं रोगप्रतीकारचिन्तनं परित्यजेत् । एतत्सर्वं परिज्ञायात्मनः परस्य वोभयथा परिव्रजेत्, साधुमार्गं यायादित्यर्थः ॥ ८ ॥

खत्तियगणउग्गरायपुत्ता, माहणभोइय विविहा य सिप्पिणो ।
नो तेसिं वयइ सिलोगपूयं, तं परिन्नाय परिव्वए स भिक्खू ॥ ९ ॥

भिक्षुरित्युच्यते । स इति कः ? यस्तेषां गाथोक्तानां श्लोकः कीर्तिर्यथा, एते भव्याः पूज्या इति, एते पूजायोग्याः, एतेषां पूजा कर्तव्या, एतेषां कीर्तिकरणे, एतेषां पूजाया उपदेशे च न कश्चिल्लाभः स्यात् साधुनैतेषां कीर्तिपूजे न कर्तव्ये इत्यर्थः । एते के के ? ये क्षत्रिया राजानः, तथा गणा मल्लादीनां समूहाः, पुनरुग्राः कोट्टपालाः, राजपुत्रा राजकुमाराः, ब्राह्मणाः प्रसिद्धाः, भोगिनो भोगवंशोद्भवाः, अथवा भोगिनो विषयभोक्तारः, च पुनर्विविधा-नानाप्रकाराः शिल्पिनश्चित्रकार-सूत्रधार-स्वर्णकार-लोहकारादयो ये वर्तन्ते, तान् परिज्ञायोभयथा ज्ञात्वा साधुः साधुमार्गे परिव्रजेत् ॥ ९ ॥

गिहिणो जे परिव्वइएण[1] दिट्ठा, अप्पव्वईएण च[2] संथुया हविज्जा ।
तेसिं इहलोइयफलट्ठा, जो संथवं न करेइ स भिक्खू ॥ १० ॥

यस्तैर्गृहस्थैः सह इहलोकफलार्थं संस्तवं-परिचयं न करोति, प्राकृतत्वात् 'तेसि' मिति तृतीयास्थाने षष्ठी । तैर्गृहस्थैः कैः ? ये गृहस्थाः परिव्रजितेन गृहीतदीक्षेण दृष्टाः, चशब्दः पुनरर्थे, पुनरप्रव्रजितेनाऽगृहितदीक्षेण गृहस्थाश्रमस्थितेन संस्तुताः कृतपरिचयाः, तैः सहालापसंलापमिहलोकस्वार्थाय न कुर्यात्, स साधुरित्यर्थः ॥ १० ॥

[3]जं किंचि आहारपाणगं, विविहं खाइमसाइमं परेसिं लद्धुं ।
जो तं तिविहेण नाणुकंपे, मणवयकायसुसंवुडे न स भिक्खू ॥ ११ ॥

स भिक्षुर्न भवति, स कः ? यः 'परेसिं' इति परेभ्यो गृहस्थेभ्य आहारमन्नादिकम्, पानकं दुग्धादिकम्, पुनर्विविधं नानाप्रकारं खादिमं खर्जुरादिकम् स्वादिमं लवङ्गादिकं लब्ध्वा, तमिति तेनाशनपान-खादिम-स्वादिमादिना चतुर्विधेन, त्रिविधेन मनोवाक्काय-योगेन नानुकम्पते, ग्लानबालादीन्नोपकुरुते । कोऽर्थः ? योऽशनपानखादिमस्वादिमाहारं लब्ध्वा बालवृद्धानां साधूनां तेनाहारेण संविभागं न करोति स साधुर्न भवतीत्यर्थः । 'असंविभागी न हु तस्स मोक्खं' इत्युक्तेः । पुनः साधुः कीदृग्भवति ? मनोवाक्काययोगेन सुतरां संवृतः पिहिताश्रवद्वारः ॥ ११ ॥

सयणासणपाणभोयणं, विविहं खाइमसाइमं परेसिं ।
अदए पडिसेहिए नियंठे, जे तत्थ न पउस्सई स भिक्खू ॥ १२ ॥

पुनर्यः शयनासनपानभोजनम्, पुनर्विविधं खादिम-स्वादिमम्, परेण गृहस्थेनादत्ते, अथवा गृहे साधौ प्रतिषिद्धे सति तस्मिन् गृहस्थे प्रद्वेषं न करोति - न प्रद्वेष्टि । कोऽर्थः ? यदा कश्चित्साधुः कस्यचिद् गृहस्थस्य गृहे गतस्तस्य च गृहस्थस्य गृहे प्रभूतं शयनं-शय्या, चाशनं-मोदकादिकम्, पानं खर्जूरद्राक्षादिपानीयम्, शर्करादिजलम्, प्रासुकं-तन्दुलप्रक्षा-लनजलं वा, भोजनं-तन्दुलदाल्यादि, पुनर्विविधं-नानाप्रकारम् खादिमं-खर्जूर-नालिकेर-गरिकादिकम्, स्वादिमं-लवङ्गैला-जातिफल-तजादिकं वर्तते, परं स गृहस्थः साधवे न प्रददाति अथवा पुनर्निवारयति, रे भिक्षो ! अत्र नागन्तव्यमिति तद्वाक्यं श्रुत्वेति न जानाति-धिगेनं गृहस्थं दुष्टम्, यः प्रभूते वस्तुनि सति मह्यं न ददाति, अथ च मां निवारयतीति द्वेषं न विधत्ते, स साधुर्भिक्षुरित्युच्यते ॥ १२ ॥

---

१ पव्वइएण-इति अन्यसंस्करणे-तत्र तस्य व्याख्याऽपि प्रव्रजितेन इति कृता ॥
२ व शब्दः अन्यसंस्करणे ॥
३ अन्यसंस्करणे इयं गाथा द्वादशतमायां सङ्ख्यायां विद्यते, द्वादशतमा च एकादशतमायां विद्यते ॥

आयामगं चेव जवोदणं च, सीयं च सोवीरजवोदगं च ।
नो हीलए पिंडं नीरसं तु, पंतं कुलाइं परिव्वए स भिक्खु ॥ १३ ॥

यः प्रान्तानि कुलानि परिव्रजेत्, प्रान्तानि दुर्बलानि, चित्तवित्ताभ्यां दुर्बलानि, एतादृशानि, कुलान्याहारार्थं परिव्रजेत्, सर्वदा धनिनामेव कुलेषु यो न याति, सर्वदा दानशोण्डानामेव कुलेषु न याति, ततो हि नियतपिण्डसेवनात्साधोर्धर्महानिः स्यात् । तु पुनर्य आयामकं-धान्यस्याऽवश्रावणं, च पुनर्यवोदनं यवभक्तम्, पुनः शीतं-चिरकालीनम्, पुनः सौवीरं-काञ्जिकम्, पुनर्यवोदकं यवप्रक्षालनजलमित्यादिकम्, पुनर्यन्नीरसं पिण्डं सर्वथा रसवर्जितमेतादृशमाहारं पानीयं गृहस्थानां गृहाल्लब्धं यो न हीलयेन्न निन्देत्, कदन्नमिदम्, कुत्सितं पानीयमेतदित्यादिवचनं न ब्रूते, स साधुर्भिक्षुरित्युच्यते ॥ १३ ॥

सद्दा विविहा भवंति लोए, दिव्वा माणुस्सगा तहा तिरिच्छा ।
भीमा भयभेरवा उराला, जे सुच्चा न विहिज्जइ स भिक्खू ॥ १४ ॥

य एतादृशान् शब्दान् श्रुत्वा न 'विहज्जइ' न व्यथते, धर्मध्यानान्न चलते स भिक्षुरुच्यते । एतादृशान् कीदृशान् ? ये शब्दा लोके दिव्याः, दिवि भवा दिव्याः, देवैर्भयाय कृताः, पुनर्ये शब्दा मानुष्यका मनुष्यैः कृता मानुष्यकाः, तथा ये शब्दास्तिरश्चीनास्तैरश्चास्तिर्यग्भ्यो भवास्तिरश्चीना भवन्ति, तान् श्रुत्वा न क्षोभं प्राप्नोति । कीदृशाः शब्दाः ? भयभैरवाः, भयेन भैरवा भयभैरवाः, अत्यन्तसाध्वसोत्पादकाः, पुनः कीदृशाः ? उदारा महान्तो भवन्ति ॥ १४ ॥

वायं विविहं समिच्च लोए, सहिए खेयाणुगए य कोवियप्पा ।
पन्ने अभिभूय सव्वदंसी, उवसंते अविहेडए स भिक्खू ॥ १५ ॥

यः पुनर्लोके विविधं वादं समेत्य अविहठको भवेत्, [1]कस्यचित्पक्षपातं न कुर्यात् । लोके हि बहूनि दर्शनानि सन्ति, ते परस्परं वादं कुर्वन्ति, अन्योन्यं मतं दुषयन्ति, मुण्डा जटाधारिभिः, नग्ना वस्त्रधारिभिः, गृहस्था वनवासिभिः, इत्यादिस्वस्वमताभिप्रायवचनरूपं वादं कृत्वा कस्यापि बाधां न कुर्यादित्यर्थः । कीदृशो यः ? सहितो ज्ञानदर्शनचारित्रसहितः, पुनः कीदृशः ? खेदानुगतः, खेदयति मन्दीकरोति कर्मानेनेति खेदः-संयमः, तेनानुगतः खेदानुगतः सप्तदशविधसंयमरतः । पुनः कीदृशः ? कोविदात्मा, कोविदो-लब्धशास्त्रपरमार्थ आत्मा यस्येति कोविदात्मा । पुनः कीदृशः ? प्राज्ञः प्रकर्षेणान्येभ्य आधिक्येन जानातीति प्राज्ञः सारबुद्धिमान् । पुनः कीदृशः ? अभिभूय सर्वदर्शी, अभिभूय परीषहान् जित्वा रागद्वेषौ निवार्य सर्वजन्तुगणमात्मसदृशं पश्यतीत्येवंशीलः सर्वदर्शी । पुनः कीदृशः ? उपशान्तः कषायरहितः स्यात्, स भिक्षुरित्युच्यते ॥ १५ ॥

---

१ कस्यचिद् बाधको न भवेत्, कस्यचित्पं-मु. ॥

असिप्पजीवी अगिहे अमित्ते, जिइंदिए सव्वओ विप्पमुक्के ।
अणुक्कसाई लहुअप्पभक्खी, चिच्चा गिहं एगचरे स भिक्खु ॥ १६ ॥ त्तिबेमि ॥

स भिक्षुर्भवेत् । स इति कः ? यो गृहं द्रव्यभावभेदेन द्विविधं त्यक्त्वैक एकाकी रागद्वेषरहितोऽसहायो वा चरतीत्येकचरः स्यात् । कथंभूतः सः ? अशिल्पजीवी शिल्पेन-विज्ञानेन जीवते आजीविकां करोतीति शिल्पजीवी, न शिल्पजीवी अशिल्पजीवी, चित्र-करणादिविज्ञानेनाजीविकां न करोतीत्यर्थः । पुनः कीदृशः ? अगृहो, न विद्यते गृहं यस्य सोऽगृहः स्त्रीपरिचयरहितः, अथवा गृहस्थैः सह परिचयरहितः । पुनः कीदृशः ? अमित्रः शत्रुमित्ररहितः । पुनः कीदृशः ? जितेन्द्रियः । पुनः कीदृशः ? सर्वतो विप्रमुक्तो बाह्या-ऽभ्यन्तरसंयोगाद्विप्रमुक्तः सर्वपरिग्रहरहितः । पुनः कीदृशः ? अणुकषायो मन्दकषायीत्यर्थः । पुनः कीदृशः ? लघ्वल्पभक्षी, लघूनि निःसाराणि वल्लचणकनिष्पावककुलत्थामाषादिप्रा-सुकाहाराणि, तानि स्तोकानि भक्षितुं शीलं यस्य स लघ्वल्पभक्षी नीरसस्तोकाहारका-रीत्यर्थः । अथवा लघु-प्रासुकं च तदल्पं च लघ्वल्पं तदाहारं भक्षितुं शीलं यस्य स लघ्वल्पभक्षी, अथवा लघुः क्षीणकर्मा स चासावल्पभक्षी च लघ्वल्पभक्षी, इत्यहं ब्रवीमीति सुधर्मास्वामी जम्बूस्वामिनं प्राह ॥ १६ ॥

इति भिक्षुलक्षणाख्यमध्ययनं पञ्चदशं सम्पूर्णम् ॥ १५ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविर-चितायां भिक्षुलक्षणाख्यमध्ययनं पञ्चदशं सम्पूर्णम् ॥ ५५ ॥

।। अथ षोडशं ब्रह्मचर्यसमाधिस्थानाख्यमध्ययनं प्रारभ्यते ।।

पञ्चदशेऽध्ययने हि भिक्षुगुणा उक्ताः । ते भिक्षुगुणा हि ब्रह्मचर्ययुक्तस्य साधोर्भवन्ति । अतः षोडशेऽध्ययने ब्रह्मचर्यस्य समाधिस्थानान्युच्यन्ते-

सुयं मे आउसं तेणं भगवया एवमक्खायं इह खलु थेरेहिं भगवंतेहिं दस बंभचेरसमाहिठाणा पन्नत्ता, जे भिक्खू सुच्चा निसम्म संजमबहुले संवरबहुले समाहिबहुले गुत्ते गुत्तिंदिए गुत्तबंभयारी सया अप्पमत्ते विहरिज्जा ।।

श्रीसुधर्मास्वामी स्वशिष्यं जम्बूस्वामिनं प्राह-हे आयुष्मन् ! मे मया श्रुतम्, 'तेणं' इति तेन भगवता ज्ञानवता तीर्थकरेणाख्यातम्, श्रीमहावीरेण स्वामिनोक्तम्, आसन्नत्वात्तस्यैव ग्रहणम् । पुनरिह श्रीजिनशासने स्थविरैर्गणधरैर्भगवद्भिर्माहात्म्यवद्भिस्तीर्थकरोक्तार्थधारणशक्तिमद्भिर्दशब्रह्मचर्यसमाधिस्थानान्युक्तानि, ब्रह्मचर्यस्थैर्यस्य कारणान्युक्तानि । कोऽर्थः ? ममैवैषा बुद्धिर्नास्ति, किन्तु तीर्थकरैः पुनर्गणधरैर्गौतमादिभिः स्वापेक्षया वृद्धैरेवमुक्तम्, तथैव मयोच्यते । यानि ब्रह्मचर्यसमाधिस्थानानि भिक्षुः श्रुत्वा शब्दतः श्रवणे धृत्वा, निशम्यार्थतो मनस्यवधार्य संयमबहुलः सन्, बहुलः प्रधानप्रधानतरस्थानप्राप्त्योत्तमः संयमो यस्य स बहुलसंयमो वर्धमानपरिणामचारित्रः सन् विहरेत् । पुनर्यानि ब्रह्मचर्यसमाधिस्थानानि श्रुत्वा संवरबहुलः, संवर आस्रवनिरोधः, स बहुलो यस्य स संवरबहुलः, प्रधानास्रवद्वारनिरोधः, पुनः समाधिबहुलो बहुलसमाधिः प्रधानचित्तस्वास्थ्ययुक्तः सन् विहरेत् । पुनर्यानि ब्रह्मचर्यसमाधिस्थानानि श्रुत्वा भिक्षुर्गुप्तो मनोवाक्कायगुप्तियुक्तः सन्, अत एव गुप्तं नवगुप्तिसेवनाद् गुप्तं सुरक्षितं ब्रह्मचर्यं चरितुं-सेवितुं शीलं यस्य स गुप्तब्रह्मचारी स्थिरब्रह्मचर्यधारकः सन् सदा सर्वदाऽप्रमत्तोऽप्रमादी सन् विहारं कुर्यात् । यतो हि पूर्वं यः साधुर्ब्रह्मचर्यसमाधिस्थानानि श्रृणोति स साधुर्ब्रह्मचर्यपालने स्थिरो भवति । यदुक्तम्-

"सुच्चा जाणइ कल्लाणं, सुच्चा जाणइ पावगं ।
उभयंपि जाणइ सोच्चा, जं सेयं तं समायरे ॥ १ ॥" [दशवैकालिक-४-११]

इति श्रुत्वा जम्बूः प्राह-

कयरे खलु ते थेरेहिं भगवंतेहिं दस बंभेचेरसमाहिठाणा पन्नत्ता ? जे भिक्खू सुच्चा निसम्म संयमबहुले संवरबहुले समाहिबहुले गुत्ते गुत्तिंदिए गुत्तबंभयारी सया अप्पमत्ते विहरेज्जा ।।

हे स्वामिन् ! यानि ब्रह्मचर्यसमाधिस्थानानि भिक्षुः- साधुः शब्दतः श्रुत्वा, अर्थतो हृद्यवधार्य संयमबहुलः संवरबहुलः समाधिबहुलो गुप्तो गुप्तेन्द्रियो गुप्तब्रह्मचारी सदाऽप्रमादी विहरेत् । तानि खलु निश्चयेन कतराणि - कानि तैः स्थविरैर्भगवद्भिर्दश ब्रह्मचर्यसमाधि-

स्थानानि प्रतिपादितानि ? यानि भिक्षुः श्रुत्वा - निशम्य संयमबहुलः संवरबहुलो गुप्तो गुप्तेन्द्रियो गुप्तब्रह्मचारी सदाऽप्रमत्तः सन् विहरेत् ।

इति जम्बूस्वामिनः प्रश्नवाक्यं श्रुत्वा सुधर्मास्वामी प्राह-

इमे खलु ते थेरेहिं भगवंतेहिं दस बंभचेरसमाहिठाणा पन्नत्ता, जे भिक्खू सुच्चा निसम्म संयमबहुले संवरबहुले समाहिबहुले गुत्ते गुत्तिंदिए गुत्तबंभयारी सया अप्पमत्ते विहरिज्जा ॥

हे जम्बू ! इमानि प्रत्यक्षं वक्ष्यमाणानि खलु निश्चयेन तानि स्थविरैर्भगवद्भिर्दश - ब्रह्मचर्यसमाधिस्थानानि प्रज्ञप्तानि, यानि दश ब्रह्मचर्यसमाधिस्थानानि शब्दतः श्रुत्वा, निशम्यार्थतो हृद्यवधार्य भिक्षुः-साधुः संयमबहुलः समाधिबहुलो गुप्तो गुप्तेन्द्रियो गुप्त-ब्रह्मचारी सर्वदाऽप्रमत्तोऽप्रतिबद्धविहारी सन् विहरेत् ।

तानि समाधिस्थानानि निरूपयति-

तं जहा-विवित्ताइं सयणासणाइं सेविज्जा से निग्गंथे, नो इत्थीपसु-पंडगसंसत्ताइं सयणासणाइं सेवित्ता हवइ से निग्गंथे ॥

तद्यथा-तानि यथा सन्ति तथा निरूपयामि । हे जम्बू ! स निर्ग्रन्थो भवेत्, स इति कः ? यो विविक्तानि स्त्रीपशुपण्डगादिभिर्विरहितानि शयनानि पट्टिकासंस्तारकादीनि, अर्थात् शयनादीनां स्थानानि सेवेत कायेनानुभवेत् अयमन्वयार्थः । यः स्त्रीपशुपण्डकादिरहितस्थानानि सेवेत स निर्ग्रन्थो भवेदित्यर्थः । अथ व्यतिरेकेणार्थमाह-यस्मिन् सति यद्भवेत् सोऽन्वयः, यस्मिन्नसति यन्न भवेत् स व्यतिरेकः । व्यतिरेकं दर्शयति-'नो इत्थी-पसुपंडगसंसत्ताइं सयणासणाइं सेवित्ता हवइ, से निग्गंथे' हे जम्बू ! स निर्ग्रन्थो नो भवेत्, स कः ? यः स्त्रीपशुपण्डकादिसंसक्तानां - स्त्रीपशुपण्डकादिभिः सेवितानां शयनास-नानां सेवितोपभोक्ता भवेत् ।

इति वचनं श्रुत्वा शिष्यः प्राह-

तं कहमिति चेत् आयरियाह-

हे स्वामिन् ! तत्पूर्वोक्तं कथं ? केनोत्पत्तिप्रकारेण ? इति चेदेवं यदि मन्यसे ।

इति शिष्येण पृष्टव्ये सत्याचार्य आह-

निग्गंथस्स खलु इत्थी पसुपंडगसंसत्ताइं सयणासणाइं सेवमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा, भेयं वा लभेज्जा, उम्भायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ धम्माओ भंसेज्जा, तम्हा नो इत्थिपसुपंडग-संसत्ताइं सयणासणाइं सेवित्ता हवइ से निग्गंथे ॥

हे शिष्य ! खलु निश्चयेन स्त्रीपशुपण्डकादिभिः संसक्तानि शयनासनानि सेवमानस्य निर्ग्रन्थस्य ब्रह्मचर्यधारिणोऽपि साधोर्ब्रह्मचर्ये शङ्कोत्पद्यते । इमां स्त्रीं सेवे वा न सेवे वा, अथवाऽन्येषामपि स्त्रीपशुपण्डकादिसहिते स्थाने स्थितं ब्रह्मचारिणं साधुं दृष्ट्वा शङ्का उत्पद्यते । किमयमेतादृशो विरुद्धानां शयनासनानां सेवी ब्रह्मचारी भवेत् न वा ? आत्मनस्तु स्त्र्यादिभिरत्यन्तापहृतचित्ततया मिथ्यात्वोदयादेव स्त्रीसेवने मैथुने नवलक्षसूक्ष्मजीवानां वधो जिनैः प्रोक्तः तत्सत्यं वा मिथ्या वेत्यादिरूपः संशय उत्पद्यते । पुनर्ब्रह्मचारिणः काङ्क्षा स्त्रीपशुपण्डकादिभिर्मैथुनेच्छोत्पद्यते । पुनर्ब्रह्मचारिणः साधोर्ब्रह्मचर्ये विचिकित्सोत्पद्यते । मया ब्रह्मचर्यपालने एतावन्महत्कष्टं विधीयते, तस्य ब्रह्मचर्यकष्टस्य फलं भविष्यति न वा ? तस्माद्वरमेतेषां सेवनम्, एतेषां सेवने साम्प्रतं मम सुखं जायते, एतादृशी मतिः समुत्पद्यते । वाऽथवा भेदं चारित्रस्य विदारणं-विनाशं लभेत, वाऽथवोन्मादं कामेन पारवश्यं प्राप्नुयात् । वाथवा तादृशस्त्र्यादिसहितानि स्थानानि सेवमानस्य साधोर्दीर्घकालिकं प्रचुरकालभावि स्त्र्यादिसेवनाभिलाषोत्कर्षत आहारादावरुचिर्निद्राहित्यादिदोषै रोगो-दाहज्वरादिः, आतङ्कः-शीघ्रघाती शूलादिः, रोगश्चातङ्कश्चानयोः समाहारो रोगातङ्कं शरीरे भवेत् । यतो हि कामाधिक्यात् कामिनां शरीरे दश कामभावा जायन्ते । यदुक्तं-

"प्रथमे जायते चिंता, द्वितीये द्रष्टुमिच्छति ।
तृतीये दीर्घनिःश्वासा-श्चतुर्थे ज्वरमादिशेत् ॥ १ ॥

पंचमे दह्यते गात्रं, षष्ठे भक्तं न रोचते ।
सप्तमे च भवेत्कम्प-मुन्मादश्चाष्टमे तथा ॥ २ ॥

नवमे प्राणसंदेहो, दशमे जीवितं त्यजेत् ।
कामिनां मदनोद्वेगा-दृश संजायते ह्यमी ॥ ३ ॥"

इति स्त्रीदर्शनादृश भावा उत्पद्यन्ते । अथ पुनः केवलिप्रज्ञप्तात्केवलिप्रणीताद्धर्मात् श्रुतचारित्ररूपाद् भ्रस्येद् धर्माद्भ्रष्टो भवेत् । तस्मादेतेषां दूषणानां प्रादुर्भावात् खलु निश्चयेन स्त्रीपशुपण्डकससक्तानां शयनासनस्थानानां सेवितोपभोक्ता भिक्षुर्नो भवेत्, स निर्ग्रन्थो नो भवेत् । इति प्रथमं ब्रह्मचर्यसमाधिस्थानम् । एषा प्रथमा ब्रह्मचर्यतरोर्वाटिका ।

नो इत्थीणं कहं कहेत्ता हवइ से निग्गंथे तं कहमिति चेत् आयरिय आह-निग्गंथस्स खलु इत्थीणं कहं कहेमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा, भेयं वा लभेज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ धम्माओ भंसेज्जा, तम्हा खलु निग्गंथे नो इत्थीणं कहं कहेज्जा ॥ २ ॥

स निर्ग्रन्थो भवति, स इति कः ? यः स्त्रीणामर्थादेकाकिनीनां स्त्रीणामेव कथां वाक्यप्रबन्धरूपां वार्त्ताम्, अथवा स्त्रीणां जातिकुलनेपथ्यविषयाम्, पद्मिनी, चित्रिणी, हस्तिनी, शङ्खिनी, मुग्धा, मध्या, प्रौढादिरूपां कार्णाटकलाटसिंहलदेशोद्भवानां नारीणां वर्णनरूपां कथां प्रति कथयिता न भवति स साधुर्भवतीत्यर्थः । स्त्रीणामग्रे कथाम्, अथवा स्त्रीणामेव वर्णनं करोति स साधुर्न स्यादिति भावः । इत्युक्तः शिष्यः प्राह-तत्कथमिति चेदेवं यदि मन्यसे, आचार्य आह-हे शिष्य ! खलु निश्चयेन निर्ग्रन्थस्य साधोः स्त्रीणां कथां कथमानस्य ब्रह्मचारिणोऽपि ब्रह्मचर्ये शङ्का, एनां सेवामि, न सेवामि इत्यादिरूपा, अथवा आकाङ्क्षा, अग्रेतनानां पदानां पूर्ववदेव अर्थो ज्ञेयः । नवरं 'तम्हा' इति तस्माच्छङ्-कादिदोषप्रादुर्भावात्खलु निश्चयेन निर्ग्रन्थः स्त्रीणामेवाग्रे, स्त्रीणामेव केवलां कथां न कथयेत् ॥ २ ॥ इति द्वितीयं ब्रह्मचर्यसमाधिस्थानम् । एषा द्वितीया वाटिका ॥ २ ॥

अथ तृतीयामाह-

नो निग्गंथे इत्थीहिं सद्धिं संनिसिज्जागए विहरत्ता हवइ से निग्गंथे । तं कहमिति चेत् आयरिय आह-निग्गंथस्स खलु इत्थीहिं सद्धिं सन्निसिज्जागयस्स विहरमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा भेयं वा लभिज्जा उम्मायं वा पाउणिज्जा दीहकालियं वा रोगायंकं हविज्जा केवलिपन्नताओ वा धम्माओ भंसिज्जा । तम्हा खलु नो निग्गंथे इत्थीहिं सद्धिं सन्निसिज्जागए विहरेज्जा ॥ ३ ॥

स निर्ग्रन्थो भवेत्, यः स्त्रीभिः सार्धं निषद्या, निषीदन्त्यस्यामिति निषद्या, पट्टिका-पीठफलकचतुष्काद्यासनम्, तां निषद्यां गतः स्थितः सन् विहर्त्ता अवस्थाता न भवेत् । कोऽर्थः ? यः स्त्रीभिः सहैकस्मिन्नासने नोपविशेत् स निर्ग्रन्थो भवेत् । अत्रायं सम्प्रदायः-यत्रासने पुरा स्त्री उपविष्टा भवति, तत आसनात् स्त्रियामुत्थितायां सत्यां मुहूर्तादनन्तरं तदासनं साधोरुपविशनयोग्यं भवति । 'तं कहमिति चेत् आयरिय आह' अनयोः पदयोरर्थः पूर्ववत् । 'निग्गंथस्स खलु इत्थीहिं० ' निर्ग्रन्थस्य खलु स्त्रीभिः सार्धं निषद्यां गतस्य-प्राप्तस्य विहरमाणस्य तत्र स्थितस्य ब्रह्मचारिणो ब्रह्मचर्ये शङ्कादयो दोषा उत्पद्यन्ते । तस्मात्कारणात्खलु निश्चयेन निर्ग्रन्थः स्त्रीभिः सहैकत्रासने गतः-प्राप्तः सन्नो विहरेन्नोपविशेत् ॥ ३ ॥ इति तृतीयं ब्रह्मचर्यसमाधिस्थानम्, एषा तृतीया वाटिका ॥ ३ ॥

नो निग्गंथे इत्थीणं इंदियाइं मणोहराइं मणोरमाइं आलोइत्ता निज्झाइत्ता हवइ, से निग्गंथे । तं कहमिति चेत् आयरिय आह-निग्गंथस्स खलु इत्थीणं इंदियाइं मणोहराइं मणोरमाइं आलोएमाणस्स निज्झायमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पजिज्जा, भेयं वा लभेज्जा,

उम्मायं वा पाउणिज्जा, दीहकालीयं वा रोगायंकं हविज्जा, केवलि-पण्णत्ताओ धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे इत्थीणं इंदियाइं मणोहराई मणोरमाई आलोइज्जा निज्झाइज्जा ॥ ४ ॥

स निर्ग्रन्थो भवति, स इति कः ? यः स्त्रीणां मनोहराणि, मनोहरन्ति दृष्टमात्राणि चित्तमाक्षिपन्तीति मनोहराणि, पुनर्मनोरमाणि मनो रमन्त्यनुचिन्त्यमानान्याह्लादयन्तीति मनोरमाणि, ईदृशानीन्द्रियाणि नयनवदनजघनवक्षःस्थलनाभिकक्षादीनि प्रत्यालोकयित्वा समन्ताद् दृष्ट्वा निध्याता, नितरां ध्याता निध्याता, दर्शनादनन्तरमतिशयेन चिन्तयिता यो न भवेत् स निर्ग्रन्थो भवति । इत्युक्ते शिष्यः पृच्छति, तत्कथमिति चेदाचार्य आह-हे शिष्य ! निर्ग्रन्थस्य खलु निश्चयेन स्त्रीणां पूर्वोक्तानीन्द्रियाण्यासमन्ताद्विलोकयतः, अथवा ईषदपि लोकयतः पश्यतो नितरां ध्यायमानस्यात्यन्तं चिन्तयतः, स्त्रीणामिन्द्रियेषु दृष्टिं लगयित्वा स्थितस्य ब्रह्मचारिणो ब्रह्मचर्ये शङ्कादयो दोषा उत्पद्यन्ते । तस्मात् 'खलु' निश्चयेन निर्ग्रन्थः स्त्रीणां मनोहराणि मनोरमाणीन्द्रियाणि नालोकयिता न समन्ताद् दृष्टा, अथवा नेषदपि दृष्टा, न च तानीन्द्रियाणि निध्याता - नितरां चिन्तयिता भवेत् । स्त्रीन्द्रियाणां रागेण दृष्टा नितरां ध्याता साधुर्न भवेदित्यर्थः ॥ ४ ॥ इदं चतुर्थं ब्रह्मचर्यसमाधिस्थानम् ४। एषा चतुर्थी वाटिका ४ ।

अथ पञ्चमीं प्राह-

नो निग्गंथे इत्थीणं कुड्डुंतरंसि वा, दूसंतरंसि वा, भित्तिंतरंसि वा, कूईयसद्दं वा रूइयसद्दं वा, गीयसद्दं वा हसियसद्दं वा, थणियसद्दं वा, कंदियसद्दं वा, विलवियसद्दं वा, सुणित्ता हवइ से निग्गंथे । तं कहमिति चेत् आयरिय आह-निग्गंथस्स खलु इत्थीणं कुड्डुंतरंसि वा, दूसंतरंसि वा, भित्तितरंसि वा, कूइयसद्दं वा, रुइयसद्दं वा, गीयसद्दं वा, हसियसद्दं वा, थणियसद्दं वा, कंदियसद्दं वा, विलवियसद्दं वा, सुणमाणस्स बंभयारिस्स बंभचेरे संका वा, कंखा वा, वितिगिच्छा वा समुप्पज्जिज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हविज्जा, केवलिपन्नत्ताओ धम्माओ भंसिज्जा, तम्हा खलु निग्गंथे नो इत्थीणं कुड्डंतरंसि वा, दूसंतरंसि वा, भित्तितरंसि वा, कूइयसद्दं वा, रुइयसद्दं वा, गीयसद्दं वा, हसियसद्दं वा, थणियसद्दं वा, विलवियसद्दं वा, सुणमाणे विहरेज्जा ॥ ५ ॥

स निर्ग्रन्थो भवेत् । स इति कः ? यः कुड्यान्तरे कुड्यं पाषाणरचितम्, तेनान्तरं व्यवधानं कुड्यान्तरं, तस्मिन् कुड्यान्तरे स्थित्वेत्यध्याहारः, दूष्यान्तरे वा वस्त्ररचितभित्त्यन्तरे परिच्छदाया अन्तरे स्थित्वा, भित्त्यन्तरे मृत्तिकापक्वेष्टिकाणां भित्तिव्यवधाने स्थित्वा वा,

'इत्थीण' मिति स्त्रीणां 'कूइयसद्दं' सम्भोगसमये - भोक्तुर्मनःप्रसत्तये कोकिलादिविहग-शब्दानुरूपं कूजितशब्दं, पुनः स्त्रीणां रुदितशब्दम् भोगसमये प्रेमकलहजनितं रोदनशब्दं वा, अथवा पुनर्गीतशब्दं वा, पञ्चमरागादिहुंकाररूपं गीतशब्दं वा, अथवा पुनः स्त्रीणां हसितशब्दं कहकहादिकहास्योत्पादिकाट्टाट्टदन्तनिष्कासनोद्भवशब्दम्, स्तनितशब्दं वा, भोगसमये दूरतरघनगर्जनानुकारिशब्दं वा, क्रन्दितशब्दं वा, प्रोषितभर्तृकाणां - विरहिणीनां भर्तृवियोगदुःखाज्जातम्, वाथवा विलपितशब्दं भर्तृगुणान् स्मारं स्मारं प्रलापरूपं शब्दं प्रति यः श्रोता न भवति स निर्ग्रन्थो भवति । इति श्रुत्वा शिष्यः पृच्छति तत्कथं - केन कारणेन ? यदेवमुच्यते, इति श्रुत्वा आचार्य आह-हे शिष्य ! खलु निश्चयेन कुड्यान्तरादिषु पूर्वोक्तस्थाने स्थित्वा स्त्रीणां पूर्वोक्तान् कूजितादिशब्दान् श्रृण्वतो निर्ग्रन्थस्य ब्रह्मचारिणोऽपि ब्रह्मचर्ये शङ्का वा काङ्क्षा वेत्यादयो दोषा उत्पद्यन्ते । तस्मात्कारणात् खलु -निश्चयेन निर्ग्रन्थः कुड्यांतरेषु स्थित्वा स्त्रीणां कूजितादिशब्दं नो श्रृण्वन् विचरेत् । स्त्रीणां हि कामोद्दीपकशब्दश्रोता साधुर्न भवेदिति भावः । इति पञ्चम ब्रह्मचर्यसमाधिस्थानम् । एषा पञ्चमी वाटिका ॥ ५ ॥

अथ षष्ठी प्राह-

नो निग्गंथे इत्थिणं पुव्वरयं पुव्वकीलिअं अणुसरित्ता हवइ, से निग्गंथे । तं कहमिति चेत् आयरियाह-निग्गंथस्स खलु इत्थीणं पुव्वरयं पुव्वकीलियं अणुसरेमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा, भेयं वा लभेज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हवेज्जा, केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु नो निग्गंथे इत्थीणं पुव्वरयं पुव्वकीलियं अणुसरिज्जा ॥ ६ ॥

स निर्ग्रन्थो भवेत्, यः पूर्वं गृहस्थत्वे स्त्र्यादिभिः सह रतं - कामासनैर्मैथुनसेवनम्, पुनस्ताभिरेव समं पूर्वक्रीडितं - गृहस्थावस्थायां पुरो द्यूतादिक्रीडनं कृतम्, तस्यानुस्मर्ता मुहुर्चिन्तयिता नो भवेत् स साधुर्भवेदित्युक्ते शिष्यः प्राह-तत्कथमिति चेत्तदाह-हे शिष्य ! खलु निश्चयेन स्त्रीभिः सह पूर्वकृतं रतं - मैथुनम्, पूर्वकृतं द्यूतादिक्रीडितमनुस्मरतो - वारंवारचिन्तयतो निर्ग्रन्थस्य साधोर्ब्रह्मचारिणो ब्रह्मचर्ये शङ्कादयो दोषा उत्पद्यन्ते । तस्मात् खलु निश्चयेन निर्ग्रन्थः स्त्रीभिः सह पूर्वरतं-पूर्वक्रीडितं प्रत्यनुस्मर्ता न भवेत्, स साधुर्भवेत् ॥६॥ इति षष्ठं ब्रह्मचर्यसमाधिस्थानम् ॥ इति षष्ठी वाटिका ॥ ६ ॥

अथ सप्तमी प्राह-

नो निग्गंथे पणीयं आहारं आहारित्ता हवइ, से निग्गंथे, तं कहमिति चेत् आयरियाह-निग्गंथस्स खलु पणियपाणभोयणं आहारेमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा,

भेयं वा लभेज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हवेज्जा, केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा । तम्हा खलु नो निग्गंथे पणीयं आहारं आहारेज्जा ॥ ७ ॥

स निर्ग्रन्थो भवेत्, यः प्रणीतं-गलद्घृतादिबिन्दुकम् उपलक्षणत्वादन्यदपि सरसमत्यन्तधातुवृद्धिकरं कामोद्दीपकमाहारं प्रत्याहर्त्ता न भवेत् । यः सरसाहारकृन्न भवेत् स निर्ग्रन्थः । तदा शिष्यः पृच्छति-तत्कथमिति चेत्तदा आचार्य आह-हे शिष्य ! निर्ग्रन्थस्य साधोः खलु निश्चयेन प्रणीतं सरसमाहारं भुञ्जानस्य ब्रह्मचारिणो ब्रह्मचर्ये शङ्कादयो दोषा उत्पद्यन्ते । तस्मादित्यादिदोषप्रादुर्भावान्निर्ग्रन्थः प्रणीताहारकारी न भवेत् ॥ ७ ॥ इति सप्तमं ब्रह्मचर्यसमाधिस्थानम् । इति सप्तमी वाटिका ॥ ७ ॥

अथाष्टमीं प्राह-

नो निग्गंथे अइमायाए पाणभोअणं आहारेत्ता हवइ, से निग्गंथे, तं कहमिति चेत् आयरियाह-निग्गंथस्स खलु अइमायाए पाणभोयणं आहारेमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा, भेयं वा लभेज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हवेज्जा, केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा । तम्हा खलु नो निग्गंथे अइमायाए पाणभोयणं भुंज्जिज्जा ॥ ८ ॥

स निर्ग्रन्थो भवेत्, योऽतिमात्रया द्वात्रिंशत्कवलाः पुरुषाणामाहारस्य मात्रा, ततोऽधिकाहारं पानकं - द्राक्षाशर्करादेर्जलमाहर्त्ता न भवेत् । यतो ह्यागमे पुरुषस्य द्वात्रिंशत्कवलैराहारमात्रा, स्त्रियस्त्वष्टाविंशतिकवलैराहारमात्रा, नपुंसकस्य चतुर्विंशतिकवलैराहारमात्रोक्तास्ति । ब्रह्मचारिणो ह्यधिकाहारपानीयं न करणीयमिति श्रुत्वा शिष्यः पृच्छति । तत्कथमिति चेत्तदाचार्यः प्राह-निर्ग्रन्थस्य खल्वतिमात्रमाहारपानीयमाहर्तुर्मात्राधिकमाहारकर्तुर्ब्रह्मचारिणो ब्रह्मचर्ये शङ्कादयो दोषा उत्पद्यन्ते । तस्माच्छङ्कादिदोषाणां प्रादुर्भावात् खलु निश्चयेन निर्ग्रन्थोऽतिमात्रया पानीयं भोजनं वा न भुञ्जेत् ॥ ८ ॥ इत्यष्टमं ब्रह्मचर्यसमाधिस्थानम् । इत्यष्टमी वाटिका ॥ ८ ॥

अथ नवम्युच्यते -

नो विभूसाणुवाई हवइ, से निग्गंथे, तं कहमिति चेत् आयरियाह-निग्गंथे खलु विभूसावत्तिए विभूसियसरीरे इत्थीजणस्स अहिलसणिज्जे हवइ, तओ णं तस्स इत्थीजणेणं अहिलसिज्जमाणस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालीयं वा रोगायंकं हवेज्जा, केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा । तम्हा खलु नो निग्गंथे विभूसियवत्तिए भवेज्जा ॥ ९ ॥

स निर्ग्रन्थो भवेत्, यो विभूषानुपाती नो भवेत्। विभूषां - शरीरशोभामनुवर्त्तयितुमनुपतितुं विधातुं शीलमस्येति विभूषानुवर्ती, विभूषानुपाती वा, शरीरशोभाकरणोपकरणैः स्नानदन्तधावनादिभिः संस्कारकर्ता न भवेत्, सा साधुर्ब्रह्मचारी। इति श्रुत्वा तदा शिष्यः प्राह-तत्कथमिति चेत्तदाचार्य आह-खलु निश्चयेन निर्ग्रन्थः साधुर्विभूषानुवर्तिकः- शरीरशोभाकारी, विभूषितशरीरः- स्नानाद्यलङ्कृततनुः पुमान् स्त्रीजनस्याभिलषणीयः- कामाय वाञ्छनीयो भवेत्। ततो 'णं' ततः पश्चात् स्त्रीजनेनाभिलषणीयस्य ब्रह्मचारिणो ब्रह्मचर्ये शङ्कादयो दोषा उत्पद्यन्ते। तस्माच्छङ्कादिदोषाणां प्रादुर्भावात्खलु निश्चयेन निर्ग्रन्थो विभूषानुवर्तिको न भवेत् ॥ ९ ॥ इति नवमं ब्रह्मचर्यसमाधिस्थानम्। इति नवमी वाटिका।

अथ दशमी कथ्यते -

नो निग्गंथे सद्दरूवरसगंधफासाणुवाई हवइ से निग्गंथे, तं कहमिति चेत् आयरियाह-निग्गंथस्स खलु सद्दरूवरसगंधफासाणुवाइयस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा, भेयं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं हवेज्जा, केवलिपन्नत्ताओ वा धम्माओ भंसिज्जा। तम्हा खलु नो निग्गंथे सद्दरूवरसगंधफासाणुवाई भवेज्जा [दसमे बम्भचेरसमाहिठाणे हवई।] ॥ १० ॥

स निर्ग्रन्थो भवेत्, स इति कः ? यः शब्दरूपरसगन्धस्पर्शानुपाती न भवेत्। शब्दश्च रूपञ्च रसश्च गन्धश्च स्पर्शश्च शब्दरूपरसगन्धस्पर्शाः, तान् अनुपतत्यनुपातीति शब्दरूपरसगन्धस्पर्शानुपाती, शब्दो-मन्मनादिः, रूपं-स्त्रीसम्बन्धिलावण्यम्, रसो-मधुरादिः, गन्धश्चन्दनागरुकस्तूरिकादिः, स्पर्शः-कोमलस्त्वक्सौख्यदः, एषां भोक्ता साधुर्न स्यात्, इत्युक्ते शिष्यः पृच्छति, तत्कथमिति चेदाचार्य आह-निर्ग्रन्थस्य खलु निश्चयेन शब्दरूपरसगन्धस्पर्शानुपातिब्रह्मचारिणो ब्रह्मचर्ये शङ्कादयो दोषा उत्पद्यन्ते। तस्माच्छङ्कादिदोषाणां प्रादुर्भावात्खलु निश्चयेन निर्ग्रन्थः शब्दरूपरसगन्धस्पर्शानुपाती विषयासेवी न भवेत् ॥ १० ॥ एतद्दशमं ब्रह्मचर्यसमाधिस्थानम् १० ।

अथात्र सर्वेषां दशानां समाधिस्था-नानां सङ्ग्रहश्लोकान् पद्यरूपानाह-तं जहा-

जं विवित्तमणाइन्नं, रहियं थीजणेण य ।
बंभचेरस्स रक्खट्ठा, आलयं तु निसेवए ॥ १ ॥

साधुर्ब्रह्मचारी तमालयं - तमुपाश्रयं निषेवते। तु पादपूरणे, तं कं ? य आलयो विविक्त एकान्तभूतः, तत्रत्यवास्तव्यस्त्रीजनेन, चशब्दात्पशुपण्डकैरपि रहितः, पण्डकशब्देन नपुंसक उच्यते। कालाकालविभागागतसाध्वीजनं श्राद्धीजनं चाश्रित्य विविक्तत्वं ज्ञेयम्। यदुक्तं-

"अट्ठमीपक्खिए मोत्तुं, वायणाकालमेव य ।
सेसकालंमिइंतीओ, नेया उ अकालचारीओ" ॥ १ ॥

तस्माद्य आलयः स्त्र्यादिभिरसेवितस्तमालयं ब्रह्मचारी साधुश्च निषेवत इत्यर्थः । पुनर्यश्चालयोऽनाकीर्णो गृहस्थानां गृहाद् दूरवर्ती । किमर्थं ? ब्रह्मचर्यस्य रक्षार्थम्, यो हि स्वब्रह्मचर्यं रक्षितुमिच्छति स एतादृशमुपाश्रयं निषेवते । अत्र लिङ्गव्यत्ययः प्राकृतत्वात् ॥ १ ॥

मणपल्हायजणणिं, कामरागविवड्ढणिं ।
बंभचेररओ भिक्खू, थीकहं तु विवज्जए ॥ २ ॥

अथ द्वितीयं-ब्रह्मचर्यरतो भिक्षुः स्त्रीकथां विवर्जयेत्, स्त्रीणां कथा स्त्रीकथा, तां त्यजेत् । कीदृशीं कथां ? मनःप्रह्लादजननीमन्तःकरणस्य हर्षोत्पादिकाम् । पुनः कीदृशीं ? कामरागविवर्धनीं - विषयरागस्यातिशयेन वृद्धिकर्त्रीम् ॥ २ ॥

समं च संथवं थीहिं, संकहं च अभिक्खणं ।
बंभचेररओ भिक्खू, निच्चसो परिवज्जए ॥ ३ ॥

ब्रह्मचर्यरतो भिक्षुर्नित्यशो - निरन्तरं सर्वदा स्त्रीभिः समं संस्तवमर्थादेकासने स्थित्वा परिचयम्, च पुनरभीक्ष्णं - वारंवारं सङ्कथां स्त्रीजातिभिः सह स्थित्वा बह्वीं वार्तां परिवर्जयेत्, सर्वथा त्यजेत् ॥ ३ ॥

अंगपच्चंगसंठाणं, चारुल्लवियपेहियं ।
बंभचेररओ थीणं, चक्खूगिज्झं विवज्जए ॥ ४ ॥

ब्रह्मचर्यरतो साधुः स्त्रीणामङ्गप्रत्यङ्गसंस्थानं चक्षुर्ग्राह्यं विवर्जयेत् । अङ्गं-मुखम्, प्रत्यङ्ग—स्तन-जघन-नाभि-कक्षादिकम्, संस्थानकं-कटीविषये हस्तौ दत्वोर्ध्वस्थायित्वम्, पुनः स्त्रीणां चारूल्लपितप्रेक्षितं चक्षुर्ग्राह्यं विशेषेण वर्जयेत् । चारु-मनोहरं यदुल्लपितं-मन्मनादिजल्पितम्, प्रकृष्टमीक्षितं-वक्त्रावलोकनमेतत्सर्वं परित्यजेत् । कोऽर्थः ? ब्रह्मचारी हि स्त्रीणामङ्गप्रत्यङ्गसंस्थानं, चारुभणितं, कटाक्षैरवलोकनमेतत्सर्वं दृष्टिविषयमागतमपि, ततः स्वकीयं चक्षुरिन्द्रियं बलान्निवारयेदित्यर्थः ॥ ४ ॥

कूइयं रुइयं गीयं, हसियं थणियकंदियं ।
बंभचेररओ थीणं, सोयगिज्झं विवज्जए ॥ ५ ॥

ब्रह्मचर्यरतः स्त्रीणां कूजितम्, रुदितम्, गीतम्, हसितम्, स्तनितम्, क्रन्दितं श्रोत्रग्राह्यं -कर्णाभ्यां गृहीतुं योग्यं विशेषेण वर्जयेत्, न शृणुयादित्यर्थः ॥ ५ ॥

हासं कीडुं रइं दप्पं, सहसाऽवित्तासियाणि य ।
बंभचेररओ थीणं, नाणुचिंते कयाइवि ॥ ६ ॥

ब्रह्मचर्यरतो ब्रह्मचारी स्त्रीणां हास्यम्, पुनः क्रीडाम्, तथा रतिम् मैथुनप्रीतिम्, दर्पं स्त्रीणां मानमर्दनादुत्पन्नं गर्वम्, पुनः सहसा अपत्रासितानि सहसात्कारेणागत्य पश्चात्पराङ्-मुखस्थितानां स्त्रीणां नेत्रे हस्ताभ्यां निरुन्ध्य भयोत्पादनहास्योत्पादनानि सहसावित्रासिता-न्युच्यन्ते । एतानि पूर्वानुभूतानि कदापि नानुचिन्तयेन्न स्मरेत् ॥ ६ ॥

पणियं भत्तपाणं तु, खिप्पं मयविवड्ढणं ।
बंभचेररओ भिक्खू, निच्चसो परिवज्जए ॥ ७ ॥

ब्रह्मचर्यरतो भिक्षुः प्रणीतं-क्षरद्घृतादिरसम्, भक्तमाहारम्, तथा पानं-द्राक्षाखर्जूर-शर्करादिमिश्रितं पानीयं नित्यशः परिवर्जयेत्, सर्वदा परित्यजेत्, सदा सेवनाद् गार्ध्यं स्यात् । तथा ब्रह्मरतो भिक्षुर्यदाहारं पानीयं च क्षिप्रं-शीघ्रं मदविवर्धनं - कामोद्दीपकं भवति, तदपि नित्यं परिवर्जयेत् ॥ ७ ॥

धम्मलद्धं मियं काले, जत्तत्थं पणिहाणवं ।
नाइमत्तं तु भुंजिज्जा, बंभचेररओ सया ॥ ८ ॥

ब्रह्मचर्यरतः साधुर्ब्रह्मचारी सदाऽतिमात्रं - मात्रातिरिक्तमतिमात्रं मात्राधिकमाहारं नैव भुञ्जीत । परं कीदृशमाहारं ? धर्मेण लब्धम्, न तु विप्रतार्य गृहीतम्, तदपि आहारं यात्रार्थं-संयमनिर्वाहार्थं न तु बल-वीर्यादिवृद्धयर्थं गृहीतम्, तदाहारं कदाचित्सरसमपि लब्धं तदा सदैव न भुञ्जीत । कीदृशो ब्रह्मचारी साधुः ? प्रणिधानवान् प्रणिधानं - चित्तस्य स्थैर्यम्, तद्विद्यते यस्य स प्रणिधानवान्, चित्तस्वास्थ्ययुक्त इत्यर्थः ॥ ८ ॥

विभूसं परिवज्जिज्जा, सरीरपरिमंडणं ।
बंभचेररओ भिक्खू, सिंगारत्थं न धारए ॥ ९ ॥

ब्रह्मचर्यरतो भिक्षुः शरीरस्य परि-समन्तान्मण्डनं - नखकेशादीनां संस्कारणं शृङ्गारार्थं परिवर्जयेत् । पुनर्ब्रह्मचर्यधारी विभूषां - सम्यग् वस्त्रादिविहितशरीरशोभां परिवर्जयेत् ॥ ९ ॥

सद्दे रूवे य गंधे य, रसे फासे तहेव य ।
पंचविहे कामगुणे, निच्चसो परिवज्जए ॥ १० ॥

ब्रह्मचारी नित्यशः सर्वदा शब्दं-कर्णसुखदम्, रूपं-नेत्रप्रीतिकरम्, पुनर्गन्धं-नासासु-खदम्, तथा रसं-मधुरादिकम्, तथैव स्पर्शं-त्वक्प्रीतिकरम्, एवं पञ्चविधकामगुणान् परि-वर्जयेत् ॥ १० ॥

अथ यत्पूर्वमुक्तं शङ्काकाङ्क्षादूषणं स्यात्, तत्सर्वं पृथक् दृष्टान्तेन दृढयति -

आलओ थीजणाइन्नो, थीकहा य मणोरमा ।
संथवो चेव नारीणं, तासिं इंदियदरिसणं ॥ ११ ॥

कूइयं रुइयं गीयं, हसियं [1]भुत्तासिणाणि य ।
पणीयं भत्तपाणं च, अइमायं पाणभोयणं ॥ १२ ॥

गत्तभूसणमिट्ठं च, कामभोगा य दुज्जया ।
नरस्सऽत्तगवेसिस्स, विसं तालउडं जहा ॥ १३ ॥

तिसृभिर्गाथाभिः पूर्वाण्येव ब्रह्मचर्यसमाधिभङ्गकारणान्याह-आत्मगवेषकस्य नरस्य स्त्रीजनस्य चैतत्सर्वं ब्रह्मचर्यघातकरं त्याज्यमित्यर्थः । आत्मानं ब्रह्मचर्यजीवितं गवेषयतीत्यात्मगवेषकस्तस्य-वल्लभब्रह्मचर्यस्य । किमिव ? तालपुटं विषमिव, यथा शब्द इवार्थे, यथा तालपुटं विषं तालुकस्पर्शनमात्रादेव त्वरितं जीवितं हन्ति । तथैतदपि त्वरितं ब्रह्मचर्यजीवितमपहरतीत्यर्थः ।तत् किं किमित्याह-स्त्रीजनाकीर्ण आलयो-गृहमुपाश्रयः १, पुनर्मनोरमा-मनोहरा स्त्रीकथा २, च पुनर्नारीणां संस्तवः, स्त्रीभिः सहैकासने उपविशनं परिचयकरणम् ३, पुनस्तासां स्त्रीणां रागेणेन्द्रियाणां-नयनवदनस्तनादीनां दर्शनम् ४, पुनः स्त्रीणां कूजितम्, तथा रुदितम्, पुनर्गीतम्, तथा हसितम् ५, पुनः स्त्रीभिः सह[2]भुक्तासनानि ६, पुनस्तथा प्रणीतरसभक्तपानसेवनं ७, पुनरतिमात्रपानभोजनम् ८, पुनर्गात्रभूषणार्थं शोभाकरणम् ९, पुनर्दुर्जयाः कामभोगाः, अधीरपुरुषैस्त्यक्तुमशक्याः १०, एतत्सर्वं ब्रह्मचर्यधारिणा परिहरणीयम् ॥ ११ ॥ १२ ॥ १३ ॥

दुज्जये कामभोगे य, निच्चसो परिवज्जए ।
संकाठाणाणि सव्वाणि, वज्जिज्जा पणिहाणवं ॥ १४ ॥

प्रणिधानवानेकाग्रचित्तः सर्वाणि दशापि शङ्कास्थानानि यानि पूर्वोक्तानि तानि वर्जयेत् । पुनर्दुर्जयान् भोगान् परिवर्जयेत् । पुनः कामभोगग्रहणमत्यन्तनिवारणोपदेशार्थं ॥ १४ ॥

धम्मारामे चरे भिक्खू, धिइमं धम्मसारही ।
धम्मारामरए दंते, बंभचेरसमाहिए ॥ १५ ॥

ब्रह्मचर्यसमाधिमान् भिक्षुः साधुर्धर्मारामे चरेत् । धर्म आराम इव दुःखसन्तापतप्तानां सौख्यहेतुत्वात्, धर्मारामस्तस्मिन् धर्मारामे तिष्ठेत्, शीलधर्मः स एवारामस्तत्र विचरेदित्यर्थः । कीदृशो भिक्षुः ? धृतिमान् धैर्ययुक्तः, पुनः कीदृशः ? धर्मसारथिर्धर्ममार्गप्रवर्तयिता ।

---

१ सहासनभुक्तानीति वक्तव्ये सहभुक्तासनानीति प्राकृतत्वात् ।

२ एकासने उपविशनपूर्वं भोजनानि कृत्यानि कार्यमित्यर्थः ।

पुनः कथम्भूतो ? धर्मारामरतः, धर्मे आ-समन्ताद्रमन्ते इति धर्मारामाः साधवस्तेषु रतः, साधुभिः सह-युक्तः, न त्वेकाकी तिष्ठति । पुनः कीदृशः ? दान्त - इन्द्रियाणां जेता कषायजेता च ॥ १५ ॥

अथ ब्रह्मचर्यधरणात्फलमाह-

देवदाणवगंधव्वा, जक्खरक्खसकिन्नरा ।
बंभयारिं नमंसंति, दुक्करं जे करिंति तं ॥ १६ ॥

देवा-विमानवासिनो ज्योतिष्काश्च, दानवा-भवनपतयो, गन्धर्वा-देवगायनाः, यक्षा-वृक्षवासिनः सुराः, राक्षसा-मांसास्वादतत्पराः, किन्नरा-व्यन्तरजातयः, एते सर्वेऽपि तं ब्रह्मचारिणं नमस्कुर्वन्ति । तं कं ? यो ब्रह्मचारी पुरुषः स्त्रीजनो वा दुष्करं-कर्तुमशक्यं धर्मं करोतीति शीलधर्मं पालयति ॥ १६ ॥

एस धम्मे धुवे णिच्चे, सासए जिणदेसिए ।
सिद्धा सिज्झंति चाणेणं, सिज्झिस्संति तहावरे ॥ १७ ॥ त्तिबेमि ॥

एष धर्मोऽस्मिन्नध्ययने उक्तो ब्रह्मचर्यलक्षणो ध्रुवोऽस्ति, परतीर्थिभिरनिषेध्योऽस्ति, तस्मात्प्रमाणप्रतिष्ठितः, पुनर्नित्यस्त्रिकालेऽप्यविनश्वरः, अत एव शाश्वतस्त्रिकाले फलदायकत्वात् । पुनर्जिनैस्तीर्थकरैर्देशितः- प्रकाशितः, इति विशेषणैरस्य शीलधर्मस्य प्रामाण्यं प्रकाशितम् । अनेन शीलधर्मेण बहवो जीवाः सिद्धा-अतीतकाले सिद्धिं प्राप्ताः । च पुनरनेन धर्मेण कृत्वेदानीं सिद्धयन्ति । तथा तेन प्रकारेण शीलधर्मेण सेत्स्यन्ति, अपरेऽनागताद्धायां सिद्धिं प्राप्स्यन्ति । अत्राध्ययने मुहुर्मुहुर्ब्रह्मचर्यसमाधिस्थानानि प्रकाशितानि, मुहुर्मुहुर्दूषणान्युक्तानि, तदत्र शीलेऽत्यन्तपालनादरप्रकाशनाय, न तु पुनरुक्तिदोषो ज्ञेयः । इत्यहं ब्रवीमीति सुधर्मास्वामि जम्बूस्वामिनं प्राह ॥ १७ ॥

इति ब्रह्मचर्यसमाधिस्थानाख्यमध्ययनं षोडश संम्पूर्णम् ॥ १७ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां ब्रह्मचर्यसमाधिस्थानं षोडशं सम्पूर्णम् ॥

।। अथ सप्तदशं पापश्रमणीयमध्ययनं प्रारभ्यते ।।

षोडशेऽध्ययने ब्रह्मचर्यगुप्तयः प्रकाशिताः, ता गुप्तयस्तु पापस्थानवर्जनादेव भवन्ति । तस्मात्पापस्थानसेवनात्पापश्रमणो भवति । ततः पापश्रमणज्ञानार्थं सप्तदशमध्ययनं प्रकाश्यते । इति षोडश-सप्तदशयोः सम्बन्धः ।।

जे केइ उ पव्वइए नियंठे, धम्मं सुणित्ता विणओववन्ने ।
सुदुल्लहं लहिउं बोहिलाभं, विहरेज्ज पच्छा य जहासुहं तु ।। १ ।।

यः कश्चित्प्रव्रजितो-गृहीतदीक्षो निर्ग्रन्थः साधुः पूर्वं धर्मं-श्रुतचारित्ररूपधर्मं श्रुत्वा, विनयं-ज्ञानदर्शनसेवनरूपमुपपन्नः-प्राप्तः सन्, पुनर्यः साधुः सुतरामतिशयेन दुर्लभं सुदुर्लभं बोधिलाभं-श्रीतीर्थङ्करस्य धर्मं सम्यक्त्वं लब्ध्वा, पश्चाद्यथासुखं-यथेच्छं निद्राविकथा-प्रमादवत्त्वेन विचरेत्, सिंहत्वेन धर्ममङ्गीकृत्य पश्चाच्छृगालवृत्त्यैव विचरेत् स च प्रमादी ।। १ ।।

गुरुणा हे शिष्य ! त्वमधीष्वेत्युक्तः सन् किं वक्ति ? तदाह-

सिज्जा दढा पाउरणं मि अत्थि, उप्पज्जई भोत्तुं तहेव पाउं ।
जाणामि जं वट्टइ आउसु त्ति, किं नाम काहामि सुएण भंते ।। २ ।।

हे गुरो ! शय्योपाश्रयो वसतिर्दृढा, वर्षाशीतातपपीडानिवृत्तिकरास्ति, प्रावरणं-वस्त्रं शीताद्युपद्रवहरं शरीराच्छादकं 'मे' ममास्ति वर्तते । हे गुरो ! पुनर्भोक्तुं भोजनम्, तथैव पातुं पानं योग्यमुपपद्यते-मिलति । हे आयुष्मन् ! हे भगवन् ! यद्वर्तमानं जीवादिवस्तु वर्तते तदप्यहं जानामि, इति हेतोर्हे भगवन् ! श्रुतेन-सिद्धान्ताध्ययनेन किं करिष्यामि ? अत्र हे भगवन्नित्यामन्त्रणं क्षेपे वर्तते । कोऽर्थः ? ये भगवन्तोऽधीयन्ते, तेषामपि नातीन्द्रियज्ञानम्, तत्किं गलतालुशोषेणेत्यध्यवसितोऽयं भवति । स पापश्रमण उच्यते, इतीहापि सम्बध्यते सिंहावलोकनन्यायेन ।। २ ।।

जे केई पव्वईए, निद्दासीले पगामसो ।
भोच्चा पेच्चा सुहं सुवई, पावसमणित्ति वुच्चइ ।। ३ ।।

स पापश्रमण इत्युच्यते । पापश्चासौ श्रमणश्च पापश्रमणः पापिष्ठसाधुरित्यर्थः । स इति कः ? यः कश्चित्प्रव्रजितो गृहीतदीक्षः सन् पश्चात्प्रकामशोऽत्यन्तं भुक्त्वा, दधिकरम्बादिकं भुक्त्वा, पीत्वा - दुग्धतक्रादिकमाचम्य निद्राशीलो भूत्वा सुखं प्रतिक्रमणादिक्रियानुष्ठानमकृत्वैव स्वपिति, स सम्यक् साधुर्न भवेदित्यर्थः ।। ३ ।।

आयरियउवज्झाएहिं, सुयं विणयं च गाहिए ।
ते चेव खिंसई बाले, पावसमणित्ति वुच्चइ ।। ४ ।।

स पापश्रमण इत्युच्यते । स इति कः ? यस्तानेवाचार्यान् गणवृद्धान्, उपाध्यायान् पाठकान् 'खिंसई' इति निन्दते । किं जानन्त्येतेऽज्ञाः ? अहं यादृशमाचारं सूत्राणामर्थं

जानामि, तादृशमेते आचार्या उपाध्याया न जानन्तीत्युक्त्वा निन्दति । तान् कान् ? यैराचार्यैरुपाध्यायैश्च श्रुतं-शास्त्रम्, विनयं च ग्राहितः, शिक्षितश्च तान् प्रति निन्दति । इति न जानाति यदेतैरेवाहं शिक्षितः । एतादृशः कृतघ्नः पापश्रमणः श्रमणाभासः श्रमणलक्षणैर्हीनः श्रमणत्वं मन्यमानः पापश्रमण उच्यते । कीदृशः सः ? बालोऽज्ञानी निर्विवेकीत्यर्थः ॥ ४ ॥

आयरियउवज्झायाणं, सम्मं नो पडितप्पइ ।
अप्पडिपूयए थद्धे, पावसमणित्ति वुच्चइ ॥ ५ ॥

ज्ञानविषयं पापश्रमणत्वमुक्त्वा दर्शनविषयमाह-य आचार्याणां पुनरुपाध्यायानां सम्यक्प्रकारेण वैपरीत्यराहित्येन न परितृप्यति-प्रीतिं न विदधाति । पुनर्योऽर्हदादीनां यथा-योग्यपूजायाः पराङ्मुखो भवति, अप्रतिपूजको भवति । अथवोपकारकर्तुरप्युपकारं विस्मार्य तस्य प्रत्युपकारं किमपि न करोति, सोऽप्रतिपूजक उच्यते । पुनः स्तब्धोऽहङ्कारी, मनस्येवं जानाति यदहं महापुरुषोऽस्मि, एतादृशो मुनिर्यः स्यात् स पापश्रमण उच्यते ॥ ५ ॥

संमद्दमाणे पाणाणि, बीयाणि हरियाणि च ।
असंजए संजयमन्नमाणे, पावसमणित्ति वुच्चई ॥ ६ ॥

यः प्राणान् द्वित्रिचतुरिन्द्रियान् संमर्द्दमानोऽतिशयेन पीडयन्, च पुनर्बीजानि शालिगोधूमादिसचित्तधान्यानि संमर्द्दयति, च पुनर्हरितानि दूर्वादीनि फलपुष्पादीनि संमर्द्द-यति, पुनर्योऽसंयतः सन्नात्मानं संयतं मन्यमानः, स पापश्रमण उच्यते ॥ ६ ॥

संथारं फलगं पीढं, निसेज्जं पायकंबलं ।
अप्पमज्जियमारुहइ, पावसमणित्ति वुच्चइ ॥ ७ ॥

पुनर्यः संस्तारं कम्बलादिकम्, फलकं पट्टिकादिकम्, पीठं सिंहासनादिकम्, निषीद्यते उपविश्यते इति निषद्या तां निषद्यां स्वाध्यायातापनादिक्रियायोग्यां भूमिम्, पादकम्बलं पादपुञ्छनमित्याद्युपकरणमप्रमृज्य रजोहरणादिना प्रमार्जनमकृत्वा जीवयतनामकृत्वा-ऽऽरोहते स पापश्रमण उच्यते ॥ ७ ॥

दवदवस्स चरई, पमत्ते य अभिक्खणं ।
उल्लंघणे य चंडे य, पावसमणित्ति वुच्चइ ॥ ८ ॥

पुनर्य आहाराद्यर्थं यदा व्रजति, तदा दबदब इति घातैः पृथिवीं कुट्टयन् शीघ्रं शीघ्रं व्रजति, ईर्यासमितिं न साधयति । पुनरभीक्ष्णं-वारंवारं प्रमत्तः प्रमादी सर्वाभिः समितिभिर्हीनः स्यात्, अप्रमत्तो न भवति । पुनर्य उल्लङ्घनः, उल्लङ्घयत्यज्ञानीनामथवा बालानाम् हास्याद्यविनयकर्तृणांभापयन् स्वकीयमाचारमतिक्रामयतीत्युल्लङ्घनः । पुनर्यश्चण्डः क्रोधाध्मातचित्तः स्यात्, स पापश्रमण उच्यते ॥ ८ ॥

पडिलेहेइ पमत्ते, अवउज्झइ पायकंबलं ।
पडिलेहणा अणाउत्ते, पावसमणि त्ति वुच्चई ॥ ९ ॥

पुनः पापश्रमणः स उच्यते । स इति कः ? यो वस्त्रपात्रादिकं निजोपकरणं प्रमत्तः सन् प्रतिलेखयति, मनोविना प्रतिलेखयतीत्यर्थः । पुनर्यः पादकम्बलं पादपुञ्छनमथवा पात्र-कम्बलमपोज्झति, यत्र तत्राऽप्रमार्जितेऽप्रतिलेखिते स्थले निक्षिपति । अत्र पात्रकम्बल-ग्रहणेन सर्वोपधिग्रहणं कर्तव्यम् । पुनर्यः प्रतिलेखनायां स्वकीयसर्वोपधिप्रतिलेखनायाम-नायुक्त आलस्यभाक् प्रत्युपेक्षानुपयुक्त इत्यर्थः । एतादृशः पापश्रमणो भवेत् ॥ ९ ॥

पडिलेहेइ पमत्ते, से किंचि हु निसामिया ।
गुरुं परिभावए निच्चं, पावसमणि त्ति वुच्चई ॥ १० ॥

स पापश्रमण इत्युच्यते । सः कः ? यः साधुर्यत्किञ्चिद्वस्त्रपध्यादिकं प्रतिलेखयति, तदा किञ्चिन्निशम्य प्रतिलेखयति । कोऽर्थः ? यदा प्रतिलेखनावसरे कश्चिद्वार्तां करोति तदा तद्वार्ताश्रवणव्यग्रचित्तः सन् प्रतिलेखयतीत्यर्थः । पुनर्यो गुरून्नित्यं परिभवति सन्ताप-यति स पापश्रमणो भवति ॥ १० ॥

बहुमाई पमुहरी, थद्धे लुद्धे अणिग्गहे ।
असंविभागी अचियत्ते, पावसमणि त्ति वुच्चई ॥ ११ ॥

पुनर्यो बहुमायी प्रचुरमायायुक्तो भवति, पुनर्यः प्रमुखरः प्रकर्षेण वाचालो भवति, पुनर्यः स्तब्धोऽहङ्कारी पुनर्यो लुब्धो लोभी, पुनर्योऽनिग्रहः, न विद्यते निग्रहो यस्य सोऽनिग्रहो-ऽवशीकृतेन्द्रियः पुनर्योऽसंविभागी गुरुग्लानादीनामुचिताहारादिना न प्रतिसंवि-भजति । पुनर्यो 'अचियत्त' इति गुर्वादिष्वप्रीतिकर्ता स पापश्रमण इत्युच्यते ॥ ११ ॥

विवायं च उदीरेइ, अहम्मे अत्तपन्नहा ।
वुग्गहे कलहे रत्ते, पावसमणि त्ति वुच्चइ ॥ १२ ॥

यः पुनरेतादृशो भवति स पापश्रमण इत्युच्यते । सः कः ? यो विवादं कलहमुदीरयति, उपशान्तमपि पुनरुज्ज्वालयति । पुनर्योऽधर्मोऽसदाचाररतः, पुनर्य आत्मप्रज्ञहा, आत्मां सद्बोधरूपतया हितां प्रज्ञां हन्तीत्यात्मप्रज्ञहा तत्त्वबुद्धिहन्ता, पुनर्यो व्युद्ग्रहो भवति, विशेषेणोद्ग्रहो दण्डादिप्रहारजनितयुद्धं व्युद्ग्रहस्तस्मिन् रतः, तथा पुनः कलहे-वाग्युद्धे रतः ॥ १२ ॥

अथिरासणे कुक्कुईए, जत्थ तत्थ निसीयई ।
आसणंमि अणाउत्ते, पावसमणि त्ति वुच्चइ ॥ १३ ॥

पुनर्योऽस्थिरासनो भवति, अस्थिरमासनं यस्य सोऽस्थिरासनः, आसने स्थिरं न तिष्ठतीत्यर्थः । पुनर्यः कौकुच्यिकः, कौकुच्यं भण्डचेष्टादिहास्यमुखविकारादिकं तत्करोतीति

कौकुच्यिको भण्डचेष्टाकारी । पुनर्यो यत्र तत्र निषीदति, सचित्तपृथिव्यामप्रासुकभूमौ तिष्ठति । पुनरासनेऽनायुक्त आसनेऽसावधानः स पापश्रमण उच्यते ॥ १३ ॥

ससरक्खपाओ सुयई, सिज्झं न पडिलेहई ।
संथारए अणाउत्ते, पावसमणि त्ति वुच्चइ ॥ १४ ॥

पुनः स पापश्रमण उच्यते । सः कः ? यः सरजस्कपादः स्वपिति, संस्तारके रजोऽवगुण्ठितचरणोऽप्रमृज्यैव शेते, पुनर्यः शय्यां न प्रतिलेखयति, शय्यां वसतिमुपाश्रयं न सम्यक् प्रतिलेखयति, न प्रमार्जयति । पुनर्यः संस्तारकेऽनायुक्तः, यदा संस्तारके शेते तदा पौरुषीमभणित्वाऽविधिनाऽसावधानत्वेन शेते, स पापश्रमण उच्यते ॥ १४ ॥

दुद्धदहीविगईओ, आहारेइ अभिक्खणं ।
अरए अ तवोकम्मे, पावसमणि त्ति वुच्चइ ॥ १५ ॥

यो दुग्धदधिनी विकृती अभीक्ष्णं-वारंवारमाहारयति, पुनर्यस्तपःकर्मण्यरतस्तपःकर्मण्यरतिं धत्ते, स पापश्रमण इत्युच्यते ॥ १५ ॥

अत्थंतंमि य सूरंमि, आहारेइ अभिक्खंण ।
चोईओ पडिचोएई, पावसमणि त्ति वुच्चइ ॥ १६ ॥

पुनर्यः सूर्येऽस्तमिते सति अभीक्ष्णं प्रतिदिनमाहारयति, आहारं करोति, पुनर्यश्चोदितः प्रेरितः सन् प्रतिचोदयति, केनचिद् गीतार्थेन शिक्षितः सन् तं पुनः प्रतिशिक्षयति स पापश्रमण उच्यते ॥ १६ ॥

आयरियपरिच्चाई, परपासंडसेवई ।
गाणंगणिए दुब्भूए, पावसमणि त्ति वुच्चई ॥ १७ ॥

पुनर्य आचार्यपरित्यागी, आचार्यान् परित्यजतीत्याचार्यपरित्यागी । आचार्या हि सरसाहारमपरेभ्यो ग्लानादिभ्यो ददति, अस्मभ्यं च वदति तपः कुर्वन्त्वित्यादि गुरूणां दूषणं दत्वा पृथग्भवति । पुनर्यः परपाखण्डान् सेवते इति परपाखण्डसेवकः, परेषु पाखण्डेषु मृदुशय्यादिसुखं दृष्ट्वा तान् सेवते । पुनर्यो गाणंगणिको भवति, गणाङ्गणं षण्मासाभ्यन्तर एव सङ्क्रामतीति गाणंगणिकः, अत एव दुर्भूतो दुराचारतया निन्दनीय इत्यर्थः, स पापश्रमण उच्यते ॥ १७ ॥

सयं गेहं परिच्चज्ज, परगेहंसि वावरे ।
निमित्तेण य ववहरई, पावसमणि त्ति वुच्चइ ॥ १८ ॥

यः पुनः स्वयं - स्वकीयं गृहं - दीक्षां गृहीत्वा पूर्वमेकं त्यक्त्वा परस्यान्यस्य गृहस्थस्य गृहे परगृहे व्याप्रियते, आहारार्थी सन् तत्कार्याणि कुरुते । पुनर्यो निमित्तेन शुभाशुभ-

कथनेन व्यवहरति द्रव्यमर्जयति, अथवा गृहस्थादिनिमित्तं व्यवहरति, क्रयविक्रयादिकं कुरुते, स पापश्रमण इत्युच्यते ॥ १८ ॥

सन्नाइपिंडं जेमेई, नेच्छइ सामुदाणियं ।
गिहिनिसिज्जं च वाहेइ, पावसमणि त्ति वुच्चई ॥ १९ ॥

यः पुनः स्वज्ञातिपिण्डं स्वकीयबन्धुभिर्दत्तमाहारं भुङ्क्ते । रागपिण्डं भुङ्क्ते इत्यर्थः । पुनर्यः सामुदायिकम्, समुदाये भवं सामुदायिकम्, गृहाद्गृहाद्गृहीतं भैक्ष्यं नेच्छति न वाञ्छति । पुनर्यो गृहिनिषद्याम्, गृहिणो निषद्या गृहिनिषद्या, गृहस्थस्य गृहे गत्वा पल्यङ्कादिकं वाहयत्यारोहयति, मञ्चमञ्चिकापीठिकादिषु तिष्ठतीत्यर्थः । स पापश्रमण उच्यत इति ॥ १९ ॥

एयारिसे पंचकुसीलसंवुडे, रूवंधरे मुणिपवराण हिट्ठिमे ।
अयंसि लोए विसमेव गरहिए, न से इहं नेव परत्थ लोए ॥ २० ॥

एतादृशो रूपधरो मुनिवेषधारी, स इहास्मिन् लोके न, तथा परंमि-परस्मिन् लोकेऽपि न, स गृहस्थोऽपि न भवति, साधुरपि न भवति, उभयतोऽपि भ्रष्ट इत्यर्थः । स कीदृशः ? पञ्चकुशीलसंवृतः, पञ्च च ते कुशीलाश्च पञ्चकुशीलास्तद्वदसंवृतोऽजितेन्द्रियः, अत्र प्राकृतत्वादकारलोपः । अथवा पञ्चकुशीलैः संवृतः सहितः, यादृशा जिनमते पञ्च कुशीलास्तन्मध्यवर्त्तीत्यर्थः । यदुक्तम् -

"ओसन्नो पासत्थो, होइ कुसीलो तहेव संसत्तो ।
अहच्छंदोवि य एए, अवंदणिज्जा जिणमयंमि ॥ १ ॥"

पापश्रमणोऽप्यवन्दनीय एव । पुनः कीदृशः ? मुनिप्रवराणां प्रधानमुनीनां मध्येऽधः स्थितः स पापश्रमण एतस्मिन् लोके विषमिव गर्हितो, विषमिव निन्द्यो, विषवत् त्याज्य इत्यर्थः ॥ २० ॥

जे वज्जए एए सया उ दोसे, से सुव्वए होइ मुणीण मज्झे ।
अयंसि लोए अमयंव पूइए, आराहए लोगमिणं तहा परे ॥ २१ ॥ त्तिबेमि ॥

य 'एए' इत्येतान् दोषान् सर्वदा वर्जयेत्, स सुव्रतः, सुष्ठु व्रतानि यस्य स सुव्रतो महोज्ज्वलव्रतधारी, सर्वमुनीनां मध्ये एतस्मिन् लोकेऽमृतमिव पूजितो भवेत्, सर्वमुनीनामादरणीयः स्यात्, पुनः सुव्रतः साधुरस्मिन् लोके, तथा परत्र परभवेऽप्याराधकः स्यादित्यहं ब्रवीमि ॥ २१॥

इति पापश्रमणीयमध्ययनं सप्तदशम् ॥ १७ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां पापश्रमणीयाख्यं सप्तदशमध्ययनं सम्पूर्णम् ॥

॥ अथ अष्टादशं संयतीयाख्यमध्ययनं प्रारभ्यते ॥

सप्तदशेऽध्ययने पापस्थानकनिवारणमुक्तम्, तत्पापस्थाननिवारणं संयमवतो भवति। स च संयमो हि भोगजयात् ऋद्धेस्त्यागाच्च भवति। स च भोगत्यागः संयतराजर्षिदृष्टान्तेनाष्टादशाध्ययनेन दृढयति। इति सप्तदशाष्टादशयोः सम्बन्धः।

कंपिल्ले नयरे राया, उदिण्णबलवाहणे।
नामेणं संजए नाम, मिगव्वं उवणिग्गए ॥ १ ॥

हयाणीए गयाणीए, रहाणीए तहेव य।
पायत्ताणीए महया, सव्वओ परिवारिए ॥ २ ॥

काम्पिल्ये नगरे राजाभूत्। कीदृशः स राजा ? नाम्ना संयत इति नाम प्रसिद्धः। पुनः कीदृशः ? उदीर्णबलवाहनः, उदीर्णमुदयं प्राप्तं बलं येषां तान्युदीर्णबलानि, उदीर्णबलानि वाहनानि यस्य स उदीर्णबलवाहनः। अथवा बलं चतुरङ्गं गजाश्वरथसुभटरूपम्, वाहनम्-शिबिकावेसरप्रमुखम्, बलं च वाहनं च बलवाहने, उदीर्णे उदयं प्राप्ते बलवाहने यस्य स उदीर्णबलवाहनः। स संयतो राजा मृगव्यामुपनिर्गतो-नगरादाक्षेटके गतः, मृगव्या आक्षेटक उच्यते ॥ १ ॥

पुनः कीदृशः संयतो नृपः ? हयानामनीकं तेन हयानीकेन घोटककटकेन, तथा पुनर्गजानीकेन-कुञ्जरकटकेन, तथैव रथानीकेन, पुनर्महता प्रचुरेण पादात्यनीकेन सर्वतः परिवारितः सर्वपरिवारसहितः ॥ २ ॥ युग्मम्॥

मिए छुभित्ता हयगओ, कंपिल्लुज्जाणकेसरे।
भीए संते मिए तत्थ, वहेइ रसमुच्छिए ॥ ३ ॥

स संयतो नृपो हये गतोऽश्वारूढस्तत्र काम्पिल्योद्याने केसरनाम्नि पूर्वं मृगान् क्षिप्त्वा-प्रेरयित्वा अश्वेन त्रासयित्वा तान् मृगान् वध्यति। कीदृशः संयतः ? रसमूर्च्छितः, रसस्तेषामास्वादानुभवस्तत्र लोलुपः, कीदृशान् मृगान् ? भीतान्, पुनः कीदृशान् ? ग्लानिं प्राप्तान् ॥ ३ ॥

अह केसरंमि उज्जाणे, अणगारे तवोधणे।
सज्झायज्झाणसंजुत्ते, धम्मज्झाणं झियायई ॥ ४ ॥

अथ मृगाणां त्रासमारणोत्पादनानन्तरम्, केसरे उद्यानेऽनगारो धर्मध्यानमाज्ञाविचयादिकं ध्यायति, धर्मध्यानं चिन्तयति। कथंभूतोऽनगारः ? तपोधनस्तप एव धनं यस्य स तपोधनः, पुनः कीदृशः ? स्वाध्यायध्यानसंयुक्तः ॥ ४ ॥

अप्फोवमंडवंमि, झायइ खवियासवे ।
तस्सागए मिए पासं, वहेइ से नराहिवे ॥ ५ ॥

'अप्फोवमंडवंमि' इति वृक्षाद्याकीर्णोऽफोवः स चासौ मण्डपश्चाफोवमण्डपस्तस्मिन्नफोवमण्डपे, नागवल्लीद्राक्षादिभिर्वेष्टिते स्थाने इत्यर्थः । तस्मिन् वृक्षनिकुञ्जे लतावेष्टिते सोऽनगारोऽप्फोवमंडपे स्थितो ध्यानं ध्यायति, धर्मध्यानं चिन्तयति । कीदृशः सोऽनगार ? क्षपिताश्रवः, क्षपिता-निरुद्धा आश्रवा येन स क्षपिताश्रवो - निरुद्धपापागमनद्वारः । अत्र पूर्वगाथायामपि ध्यानं ध्यायतीत्युक्तम्, पुनरपि यदुक्तं तदत्यन्तादरख्यापनार्थम् स नराधिपः संयतो भूपस्तस्य धर्मध्यानपरायणस्य साधोः पार्श्वे आगतं मृगं हन्ति स्म ॥ ५ ॥

अह आसगओ राया, खिप्पमागम्म सो तहिं ।
हए मिए उ पासित्ता, अणगारं तत्थ पासई ॥ ६ ॥

अथानन्तरमश्वगतोऽश्वारूढः स संयतो राजा तत्र-तस्मिन् लतागृहे क्षिप्रं - शीघ्रमागत्य हतं मृगं दृष्ट्वा तत्रानगारं साधुं पश्यति ॥ ६ ॥

अह राया तत्थ संभंतो, अणगारो मणाहओ ।
मए उ मंदपुण्णेणं, रसगिद्धेण घित्तुणा ॥ ७ ॥

अथानन्तरं तत्र - तस्मिन् स्थाने स संयतो राजा सम्भ्रान्तो मुनिदर्शनाद्भीत इत्यर्थः, मनस्येवं चिन्तयति स्म । मया मन्दपुण्येन-न्यूनभाग्येनाऽनगारः साधुरनाहतोऽल्पेनाहतोऽभूत्, स्तोकेन टलित इत्यर्थः । मया पापेनायं साधुर्मारित एवाभूदित्यर्थः । कीदृशेन मया ? रसगृद्धेन मांसास्वादलोलुपेन, पुनः कीदृशेन मया ? 'घित्तुणा' घातकेन-जीवहननशीलेन ॥ ७ ॥

आसं विसज्जइत्ता णं, अणगारस्स सो निवो ।
विणएणं वंदए पाए, भगवं इत्थ मे खमे ॥ ८ ॥

स नृपोऽनगारस्य विनयेन पादौ वन्दते । किं कृत्वा ? अश्वं विसृज्य, णमिति वाक्यालङ्कारे, घोटकं त्यक्त्वा । पुनः स नृप इति वक्ति-हे भगवन् ! 'इत्थ' इत्यत्र मृगवधे मेऽपराधं क्षमस्व, अपराधमिति पदमध्याहार्यम् ॥ ८ ॥

अह मोणेण सो भयवं, अणगारे झाणमस्सिए ।
रायाणं न पडिमंतेइ, तओ राया भयद्दुओ ॥ ९ ॥

अथ राज्ञा मुनेश्चरणवन्दना कृता, ततोऽनन्तरं स भगवान् ज्ञानातिशययुक्तोऽनगारः साधु मौनेन ध्यानमाश्रितः सन्, पिण्डस्थ-पदस्थ-रूपस्थ-रूपातीतादिकं ध्यायन्, अथवा धर्मध्यानमाश्रितः सन् राजानं संयतभूपं प्रति न निमन्त्रयति न जल्पयति । ततस्तस्मात्कारणान्मुनेरभाषणाद्राजा भयद्रुतो - भयभ्रान्तोऽभूत्, इति वक्ति च ॥ ९ ॥

संजओ अहमस्सीति, भयवं वाहराहि मे ।
कुद्धे तेएण अणगारे, डहिज्ज नरकोडिओ ॥ १० ॥

किं वक्ति ? तदाह-राजा मनस्येवं जानाति स्म, अयं साधुर्मां नीचं ज्ञात्वा किञ्चिद्विरूपं त्वरितं मा कुर्यात्, तस्मात् स्वकीयं नृपत्वं स्वनामसहितमवादीदिति भावः । हे भगवन्नहं संयतो राजास्मि, इति हेतोर्हे भगवन् ! मे व्याहर मां जल्पय । हे स्वामिन् ! भवादृशः साधुः क्रुद्धः सन् तेजसा-तेजोलेश्यादिना नरकोटिं दहेत्, तस्मात् स्वामिना क्रोधो न विधेयः ॥ १० ॥

अभओ पत्थिवा तुब्भं, अभयदाया भवाहि य ।
अणिच्चे जीवलोगंमि, किं हिंसाए पसज्जसि ॥ ११ ॥

तदा मुनिराह-हे पार्थिव ! तुभ्यमभयं - भयं मा भवतु । त्वमप्यभयदाता 'भवाहि' इति भव । च इति पादपूरणे । जीवानामभयदानं देहि, जीवानां हिंसां मा कुर्वित्यर्थः । हे राजन्ननित्ये जीवलोके - संसारे 'किमि' ति किमर्थं हिंसायां प्रसज्जसि ? प्रकर्षेण सज्जो भवसि ? जीवलोकस्यानित्यत्वे त्वमप्यनित्योऽसि । किमर्थं प्राणिवधं करोषीत्यर्थः ॥ ११ ॥

जया सव्वं परिच्चज्ज, गंतव्वमवसस्स ते ।
अणिच्चे जीवलोगंमि, किं रज्जंमि पसज्जसि ॥ १२ ॥

हे राजन् ! यदा सर्वमन्तःपुरादिकं कोष्ठागारभाण्डागारादिकं परित्यज्य 'ते' तव परलोके गन्तव्यं वर्तते । कथंभूतस्य ते ? अवशस्य-परवशस्य, मरणसमये जीवो जानाति न म्रियते, परं किं करोति ? जीवः परवशः सन् स्वेच्छां विनैव म्रियते । यदुक्तं-

१"सव्वे जीवावि इच्छंति, जीविउं न मरिज्जउं ॥" [द.वै. ६-११] तेन हे नृप ! तव सर्वं परित्यज्य मर्तव्यमस्ति, तदाऽनित्ये जीवलोकेऽनित्ये संसारे किं राज्ये प्रसज्जसि-प्रसङ्गं करोषि-गृद्धो भवसि इति ॥ १२ ॥

जीवियं चेव रूवं च, विज्जुसंपायचंचलं ।
जत्थ तं मुज्झसि रायं, पेच्चत्थं नावबुज्झसि ॥ १३ ॥

हे राजन् ! जीवितमायुः च पुना रूपं शरीरस्य सौन्दर्यं विद्युत्सम्पातचञ्चलं वर्तते, विद्युतः सम्पातश्चलनं तद्वच्चञ्चलं वर्तते । हे राजन् ! यत्र यस्मिन्नायुषि रूपे च त्वं मुह्यसे मोहं प्राप्नोषि, प्रेत्यार्थं - परलोकार्थं च नावबुध्यसे-न जानासि ॥ १३ ॥

दाराणि य सुया चेव, मित्ता य तह बंधवा ।
जीवंतमणुजीवंति, मयं नाणुव्वयंति य ॥ १४ ॥

---

१ सर्वे जीवा अपि इच्छन्ति, जिवितुं, न मर्त्तुम् ॥

हे राजन् ! दाराः-स्त्रियः, च पुनः सुता-आत्मजाः, पुनर्मित्राणि, तथा बान्धवा ज्ञातयो भ्रातृप्रमुखाः, एते सर्वेऽपि जीवन्तं मनुष्यमनुजीवन्ति, जीवतो - धनवतः पुरुषस्य पृष्टे उदरपूर्तिं कुर्वन्ति, तस्य द्रव्यं भुञ्जतीत्यर्थः । परं तं पुरुषं मृतं नानुव्रजन्ति, मृतस्य तस्य पुरुषस्य पृष्टे केऽपि न व्रजन्तीत्यर्थः । तदाऽन्यद् गृहादिकं किं पुनः सह यास्यतीति ? अतः कृतघ्नेष्वादरो न विधेयः, तस्मात्परिकरे को रागः कर्तव्यः ॥ १४ ॥

नीहरंति मयं पुत्ता, पियरं परमदुक्खिया ।
पियरो वि तहा पुत्तो, बंधू रायं तवं चरे ॥ १५ ॥

हे राजन् ! पुत्रा मृतं पितरं नीहरन्ति-गृहान्निष्कासयन्ति । कीदृशाः पुत्राः ? परमदुःखिता अत्यन्तं शोकार्दिताः, पितरोऽपि-जनका अपि, तथा तेन प्रकारेण पुत्रान् मृतान्निष्कासयन्ति । एवं बान्धवा बान्धवान् मृतान्निष्कासयन्ति । तस्मादेवं ज्ञात्वा हे राजंस्तपश्चरेत्तपः कुर्वित्यर्थः ॥ १५ ॥

तओ तेणज्जिए दव्वे, दारे य परिरक्खिए ।
कीलंतऽन्ने नरा रायं, हट्ठतुट्ठमलंकिया ॥ १६ ॥

ततो निःसरणानन्तरं तेनैव पित्राद्यर्जितधनेन, च पुनर्दारेषु-स्त्रीषु हे राजन् ! अन्ये नराः क्रीडन्ति, स्वामिनि मृते सति तस्य धने तस्य स्त्रीषु चापरे मनुष्या हृष्टतुष्टं यथा स्यात्तथा हर्षिताः सन्तुष्टाः सन्तोऽलङ्कृता अलङ्काराऽयुक्ताः सन्तश्च क्रीडां कुर्वन्ति । कथंभूते धने ? परिरक्षिते, समस्तप्रकारेण चौराग्निप्रमुखेभ्यो रक्षिते । यावत्स जीवति तावद्धनस्य स्त्रीणां च रक्षां कुरुते, मृते सत्यन्ये भुञ्जन्ति, धनस्त्रीप्रमुखाः पदार्थास्तत्रैव तिष्ठन्ति, न च सार्थे समायान्ति । कोऽर्थः ? वराको जनो दुःखेन द्रव्यमुत्पाद्य यत्नेन रक्षति, दारानपि जीवितव्यमिव रक्षति, अलङ्कारैर्नवै रञ्जयति । तस्मिन् मृते सति तेनैव वित्तेन तैरेव दारैश्च, अन्ये हृष्टाः-शरीरे पुलकादिमन्तः, तुष्टा-आन्तरप्रीतिभाजोऽलङ्कृता विभूषिताः सन्तो रमन्ते, यत ईदशी भवस्थितिरस्ति । ततो हे राजंस्तपश्चरेत्तपः कुर्यादिति सम्बन्धः ॥ १६ ॥

तेणावि जं कयं कम्मं, सुहं वा जइ वा दुहं ।
कम्मुणा तेणसंजुत्तो, गच्छई उ परं भवं ॥ १७ ॥

तेनापि मरणोन्मुखेन जीवेन यच्छुभं कर्म, अथवाऽशुभं कर्म कृतं भवेत्, सुखं दुःखं वोपार्जितं स्यात्, तेन शुभाशुभलक्षणेन कर्मणा संयुक्तः सन् स जीवः परभवं गच्छति, एतावता जीवस्य सार्थेऽन्यत्किमपि नायाति, स्वोपार्जितं शुभाशुभं कर्म सार्थे समागच्छति ॥ १७ ॥

सोऊण तस्स सो धम्मं, अणगारस्स अंतिए ।
महया संवेगनिव्वेयं, समावन्नो नराहिवो ॥ १८ ॥

स संयतो राजा 'महया' इति महासंवेगनिर्वेदं समापन्नः, संवेगश्च निर्वेदश्च संवेग-निर्वेदम् संवेगः-मोक्षाभिलाषः,-निर्वेदः-संसारादुद्विग्नता, स राजा उभयं प्राप्त इत्यर्थः । किं कृत्वा ? तस्यानगारस्य साधोरन्तिके --समीपे धर्मं श्रुत्वा ॥ १८ ॥

संजओ चइउं रज्जं, निक्खंतो जिणसासणे ।
गद्दभालिस्स भगवओ, अणगारस्स अंतिए ॥ १९ ॥

संयतो राजा गर्दभालिनाम्नोऽनगारस्यान्तिके - समीपे जिनशासने - वीतरागधर्मे निष्क्रान्तः समागतः, संसाराद् गृहाच्च निःसृतः, जैनीं दीक्षामाश्रितः । किं कृत्वा ? राज्यं त्यक्त्वा ॥ १९ ॥

चिच्चा रट्ठं पव्वईओ, खत्तिओ परिभासई ।
जहा ते दीसई रूवं, पसन्नं ते तहा मणो ॥ २० ॥

अत्र वृद्धसम्प्रदायोऽयमस्ति-स संयतराजर्षिर्गर्दभालिनामाचार्यस्य शिष्यो जातः, पश्चाद् गीतार्थो जातः, समस्तसाध्वाचारविचारदक्षो गुरोरादेशेनैकाकी विहरन्नेकस्मिन् ग्रामे एकदा समागतोऽस्ति । तत्र ग्रामे क्षत्रियराजर्षिर्मिलितः, स क्षत्रियसाधुः संयतमुनिं प्रतिभाषते-वदति । परं स क्षत्रियमुनिः कीदृशोऽस्ति ? स हि पूर्वजन्मनि वैमानिक आसीत्, ततश्च्युत्वैकस्मिन् क्षत्रियकुले समुत्पन्नः, तत्र कुतश्चित्तथाविधनिमित्तदर्शनादुत्पन्नजातिस्मृतिस्ततः समुत्पन्नवैराग्यो राज्यं त्यक्त्वा प्रव्रजितः, स क्षत्रियो राजर्षिरनिर्दिष्टनामा क्षत्रिय-जातिविशिष्टत्वात् क्षत्रियमुनिर्जातिस्मृतिज्ञानवान्, स संयतं मुनिं दृष्ट्वा परिभाषते संयतस्य ज्ञानपरीक्षां कर्तुं, संयतमुनिमित्यध्याहारः । किं परिभाषते ? तदाह-हे साधो ! यथा येन प्रकारेण 'ते' तव रूपं - बाह्याकारं दृश्यते, तथा तेन प्रकारेण तव मनः प्रसन्नं - विकाररहितं वर्तते । अन्तःकालुष्ये ह्येवं प्रसन्नताऽसम्भवात् ॥ २० ॥

पुनः किं परिभाषते ? इत्याह-

किं नामे किं गोत्ते, कस्सट्ठाए व माहणे ।
कहं पडियरसि बुद्धे, कहं विणीए त्ति वुच्चसि ॥ २१ ॥

हे साधो ! तव किं नाम ? तव किं गोत्रम् ? पुनः 'कस्सट्ठाए' इति कस्मै अर्थाय वा त्वं माहनः प्रव्रजितोऽसि ? हे साधो ! त्वं बुद्धान् कथं प्रतिचरसि ? त्वमाचार्यान् केन प्रकारेण सेवसे ? पुनर्हे साधो ! त्वं कथं विनीत इत्युच्यसे ? अहं त्वां पृच्छामि ॥ २१ ॥

संजओ नाम नामेणं, तहा गोत्तेण गोयमो ।
गद्दभाली ममायरिया, विज्जाचरणपारगा ॥ २२ ॥

अथ क्षत्रियसाधोः प्रश्नान्तरं संयतसाधुरुवाच । हे साधो ! अहं संयत इति नाम्नाऽभिधानेन नाम प्रसिद्धोऽस्मि । तथा पुनरहं गोत्रेण गौतमोऽस्मि । ममाचार्या गुरवो गर्दभालि-

नामानः । कीदृशा मम गुरवः ? विद्याचरणपारगाः, विद्या च चरणं च विद्याचरणे, तयोः पारगा विद्याचरणपारगाः । विद्या—श्रुतज्ञानं, चरणं-चारित्रम्, तयोः पारगामिनः । अयमाशयः-अहं तैर्गर्दभालिनामाचार्यैर्जीवघातान्निवर्तितः, तन्निवृत्तौ मुक्तिफलमुक्तं च । ततस्तदर्थं माहनोऽस्मि । यथा [1]तदुपदेशं (तथा) गुरुन् प्रतिचरामि, तदुपदेशसेवनाच्च विनीतोऽस्मीति भावः ॥ २२ ॥

अथ तद्गुणबहुमानतोऽपृष्टोऽपि क्षत्रियमुनिराह-

किरियं १ अकिरियं २ विणयं ३, अन्नाणं ४ च महामुणी ।
एएहिं चउहिं ठाणेहिं, मेयन्ने किं पभासई ॥ २३ ॥

हे संयतमहामुने ! एतैश्चतुर्भिः स्थानैर्मिथ्यात्वाधारभूतैर्हेतुभिः कृत्वा मेयज्ञाः किं प्रभाषन्ते ? मेयं - जीवादिवस्तु जानन्तीति मेयज्ञाः-पदार्थज्ञाः कुतीर्थ्या वादिनः कुत्सितं प्रजल्पन्ते । एतावता एतैश्चतुर्भिर्हेतुभिर्मिथ्यात्विनः सर्वे त्रिषष्ट्युत्तरत्रिशतभेदाः (३६३) पाखण्डिनो यथावस्थिततत्वमजानाना यथातथा प्रलापिनः सन्ति, ते त्वया ज्ञातव्याः । तानि कानि चत्वारि स्थानानि ? क्रिया जीवादिसत्तारूपा १, पश्चादक्रिया जीवादिपदार्थानामक्रिया नास्तित्वरूपा २, विनयं सर्वेभ्यो नमस्कारकरणम् ३, अज्ञानं सर्वेषां पदार्थानामज्ञानं भव्यम् ४, एते ह्येकान्तवादित्वेन मिथ्यात्विनो ज्ञेयाः । कुत्सितभाषणं ह्येतेषां विचारस्याऽसहत्वात् ।

यतो हि सर्वथा सर्वत्र सत्तायाः सत्वात्सर्वत्र जीवः स्यात्, अजीवेऽपि जीवबुद्धिः स्यात् १ । पुनर्नास्तित्वे आत्मनो नास्तित्वेऽस्य प्रमाणबाधितत्वाच्च जीवाजीवयोरुभयोरपि सादृश्यं नास्तित्वं स्यात् २ । सर्वत्र विनये क्रियमाणे निर्गुणे विनयस्याऽशुभफलत्वात्, विनयोऽपि स्थाने एव कृतः फलदः, तस्मादेकान्तं विनयोऽपि न श्रेष्ठः ३ । अज्ञानं हि मुक्तिसाधने कारणं नास्ति, मुक्तेर्ज्ञानस्यैव कारणत्वात् हेयोपादेयपदार्थयोरपि ज्ञानैव साध्यत्वात्, ज्ञानं विना हितमपि न जानाति, तस्मादज्ञानमपि न श्रेष्ठम् ४ । तस्मात्क्रियावादिनः १, अक्रियावादिनः २, विनयवादिनः ३, अज्ञानवादिनश्च ४, सर्वेऽप्येते एकान्तवादिनो मिथ्यात्विनः कुतीर्थिनः कुत्सितभाषिणो ज्ञेयाः । एतेषां पाखण्डिनां सर्वे भेदाः (३६३) त्रिषष्ट्युत्तरत्रिशतप्रमिता भवन्ति । तत्र क्रियावादिनां १८०, अक्रियावादिनां ८४, विनयवादिनां ३२, अज्ञानवादिनां ६७, कुत्सितभाषितं हि न चैतत् स्वाभिप्रायेण, किन्तु भगवद्वचसैतेषां कुत्सितभाषितम् ॥ २३ ॥

तदाह-

इइ पाउकरे बुद्धे, नायए परिनिव्वुए ।
विज्जाचरणसंपन्ने, सच्चे सच्चपरक्कमे ॥ २४ ॥

इत्येते क्रियावादिनः कुत्सितं प्रभाषन्ते, इत्येवंरूपं वचनं बुद्धो-ज्ञाततत्त्वो ज्ञातकः श्रीमहावीरः प्रादुरकरोत्-प्रकटीचकार । कीदृशो ज्ञातकः ? परिनिर्वृतः, कषायाभावात्

---

१ तदुपदेशानुसारतो-मु० ॥

परि-समन्ताच्छीतीभूतः, पुनः कीदृशो ज्ञातकः ? विद्याचरणसम्पन्नाः, विद्याशब्देन क्षायकोत्तमज्ञानम्, चरणं-यथाख्यातचारित्रम्, ताभ्यां सम्पन्नः- सहितः, पुनः कीदृशः ? सत्यः सत्यवचनवादी, पुनः कीदृशः ? सत्यपराक्रमः सत्यवीर्यसहितः ॥ २४ ॥

तेषां फलमाह -

पडंति नरए घोरे, जे नरा पावकारिणो ।
दिव्वं च गइं गच्छंति, चरित्ता धम्ममारियं ॥ २५ ॥

पुनः क्षत्रियमुनिर्वदति, हे महामुने ! ये पापकारिणो नराः पापमसत्प्ररूपणं कुर्वन्तीत्येवंशीलाः पापकारिणो ये नरा भवन्ति, ते नरा घोरे-भीषणे नरके पतन्ति, च पुनर्धर्मं सत्यप्ररूपणारूपं 'चरित्ता' आराध्य दिव्यां-दिवः सम्बन्धिनीमुत्तमां गतिं गच्छन्ति । कथंभूतं धर्मं ? 'आरियं' आर्यं वीतरागोक्तमित्यर्थः । अत्र पापमसत्यवचनं ज्ञेयम्, धर्मं च सत्यवचनं ज्ञेयम् । एवं ज्ञात्वा भो संयत ! भवता सत्यप्ररूपणापरेणैव भाव्यमित्यर्थः ॥ २५ ॥

कथममी पापकारिणः ? इत्याह-

मायावुइयमेयं तु, मुसा भासा निरत्थिया ।
संजममाणो वि अहं, वसामि इरियामि य ॥ २६ ॥

एतत्क्रियाऽक्रियाविनयाऽज्ञानवादिनां मायोक्तम्, मायया-कपटेनोक्तं मायोक्तं शाठ्योक्तं ज्ञेयम्, एते सर्वेऽपि कपटेन मृषां भाषन्ते इत्यर्थः । एतेषां क्रियावादिनां तु तस्मात्कारणान्मृषा भाषा-असत्या भाषा निरर्थका सत्यार्थरहिता । अपि निश्चयेन तेनैव कारणेन हे साधो ! संयच्छन् पापान्निवर्तितः सन्, तेषां पाखण्डिनामसत्प्ररूपणातो निवर्तितः सन्नहं वसामि, निरवद्योपाश्रयादौ तिष्ठामि । अत्राहं पाखण्डिनां वाक्यरूपपापान्निवृत्तः सन् तिष्ठामीत्युक्तम्, तत्तस्य स्थिरीकरणार्थम् । यथाहमसत्प्ररूपणातो निवृत्तस्तथा त्वयापि निवर्तितव्यमित्यर्थः । यतः साधुः स्वयं साधुमार्गे स्थितोऽपरमपि साधुमार्गे स्थापयति । च पुनर्हे साधो ! अहं 'इरियामि' ति ईर्यया गच्छामि, गौचर्यादौ भ्रमामि ॥ २६ ॥

सव्वे ते विइया मज्झं, मिच्छादिट्ठी अणारिया ।
विज्जमाणे परे लोए, सम्मं जाणामि अप्पगं ॥ २७ ॥

हे साधो ! ते सर्वेऽपि क्रियाऽक्रियाविनयाऽज्ञानवादिनश्चत्वारोऽपि पाखण्डिनो मया विदिता - ज्ञाताः । एते चत्वारोऽपि मिथ्यादृष्टयो-मिथ्यादर्शनयुक्ताः । पुनरेते चत्वारोऽप्यनार्या अनार्यकर्मकर्तारः, सम्यग्मार्गविलुम्पकाः । मयैते यादृशाः सन्ति तादृशा ज्ञाताः । पुनर्हे मुने ! परलोके विद्यमाने सम्यक्प्रकारेण 'अप्पगं' आत्मानं स्वस्य परस्य च जानामि । आत्मा परलोकादागतस्ततोऽहं परलोकमात्मानं च सम्यग् जानामि । तेन कुतीर्थिनोऽपि सम्यग् ज्ञाताः, तेन कुतीर्थिनां सङ्गं न करोमि ॥ २७ ॥

कथं जानामीत्याह-

अहमासि महापाणे, जुइमं वरिससओवमे ।
जा सा पाली महापाली, दिव्वा वरिससओवमा ॥ २८ ॥

हे मुने ! अहं महाप्राणे विमाने पञ्चमे ब्रह्मलोके देव आसम् । कथंभूतोऽहं ? द्युतिमान्, द्युतिर्विद्यते यस्य स द्युतिमांस्तेजस्वी । पुनः कथंभूतोऽहं ? वर्षशतोपमो वर्षशत जीविनः पुरुषस्योपमा यस्यासौ वर्षशतोपमः । कोऽर्थः ? यथेह वर्षशतजीवीदानीं परिपूर्णायुरुच्यते, तथाहं तत्र विमाने परिपूर्णायुरभवम् । तत्र या पालिर्महापालिश्च, सा दिव्या स्थितिर्मेऽभूदिति शेषः । पालिशब्दस्य कोऽर्थः ? पालिरिव पालिर्जीवितजलधारणात्, पालिशब्देन भवस्थितिः कथ्यते, सा चेह पल्योपमप्रमाणा, महापालिः सागरोपम प्रमाणा स्थितिः कथ्यते । दिवि भवा दिव्या, देवसम्बन्धिनी स्थितिरित्यर्थः । कथंभूता पालिर्महापालिश्च ? वर्षशतोपमा, वर्षशतैः केशोद्धारहेतुभिरुपमीयते या सा वर्षशतोपमा, द्विविधापि दिव्या भवस्थितिस्तत्रास्ति । परं मे महापालिर्दिव्या भवस्थितिरासीदित्याम्नायः, दशसागरायुरहमासमित्यर्थः ॥ २८ ॥

से चुए बंभलोगाओ, माणुस्सं भवमागओ ।
अप्पणो य परेसिं च, आउं जाणे जहा तहा ॥ २९ ॥

'से' इति सोऽहमित्यध्याहारः सोऽहं ब्रह्मलोकात्पञ्चमदेवलोकाच्च्युतः सन् मानुष्यं भवं नरसम्बन्धिजन्म समागतः, आत्मनश्च पुनः परेषां च यथा [1]यथायुर्जीवितं वर्तते तथा जानामि, यस्य मानवस्य येन प्रकारेणायुरस्ति, तस्य तेन प्रकारेण सर्वं जानामि, परं विपरीतं न जानामि, सत्यं जानामि ॥ २९ ॥

नाणारुइं च छंदं च, परिवज्जेज्ज संजए ।
अणट्ठा जे य सव्वत्था, इइ विज्जामणुसंचरे ॥ ३० ॥

हे मुने ! संयतसाधो ! नानारुचि-क्रियावाद्यादिमतविषयमभिलाषं परिवर्जयेः । च पुनश्छन्दः- स्वमतिकल्पिताभिप्रायं नानाविधं परिवर्जयेः । च पुनर्येऽनर्था अनर्थहेतवो ये सर्वार्था अशेषहिंसादयो गम्यत्वात्तान् परिवर्जयेरिति सम्बन्धः । इत्येवंरूपां विद्यां सम्यग्ज्ञानरूपामनुलक्ष्यीकृत्य सञ्चरेस्त्वं संयमाध्वनि यायाः । अहमपीति विद्यां - ज्ञानं ज्ञात्वाङ्गीकृत्य संयममार्गे यामीति त्वयापि तथैव सञ्चरितव्यमिति हार्दम् ॥ ३० ॥

पडिक्कमामि पसिणाणं, परमंतेहिं वा पुणो ।
अहो उट्ठिअे अहोरायं, इइ विज्जा तवं चरे ॥ ३१ ॥

पुनः स्वाचारं वक्ति-हे मुने ! अहं 'पसिणाणं' इति प्राकृतत्वाद्विभक्तिव्यत्ययः । प्रश्नेभ्यः- शुभाशुभसूचकाङ्गुष्ठादिपृच्छाभ्यः प्रतिक्रमामि - पराङ्मुखो भवामि । वाथवा

---

१ तथा-D.L. ॥

पुनः परमन्त्रेभ्यः प्रतिक्रमामि प्रतिनिवर्ते, परस्य - गृहस्थस्थ मन्त्राणि - कार्यालोचनानि तेभ्यः परमन्त्रेभ्यः, एभ्यः सर्वेभ्यः पराङ्मुखो भवामि । 'अहो' इति आश्चर्ये, अहोरात्रमुत्थितो धर्मं प्रत्युद्यतः कश्चिदेव महात्मैवंविधः स्यात्, इति विदन्निति जानंस्तपश्चरेः, न तु प्रश्नमन्त्रादिके चरेः ॥ ३१ ॥

जं च मे पुच्छसि काले, सम्मं सुद्धेण चेयसा ।
ताइं पाउकरे बुद्धे, तं नाणं जिणसासणे ॥ ३२ ॥

अथ संयतमुनिना पृष्टम्, त्वमायुः कथं जानासि ? तदा पुनः क्षत्रियमुनिराह-हे संयत ! त्वं मां काले इति कालविषयमायुर्विषयं ज्ञानं पृच्छसि । कीदृशस्त्वं ? सम्यक् शुद्धेन-निर्मलेन चित्तेनोपलक्षितः, 'तमि' ति सूत्रत्वात्तद् ज्ञानं बुद्धः श्रीमहावीरः, अथवा बुद्धः श्रुतज्ञानवान् प्रादुरकरोत्, पुनस्तच्च ज्ञानं श्रीजिनशासने जानीहि । नापरस्मिन् कुत्रापि दर्शनेऽस्ति । ततोऽहं तत्र स्थितः, तत्प्रसादाद् बुद्धोऽस्मीति भावः ॥ ३२ ॥

किरियं च रोयए धीरो, अकिरियं परिवज्जए ।
दिट्ठीए दिट्ठीसंपन्ने, धम्मं चर सुदुच्चरं ॥ ३३ ॥

धीरोऽक्षोभ्यः क्रियां जीवस्य विद्यमानतां-जीवसत्तां रोचयति, स्वयं स्वस्मै अभिलषयति, तथा परस्मै अप्यभिलषयतीत्यर्थः । अथवा क्रियां-सम्यगनुष्ठानरूपां प्रतिक्रमणप्रतिलेखनारूपां मोक्षमार्गसाधनभूतां ज्ञानसहितां क्रियां रोचयति । पुनरक्रियां जीवस्य नास्तित्वं -जीवे जीवस्याऽविद्यमानतां परिवर्जयेत्, अथवा अक्रियां मिथ्यात्विभिः कल्पितां कष्टक्रियामज्ञानक्रियां परित्यजेत् । पुनर्धीरः पुमान् दृष्ट्या-सम्यग्दर्शनात्मिकया दृष्टिसम्पन्नो भवति । दृष्टिः- सम्यग्ज्ञानात्मिका बुद्धिस्तया सम्पन्नः- सहितो दृष्टिसम्पन्नः, सम्यग्दर्शनेन सम्यग्ज्ञान-सहितः इत्यर्थः । तस्मात्त्वमपि सम्यग्ज्ञानदर्शनसहितः सन् सुदुश्चरं कर्तुमशक्यं धर्मं - चारित्रधर्मं चर-अङ्गीकुरु ॥ ३३ ॥

अथ क्षत्रियमुनिः संयतमुनिं प्रति महापुरुषाणां धर्ममार्गप्रवर्तितानां दृष्टान्तेन दृढीकरोति ।

एयं पुण्णपयं सोच्चा, अत्थधम्मोवसोहियं ।
भरहोवि भारहं वासं, चिच्चा कामाइं पव्वए ॥ ३४ ॥

हे मुने ! भरतोऽपि भरतनामा चक्रयपि भारतं क्षेत्रं षट्खण्डर्द्धिं त्यक्त्वा, पुनः कामान् - कामभोगांस्त्यक्त्वा प्रव्रजितो दीक्षां प्रपन्न इत्यर्थः । किं कृत्वा ? एतत्पूर्वोक्तं पुण्यपदं श्रुत्वा, पुण्यं च तत्पदं च पुण्यपदम्, पुण्यं-पवित्रमर्थान्निष्कलङ्कं-निर्दूषणम्, अथवा पुण्यं-पुण्यहेतुभूतम्, एतादृशं पदम्, पद्यते ज्ञायतेऽर्थोऽनेनेति पदं सूत्रं जिनोक्तमा-गमम्, क्रियावाद्यादिनानारुचिवर्जननिवेदकशब्दसूचनालक्षणम्, तत् श्रवणविषयीकृत्य । अथवा पूर्णं पदम्, पूर्णपदं सम्पूर्णज्ञानम्, पदशब्देन ज्ञानमप्युच्यते । कीदृशं पुण्यपदम् ? अर्थधर्मोपशोभितम्, अर्थ्यते प्रार्थ्यते इत्यर्थः, स्वर्गापवर्गलक्षणः पदार्थः, धर्मस्तदुपायभूतः

स्वर्गापवर्गप्राप्तिकारणभूतः, अर्थश्च धर्मश्चार्थधर्मौ, ताभ्यामुपशोभितमर्थधर्मोपशोभितम्। एतादृशं जिनोक्तं सिद्धान्तमर्थधर्मसहितं श्रुत्वा यदि भरतश्चक्रधरः सम्पूर्णभरतक्षेत्रं षट्खण्ड-साम्राज्यं त्यक्त्वा दीक्षां जग्राह, तदा त्वयाप्यस्मिन् जिनोक्तागमे चलितव्यम्, [१]महाजनो येन गतः स पन्थेत्युक्तत्वात्। सकलनृपेषु ऋषभपुत्रो भरतो मुख्यस्तेनायं मार्गः समाश्रित इत्यर्थः ॥ ३४ ॥ अथात्र भरतचक्रिणः कथा-

अयोध्यायां नगर्यां श्री ऋषभदेवपुत्रः पूर्वभवकृतमुनिजनवैयावृत्त्यार्जितचक्रिभोगः प्रथमचक्री भरतनामास्ति तस्य नवनिधानानां चतुर्दशरत्नानां द्वात्रिंशत्सहस्रनरपतीनां द्विसप्ततिसहस्रपुरवराणां षण्णवतिकोटिग्रामाणां चतुरशीतिशतसहस्रहयगजरथानां षट्खण्डभरतस्यैश्वर्यं कुर्वतः स्वसम्पत्त्यनुसारेण साधर्मिकवात्सल्यं कुर्वतः, स्वयं कारिताष्टापदशिरःसंस्थितचतुर्मुखयोजनायामजिनायतनमध्यस्थापितनिजनिजवपुः-प्रमाणोपेतश्रीऋषभादिचतुर्विंशतिजिनप्रतिमावन्दनार्चनं समाचरतः श्रीभरतचक्रिणः पञ्च पूर्वलक्षाण्यतिक्रान्तानि।

अन्यदा महाविभूत्योद्वर्तितदेहः सर्वालङ्कारविभूषितः स भरतचक्री आदर्शभवने गतः। तत्र स्वदेहं प्रेक्षमाणस्याङ्गुलीयकं पतितं, तच्च तेन न ज्ञातं। आदर्शभित्तौ स्वदेहं पश्यता तेन पतिता मुद्रिका स्वकराङ्गुल्यशोभमाना दृष्टा। ततो द्वितीयाङ्गुलीतोऽपि मुद्रिका-ऽपनीता। साप्यशोभमाना दृष्टा। ततः क्रमात्सर्वाङ्गाभरणान्युत्तारितानि। तदा स्वशरीरमतीवाशोभमानं निरीक्ष्य संवेगमापन्नश्चक्री एवं चिन्तितुं प्रवृत्तः। अहो ! आगन्तुकद्रव्यैरेवेदं शरीरं शोभते, न स्वभावसुन्दरम्। अपि चैतच्छरीरसङ्गेन सुन्दरमपि वस्तु विनश्यति उक्तं च-

मणुन्नं असणपाणं, विविहं खाइमसाइमं।
सरीरसंगमावन्नं, सव्वंपि असुई भवे ॥ १ ॥
वरं वत्थं वरं पुप्फं, वरं गंधविलेवणं।
विनस्सए सरीरेण, वरं सयणमासणं ॥ २ ॥
निहाणं सव्वरोगाणं, कयग्घमथिरं इमं।
पंचासुहभूअमयं, अथक्कपरिक्कमणं ॥ ३ ॥

तत एतच्छरीरकृते सर्वथा न युक्तमनेकपापकर्मकरणेन मनुष्यजन्महारणम् यत उक्तम्-

"लोहाय नावं जलधौ भिनत्ति, सूत्राय वैडूर्यमणिं हणाति।
सच्चंदनं प्लोषति भस्महेतो-र्यो, मानुषत्वं नयतीन्द्रियार्थे ॥ १ ॥"

इत्यादिकं चिन्तयतस्तस्य भरतस्य प्राप्तभावचारित्रस्य प्रवर्धमानशुभाध्यवसायक्षप-कश्रेणिप्रपन्नस्य केवलज्ञानमुत्पन्नम् शक्रस्तत्र समायातः, कथयति च द्रव्यलिङ्गं प्रपद्यस्व। येन दीक्षोत्सवं करोमि। ततो भरतकेवलिना स्वमस्तके पञ्चमौष्टिको लोचः कृतः, शासनदेव-

---

१ बृहच्छान्तौ द्वितीयगाथायां एष पाठोऽस्ति ॥

तया च रजोहरणोपकरणानि दत्तानि । दशसहस्रराजभिः समं प्रव्रजितो भरतः । शेषचक्रिणस्तु सहस्रपरिवारेण प्रव्रजिताः । ततः शक्रेण वन्दितोऽसौ ग्रामाकरनगरेषु भ्रमन् भव्यसत्वान् प्रतिबोधयन् एकपूर्वलक्षं यावत् केवलिपर्यायं पालयित्वा परिनिर्वृतः । तत्पट्टे च शक्रेणादित्ययशा नृपोऽभिषिक्तः । इति भरतदृष्टान्तः ॥ ३४ ॥

पुनस्तदेव महापुरु षदृष्टान्तेन दृढयति-

सगरो वि सागरंतं, भरहवासं नराहिवो ।
इस्सरियं केवलं हिच्चा, दयाइ परिनिव्वुडे ॥ ३५ ॥

हे मुने ! सगरोऽपि सगरनामा नराधिपोऽपि दयया संयमेन परिनिर्वृत्तः, कर्मभ्यो मुक्तः । अत्र नराधिपशब्देन अपिशब्दाद् द्वितीयश्चक्रवर्त्त्यधिकारादनुक्तोऽपि चक्रेव गृह्यते । किं कृत्वा ? भरतवर्षं - भरतक्षेत्रमर्थाद्भरतक्षेत्रराज्यं त्यक्त्वा, पुनः केवलं परिपूर्णमेकच्छत्ररूपमैश्वर्यं हित्वा-त्यक्त्वा, कीदृशं भरतवर्षं ? सागरान्तं समुद्रान्तसहितम् चुल्लहिमवत्पर्वतं यावद्विस्तीर्णं भरतक्षेत्रराज्यमित्यर्थः ॥ ३५ ॥

अत्र सगरचक्रवर्तिदृष्टान्तः, तथाहि -

अयोध्यायां नगर्यामीक्ष्वाकुकुलोद्भवो जितशत्रुनृपोऽस्ति, तस्य भार्या विजयानाम्न्यस्ति । सुमित्रनामा जितशत्रुसहोदरो युवराजो वर्तते, तस्य यशोमतीनाम्नी भार्यास्ति । जितशत्रुराज्ञ्या विजयानाम्न्या चतुर्दशमहास्वप्नसूचितः पुत्रः प्रसूतः, तस्य नामाऽजित इति दत्तम्, स च द्वितीयस्तीर्थकर इति । सुमित्रयुवराजपत्न्या यशोमत्या सगरनामा द्वितीयश्चक्रवर्ती प्रसूतः । तौ द्वावपि यौवनं प्राप्तौ, पितृभ्यां कन्याः परिणायिताः । कियता कालेन जितशत्रुराज्ञा निजे राज्येऽजितकुमारः स्थापितः, सगरश्च यौवराज्ये स्थापितः । सहोदरसुमित्रसहितेन जितशत्रुनृपेण दीक्षा गृहीता । अजितराज्ञा च कियत्कालं राज्यं परिपाल्य तीर्थप्रवर्तनसमये स्वराज्ये सगरं स्थापयित्वा दीक्षा गृहीता । सगरस्तूत्पन्नचतुर्दशरत्नः साधितषट्खण्डभरतक्षेत्रो राज्यं पालयति । तस्य पुत्राः षष्टिसहस्रसङ्ख्याका जाताः, सर्वेषां तेषां मध्ये ज्येष्ठो जह्नुकुमारो वर्तते । अन्यदा जह्नुकुमारेण कथञ्चित्सगरः सन्तोषितः । स उवाच जह्नुकुमार ! यत्तव रोचते तन्मार्गय ? जह्नुरुवाच-तात ! ममास्त्ययमभिलाषः । यत्तातानुज्ञातोऽहं चतुर्दशरत्नसहितोऽखिलभ्रातृपरिवृतः पृथ्वीं परिभ्रमामि । सगरचक्रिणा तत्प्रतिपन्नम् ।

प्रशस्ते मुहुर्ते सगरचक्रिणः समीपात्स निर्गतः, सबलवाहनोऽनेकजनपदेषु भ्रमन् प्राप्तोऽष्टापदपर्वते । सैन्यमधस्तान्निवेश्य स्वयमष्टापदपर्वतमारूढः दृष्ट्वांस्तत्र भरतनरेन्द्रकारितं मणिकनकमयं चतुर्विंशतिजिनप्रतिमाधिष्ठितं स्तूपशतसङ्कुलं जिनायतनम् । तत्र जिनप्रतिमा अभिवन्द्य जह्नुकुमारेण मन्त्री पृष्टः, केन सुकृतवतेदमतीवरमणीयं जिनभवनं कारितम् ? मन्त्रिणा कथितं भवत्पूर्वजेन श्रीभरतचक्रिणेति श्रुत्वा जह्नुकुमारोऽवदत्-अन्यः कश्चिदष्टापदसदृशः पर्वतोऽस्ति ? यत्रेदृशमन्यं चैत्यं कारयामः । चतसृषु दिक्षु पुरुषास्तद्गवेषणाय

प्रेषिताः, ते सर्वत्र परिभ्रम्य समायाताः, ऊचुश्च स्वामिन् ! ईदृशः पर्वतः क्वापि नास्ति, जह्नुना भणितं यद्येवं वयं कुर्म एतस्यैव रक्षाम् । यतोऽत्र क्षेत्रे कालक्रमेण लुब्धाः शठाश्च नरा भविष्यन्ति । अभिनवकरणात्पूर्वकृतपरिपालनं श्रेयः । ततश्च दण्डरत्नं गृहीत्वा समन्ततोऽष्टापदपार्श्वेषु जह्नुप्रमुखाः सर्वेऽपि कुमाराः खातुं लग्नाः । तच्च दण्डरत्नं योजनसहस्रं भित्त्वा प्राप्तं नागभवनेषु, तेन तानि भिन्नानि दृष्ट्वा नागकुमाराः शरणं गवेषयन्तो गता नागराजज्वलनप्रभसमीपे, कथितः स्वभवनविदारणवृत्तान्तः । सोऽपि सम्भ्रान्त उत्थितोऽवधिना ज्ञात्वा क्रोधोद्धुरः समागतः सगरसुतसमीपम् भणितवांश्च भो भो किं भवद्भिर्दण्डरत्नेन पृथ्वीं विदार्यास्मद्भवनोपद्रवः कृतः ? अविचार्यं भवद्भिरेतत्कृतम् । यत उक्तं-

[1]अप्पवहाए नूणं होइ, बलं गर्वितानाम् भुवणंमि ।
णियपक्खबलेणं चिय, पडइ पयंगो पईवंमि ॥ १ ॥

ततो नागराजोपशमननिमित्तं जह्नुना भणितम् भो नागराज ! कुरु प्रसादम्, उपसंहर क्रोधसम्भरम्, क्षमस्वास्मदपराधमेकम्, न ह्यस्माभिर्भवतामुपद्रवनिमित्तमेतत्कृतम्, किन्त्वष्टापदचैत्यरक्षार्थमेषा परिखा कृता । न पुनरेवं करिष्यामः । तत उपशान्तकोपो ज्वलनप्रभः स्वस्थानं गतः । जह्नुकुमारेण भ्रातृणां पुर एवं भणितम्, एषा परिखा दुर्लङ्घ्यापि जलविरहिता न शोभते, तत इमां नीरेण पूरयामः दण्डरत्नेन गङ्गां भित्त्वा जह्नुना जलमानीतम्, भृता च परिखा । तज्जलं नागभवनेषु प्राप्तम्, जलप्रवाहसन्त्रस्तं नागनागिनीप्रकरमितस्ततः प्रणश्यन्तं प्रेक्ष्य प्रदत्तावधिज्ञानोपयोगः कोपानलज्वालामालाकुलो ज्वलनप्रभ एवमचिन्तयत् यदहो ! एतेषां जह्नुकुमारादीनां महापापानां मयैकवारमपराधः क्षान्तः, पुनरधिकतरमुपद्रवः कृतः, ततो दर्शयाम्येषामविनयफलम् ।

इति ध्यात्वा ज्वलनप्रभेण तद्वधार्थं नयनविषा महाफणिनः प्रेषिताः, तैः परिखाजलान्तर्निर्गत्य नयनैस्ते कुमाराः प्रलोकिताः, भस्मराशीभूताश्च सर्वेऽपि सगरसुताः । तथाभूतांस्तान् वीक्ष्य सैन्ये हाहारवो जातः, मन्त्रिणोक्तमेते तु तीर्थरक्षां कुर्वन्तोऽवश्यभावितयेमामवस्थां प्राप्ताः सद्गतावेव गता भविष्यन्तीति किं शोच्यते ? अतस्त्वरितमितः प्रयाणं क्रियते, गम्यते च महाराजचक्रिसमीपम् । सर्वसैन्येन मन्त्रिवचनमङ्गीकृतम्, ततस्त्वरितप्रयाणकरणेन क्रमात्प्राप्तं स्वपुरसमीपे । ततः सामन्तामात्यादिभिरेवं विचारितं समस्तपुत्रवधोदन्तः कथं चक्रिणो वक्तुं पार्यते ? ते सर्वे दग्धाः, वयं चाक्षताङ्गाः समायाता एतदपि प्रकामं त्रपाकरम् । ततः सर्वेऽपि वयं प्रविशामोऽग्नौ । एवं विचारयतां तेषां पुरः समायात एको द्विजः । तेनेदमुक्तम्-भो वीराः ! किमेवमाकुलीभूताः ? मुञ्चत विषादम्, यतः संसारे न किञ्चित्सुखम्, दुःखमत्यन्तमद्भुतमस्ति, भणितं च-

"कालंमि अणाईए, जीवाणं विविहकम्मवसगाणं ।
तं नत्थि संविहाणं, जं संसारे न संभवइ ॥ १ ॥"

---

१ आत्मवधार्थं नूनं, भवति बलं गर्वितानां भुवने । निजपक्षबलेन चैव, पतति पतङ्गः प्रदीपे ॥ १ ॥

अहं सगरचक्रिणः पुत्रवधव्यतिकरं कथयिष्यामि । सामन्तादिभिस्तद्वचः प्रतिपन्नम् । ततः स द्विजो मृतं बालकं करे धृत्वा मुष्टोऽस्मीति वदन् सगरचक्रिगृहद्वारे गतः । चक्रिणा तस्य विलापशब्दः श्रुतः । चक्रिणा स द्विज आकारितः, केन मुष्टोऽसीति चक्रिणा पृष्टः । स प्राह-देव ! एक एव मे सुतः सर्पेण दष्टो मृतः एतद्दुःखेनाहं विलपामीति । हे करुणासागर ! त्वमेनं जीवय, अस्मिन्नवसरे तत्र मन्त्रिसामन्ताः प्राप्ताः, चक्रिणं प्रणम्य चोपविष्टाः । तदानीं चक्रिणा राजवैद्यमाकार्यैवमुक्तम्, एनं निर्विषं कुरु ? वैद्येन तु चक्रिसुतमरणं श्रुतवतोक्तम्, राजन् ! यस्मिन् कुले कोऽपि न मृतस्तत्कुलाद् भस्म यद्येष आनयति तदैनमहं जीवयामि । द्विजेन गृहे गृहे प्रश्नपूर्वकं भस्म मार्गितम् । गृहमनुष्याः स्वमातृपितृभ्रातृदुहितृप्रमुखकुटुम्बमरणान्याचख्युः । द्विजश्चक्रिसमीपे समागत्योवाच, नास्ति वैद्योपदिष्टताद्दशभस्मोपलब्धिः । सर्वगृहे कुटुम्बमनुष्यमरणसद्भावात् । [[1]चक्रिणोक्तं] यद्येवं तत्किं स्वपुत्रं शोचसि ? सर्वसाधारणमिदं मरणम् । उक्तं च-

"[2]किं अत्थि कोइ भुवणे, जस्स जायाइं नेव यायाइं ।
नियकम्मपरिणईए, जम्ममरणाइं संसारे ॥ १ ॥"

ततो भो ब्राह्मण ! मा रुद ? शोकं मुञ्च । आत्महितं कार्यं चिन्तय । यावत्त्वमप्येवं मृत्युसिंहेन न कवलीक्रियसे । विप्रेण भणितम्-देव ! अहमपि जानाम्येवम्, परं पुत्रमन्तरेण सम्प्रति मे कुलक्षयः, तेनाहमतीवदुःखितः, त्वं तु दुःखितानाथवत्सलोऽप्रतिहतप्रतापश्चासि, ततो मे देहि पुत्रजीवितदानेन मनुष्यभिक्षाम् ? चक्रिणा भणितं-भद्र ! इदमशक्यप्रतिकारम् । उक्तं च-

"[3]सीयंति सव्वसत्ताइं, एत्थ न कम्मंति मंततंताइं ।
अदिट्ठपहरगंसि, विहिंपि किं पोरुसं कुणई ॥ १ ॥"

ततः परित्यज्य शोकं, कुरु परलोकहितं । मूर्ख एव हृते नष्टे मृते करोति शोकम् । विप्रेण भणितं-महाराज ! सत्यमेतत्, न कार्योऽत्र जनकेन शोकः, ततस्तवमपि मा कार्षीः शोकम्, असम्भावनीयं भवतः शोककारणं जातम् । सम्भ्रान्तेन चक्रिणा पृष्टं-भो विप्र ! कीदृशं मम शोककारणं जातम् ? विप्रेण भणितं-देव ! तव षष्टिसहस्राः पुत्राः कालं गताः । इदं श्रुत्वा चक्री वज्रप्रहाराहत इव नष्टचेतनः सिंहासनान्निपतितो मूर्च्छितः, सेवकैरुपचरितश्च । मूर्च्छावसाने च शोकातुरमना मुत्कलकण्ठेन रुरोद, एवं विलापांश्च चकार । हा पुत्राः ! हा हृदयदयिताः ! हा बन्धुवल्लभाः ! हा शुभस्वभावाः ! हा विनीताः ! हा सकलगुणनिधयः !

कालेऽनादौ, जीवानां विविधकर्मवशगानाम् । तद् नास्ति संविधानं यद् संसारे न संभवति ॥ १ ॥

१. चक्रिणोक्तं-D.L. नास्ति ॥

२. किमस्ति कोऽपि भुवने, यस्य जातानि जातं नैव यातानि (यातम्) ।
निजकर्मपरिणत्या, जन्ममरणानि संसारे ॥ १ ॥

३. सीदन्ति सर्वसत्त्वानि, अत्र न क्रमन्ते मन्त्रतन्त्रादि ।
अदृष्टप्रहरके विधिमपि किं पौरुषं करोति ॥ १ ॥

कथं मामनाथं मुक्त्वा यूयं गताः ? युष्मद्विरहार्त्तस्य मम दर्शनं ददत । हा निर्दय पापविधे ! एकपदेनैव सर्वांस्तान् बालकान् संहरतस्तव किं पूर्णं जातम् ! हा निष्ठुरहृदय ! असह्यसुतमरणसन्तप्तं त्वं किं न शतखण्डं भवसि ? एवं विलपमानश्चक्री तेन विप्रेण भणितः-महाराज ! त्वं मम सम्प्रत्येवमुपदिष्टवान्, स्वयं च कथं शोकं गच्छसीति ? उक्तं च-

"[1]परवसणंमि सुहेण, संसारासारत्तं कहइ लोओ ।
णियबंधुजणविणासे, सव्वस्सवि चलइ धीरत्तं ॥ १ ॥"

एकपुत्रस्यापि मरणं दुस्सहम्, किं पुनः षष्टिसहस्रपुत्राणां ? तथापि सत्पुरुषा व्यसनं सहन्ते । पृथिव्येव वज्रनिपातं सहते, नापर इति । अतोऽवलम्बस्व सुधीरत्वं, अलमत्र विलपितेन । यत उक्तं-

"[2]सोयंताण पि नो ताणं, कम्मबंधो उ केवलो ।
तो पंडिया न सोयंति, जाणंता भवरूवयं ॥ १ ॥"

एवमादिवचनविन्यासैर्विप्रेण स्वस्थीकृतो राजा, भणिताश्च तेनैव सामन्तमन्त्रिणः, वदन्तु यथावृत्तं षष्टिसहस्रपुत्रमरणव्यतिकरम् । तैरुक्तः सकलोऽपि तद्व्यतिकरः, प्रधानपुरुषैः सर्वैरपि राजा धीरतां नीतः, उचितकृत्यं कृतवान् । अत्रान्तरेऽष्टापदासन्नवासिनो जनाः प्रणतशिरस्काश्चक्रिण एवं कथयन्ति, यथा देव ! यो युष्मदीयसुतैरष्टापदरक्षणार्थं गङ्गाप्रवाह आनीतः, स आसन्नग्रामनगराण्युपद्रवति, तं भवान्निवारयतु देव अन्यस्य कस्यापि तन्निवारणशक्तिर्नास्तीति । चक्रिणा स्वपौत्रो भगीरथिर्भणितः-वत्स ! नागराजमनुज्ञाप्य दण्डरत्नेन गङ्गाप्रवाहं नय समुद्रम् । ततो भगीरथिरष्टापदसमीपं गतः, अष्टमभक्तेन आराधितः समागतो नागराजो भणति-किं ते सम्पादयामि ? प्रणामपूर्वं भगीरथिना भणितम्-तव प्रसादेनामुं गङ्गाप्रवाहमुदधिं नयामि । अष्टापदासन्नलोकानां महानुपद्रवोऽस्तीति । नागराजेन भणितम्, विगतभयस्त्वं कुरु स्वसमीहितम् ! निवारयिष्याम्यहं भरतनिवासिनो नागान् । इति भणित्वा नागराजः स्वस्थानं गतः । भगीरथिनापि कृता नागानां बलिकुसुमादिभिः पूजा, ततः प्रभृति लोको नागबलिं करोति ।

भगीरथिर्दण्डेन गङ्गाप्रवाहमाकर्षन् भञ्जंश्च बहून् स्थलशैलप्रवाहान् प्राप्तः पूर्वसमुद्रम्, तत्रावतारिता गङ्गा । तत्र नागानां बलिपूजा विहिता । यत्र गङ्गा सागरे प्रवाहिता, तत्र गङ्गासागरतीर्थं जातम् । गङ्गा जह्नुनाऽऽनीतेति जाह्नवी, भगीरथिनाऽऽनीतेति भागीरथी । भगीरथिस्तदा मिलितैर्नागैः पूजितो गतोऽयोध्याम् । पूजितश्चक्रिणा तुष्टेन स्थापितः स्वराज्ये । सगरचक्रवर्तिना श्रीअजितनाथतीर्थपति समीपे दीक्षा गृहीता । क्रमेण च कर्मक्षयं कृत्वा सगरः सिद्धः । अन्यदा भगीरथिना राज्ञा कश्चिदतिशयज्ञानी पृष्टः-भगवन् ! किं कारणं

---

१ परव्यसने सुखेन, संसारासारत्वं कथयति लोकः ।
निजबन्धुजनविनाशे, सर्वस्याऽपि चलति धीरत्वम् ॥ १ ॥

२ शोचतामपि न त्राणं, कर्मबन्धस्तु केवलः ।
तस्मात् पण्डिता न शोचन्ति, जानन्ता भवस्वरूपम् ॥ २ ॥

यज्जह्नुप्रमुखाः षष्टिसहस्रा भ्रातरः समकालं मरणं प्राप्ताः ? ज्ञानिना भणितम्-महाराज ! एकदा महान् सङ्घश्चैत्यवन्दनार्थं सम्मेतपर्वते प्रस्थितः, अरण्यमुल्लङ्घ्यान्तिमग्रामं प्राप्तः । तन्निवासिना सर्वेणानार्यजनेनात्यन्तमुपद्रुतो दुर्वचनेन वस्त्रान्नधनहरणादिना च । तत्प्रत्ययं तद्ग्रामवासिलोकैरशुभं कर्म बद्धम् । तदानीमेकेन प्रकृतिभद्रकेण कुम्भकारेणोक्तम्, मोपद्रवतेमं तीर्थयात्रागतं जनम्, इतरस्यापि निरपराधस्य परिक्लेशनं महापापस्य हेतुर्भवति, किं पुनरेतस्य धार्मिकजनस्य ? यतो यद्येतस्य सङ्घस्य स्वागतप्रतिपत्तिं कर्तुं न शक्तास्तदोपद्रवं तु रक्षतेति भणित्वा कुम्भकारेण निवारितः स ग्रामजनः । सङ्घस्ततो गतः । अन्यदा तद्ग्राम-निवासिनैकेन नरेण राजसन्निवेशे चौर्यं कृतम् । ततो राजनियुक्तैः पुरुषैः स ग्रामो द्वारपिधान-पूर्वकं ज्वालितः । तदा स कुम्भकारः साधुप्रसिद्ध्या ततो निष्कासितोऽन्यस्मिन् ग्रामे गतः । तत्र षष्टिसहस्रजना दग्धाः, उत्पन्ना विराटविषयेऽन्ति-मग्रामे कोद्रवित्वेन । ताः क्रोद्रव्य एकत्र पुञ्जीभूताः स्थिताः सन्ति । तत्रैकः करी समायातः, तच्चरणेन ताः सर्वा अपि मर्दिताः । ततो मृतास्ते नानाविधासु दुःखप्रचुरासु योनिषु सुचिरं परिभ्रम्यानन्तरभवे किञ्चिच्छुभ-कर्मोपार्ज्य सगरचक्रिसुतत्वेनोत्पन्नाः । षष्टिसहस्रप्रमाणा अपि ते तत्कर्मशेषवशेन तादृशं मरणव्यसनं प्राप्ताः । सोऽपि कुम्भकारस्तदा स्वायुःक्षये मृत्वा एकस्मिन् सन्निवेशे धनसमृद्धो वणिग्जातः । तत्र कृतसुकृतो मृत्वा नरपतिः सञ्जातः । तत्र शुभानुबन्धेन शुभकर्मोदयेन प्रतिपन्नो मुनिधर्मं शुद्धं च परिपाल्य ततो मृत्वा सुरलोकं गतः । ततश्च्युतस्त्वं जह्नुसुतो जातः । इदं भगीरथिः श्रुत्वा संवेगमुपागतस्तमतिशयज्ञानिनं नत्वा गतः स्वभवनम् । इदं च भगीरथिपृच्छासंविधानकं प्रसङ्गत उक्तम् इति सगरदृष्टान्तः २ ॥ ३५ ॥

चइत्ता भारहं वासं, चक्कवट्टी महड्ढिए ।
पव्वज्जमब्भुवगओ, मघवं नाम महाजसो ॥ ३६ ॥

पुनर्मघवानामा तृतीयचक्रवर्ती प्रव्रज्यां दीक्षामभ्युगतश्चारित्रं प्राप्तः कीदृशो मघवा ? महर्द्धिकश्चतुर्दशरत्ननवनिधानधारको वैक्रियर्द्धिधारी वा । पुनः कीदृशः ? महायशा-विस्तीर्णकीर्तिः ॥ ३६ ॥

अत्र मघवाख्यस्य चक्रिणो दृष्टान्तः-

इहैव भरतक्षेत्रे श्रावत्स्यां नगर्यां समुद्रविजयस्य राज्ञो भद्रादेव्याः कुक्षौ चतुर्दश-महास्वप्नसूचितो मघवानामा चक्री समुत्पन्नः । स च यौवनस्थो जनकेन वितीर्णराज्यः क्रमेण प्रसाधितभरतक्षेत्रस्तृतीयश्चक्रवर्ती जातः । सुचिरं राज्यमनुभवतस्तस्यान्यदा भवविरक्ता जाता । स एवं भावयितुं प्रवृत्तः, येऽत्र प्रतिबन्धहेतवो रमणीयाः पदार्थास्तेऽ-स्थिराः उक्तं च -

"हियइच्छिया उ दारा, सुआ विणीया मणोरमा भोगा ।
विउला लच्छी देहो, निरामओ दीहजीवित्तं ॥ १ ॥"[1]

---

१ "हितेच्छिता तु दारा, सुता विनीता मनोरमा भोगा ।
विपुला लक्ष्मी देहो, निरामयो दीर्घजीवितम् ॥ १ ॥"

भवपडिबंधनिमित्तं, एगाइवत्थु न वरं सव्वंपि ।
कइवयदिणावसाणे, सुमिणोभोगुव्व न हि किंचि[1] ॥ २ ॥

ततोऽहं धर्मकर्मण्युद्यमं करोमि, धर्म एव भवान्तरानुगामी । एवमादिकं परिभाव्य पुत्रनिहितराज्यो मघवाचक्री परिव्रजितः कालक्रमेण विविधतपश्चरणेन कालं कृत्वा सनत्कुमारे कल्पे गतः । इति मघवादृष्टान्तः ३ ॥ ३६ ॥

सणंकुमारो मणुस्सिंदो, चक्कवट्टी महड्ढिओ ।
पुत्तं रज्जे ठविऊणं, सो वि राया तवं चरे ॥ ३७ ॥

पुनः सनत्कुमारो मनुष्येन्द्रश्चतुर्थचक्री, सोऽपि तपश्चारित्रं समाचरेदित्यर्थः । किं कृत्वा ? पुत्रं राज्ये स्थापयित्वा । स च कीदृशः ? महर्द्धिकः ॥ ३७ ॥

अत्र सनत्कुमारदृष्टान्तः-

अस्त्यत्र भरतक्षेत्रे कुरुजङ्गलजनपदे हस्तिनागपुरं नाम नगरम् । तत्राश्वसेनो नाम राजा । तस्य भार्या सहदेवीनाम्नी । तयोः पुत्रश्चतुर्दशस्वप्नसूचितश्चतुर्थचक्रवर्ती सनत्कुमारो नाम । तस्य सूरिकालिन्दीतनयेन महेन्द्रसिंहेन परममित्रेण समं कलाचार्यसमीपे सर्वकलाभ्यासो जातः । सनत्कुमारो यौवनमनुप्राप्तः । अन्यदा वसन्तसमयेऽनेकराजपुत्रनगरलोकसहितः सनत्कुमारः क्रीडार्थमुद्याने गतः तत्राश्वक्रीडां कर्तुं सर्वे कुमारा अश्वारूढाः स्वं स्वमश्वं खेलयन्ति । सनत्कुमारोऽपि जलधिकल्लोलाभिधानं तुरङ्गमारूढः । समकालं सर्वैः कुमारैः मुक्ताः, ततो विपरीतशिक्षितेन कुमाराश्वेन तथा गतिः कृता, यथाऽपरकुमाराश्वाः प्राक्पतिताः । कुमाराश्वस्त्वदृश्यीभूतः । ज्ञातवृत्तान्तो राजा सपरिकरस्तत्पृष्ठौ चलितः । अस्मिन्नवसरे प्रचण्डवायुर्वातुम् लग्नः, तेन तुरगपदमार्गो भग्नः । महेन्द्रसिंहो राजाज्ञां मार्गयित्वोन्मार्गेणैव कुमारमार्गणाय लग्नः, प्रविष्टो भीषणां महाटवीम् । तत्र भ्रमतस्तस्य वर्षमेकमतिक्रान्तम् । एकस्मिन् दिवसे गतः स्तोकं भूमिभागं यावत्, तावदेकं महत्सरो दृष्टवान्, तत्र कमलपरिमलमाघ्रातवान्, श्रुतवांश्च मधुरगीतवेणुरवम्, यावन्महेन्द्रसिंहोऽग्रं गच्छति, तावत्तरुणीगणमध्यसंस्थितं सनत्कुमारं दृष्टवान् । विस्मितमना महेन्द्रसिंहश्चिन्तयति, किं वा मदैष विभ्रमो दृश्यते ? किं वा सत्य एवायं सनत्कुमारः ? यावदेवं चिन्तयन्महेन्द्रसिंहस्तिष्ठति तावत्पठितमिदं बन्दिना-

"[2]जय आससेणनहयल-मयंक कुरुभुवणलग्गणे खंभ ।
जय तिहुअणनाह सणं-कुमार जय लद्धमाहप्पं ॥ १ ॥"

ततो महेन्द्रसिंहः सनत्कुमारोऽयमिति निश्चितवान् ।

---

१ भवप्रतिबन्धनिमित्तं, एकादिवस्तु न वरं सर्वेऽपि ।
कतिपयदिनावसाने, स्वप्नभोग इव न हि किञ्चित् ॥ २ ॥

२ जय अश्वसेननभस्तल-मृगाङ्क कुरुभुवनलगने स्तम्भ ।
जय त्रिभुवननाथ ! सनत्कुमार । जय लब्धमाहात्म्य ॥ १ ॥

अथ प्रकामं प्रमुदितमना महेन्द्रसिंहः सनत्कुमारेण दूरादागच्छन् दृष्टः । सनत्कुमारोऽप्युत्थायाभिमुखमाययौ । महेन्द्रसिंहः सनत्कुमारपादयोः पतितः । सनत्कुमारेण समुत्थापितो गाढमालिङ्गितश्च । द्वावपि प्रमुदितमनस्कौ विद्याधरदत्तासने उपविष्टौ । विद्याधरलोकश्च तयोः पार्श्वे उपविष्टः । अथानन्दजलपूरितनयनेन सनत्कुमारेण भणितम्-मित्र ! कथमेकाक्येव त्वमस्यामटव्यामागतः ? कथं चात्र स्थितोऽहं त्वया ज्ञातः ? किं च करोति मद्विरहे मम पिता माता च ? कथितः सर्वो वृत्तान्तो महेन्द्रसिंहेन ।

ततो महेन्द्रसिंहो वरविलासिनीभिर्मज्जितः स्नापितश्च । भोजनं द्वाभ्यां सममेव कृतम् । भोजनावसाने च महेन्द्रसिंहेन सनत्कुमारः पृष्टः । कुमार ! तदा त्वं तुरङ्गमेणापहृतः क्व गतः ? क्व स्थितश्च ? कुत एतादृशी ऋद्धिस्त्वया प्राप्ता ? सनत्कुमारेण चिन्तितं न युक्तं निजचरित्रकथनं मुखेन, इति संज्ञिता स्वयं परिणीता खेचरेन्द्रपुत्री विपुलमतीनाम्नी स्वप्रियसनत्कुमारवृत्तान्तं स्वविद्याबलेन कथयितुं प्रवृत्ता-

तदानीं कुमारो भवदादिषु पश्यत्सु तुरङ्गमेणापहृतो महाटव्यां प्रविष्टः । द्वितीयदिनेऽपि तथैव धावतोऽश्वस्य मध्याह्नसमयो जात । क्षुधापिपासाकुलितेन श्रान्तेनाश्वेन निष्कासिता जिह्वा, कुमारस्तत उत्तीर्णः, सोऽश्वस्तदानीमेव मृतः । कुमारस्ततः पादाभ्यामेव चलितः, तृषाक्रान्तश्च सर्वत्र जलं गवेषयन्नपि न प्राप । ततो दीर्घाध्वश्रमेण सुकुमारत्वेन चात्यन्तमाकुलीभूतो दूरदेशस्थितं सप्तच्छदं वृक्षं पश्यन् तदभिमुखं धावन् कियत्कालानन्तरं तत्र प्राप्तः । छायायामुपविष्टः पतितश्च लोचने भ्रामयित्वा कुमारः । अत्रावसरे कुमारपुण्यानुभावेन वनवासिना यक्षेण जलमानीतम्, शिशिरशीतलजलेन सर्वाङ्गं सिक्तः, आश्वासितश्च । लब्धचेतनेन कुमारेण जलं पीतम्, पृष्टं च कस्त्वं ? कुतो वानीतं जलमिदं ? तेन भणितमहं यक्षोऽत्र निवासी, सलिलं चेदं मानसरोवरादानीतम् । कुमारेणोक्तं यदि मां तद्दर्शयसि, तदा तत्र मानसरोवरे प्रक्षालयामि मद्वपुः, येन तत्तापोऽपनयति । तत् श्रुत्वा यक्षेण करतलसम्पुटे गृहीत्वा नीतो मानसरोवरम् । तत्र व्यसनापतितोऽयमिति कृत्वा क्रुद्धेन वैताढ्यवासिनाऽसितयक्षेण समं कुमारस्य युद्धं जातम् । तथाहि-

यक्षेण प्रथमं मोटिततरुः प्रचण्डः पवनो मुक्तः, तेन नभःस्थलं बहुलधूल्यान्धकारितम् । ततो विमुक्ताट्टहासा ज्वलनज्वालापिङ्गलकेशा पिशाचा मुक्ताः, कुमारस्तैर्मनाग् न भीतिं गतः । ततो नयनज्वालास्फुलिङ्गवर्षिभिर्नागपाशैः कुमारो यक्षेण बद्धः । जीर्णरज्जुबन्धनानीव तांस्त्रोटयति स्म कुमारः । ततः करास्फालनपूर्वं मुष्टिमुदस्य यक्षः समायातः । तावता मुष्टिप्रहारेण कुमारस्तं खण्डीकृतवान् । पुनर्यक्षः स्वस्थो भूत्वा गुरुमत्सरेण कुमारं घनप्रहारेण हतवान् । तत्प्रहारार्त्तः कुमारच्छिन्नमूलद्रुम इव भूमौ निपतितः । ततो यक्षेण दूरमुत्क्षिप्य गिरिवरः कुमारस्योपरि क्षिप्तः । तेन दृढपीडिताङ्गोऽसौ निश्चेतनो जातः ।

अथ कियत्कालानन्तरं लब्धसंज्ञः कुमारस्तेन समं बाहुयुद्धं चकार । कुमारेण करमुद्गराहतो यक्षः प्रचण्डवाताहतचूत इव तथा भूमौ निपतितौ यथा मृत इव दृश्यते । परं दैवत्वात्स

न मृतः, आरार्टिं कुर्वाणः स यक्षस्तथा नष्टो यथा पुनर्न दृष्टः कौतुकान्नभस्यागतविद्याधरैः पुष्पवृष्टिर्मुक्ता, उक्तं च जितो यक्षः कुमारेणेति ।

ततो मानससरसि यथेष्टं स्नात्वोत्तीर्णः कुमारो यावत्स्तोकं भूमिभागं गतस्तावत्तत्र वनमध्यगता अष्टौ विद्याधरपुत्रीर्ददृष्टवान् । ताभिरप्यसौ स्निग्धदृष्ट्या विलोकितः । कुमारेण चिन्तितमेताः कुतः समायाताः सन्ति ? पृच्छाम्यासां स्वरूपमिति पृष्टं कुमारेण तासां समीपे गत्वा मधुरवाण्या, कुतो भवन्त्य आगताः ? किमर्थमेतच्छून्यमरण्यमलङ्कृतं ? ताभिर्भणितम्-महाभाग ! इतो नातिदूरे प्रियसङ्गमाभिधानास्माकं पुर्यस्ति, त्वमपि तत्रैवागच्छेति भणितः किङ्करीदर्शितमार्गस्तासां नगरीं प्राप्तः । कञ्चुकिपुरुषैः राजभुवनं नीतः, दृष्टश्च तन्नगरस्वामिना भानुवेगराज्ञा, अभ्युत्थानादिना सत्कृतश्च । उक्तं राज्ञा-महाभाग ! त्वमेतासां ममाष्टकन्यानां वरो भव । पूर्वं ह्यत्रायातेनार्चिमालिनाम्ना मुनिनैवमादिष्टम्-योऽसिताक्षं यक्षं जेष्यति स एतासां भर्ता भविष्यति । ततस्त्वमेताः परिणयेति नृपेणोक्ते कुमारेण तथेति प्रतिपन्नम् । राज्ञा महामहःपूर्वकं विवाहः कृतः, कङ्कणं कुमारकरे बद्धम्, सुप्तश्च ताभिः सार्धं रतिभवने कुमारः पल्यङ्कोपरि । निद्राविगमे चात्मानं भूमौ पश्यति, किमेतदिति चिन्तितवांश्च, करबद्धं कङ्कणं च न पश्यति ।

ततः खिन्नमनाः कुमारस्ततो गन्तुं प्रवृत्तः । अरण्यमध्ये च गिरिवरशिखरे मणिमयस्तंभप्रतिष्ठितं दिव्यभवनं दृष्टम् । कुमारेण चिन्तितमिदमप्यालवालप्रायं भविष्यतीति तदासन्ने यावद्गन्तुं प्रवृत्तः कुमारस्तावत्तद्भवनान्तः करुणस्वरेण रुदन्त्या एकस्या नार्याः शब्दं श्रुतवान् । प्रविष्टस्तद्भवनान्तः सप्तमभूमिमारूढः । रुदन्त्या तत्रैकया कन्यया भणितम्, कुरुजनपदनभस्तलमृगाङ्कसनत्कुमार ! त्वं भवान्तरेऽपि मम भर्ता भूया इति वारंवारं भणन्ती पुनर्गाढं रोदितुं प्रवृत्ता । ततो रुदन्त्यैव तयासनं दत्तम् । तत्रोपविश्य कुमारस्तां पृष्टवान्, सनत्कुमारेण सह तव कः सम्बन्धः ? येन त्वं तमेवं स्मरसि । सा प्राह-मम स मनोरथमात्रेण भर्ता । कथमिति कुमारेणोक्ते सा प्राह-अहं हि साकेतपुरस्वामिसुरथनामनरेन्द्रभार्याचन्द्रयशापुत्र्यस्मि । अन्यदाहं यौवनं प्राप्ता, पित्रा च मत्कृतेऽनेकराजकुमारचित्रपटरूपाणि दूतैरानीय दर्शितानि । एकमपि चित्रपटरूपं मम न रोचते । एकदा सनत्कुमारपट्टरूपं दूतैरानीय मे दर्शितम्, तदत्यन्तं मे रुरुचे । मोहिता चाहं तद्रूपमेव ध्यायन्ती स्वगृहे तिष्ठामि । तावदहमेकेन विद्याधरेण पितृगृहादाहृतात्रानीता । स्वयंविकुर्वितेऽस्मिन्नावासे मां मुक्त्वा स क्वचित् गतोऽस्ति यावत् सा कन्या वदन्त्यस्ति तावदशनिवेगसुतवज्रवेगेन विद्याधरेण तत्रागत्य सनत्कुमार उत्क्षिप्तो गगनमण्डले । सा च कन्या हाहारवं कुर्वाणा मूर्च्छापराधीना निपतिता पृथिवीपीठे ।

तावदाकाशमार्गादागत्य सनत्कुमारेण स विद्याधरो मुष्टिप्रहारेण व्यापादितः । सनत्कुमारेण तस्यै स्ववृत्तान्तः कथितः, परिणीता च सा सुनन्दाभिधाना कन्या, सास्य स्त्रीरत्नं भविष्यति । स्तोकवेलायां तत्र वज्रवेगविद्याधरभगिनी सन्ध्यावली समागता । भ्रातरं व्यापादितं दृष्ट्वा कोपमुपागता । पुनरपीदं नैमित्तिकवचः स्मृतिपथमागतम्, यथा तव

भ्रातृवधकस्तव भर्ता भविष्यतीति मत्वा कुमारस्यैवं विज्ञप्तिं चकार। अहमिह त्वां विवाहार्थमायातास्मीति। सनत्कुमारेण सा तत्रैव परिणीता। अत्रान्तरे सनत्कुमारसमीपे द्वौ विद्याधरनृपौ समायातौ। ताभ्यां प्रणामपूर्वं कुमारस्यैवं भणितम्, देव! अशनिवेगविद्याधरो विद्याबलज्ञातपुत्रमरणवृत्तान्तस्त्वया समं योद्धुमायाति।

अतश्चन्द्रवेग-भानुवेगाभ्यामावां हरिचन्द्र-चन्द्रसेनाभिधानौ निज पुत्रौ प्रेषितौ, रहसि सन्नाहश्च प्रेषितः। आवामस्मत्पितरौ च भवत्सेवार्थं सम्प्राप्ताः। तदनन्तरं तत्र समागतौ चन्द्रवेग-भानुवेगौ सनत्कुमारस्य साहाय्याय। सन्ध्यावल्या प्रज्ञप्तिविद्या दत्ता। चन्द्रवेग-भानुवेगसहितः सनत्कुमारः सङ्ग्रामाभिमुख चलितः। तावताऽशनिवेगः सैन्यवृत्तः समायातः। तेन समं प्रथमं चन्द्रवेगभानुवेगौ योद्धुं प्रवृत्तौ। चिरकालं युद्धं कृत्वा तयोर्बलं भग्नम्। ततः स्वयमुत्थितः सनत्कुमारः, तेनाशनिवेगेन समं घोरं युद्धमारब्धम्। प्रथमं महोरगास्त्रं कुमारस्याभिमुखं मुक्तम्, तच्च कुमारेण गरुडास्त्रेण विनिहतम्। पुनस्तेनाग्नेयं शस्त्रं मुक्तम्, तत्कुमारेण वरुणास्त्रेण निहतम्। पुनस्तेन वायव्यास्त्रं मुक्तम्, कुमारेण शैलास्त्रेण प्रतिहतम्। ततो गृहीतधनुर्बाणान्मुञ्चन् कुमारस्तं निर्जीवमिव चकार। पुनर्गृहीतकरवालः सनत्कुमारेण छिन्नदक्षिणकरः कृतः। ततो द्वितीयकरेण बाहुयुद्धमिच्छतस्तस्या-भिमुखमायातस्य कुमारेण चक्रेण शिरश्छिन्नम्। तदानीमशनिवेगविद्याधरलक्ष्मीरनेकविद्या-धरैः सहिता सनत्कुमारे सङ्क्रान्ता।

ततोऽशनिवेगं हत्वा चन्द्रवेगादिविद्याधरपरिवृतः सनत्कुमारो नभोमार्गाद्विद्याधररथेन समुत्तीर्य तदावासे पुनरायातः। दृष्टस्तत्र हर्षिताभ्यां सुनन्दासन्ध्यावलीभ्याम्, उक्तं च ताभ्यामार्यपुत्र! स्वागतम्। अत्र च समस्तविद्याधरैः सनत्कुमारस्य राज्याभिषेकः कृतः। सुखेनात्र विद्याधरराजसेवितः सनत्कुमारस्तिष्ठति। अन्यदा चन्द्रवेगेन विज्ञप्तः सनत्कुमारो यथा-देव! मम पूर्वमर्चिमालिमुनिनैवमादिष्टम्, यथैदं तव कन्याशतं भानुवेगस्य चाष्टकन्या यः परिणेष्यति सोऽवश्यं सनत्कुमारनामा चतुर्थश्चक्री भविष्यति। य इतो मासमध्ये मानसरोवरे समेष्यति, तत्र व्यसनापतितं सरसि स्नातमसिताक्षो यक्षः पूर्वभववैरी द्रक्ष्यति। स पूर्वभववैरी कथमिति सनत्कुमारेण पृष्टे चन्द्रवेगो मुनिमुखश्रुतं तत्पूर्वभववृत्तान्तं प्राह-

अस्ति काञ्चनपुरं नाम नगरम्, तत्र विक्रमयशोनामराजा, तस्य पञ्चशतान्यन्तःपुर्यो वर्तन्ते। तत्र नागदत्तनामा सार्थवाहोऽस्ति। तस्य रूपलावण्यसौभाग्ययौवनगुणैः सुरसुन्दरीभ्योऽधिका विष्णुश्रीनामभार्यास्ति। सान्यदा विक्रमयशोराज्ञा दृष्टा, मदनातुरेण तेन स्वान्तःपुरे क्षिप्ता। ततो नागदत्तस्तच्चिन्तयोन्मत्तीभूत एवं विलपति - हा चन्द्रानने! क्व गता? दर्शनं मे देहीति विलपन् कालं नयति। विक्रमयशोराजा तु मुक्तसकलराज्यकार्योऽगणितजनापवादस्तया विष्णुश्रिया सहात्यन्तं रतिप्रसक्तः कालं नयति। पञ्चशतान्तःपुरीणां नामापि न गृह्णाति।

अन्यदा ताभिः कार्मणादियोगेन विष्णुश्रीर्व्यापादिता । ततो राजा तस्या मरणेनात्यन्तं शोकार्त्तोऽश्रुजलभृतनयनो नागदत्त इवोन्मत्तीभूतो विष्णुश्रीकलेवरं वह्निसात्कर्तुं न ददाति । ततो मन्त्रिभिर्नृपः कथमपि वञ्चयित्वाऽरण्ये तत्कलेवरं त्यक्तम् । राजा च तत्कलेवरमपश्यन् परिहृतान्नपानभोजनः स्थितः । मन्त्रिभिर्विचारितमेष तत्कलेवरदर्शनमन्तरेण मरिष्यतीत्यरण्ये नीत्वा राज्ञस्तत्कलेवरं दर्शितम् । राज्ञा तदानीं तत्कलेवरं गलत्पूतिनिवहं निर्यत्कृमिजालं वायसकर्षितनयनयुगलं चण्डखगतुण्डखण्डितं दुरभिगन्धं प्रेक्ष्यैवमात्मानं निन्दितुं प्रारब्धम् । रे जीव ! यस्य कृते त्वया कुलशीलजातियशोलज्जाः परित्यक्ताः, तस्येदृश्यवस्था जाता । ततो वैराग्यमार्गं प्राप्तो राजा राज्यं राष्ट्रं पुरमन्तःपुरं स्वजनवर्गं च परिहृत्य सुव्रताचार्यसमीपे निष्क्रान्तः । ततश्चतुर्थषष्ठाष्टमादिविचित्रतपःकर्मभिरात्मानं भावयन् प्रान्ते संलेखनां कृत्वा सनत्कुमारदेवलोके गतः । ततश्च्युतो रत्नपुरे श्रेष्ठिसुतो जिनधर्मो जातः । स च जिनवचन-भावितमनाः सम्यक्त्वमूलं द्वादशविधं श्रावकधर्मं पालयन् जिनेन्द्रपूजारतः कालं गमयति । इतश्च स नागदत्तः प्रियाविरहदुःखितो भ्रान्तचित्त आर्त्तध्यानपरिक्षिप्तशरीरो भूत्वा बहुति-र्यग्योनिषु भ्रान्त्वा ततः सिंहपुरे नगरेऽग्निशर्मनामा द्विजो जातः ।

कालेन त्रिदण्डिव्रतं गृहीत्वा द्विमासक्षपणरतो रत्नपुरमागतः । तत्र हरिवाहनो नाम राजा तापसभक्तः, तेन तपस्यागतः श्रुतः, पारणकदिने राज्ञा निमन्त्रितः, स गृहमागतः । अत्रान्तरे स जिनधर्मनामा श्रावकस्तत्रागतः । तं दृष्ट्वा पूर्वभवजातवैरानुभवेन रोषारुण-लोचनेन मुनिनैवमुक्तं राज्ञः, यदा त्वं मां भोजयसि तदास्य श्रेष्ठिनः पृष्ठौ स्थालं विन्यस्य मां भोजय, अन्यथा नाहं भोक्ष्ये । राज्ञोक्तमसौ श्रेष्ठी महान् वर्तते, ततोऽपरस्य पुरुषस्य पृष्ठौ त्वं भोजनं कुरु । स प्राहैतस्य पृष्ठावेव भोजनं करिष्ये, नापरथेति । राज्ञा तापसानुरागेण तत्प्रतिपन्नम् । राज्ञो वचनात् श्रेष्ठिना पृष्ठौ स्थालमारोपितम् । तापसेन तत्पृष्ठौ दाहपूर्वकं भोजनं कृतम् । श्रेष्ठिना पूर्वभवदुष्कर्मफलं ममोपस्थितमिति मन्यमानेन तत्सम्यक् सोढमिति । स्थालीदाहेन तत्पृष्ठौ क्षतं जातम् । ततः स तापसस्तथा भुक्त्वा स्वस्थाने गतः । श्रेष्ठ्यपि स्वगृहे गत्वा स्वकुटुम्बवर्गं प्रतिबोध्य जैनदीक्षां जग्राह । ततो नगरान्निर्गतो गिरिशिखरे गत्वाऽनशनमुच्चचार । पूर्वदिगभिमुखं मासार्धं यावत्कायोत्सर्गेण स्थितः । एवं शेषास्वपि दिक्षु । ततः पृष्ठिक्षते काकशिवादिभिर्भक्षितः सम्यक् तत्पीडां सहमानो मृत्वा सौधर्मे कल्पे इन्द्रो जातः । स तापसोऽपि तस्यैव वाहनमैरावणो जातः । ततश्च्युतोऽथ स ऐरावणो नरतिर्यक्षु भ्रान्त्वाऽसिताक्षो जातः, शक्रोऽपि ततश्च्युत्वा हस्तिनागपुरे सनत्कुमारश्चक्री जातः ।

एवमसिताक्षयक्षस्य भवता सह वैरकारणमिति मुनिनोक्ते मया तवान्तरवासनिमित्तं भानुवेगं विसर्जयित्वा प्रियसङ्गमपुरीनिवेशपूर्वं तव भानुवेगेन कन्याः परिणायिताः, मुक्तो मयैव कारणेन त्वं तद्वने । ततो विज्ञापयामि देव ! मन्यस्व मे कन्याशतपाणिग्रहणं । ता अपि तत्र भवन्मुखकमलं पश्यन्ति । एवं भवत्विति कुमारेणोक्ते चन्द्रवेगः कुमारेण समं

स्वनगरे गतः । तत्र कुमारेण कन्याशतं परिणीतम् । पुनरत्रागतश्च दशोत्तरेण कन्याशतेन सह भोगान् भुङ्क्ते कुमारः । अद्य पुनरेवमुक्तं कुमारेण यथाद्य गन्तव्यं यत्रास्माभिर्यक्षो जितः । साम्प्रतमत्रायातस्य कुमारस्य पुरः प्रेक्षणं कुर्वन्तीनामस्माकं कुमारपत्नीनां भवद्दर्शनं जातमिति ।

अत्रान्तरे रतिगृहशय्यात उत्थितः कुमारो महेन्द्रसिंहेन समं विद्याधरपरिवृतो वैताढ्यं गतः । अवसरं लब्ध्वा महेन्द्रसिंहेन विज्ञप्तम्, कुमार ! तव जननीजनकौ त्वद्विरहात्तौ दुःखेन कालं गमयतः । ततस्तद्दर्शनप्रसादः क्रियताम् । इति महेन्द्रसिंहवचनान्तरमेव महता गगनस्थितविद्याधरविमानहयगजादिवाहनारूढविद्याधरवृन्दसम्मर्देन हस्तिनागपुरे प्राप्तः कुमारः । आनन्दिताश्च जननीजनकनागरजनाः । ततो महता विभूत्याऽश्वसेनराज्ञा सनत्कुमारः स्वराज्येऽभिषिक्तः । महेन्द्रसिंहश्च सेनापतिः कृतः । जननीजनकाभ्यां स्थविराणामन्तिके प्रव्रज्यां गृहीत्वा स्वकार्यमनुष्ठितम् । सनत्कुमारोऽपि प्रवर्द्धमानकोशबलसारो राज्यमनुपालयति । उत्पन्नानि चतुर्दश रत्नानि नवनिधयश्च । कृता च तेषां पूजा । तदनन्तरं चक्ररत्नदर्शितमार्गो मागधवरदामप्रभाससिन्धुखण्डप्रपातादिक्रमेण भरतक्षेत्रं साधितवान् ।

एवं सनत्कुमारो हस्तिनागपुरे चक्रवर्तिपदवीं पालयन् यथेष्टं सुखानि भुङ्क्ते । शक्रेणावधिज्ञानप्रयोगात्तं पूर्वभवे स्वपदाधिरूढं ज्ञात्वा महता हर्षेण वैश्रमणोऽनुज्ञातः । सनत्कुमारस्य राज्याभिषेकं कुरु, इमं च हारम्, वनमालाम्, छत्रम्, मुकुटम्, चामरयुगलम्, कुण्डलयुगम्, दूष्ययुगम्, सिंहासनम्, पादपीठं च प्राभृतं कुरु । शक्रेण तव वृत्तान्तः पृष्टोऽस्तीति ब्रूयाः । वैश्रमणोऽपि शक्रदत्तं गृहीत्वा गजपुरनगरे समागत्य तत्प्राभृतं चक्रिणः पुरो मुक्तवान्, शक्रवचनं चोक्तवानिति । पुनः शक्रेण तिलोत्तमा-रम्भे देवाङ्गने तत्र तदभिषेककरणाय प्रेषिते । चक्रिणोऽनुज्ञां गृहीत्वा विकुर्वितयोजनप्रमाणमणिपीठोपरि रचितमणिमण्डपान्तः स्थापिते मणिसिंहासने कुमारं निवेश्य कनककलशाहृतक्षीरोदजलधाराभिर्धवलगीतानि गायन्तो देवीदेवा अभ्यषिञ्चन् । रम्भातिलोत्तमादिदेव्यस्तदानीं नृत्यं कुर्वन्ति । महामहोत्सवेन कुमारमभिषिच्य वैश्रमणादयः स्वर्गलोकं जग्मुः । चक्र्यपि भोगान् भुञ्जन्, कालं गमयति ।

अन्यदा सुधर्मसभायां सौधर्मेन्द्रः सिंहासनेऽनेकदेवदेवी सेवितः स्थितोऽस्ति । अत्रान्तरे एक ईशानकल्पदेवः सौधर्मेन्द्रपार्श्वे आगतः । तस्य देहप्रभया सभास्थितदेवदेहप्रभाभरः सर्वतो नष्टः । आदित्योदये चन्द्रग्रहादय इव निष्प्रभाः सर्वे सुरा जाताः । तस्मिन् पुनः स्वस्थाने गते देवैः सौधर्मेन्द्रः पृष्टः, "स्वामिन् ! केन कारणेनास्य देवस्येदृशी प्रभा जातास्ति ।" शक्र प्राहानेन पूर्वभवे आचाम्लवर्धमानतपोऽखण्डं कृतम्, तत्प्रभावादस्य देहे प्रभेदृशी जातास्ति । देवैः पुनरिन्द्रः पृष्टः, अन्योऽपि कश्चिदीदृशो दीप्तिमानस्ति न वा ? इन्द्रेण भणितम्-यथा हस्तिनागपुरे कुरुवंशेऽस्ति सनत्कुमारनामा चक्री, तस्य रूपं सर्वदेवेभ्योऽप्यधिकमस्ति ।

इदं शक्रवचोऽश्रद्दधानौ विजयवैजयन्तौ देवौ ब्राह्मणरूपावागतौ, प्रतीहारेण मुक्तद्वारौ गृहान्तः प्रविष्टौ राजसमीपं गतौ । दृष्टश्च तैलाभ्यङ्गं कुर्वन् राजा, अतीवविस्मितौ देवौ शक्रवर्णितरूपाधिकरूपं तं पश्यन्तौ तौ राज्ञा पृष्टौ, किमर्थं भवन्तावत्रायातौ ? तौ भणतो देव ! भवद्रूपं त्रिभुवने वर्ण्यते, तद्दर्शनार्थं कौतुकेनावामत्रायातौ । ततोऽतिरूपगर्वितेन राज्ञा तावुक्तौ, भो भो विप्रौ ! युवाभ्यां किं मद्रूपं दृष्टं ? स्तोककालं प्रतीक्षेयाः, यावदहमा-स्थानसभायामुपविशामि । एवमस्त्विति प्रोच्य निर्गतौ द्विजौ । चक्रयपि शीघ्रं मज्जनं कृत्वा सर्वाङ्गोपाङ्गशृङ्गारं दधत् सभायां सिंहासने उपविष्टः, आकारितौ द्विजौ, ताभ्यां तदा चक्रिरुपं दृष्ट्वा विषण्णाभ्यां भणितमहो ! मनुष्याणां रूपलावण्ययौवनानि क्षणदृष्टनष्टानि । तयोर्द्विजयोरेतद्वचः श्रुत्वा चक्रिणा भणितम्-भो ! किमेवं भवन्तौ विषण्णौ मम शरीरं निन्दतः ? ताभ्यां भणितम्-महाराज ! देवानां रूपयौवनतेजांसि प्रथमवयसः समारभ्य षण्मासशेषायुःसमयं यावदवस्थितानि भवन्ति, यावज्जीवं न हीयन्ते । भवतां शरीरे त्वाश्चर्यं दृश्यते, यत्तव रूपलावण्यादिकं साम्प्रतमेव दृष्टं नष्टम् । राज्ञा भणितम्-कथमेवं भवद्भ्यां ज्ञातं ? ताभ्यां शक्रप्रशंसादिकः सर्वोऽपि वृत्तान्तः कथितः ।

चक्रिणा तु केयूरादिविभूषितं बाहुयुगलं पश्यता, हारादिविभूषितमपि स्ववक्षःस्थलं विवर्णमुपलक्ष्य चिन्तितमहो ! अनित्यता संसारस्य ! असारता शरीरस्य ! एतावन्मात्रेणापि कालेन मच्छरीरस्य यौवनतेजांसि नष्टानि । अयुक्तोऽस्मिन् भवे प्रतिबन्धः, शरीरमोहाऽज्ञानम्, रूपयौवनाभिमानो मूर्खत्वम्, भोगासेवनमुन्मादः, परिग्रहो ग्रह इव । तदेतत्सर्वं व्युत्सृज्य परलोकहितं संयमं गृह्णामीति विचार्य चक्रिणा पुत्रः स्वराज्येऽभिषिक्तः, स्वयं संयमग्रहणायोद्यतो जातः । तदानीं ताभ्यां देवाभ्यां भणितं-

"[1]अणुचरियं धीर तुमे, चरियं नियस्स पुव्वपुरिसस्स ।
भरहमहानरवइणो, तिहुअणविक्खायकित्तिस्स ॥ १ ॥"

इत्याद्युक्त्वा देवौ गतौ । चक्रयपि तदानीमेव सर्वं परिग्रहं परित्यज्य विरताचार्यसमीपे प्रव्रजितः । ततः स्त्रीरत्नप्रमुखाणि सर्वरत्नानि, शेषाश्च रमण्यः, सर्वेऽपि नरेन्द्राः सर्वसैन्यलोका नव निधयश्च षण्मासान् यावत्तन्मार्गानुलग्नास्तेन संयमिना सिंहावलोकनन्यायेन दृष्ट्यापि न विलोकिताः । षष्ठभक्तेन भिक्षानिमित्तं गोचरप्रविष्टस्य प्रथममेवाऽजातक्रं तस्य गृहस्थेन दत्तम् । द्वितीयदिवसे च षष्ठमेव कृतम् । पारणके प्रान्तनीरसाहारकरणात्तस्यैते रोगाः प्रादुर्भूताः- कण्डूः १, ज्वरः २, कासः ३, श्वासः ४, स्वरभङ्गः ५, अक्षिदुःखम् ६, उदरव्यथा ७, एताः सप्त व्याधयः सप्तशतवर्षाणि यावदध्यासिताः । उग्रतपः कुर्वतस्तस्य आमर्षौषधी १, खेलौषधी २, विप्रुडौषधी ३, जल्लौषधी ४, सर्वौषधी

---

१ अनुचरितं धीर ! त्वं, चरित्रं निजकस्य पूर्वपुरुषस्य ।
भरतमहानृपतेः, त्रिभुवनविख्यातकीर्तेः ॥ १ ॥

५ प्रभृतयो लब्धयः सम्पन्नाः । तथाप्यसौ स्वशरीरप्रतीकारं न करोति । पुनः शक्रेणैकदैवं स प्रशंसितः । अहो ! पश्यन्तु देवाः सनत्कुमारस्य धीरत्वं ! व्याधिकदर्थितोऽप्ययं न स्वयं स्ववपुःप्रतीकारं कारयति । एतदिन्द्रवचनमश्रद्दधानौ तावेव देवौ वैद्यरूपेण तस्य मुनेः समीपे समायातौ, भणितवन्तौ च भगवंस्तव वपुष्यावां प्रतीकारं कुर्वः । सनत्कुमारस्तदानीं तूष्णीक एव स्थितः । पुनस्ताभ्यां भणितम्, परं तथैव मुनिर्मौनभाग्जातः, पुनः पुनस्तथैव तौ भणतः, तदा मुनिना भणितम्, भवन्तौ किं शरीरव्याधिस्फेटकौ ? किंवा कर्मव्याधिस्फेटकौ ? ताभ्यां भणितमावां शरीरव्याधिस्फेटकौ । तदानीं सनत्कुमारमुनिना स्वमुखथूत्कृतेन घर्षिता स्वाङ्गुली कनकवर्णा दर्शिता । भणितं चाहं स्वयमेव शरीरव्याधिं स्फेटयामि । यदि मे सहनशक्तिर्न स्यात्तदेति । युवां यदि संसारव्याधिस्फेटनसमर्थौ तदा तं स्फेटयेथाः । तौ देवौ विस्मितमनस्कौ प्रकटितस्वरूपावेवमूचतुः । भगवंस्त्वमेव संसारव्याधिस्फेटनसमर्थोऽसि । आवाभ्यां तु शक्रवचनमश्रद्दधानाभ्यामिहागत्य त्वं परीक्षितः । यादृशः शक्रेण वर्णितस्तादृश एव त्वमसीत्युक्त्वा प्रणम्य च तौ स्वस्थानं गतौ । भगवान् सनत्कुमारस्तु कुमारत्वे पञ्चाशद्वर्षसहस्राणि, माण्डलिकत्वे पञ्चाशद्वर्षसहस्राणि, चक्रवर्तित्वे वर्षलक्षम्, श्रामण्ये च वर्षलक्षमेकं परिपाल्य सम्मेतशैलशिखरं गतः । तत्र शिलातले आलोचनाविधानपूर्वं मासिकेन भक्तेन कालं कृत्वा सनत्कुमारकल्पे देवत्वेनोत्पन्नः । ततश्च्युतो महाविदेहे वासे सेत्स्यति । इति सनत्कुमारदृष्टान्तः ४ ॥ ३७ ॥

चइत्ता भारहं वासं, चक्कवट्टी महड्ढिओ ।
संती संतिकरे लोए, पत्तो गइमणुत्तरं ॥ ३८ ॥

पुनः शान्तिः शान्तिनाथः प्रस्तावात्पञ्चमश्चक्री अनुत्तरां गतिं प्राप्तो-मोक्षं प्राप्तः । कथंभूतः शान्तिः ? लोके शान्तिकरः, शान्तिं करोतीति शान्तिकरः, इति विशेषणेन तीर्थङ्करत्वं प्रतिपादितम् । षोडशस्तीर्थकरः शान्तिनाथो मोक्षं जगामेत्यर्थः । किं कृत्वा ? भारतं वासं त्यक्त्वा, भरतस्येदं भारतम् भरतक्षेत्रसम्बन्धिवासमिति राज्यवासम् । कीदृशः शान्तिः । चक्रवर्ती महर्द्धिकः, इत्यनेन शान्तेश्चक्रवर्तित्वं तीर्थकरत्वं च प्रतिपादितम् ॥ ३८ ॥ अत्र शान्तिनाथदृष्टान्तः-

इहैव जम्बूद्वीपे भरतक्षेत्रे वैताढ्यपर्वते रथनूपुरचक्रवालं नाम नगरमस्ति । तत्र राजाऽमिततेजाः परिवसति, तस्य सुतारानाम्नी भगिनी वर्तते । सा च पोतनाधिपतिना श्रीविजयराज्ञा परिणीता । अन्यदा अमिततेजा राजा पोतनपुरे श्रीविजयसुतारादर्शनार्थं गतः । प्रेक्षते च प्रमुदितमुच्छ्रितपताकं सर्वमपि पुरम्, विशेषतश्च राजकुलम् । ततो विस्मितलोचनोऽमिततेजा राजा गगनतलादुत्तीर्णः, गतश्च राजभवनम्, अभ्युत्थानादिना सत्कृतः श्रीविजयेन, कृतमुचितं करणीयम् । उपविष्टः सिंहासनेऽमिततेजा राजा पप्रच्छ नगरोत्सवकारणम् । श्रीविजयः प्राह-यथेतोऽष्टमे दिवसे मदन्तिके एको नैमित्तिकः समायातः । मदनुज्ञाते

सिंहासने चोपविष्टः । पृष्टश्च मया किमागमनप्रयोजनं ? ततस्तेन भणितम्, महाराज ! मया निमित्तमवलोकितम्, यथा पोतनाधिपतेरुपरि इतो दिवसात्सप्तमे दिवसे मध्याह्नसमये विद्युत्पतिष्यति। इदं च कर्णकटुकं वचः श्रुत्वा मन्त्रिणा भणितम् । तदानीं तवोपरि किं पतिष्यति ? तेनोक्तं मा कुप्यत । यथा मयोपलब्धं निमित्तं तथा भवतां कथितम्, न चात्र मम कोऽपि भावदोषोऽस्ति । ममोपरि तस्मिन् दिवसे हिरण्यवृष्टिः पतिष्यति । मया भणितं त्वयैतन्निमित्तं क्व पठितं ? तेन भणितं त्रिपृष्ठवासुदेवभ्रात्रचलबलदेवदीक्षासमये पित्रा समं मयापि प्रव्रज्या गृहीता । तत्रानेकशास्त्राध्ययनं कुर्वता मयाष्टाङ्गनिमित्तमप्यधीतम् । ततोऽहं प्राप्तयौवनः पूर्वदत्तकन्याया भ्रातृभिरुत्प्रव्राजितः । कर्मपरिणतिवशेन सा मया परिणीता । तेन मया सर्वज्ञप्रणीतनिमित्तानुसारेण प्रलोकितम्, यथा सप्तमे दिवसे पोतनाधिपतेरुपरि विद्युत्पातो भविष्यति । एवं तेन नैमित्तिकेनोक्ते एकेन मन्त्रिणा भणितम्-यथा महाराज ! समुद्रमध्ये वाहनान्तर्भवद्भिः सप्तदिवसान् यावत् स्थेयम्, तत्र विद्युन्न पराभवति । अन्येन मन्त्रिणा भणितं दैवयोगोऽन्यथा कर्तुं न तीर्यते । यत उक्तं-

[1]धारिज्जइ इंतो सागरोवि, कल्लोलभिन्नकुलसेलो ।
नहु अन्नजम्मनिम्मिअ-सुहासुहो कम्मपरिणामो ॥ १ ॥

अपरेण मन्त्रिणा भणितम्, पोतनाधिपतेर्वधोऽनेन समादिष्टः, न पुनः श्रीविजयराज्ञः । सप्तमदिवसान् यावदपरः कोऽपि पोतनाधिपतिर्विधीयते । सर्वैरप्युक्तमयमुपायः साधुः । मयोक्तं मज्जीवितरक्षाकृतेऽपरजीववधः कथं क्रियते ? सर्वैरुक्तं तर्हि यक्षप्रतिमाया राज्याभिषेकः क्रियते । एवं मन्त्रयित्वा सर्वैरपि यक्षप्रतिमा पोतनपुरराज्येऽभिषिक्ता । सप्तदिवसान् यावन्मया पौषधागारे गत्वा पौषधा एव कृताः । सप्तमदिवसमध्याह्नसमये गगनमार्गेऽकस्मात्मेघः समुत्पन्नः, स्फुरिता विद्युल्लता, इतस्ततः परिभ्रम्य यक्षप्रतिमा विनाशिता । अष्टमे दिवसे चाहं पौषधशालातो निर्गत्य क्षेमेण स्वभुवने समायातः, तं नैमित्तिकं च कनकरत्नादिभिः पूजितवान् । पुनरहं नागरिकैः पोतनराज्येऽभिषिक्तः । तदिदमस्मिन्नगरे महोत्सवकारणमिति श्री विजयेनोक्तेऽमिततेजः प्राह-अविसंवादि-निमित्तम्, शोभनो रक्षणोपाय इत्युक्त्वाऽमिततेजो राजा स्वस्थानं गतवान् ।

अन्यदा श्रीविजयराजा सुतारया समं वने रन्तुं गतः । सुतारया तत्र कनकमृगो दृष्टः, श्रीविजयस्योक्तम्-स्वामिन् ! ममैनं मृगमानीय देहि । मम क्रीडार्थे भविष्यति । ततः श्रीविजयराजा तद्ग्रहणार्थे स्वयमेव प्रधावितः, नष्टो मृगः तत्पृष्ठिं राजा न त्यजति । कियन्तीं भूवं गत्वोत्पतितो मृगः, तावता सुतारा कुर्कुटसर्पेण दष्टा, पूच्चकार । अहं कुर्कुटसर्पेण दष्टा, हा प्रिय ! मां त्रायस्वेति श्रुत्वा श्रीविजयस्त्वरितं पश्चादायातः । तावता सुतारा पञ्चत्वमुपागता । राजा च शोकपरवशस्तया समं चितायां प्रविष्टः, उद्दीप्तो ज्वलनः, तावता

१ धार्यते यान् सागरोऽपि, कल्लोलभिन्नकुलशैलः ।
न अन्यजन्मनिर्मित-शुभाशुभः कर्मपरिणामः ॥ १ ॥

स्तोकवेलायां समागतौ द्वौ विद्याधरौ, तत्रैकेन सलिलमभिमन्त्र्य चिता सिक्ता, वैतालिनी विद्या नष्टा, राजा स्वस्थो जातो बभाण च किमिदमिति । विद्याधराभ्यां भणितमावाममिततेजसः स्वकीयौ, जिनवन्दननिमित्तमाकाशमार्गे भ्रमन्तावशनिघोषविद्याधरेणापहियमाणायाः सुतारायाः आक्रन्दशब्दं श्रुतवन्तौ, तन्मोचनार्थमावाभ्यां युद्धमारब्धम्, ततः सुतारया च प्रोक्तमलं युद्धेन । यथा महाराजः श्रीविजयो वैतालिनीविद्यामोहितो जीवितं न परित्यजति, तथा तदुद्याने गत्वा शीघ्रं कुरुत ? तत आवामिहायातौ, दृष्टस्त्वं वैतालिन्या समं चितारूढः, अभिमन्त्र्य जलेन सिक्ता चिता, नष्टा सा दुष्टवैतालिनी, स्वस्थावस्थस्त्वमुत्थितः, इत्यपहृतां सुतारां ज्ञात्वा विषण्णः । श्रीविजयो राजा भणितश्च ताभ्याम्, राजन् ! खेदं मा कुरु ? स पापः क्व यास्यतीत्यादिवचनैः श्रीविजयराजानमाश्वास्य तौ विद्याधरावमिततेजसमीपं गतौ ।

ततोऽमिततेजप्रेषितविद्याधररचितविमानैः स श्रीविजयोऽप्यमिततेजसमीपं गतः । अमिततेजश्रीविजयाभ्यां ससैन्याभ्यां गत्वा तन्नगरं वेष्टितम्, अशनिघोषान्तिके दूतः प्रेषितः, तयोरागमनं श्रुत्वाशनिघोषो नष्टः । उत्पन्नकेवलस्याचलस्य च समीपे गतः । अमिततेजश्रीविजयावपि तत्पृष्ठौ तत्रायातौ । सर्वेऽपि गतमत्सरा धर्मं शृण्वन्ति एकेन विद्याधरेण सुतारापि तत्रानीता । लब्धावसरेणाशनिघोषेण भणितम्, न मया दुष्टभावेन सुतारापहृता, किन्तु विद्यां साधयित्वा गच्छता मयेयं दृष्टा, पूर्वस्नेहेनेमां त्यक्तुं न शक्नोमीति वैतालिन्या विद्यया श्रीविजयं मोहयित्वा सुतारां गृहीत्वा स्वनगरे गतः, नास्याः शीलभङ्गमकार्षम् । तथापि ममात्रार्थे योऽपराधः स क्षन्तव्य इत्याकर्ण्यामिततेजसा भणितम्-भगवन् ! किं पुनः कारणं ? एतस्यास्यां स्नेहोऽभूत् । ततोऽचलकेवली कथयति-मगधदेशेऽचलग्रामे धरणीजटो नाम विप्रः, तस्य कपिलानाम चेटी, तस्याः पुत्रः कपिलो नाम । तेन कर्णश्रवणमात्रेण विद्या शिक्षिता । गतश्च देशान्तरे रत्नपुरं नाम नगरम् । तत्र कस्यचिदुपाध्यायस्य मठे गतः । उपाध्यायेन पृष्टः कस्त्वं ? कुत आगतः ? कपिलेनोक्तमचलग्रामे धरणीजटविप्रसुतः कपिलनामाहं विद्यार्थी अत्रायातस्तव समीपमिति । उपाध्यायेन सबहुमानं स्वगृहे रक्षितः । विद्यामध्याप्य स्वपुत्री तस्मै दत्ता सत्यभामानाम्नी ।

अन्यदा वर्षाकाले स कपिलो रात्रौ स्ववस्त्राणि कक्षायां कृत्वा वर्षत्येव मेघे स्वगृहद्वारे समायातः । सत्यभामा चायं स्तिमितवस्त्रो भविष्यतीति चिन्तयन्त्यपराणि वस्त्राणि गृहीत्वा गृहद्वारे सन्मुखमायाता । कपिलेन तस्या उक्तमस्ति मम प्रभावो, येन वस्त्राणि न स्तिम्यन्ति । तावता विद्युत्प्रकाशे तया स नग्नो दृष्टः । ज्ञातं चायं नग्न एव समायातः, वस्त्राणि कक्षायां च निहितवानित्यवश्यमयं हीनकुल इति सा कपिले मन्दस्नेहा जाता ।

अन्यदा धरणीजटो विप्रस्तत्र कपिलसमीपे समायातः । सत्यभामा च पितृपुत्रयोर्विरुद्धमाचारं दृष्ट्वा परमार्थं पृष्टो धरणीजटविप्रः । तेन यथार्थं कथितम् । तत् श्रुत्वोद्विग्ना सत्यभामा कामभोगेभ्यो निर्विण्णा, प्रव्रज्याग्रहणनिमित्तं पृष्टः कपिलः, न मुञ्चत्येष

कपिलः । तदेयं गता तन्निवासिश्रीषेणराज्ञः समीपम्, बभाण च भो राजन् ! मां कपिलसमीपान्मोचय, येनाहं दीक्षां गृह्णामि । राज्ञा कपिलस्योक्तम्, कपिलो न मन्यते । राज्ञा पुनस्तस्या उक्तम्, तावत्त्वं मम गृहे तिष्ठ, यावत्कपिलं बोधयामीति । अन्यदा स राजा स्वपुत्रौ गणिकानिमित्तं युद्धयमानौ दृष्ट्वा वैराग्येण विषं भक्षितवान् । ततः सिंहनन्दिताऽभिनन्दितानाम्न्यौ श्रीषेणनृपस्य भार्ये, कपिलस्य भार्या सत्यभामा च विषप्रयोगेण कालं गताः । चत्वारोऽप्यमी जीवा देवकुरुषु युगलत्वेनोत्पन्नाः, ततः सौधर्मे कल्पे गताः ।

ततश्च्युत्वा श्रीषेणजीवोऽमिततेजो जातः, अभिनन्दिताजीवः श्रीविजयो जातः । सत्यभामाजीवः सुतारा जाता । स कपिलजीवस्तिर्यग्भवेषु चिरकालं भ्रान्त्वा क्वचित्तथाविधमनुष्ठानं कृत्वाऽशनिघोषः समुत्पन्नः । सुतारां च सत्यभामाब्राह्मणीजीवं दृष्ट्वा पूर्वस्नेहेनापहृत्य गतः । पुनरप्यमिततेजसा पृष्टम्, भगवन्नहं किं भव्योऽभव्यो वा ? अचलकेवलिना कथितं त्वं भव्य इतश्च नवमे भवे तीर्थङ्करो भविष्यसि । एषोऽपि श्रीविजयस्तव गणधरो भविष्यति । तत एतदाकर्ण्यामिततेजश्रीविजयनृपावचलकेवलिनं वन्दित्वा गतौ स्वस्थानम् ।

अन्यदामिततेजःश्रीविजयाभ्यामुद्यानगताभ्यां चारणश्रमणाभ्यामवधिज्ञानेन ज्ञात्वोक्तम्, यथा षड्विंशतिदिनानि भवतोर्द्वयोरप्यायुः । ततस्ताभ्यां मेरौ गत्वा कृतोऽष्टाह्निकामहोत्सवः, स्वस्वराज्ये च गत्वा स्वस्वपुत्रावभिषिच्य जगन्नन्दनमुनिसमीपे संयममादाय पादपोपगमनमनशनं विहितम् । विधिना कालं कृत्वा प्राणते कल्पे विंशतिसागरोपमायुर्देवत्वेनोत्पन्नौ । ततश्च्युताविहैव जम्बूद्वीपे पूर्वविदेहे रमणीविजये सीताया महानद्या दक्षिणकुले सुभगायां नगर्यां प्रेमसागरस्य राज्ञो वसुन्धराऽनङ्गसुन्दर्योर्महागर्भे क्रमेण कुमारत्वेनोत्पन्नौ । अमिततेजजीवोऽपराजितनामा श्रीविजयजीवोऽनन्तवीर्यनामा जातः । तत्रापि प्रतिशत्रुदमितारिं व्यापाद्य क्रमेण बलदेवत्वं वासुदेवत्वमापन्नौ । तयोश्च पिता प्रव्रज्याविधानेन मृत्वाऽसुरकुमारेन्द्रत्वेनोत्पन्नः । अनन्तवीर्यस्तु कालं कृत्वा द्विचत्वारिंशत्सहस्रवर्षायुर्नारकः प्रथमपृथिव्यामुत्पन्नः । चमरस्तु पुत्रस्नेहेन तत्र गत्वा वेदनोपशमं चकार । सोऽपि संविग्नः सम्यक् सहते । अपराजितो बलदेवो भ्रातृविरहदुःखितो निक्षिप्तपुत्रराज्यो जगद्धरगणधरसमीपे निष्क्रान्तः । शुद्धां प्रव्रज्यां परिपाल्याच्युतेन्द्रत्वेनोत्पन्नः । अनन्तवीर्यस्तु नरकादुद्धृत्य वैताढ्ये विद्याधरत्वेनोत्पन्नः । अच्युतेन्द्रेण प्रतिबोधितोऽसौ प्रव्रज्यां गृहीत्वाऽच्युतकल्पेन्द्रसामानिकत्वेनोत्पन्नः । अपराजितोऽच्युतेन्द्रस्ततश्च्युत्वा इहैव जम्बूद्वीपे सीतामहानदीदक्षिणकुले मङ्गलावतीविजये रत्नसञ्चयापुर्यां क्षेमङ्करो राजा, तस्य भार्या रत्नमाला, तयोः पुत्रो वज्रायुधाभिधानो जातः ।

इतश्च श्रीविजयजीवो देवायुरनुपाल्य तस्यैव पुत्रत्वेनोत्पन्नः । सहस्रायुध इति तस्य नाम प्रतिष्ठितम् । अन्यदा पौषधशालायां स्थितो वज्रायुधो देवेन्द्रेण प्रशंसितः । यथायं वज्रायुधो धर्माच्चालयितुं न शक्यते देवैर्दानवैश्च । तत एको देवस्तद्वाण्यमश्रद्दधानः पारापतरूपं विकुर्व्य भयभ्रान्तो वज्रायुधमाश्रितः । हे वज्रायुध ! तव शरणं ममास्त्विति

मनुष्यभाषयोवाच । वज्रायुधेन तस्य शरणं दत्तम्, स्थितस्तदन्तिके पारापतः, तदन्तरं तत्रैवागतो लावकः, तेनापि भणितम्, यथा महासत्व ! एष मया क्षुधाक्लान्तेन प्राप्तः, ततो मुञ्चैनम्, अन्यथा नास्ति मम जीवितमिति । ततस्तद्वचनमाकर्ण्य वज्रायुधेन भणितम्, न युक्तं शरणागतसमर्पणम्, तवापि न युक्तमेतत्, यतः-

"[1]हंतूण परप्पाणे, अप्पाणं जो करेइ सप्पाणं ।
अप्पाणं दिवसाणं कए, स नासेइ अप्पाणं ॥ १ ॥"

यथा जीवितं तव प्रियम्, सर्वेषामपि जीवानां तथैवास्ति । एनं भयभ्रान्तं दीनं व्यापादयितुं तव न युक्तम्, धर्मं कुरु । पापं मुञ्च । लावकः प्रतिभणति राजन्नहं बुभुक्षितः, न मे मनसि धर्मस्तिष्ठति । ततः पुनरपि भणितम् राज्ञा, भो महासत्त्व ! यदि बुभुक्षितस्त्वं ततोऽन्यत्तव मांसं ददामि । लावकः प्रतिभणति, स्वयंव्यापादितजीवमांसदुर्ललितोऽहम्, न च रोचते मह्यं परव्यापादितमांसम् । राज्ञा भणितम्, यावन्मात्रेण मांसेन पारापतस्तुलति, तावन्मात्रं मांसं ददामि । सोऽप्यवदत्, यदि त्वं स्वदेहादुत्कीर्य मांसं ददासि तदाहं तं मुञ्चामि । तद्राज्ञा प्रतिपन्नम् । ततस्तुष्टो लावकः, राज्ञा च तुलाऽऽनायिता, एकस्मिन् पार्श्वे पारापतो प्रक्षिप्तः, एकस्मिन् पार्श्वे स्वदेहादुत्कीर्णमांसारोपो विहितः, राजा यथा यथा तत्र मांसं प्रक्षिपति तथा तथाऽन्यत्र पार्श्वे पारापतो गुरुतरो देवमायया भवति । राजा पुनः पुनरुत्कृत्योत्कृत्य स्वदेहमांसमन्यत्र क्षिपति । तं दृष्ट्वा राजलोकः समस्तो हाहारवं चकार । पारापतपार्श्वे गुरुभारमवेक्ष्य स्वमांसपार्श्वे राजा स्वयमारूढः, एतादृशं वज्रायुधस्य सत्त्वं दृष्ट्वा विस्मितो देवः स्वं रूपं प्रकटीकृत्य प्रकामं स्तुत्वा च स्वस्थानं गतवान् ।

अन्यदा वज्रायुधसहस्रायुधौ पितृपुत्रौ क्षेमङ्करगणधरसमीपे जातवैराग्यौ सहस्रायुधसुतं बलिं राज्येऽभिषिच्य प्रव्रजितौ । प्रव्रज्यापर्यायं च परिपाल्य पादपोपगमनविधिना कालं कृत्वा द्वावपि जनावुपरितनग्रैवेयके एकत्रिंशत्सागरोपमस्थितिकावहमिन्द्रदेवौ जातौ । अहमिन्द्रसौख्यमनुभूय ततश्च्युताविहैव जम्बूद्वीपे पूर्वविदेहे पुष्कलावतीविजये पुण्डरीकिण्यां नगर्यां घनरथो राजा, तस्य द्वे महादेव्यौ पद्मावती मनोरमती च । तयोर्गर्भे जाते । वज्रायुधो मेघरथः, सहस्रायुधो दृढरथश्चेति वृद्धिं गतौ । ततः कृतं ताभ्यां कलाग्रहणम्, तौ द्वौ राज्ये स्थापयित्वा घनरथः स्वयं दीक्षां गृहीत्वा केवलज्ञानमुत्पाद्य तीर्थङ्करो जातः । तयोर्मेघरथदृढरथयोः पूर्वभवाभ्यासतो जिनधर्मदक्षताभूत् । अधिगतजीवाजीवादिभावौ तौ सुश्रावकौ जातौ ।

अन्यदा पितुस्तीर्थङ्करस्य समीपे द्वावपि जनौ निजपुत्रं राज्येऽभिषिच्य प्रव्रजितौ । तत्राधीतसूत्रार्थेन मेघरथेन विंशतिस्थानकैः समर्जितं तीर्थङ्करनामगोत्रम् । दृढरथेन शुद्धं चारित्रमाराधितम् । द्वावपि संलेखनाविधिना कालं कृत्वाऽनुत्तरोपपातिकेषु देवेषूत्पन्नौ । तत्र सर्वार्थसिद्धविमानेऽनर्गलं सुखमनुभूय मेघरथकुमारस्ततश्च्युत्वेहैव जम्बूद्वीपे भारते

---

१ हत्वा परप्राणान् आत्मानं यः करोति सप्राणम् । अल्पानां दिवसानां कृते स नाशयति आत्मानम् ॥१॥

क्षेत्रे हस्तिनागपुरे विश्वसेनस्य राज्ञोऽचिरादेव्याः कुक्षौ भाद्रपदकृष्णासप्तम्यां चतुर्दशस्वप्नसूचितः पुत्रत्वेनोत्पन्नः । साधिकनवमासानुदरे धृत्वा तमचिरादेवी ज्येष्ठकृष्णत्रयोदश्यां प्रसूतवती । षट्पञ्चाशद्दिक्कुमारीमहोत्सवो जातः । चतुःषष्ठिसुरेन्द्रैरपि जन्माभिषेकः कृत उचितसमये । गर्भस्थे चास्मिन् भगवति सर्वदेशेषु शान्तिर्जातेति शान्तिरिति नाम कृतं मातृपितृभ्याम्, क्रमेणासौ सर्वकलाकुशलो जातः । यौवनं प्राप्तो विवाहितः प्रवरराजकन्याभिः, क्रमेण राज्ये स्थापितः, पित्रा चारित्रं गृहीतम् । शान्तेश्चक्रवर्तिपदवी समायाता, उत्पन्नानि चतुर्दश रत्नानि, साधितं भरतम्, अखण्डं षट्खण्डराज्यं परिपाल्योचितावसरे स्वयं सम्बुद्धोऽपि लोकान्तिकामरैः प्रतिबोधितः, सांवत्सरं दानं दत्वा ज्येष्ठकृष्णचतुर्दश्यां चक्रिभोगांस्त्यक्त्वा निष्क्रान्तः ।

चतुर्ज्ञानसमन्वितस्योद्यतविहारं कुर्वतः पौषशुक्लनवम्यां केवलज्ञानं समुत्पन्नम् । देवैः समवसरणं कृतम्, भगवता धर्मदेशना प्रारब्धा, प्रव्राजिता गणधराः, प्रतिबोधिता बहवः प्राणिनः । क्रमेण विहृत्य भरतक्षेत्रं बोधिबीजमुप्त्वा क्षीणसर्वकर्मांशो ज्येष्ठकृष्णत्रयोदश्यां मोक्षं गत इति । अस्य भगवतः कुमारत्वे पञ्चविंशतिवर्षसहस्राणि, माण्डलिकत्वेऽपि पञ्चविंशतिवर्षसहस्राणि, चक्रित्वे पञ्चविंशतिवर्षसहस्राणि, श्रामण्ये च पञ्चविंशतिवर्षसहस्राणि, सर्वायुश्च वर्षलक्षमेकं जातमिति । इति शान्तिनाथदृष्टान्तः ॥ ५ ॥

इक्खागरायवसहो, कुंथु नामनरेसरो ।
विक्खायकित्ती भयवं, पत्तो गइमणुत्तरं ॥ ३९ ॥

पुनः कुन्थुनामा नरेश्वरः षष्ठचक्री अनुत्तरां - सर्वोत्कृष्टां गतिं प्राप्तः । कीदृशः कुन्थुः ? भगवानैश्वर्यज्ञानवान् । पुनः कीदृशः कुन्थुः ? ईक्ष्वाकुराजवृषभः, ईक्ष्वाकुवंशीयभूपेषु वृषभो वृषभसमानः प्रधान इत्यर्थः । पुनः कीदृशः ? विख्यातकीर्तिः, अत्र भगवानिति विशेषणेनाष्टमहाप्रातिहार्याद्यैश्वर्ययुक्तः सप्तदशस्तीर्थङ्करः षष्ठश्चक्री कुन्थुर्ज्ञेयः ॥ ३९ ॥

अत्र कुन्थुनाथदृष्टान्तः-

हस्तिनागपुरे सूरराज्ञः श्रीदेवी भार्या । तस्या कुक्षौ भगवान् पुत्रत्वेनोत्पन्नः जन्ममहोत्सवानन्तरं च स्वप्ने जनन्या रत्नस्तूपः [1]कुस्थो दृष्टः । गर्भस्थे च भगवति पित्रा शत्रवः कुन्थुवद् दृष्टाः इति कुन्थुनाम कृतम् । पित्रा प्राप्तयौवनश्चायं विवाहितो राजकुमारिकाभिः । काले च भगवन्तं राज्ये व्यवस्थाप्य सूरराजा स्वयं दीक्षां जग्राह । भगवांश्चोत्पन्नचक्ररत्नप्रसाधितभरतश्चक्रवर्तिभोगान् बुभुजे । तीर्थप्रवर्तमानसमये च निष्क्राम्य षोडशवर्षाणि चोग्रविहारेण विहृत्य केवलज्ञानभाक् जातः । देवाश्च समवसरणमकार्षुः । प्रव्रजिताः केवलपर्यायेण घना लोकाः । घनं कालं विहृत्य सम्मेतगिरिशिखरे मोक्षमगमत् । तस्य भगवतः कुमारत्वे त्रयोविंशतिवर्षसहस्राणि, माण्डलिकत्वे च त्रयोविंशतिवर्षसहस्राणि

---

१ पृथ्वीस्थः ॥

चक्रित्वे त्रयोविंशतिवर्षसहस्राणि, श्रामण्ये च त्रयोविंशतिवर्षसहस्राणि सार्द्धानि च सप्तशतानि वर्षाण्यभवन् । सर्वायुर्द्विनवतिवर्षसहस्राणि सार्धसप्तशतानि चास्य बभूव । इति श्रीकुन्थुनाथदृष्टान्तः ॥ ६ ॥

सागरंतं चइत्ता णं, भरहं नरवरीसरो ।
अरो य अरयं पत्तो, पत्तो गइमणुत्तरं ॥ ४० ॥

च पुनररोऽरनामा नरवरेश्वरः सप्तमश्चक्री सागरान्तं-समुद्रान्तं भरतक्षेत्रं षट्खण्डराज्यं त्यक्त्वाऽरजस्त्वं प्राप्तः सन्ननुत्तरां गतिं सिद्धिगतिं प्राप्तो-मोक्षं गत इत्यर्थः । चक्री भूत्वा तीर्थङ्करपदं भुक्त्वा मोक्षं गत इत्यर्थः ॥ ४० ॥

अत्र अरनाथदृष्टान्तः-

अरनाथवृत्तान्तस्तूत्तराध्ययनवृत्तिद्वयेऽपि नास्ति । तथापि ग्रन्थान्तराल्लिख्यते-प्राग्विदेहविभूषणे मङ्गलावतीविजये रत्नसञ्चया पुर्यस्ति । तत्र महीपालनाम भूपालोऽस्ति । प्राज्यं राज्यं भुङ्क्ते । अन्यदा गुरुमुखाद्धर्मं श्रुत्वा वैराग्यमागतः स तृणमिव राज्यं त्यक्त्वा दीक्षां ललौ । गुर्वन्तिके एकादशाङ्गान्यधीत्य गीतार्थो बभूव । बहुवत्सरकोटीः स संयममाराध्य विशुद्धविंशतिस्थानकैर्हन्नामकर्म बबन्ध । ततो मृत्वा सर्वार्थसिद्धविमाने देवो बभूव । ततश्च्युत्वेह भरतक्षेत्रे हस्तिनापुरे सुदर्शननामा नृपो बभूव । तस्य राज्ञी देवीनाम्नी बभूव । तस्याः कुक्षौ सोऽवततार । तदानीं रेवतीनक्षत्रं बभूव, तया चतुर्दश स्वप्ना दृष्टाः । ततः पूर्णेषु मासेषु रेवतीनक्षत्रे तस्य जन्म बभूव । जन्मोत्सवस्तदा षट्पञ्चाशद्दिक्कुमारिकाभिश्चतुःषष्टिसुरेन्द्रैर्निर्मितः । ततः सुदर्शनराजापि स्वपुत्रस्य जन्मोत्सवं विशेषाच्चकार । अस्मिन् गर्भगते मात्रा प्रौढरत्नमयोऽरः स्वप्ने दृष्टः । ततः पित्रास्याऽर इति नाम कृतम् । देवपरिवृतः स वयसा गुणैश्च वर्धते स्म । एकविंशतिसहस्रवर्षेषु गतेष्वरकुमारस्य पित्रा राज्यं दत्तम् । एकविंशतिवर्षसहस्राणि यावद्राज्यं भुक्तवतस्तस्य शस्त्रकोशे चक्ररत्नं समुत्पन्नम् ।

ततो भरतं साध्यैकविंशतिसहस्रवर्षाणि यावच्चक्रवर्तित्वं बुभुजे । ततः स्वामी स्वयम्बुद्धोऽपि लोकान्तिकदेवबोधितो वार्षिकं दानं दत्वा चतुःषष्टिसुरेन्द्रसेवितो वैजयन्त्याख्यां शिबिकामारूढः । सहस्राम्रवने सहस्रराजभिः समं प्रव्रजितः । ततश्चतुर्ज्ञान्यसौ त्रीणि वर्षाणि छाद्मस्थ्ये विहृत्य पुनः सहस्राम्रवने प्राप्तः । तत्र शुक्लध्यानेन ध्वस्तपापकर्मारः केवलज्ञानं प्राप । ततः सुरैः समवसरणे कृते स्वामी योजनगामिना शब्देन देशनां चकार । तद्देशनां श्रुत्वा केऽपि सुश्रावका जाताः, केऽपि च प्रव्रजिताः । तदानीं कुम्भभूपः प्रव्रज्य प्रथमो गणधरो जातः । अरनाथस्य षष्टिसहस्राः साधवो जाताः । साध्व्यः स्वामिनस्तावत्प्रमाणा एव जाताः । श्रावकाश्चतुरशीतिसहस्राधिकलक्षमाना बभूवुः । श्राविकाश्चतुरशीतिसहस्राधिकलक्षत्रयमाना बभूवुः । सर्वायुः चतुरशीतिसहस्रवर्षाणि भुक्त्वा सम्मेतशैलशिखरे मासिकानशनेन भगवान्निर्वृत्तः । देवैर्निर्वाणोत्सवो भृशं कृतः । इत्यरचक्रवर्तिदृष्टान्तः ॥९॥

चइत्ता भारहं वासं, चक्कवट्टी महड्ढिओ ।
चइत्ता उत्तमे भोए, महापउमो तवं चरे ॥ ४१ ॥

हे मुने ! महापद्मोऽप्यष्टमश्चक्री महर्द्धिकस्तपोऽचरत् । किं कृत्वा ? भारतं वासं त्यक्त्वा, पुनरूत्तमान्-प्रधानान् भोगांस्त्यक्त्वा ॥ ४१ ॥

अत्र महापद्मचक्रवर्तिदृष्टान्तः-

इहैव जम्बूद्वीपे भारते वर्षे कुरुक्षेत्रे हस्तिनागपुरं नाम नगरम् । तत्र श्रीऋषभवंशप्रसूतः पद्मोत्तरो नाम राजा । तस्य ज्वालानाममहादेवी । तस्याः सिंहस्वप्नसूचितो विष्णुकुमारनामा प्रथमः पुत्रः । द्वितीयश्चतुर्दशस्वप्नसूचितो महापद्मनामा । द्वावपि वृद्धिं गतौ, महापद्मो युवराजः कृतः । इतश्चोज्जयिन्यां नगर्यां श्रीधर्मनामराजा, तस्य नमुचिनामा मन्त्री । अन्यदा तत्र श्रीमुनिसुव्रतस्वामिशिष्यः सुव्रतो नाम सूरिः समवसृतः । तद्वन्दनार्थं लोकः स्वविभूत्या निर्गतः, प्रासादोपरिस्थितेन राज्ञा दृष्टः । पृष्टाश्च सेवकाः, अकालयात्रया क्वायं लोको गच्छति ? ततो नमुचिमन्त्रिणा भणितम्-देव अत्रोद्याने श्रमणाः समागताः, तेषां यो भक्तो लोकः स तद्वन्दनार्थं गच्छति । राज्ञा भणितम् वयमपि यास्यामः । नमुचिनोक्तं तर्हि त्वया तत्र मध्यस्थेन भाव्यम्, यथाहं वादं कृत्वा तान्निरुत्तरीकरोमि । राजा नमुचिसहितस्तत्र गतः । नमुचिना भणितम्-भो श्रमणाः ! यदि यूयं जानीथ धर्मतत्त्वं तर्हि वदथ । सर्वेऽपि मुनयः क्षुद्रोऽयमिति कृत्वा मौनेन स्थिताः । ततो नमुचि भृशं रुष्टः सूरिं प्रत्येवं भणति । एष बयल्लः (बलद) किं जानाति ? ततः सूरिभिर्भणितं भणामः किमपि यदि ते मुखं *खर्जति ।

इदं वचः श्रुत्वाऽनेकशास्त्रविचक्षणेन क्षुल्लकशिष्येण भणितम्, भगवन्नहमेवैनं निराकरिष्यामि । इत्युक्त्वा क्षुल्लकेन स वादे निरुत्तरीकृतः, साधूनामुपरि द्वेषं गतः । रात्रौ च चरवृत्त्यैकाक्येव मुनिवधार्थमागतो देवतया स्तम्भितः । प्रभाते तदाश्चर्यं दृष्ट्वा राज्ञा लोकेन च स भृशं तिरस्कृतो विलक्षीभूतो गतो हस्तिनागपुरम्, महापद्मयुवराजस्य मन्त्री जातः । इतश्च पर्वतवासी सिंहबलो नाम राजा, स च कोट्टाधिपतिरिति महापद्मादेशं विनाश्य कोट्टे प्रविशति । ततो रुष्टेन महापद्मेन नमुचिमन्त्री पृष्टः, सिंहबलराजग्रहणे किञ्चिदुपायं जानासि ? नमुचिनोक्तं सुष्ठु जानामि । ततो महापद्मप्रेरितोऽसौ सैन्यवृतो गतो निपुणोपायेन च दुर्गं भङ्क्त्वा सिंहबलो बद्ध आनीतश्च महापद्मान्तिके । महापद्मेनोक्तं नमुचे ! यत्तवेष्टं तन्मार्गय ? नमुचिनोक्तं साम्प्रतम् वरः कोशेऽस्तु, अवसरे मार्गयिष्यामि । एवं यौवराज्यं पालयतो महापद्मस्य कियान् कालो गतः ।

अन्यदा महापद्ममात्रा ज्वालादेव्या जिनरथः कारितः, अपरमात्रा च मिथ्यात्ववासितया जिनधर्मप्रत्यनीकया लक्ष्मीनाम्न्या ब्रह्मरथः कारितो भणितश्च पद्मोतरो नाम राजा, यथैष ब्रह्मरथः प्रथमं नगरमध्ये परिभ्रमतु । जिनरथश्च पश्चात्परिभ्रमतु । इदं वचः श्रुत्वा ज्वाला-देव्या प्रतिज्ञा कृता, यदि जिनरथः प्रथमं न भ्रमिष्यति तदाऽपरजन्मनि ममाहारः । ततो राज्ञा द्वावपि रथौ निरुद्धौ । महापद्मः स्वजनन्याः परमामधृतिं दृष्ट्वा नगरान्निर्गतः केनापि न ज्ञातः । परदेशे गच्छन् महाटव्यां प्रविष्टः, तत्र च परिभ्रमंस्तापसालये गतः । तापसैर्दत्तसन्मानस्तत्र तिष्ठति ।

---

१ खर्ज् - ખંજવાળવું (ગ.૧.)

इतश्च चम्पायां नगर्यां जनमेजयो राजा परिवसति । स च कालनरेन्द्रेण प्रतिरुद्धः, ततो महान् सङ्ग्रामो बभूव । जनमेजयो नष्टः, तस्यान्तःपुरमपीतस्ततो नष्टम् जनमेजयस्य राज्ञो नागवतीनाम भार्या, सा मदनावलीपुत्र्या समं नष्टा, आगता तं तापसाश्रमम्, समाश्वासिता कुलपतिना तत्रैव स्थिता । कुमारमदनावल्योः परस्परमनुरागो जातः । कुलपतिना तन्मात्रा च तयोः परस्परमनुरागो ज्ञातः । कुलपतिना नागवत्या मात्रा च भणिता मदनावली, यथा पुत्रि ! त्वं किं न स्मरसि नैमित्तिकवचनं ? यथा चक्रवर्तिनस्त्वं प्रथमपत्नी भविष्यसि । ततः कथं यत्र तत्रानुरागं करोषि ? कुलपतिनापि कुमारस्य विसर्जनार्थमुक्तम्, कुमार ! त्वमितो गच्छ । तदानीं त्वरितमेव ततो निर्गतः कुमार एवं मनोरथं चकार । यथाहमेतस्याः सङ्गमेन भरताधिपो भूत्वा ग्रामाकरनगरादिषु सर्वत्र जिनभवनानि कारयिष्यामीति ।

भ्रमन् कुमारोऽथ प्राप्तः सिन्धुनन्दनं नाम नगरम् । तत्रोद्यानिकामहोत्सवे नगरान्निर्गता नरनार्यश्च विविधक्रीडाभिः क्रीडन्ति । अस्मिन्नवसरे राज्ञः पट्टहस्ती आलानस्तम्भमुन्मूल्य गृहहट्टभित्तिभङ्गं कुर्वन्नगराद्बहिर्युवतीजनमध्ये समायातः । ताश्च तं तथाविधं दृष्ट्वा दूरतः प्रधावितुमसमर्थास्तत्रैव स्थिताः यावदसौ तासामुपरि शुण्डापातं करोति, तावता दूरदेशस्थितेन महापद्मेन करुणापूर्णहृदयेन हक्कितोऽसौ करी, सोऽपि वेगेन चलितः कुमाराभिमुखम् । तदानीं ताः सर्वा अपि भणन्ति । हाहा ! अस्मद्रक्षणार्थं प्रवृत्तोऽयं करिणा हिंस्यते । एवं तासु प्रलपन्तीषु च तयोः करिकुमारयोर्घोरः सङ्ग्रामो बभूव । सर्वेऽपि नागरजनास्तत्रायाताः । सामन्तभृत्यसहितो महासेनो राजापि तत्रायातः । भणितं च नरेन्द्रेण कुमार ! अनेन समं सङ्ग्रामं मा कुरु । कृतान्त इव च रुष्टोऽसौ तव विनाशं करिष्यतीति । महापद्म उवाच, राजन् ! विश्वस्तो भव । पश्य मम कलामित्युक्त्वा क्षणेन तं मत्तकरिणं स्वकलया वशीकृतवान् । आरूढश्च तं मत्तगजं महापद्मः स्वस्थाने नीतवान् । साधुकारेण तं लोकः पूजितवान्, यथैष कोऽपि महापुरुषः प्रधानकुलसमुद्भवोऽस्ति । अन्यथा कथमीदृशं रूपं विज्ञानं चास्य भवति ? ततो राज्ञा स्वगृहे नीत्वा कुमारस्य विविधोपचारकरणपूर्वकं कन्याशतं दत्तम् । तेन समं विषयसुखमनुभवतस्तस्य महापद्मकुमारस्य दिवसास्तत्र सुखेन यान्ति । तथापि स तां मदनावलीं हृदयान्न विस्मारयति ।

अन्यदा रजन्यां शय्यागतोऽसौ वेगवत्या विद्याधर्यापहृतः, निद्राक्षये सा तेन दृष्टा, मुष्टिं दर्शयित्वा सा कुमारेण भणिता, किं त्वमेवं मामपहरसि ? तया भणितं कुमार ! शृणु । वैताढ्ये सुरोदयनाम नगरमस्ति । तत्रेन्द्रधनुर्नाम विद्याधराधिपतिरस्ति । तस्य भार्या श्रीकान्ता वर्तते, तस्याः पुत्री जयचन्द्रानाम्नी वर्तते । सा च पुरुषद्वेषिणी नेच्छति कथमपि वरम् । ततो नरपत्याज्ञया मया सर्वत्र वरनरेन्द्रा विलोक्य पट्टिकायां लिखिताः सर्वेऽपि तस्या दर्शिताः, न कोऽपि रुचितः, अन्यदा मया तस्यास्तव रूपं दर्शितम् । तद्दर्शनानन्तरमेव सा कामावस्थया गृहीता, भणितं च तया यद्येष भर्ता न भविष्यति, तदाऽवश्यं मया मर्तव्यम्, अन्यपुरुषस्य मम यावज्जीवं निवृत्तिरेव । एष तस्या व्यतिकरो मया तन्मातृपित्रोर्ज्ञापितः । ताभ्यां त्वदानयनायाहं प्रयुक्ता । अविश्वसन्त्यास्तस्या विश्वासार्थं मयेयं प्रतिज्ञा

कृता, यद्यहं तं त्वरितं नानयामि, तदा ज्वालाकुले ज्वलने प्रविशामि । ततः कुमार ! यदि तव प्रसादेन मम मरणं न सम्पद्यते । यथा च मे प्रतिज्ञानिर्वाहो भवति, तथा प्रसादं कुरु । ततस्तदाज्ञया तया महापद्मः सूर्योदये तत्र नीतः । खेचराधिपतिर्मिलितः, तेन च सुमुहूर्ते तस्याः पाणिग्रहणं कारितं, पूजिता च वेगवती । इतश्च जयचन्द्राया मातुल-भ्रातरौ गङ्गाधर-महीधरनामानौ विद्याधरावतिप्रचण्डाविमं व्यतिकरं ज्ञात्वा अनेकभटसहितौ महापद्मेन समं सङ्ग्रामार्थ-मागतौ । महापद्मोऽपि तयोरागमनं श्रुत्वा सूरोदयपुराद्बहिर्विद्याधरभटपरिवृतो निर्गतः, संप्रलग्नस्तयोः सङ्ग्रामः, तदानीं महापद्मेन स्यन्दनाः, कुञ्जराः, अश्वाः, सुभटाः परबल-सत्काः सर्वेऽपि बाणैर्विद्धाः, भग्नं स्वं बलं दृष्ट्वा गङ्गाधरमहीधरौ स्वयमुत्थितौ, महापद्मे-नोभावपि हतौ । ततो लब्धजयः स महापद्म उत्पन्नस्त्रीरत्नवर्जसर्वरत्नः, प्राप्तनवनिधिर्द्वात्रिं-शत्सहस्रमण्डलेश्वरसेवितपादपद्मः, परिणीतैकोनचतुःषष्टिसहस्रान्तःपुरो हयगजरथपदाति-कोशसम्पन्नो नवमश्चक्रवर्ती जातः । तथापि षट्खण्डभरतराज्यं स मदनावल्या रहितं नीरसं मन्यते ।

अन्यदा तस्मिन्नाश्रमपदे गतस्य तस्य महापद्मचक्रिणस्तापसैर्महान् सत्कारः कृतः । जनमेजयेनापि राज्ञा मदनावली तस्य दत्ता, तेन परिणीता स्त्रीरत्नं बभूव । ततो महापद्मश्चक्र-वर्त्तुर्द्धिसमेतो हस्तिनागपुरं प्राप्तः, प्रणनाम च जननीजनकपादान् । ताभ्यामप्यधिकस्नेहेन प्रेक्षितः । अत्रान्तरे तत्रैव समवसृतो मुनिसुव्रतस्वामिशिष्यो नागसूरिः, ततो निर्गतः सपरिवारः पद्मोत्तरराजा तं वन्दित्वा पुरो निषण्णः । गुरुणा च तत्पुरो भवनिर्वेदजननी देशना कृता । तां श्रुत्वा वैराग्यमापन्नो राजा गुरुं प्रत्येवमुवाच-भगवन्नहं राज्यं स्वस्थं कृत्वा भवदन्तिके प्रव्रजिष्यामि । गुरुणा भणितं-मा विलम्बं कुर्विति गुरुं प्रणम्य नगरे प्रविष्टो राजा । आकारिता मन्त्रिणः प्रधानपरिजना विष्णुकुमारश्च, सर्वेषामपि राज्ञैवमुक्तम् । भो भो ! श्रुता भवद्भिः संसारासारता, अहमेतावत्कालं वञ्चितः । यत् श्रामण्यं नानुष्ठितवान् । ततः साम्प्रतं विष्णुकुमारं निजराज्येऽभिषिच्य प्रव्रज्यां गृह्णामि । ततो विष्णुकुमारेण विज्ञप्तम्, तात ! ममापि किम्पाकोपमैर्भोगैः सृतम्, तव मार्गमेवानुसरिष्यामि ॥

ततो विष्णुकुमारस्य दीक्षानिश्चयं ज्ञात्वा पद्मोत्तरराज्ञा महापद्म आकारितो भणितश्च-पुत्र ! ममेदं राज्यं प्रतिपद्यस्व । विष्णुकुमारोऽहं च प्रव्रज्यां प्रतिपद्यावः । अथ विनीतेन महापद्मेन च भणितम् । तात ! निजराज्याभिषेकं विष्णुकुमारस्यैव कुरु । अहं पुनरेतस्यै-वाज्ञाप्रतीच्छको भविष्यामि । राज्ञा भणितं-वत्स ! मयोक्तोऽप्ययं राज्यं न प्रतिपद्यते । अवश्यमयं मया समं प्रव्रजिष्यति । ततः शोभनदिवसे महापद्मस्य कृतो राज्याभिषेकः । विष्णुकुमारसहितः पद्मोत्तरराजा सुव्रतसूरिसमीपे प्रव्रजितः । ततो महापद्मो विख्यातशासन-श्चक्रवर्ती जातः । स्वमात्रपरमातृकारितौ द्वावपि रथौ तथैव स्तः । महापद्मचक्रिणा तु जननीसत्को जिनरथो नगरीमध्ये भ्रामितः, जिनप्रवचनस्य कृतोन्नतिः, तत्प्रभृति बहुलोको धर्मोद्यममतिर्जिनशासनं प्रतिपन्नः । तेन महापद्मचक्रिणा सर्वस्मिन्नपि भरतक्षेत्रे ग्रामाकर-

नगरोद्यानादिषु कारितानि जिनायतनान्येककोटिलक्षप्रमाणानि पद्मोत्तरमुनिरपि पालित-निष्कलङ्कश्रामण्यः शुद्धाध्यवसायेन कर्मजालं क्षपयित्वा समुत्पन्नकेवलज्ञानः सम्प्राप्तः सिद्धिमिति । विष्णुकुमारमुनेरप्युग्रतपोविहारनिरतस्य वर्धमानज्ञानदर्शनचारित्रपरिणामस्या-काशगमनादिवैक्रियलब्धय उत्पन्नाः । स कदाचिन्मेरुवत्तुङ्गदेहो गगने व्रजति, कदाचिन्म-दनवदूपवान् भवति । एवं नानाविधलब्धिपात्रः स सञ्जातः ।

इतश्च ते सुव्रताचार्या बहुशिष्यपरिवृता वर्षारात्रस्थित्यर्थं हस्तिनागपुरोद्याने समायाताः, ज्ञाताश्च तेन विरुद्धेन नमुचिना, अवसरं ज्ञात्वा तेन राज्ञे विज्ञप्तम् । यथा पूर्वप्रतिपन्नं मम वरं देहि । चक्रिणोक्तं यथेष्टं मार्गय । नमुचिना भणितं राजन्नहं वेदभणितेन विधिना यज्ञं कर्तुमिच्छामि, अतो राज्यं मे देहि । चक्रिणा नमुचिः स्वराज्येऽभिषिक्तः, स्वयं चान्तःपुरे प्रविश्य स्थितः । नमुचिर्यज्ञपाटकमागम्य यागनिमित्तं दीक्षितो बभूव । राज्येऽभिषिक्तस्य तस्य वर्धापनार्थं जैनयतीन् वर्जयित्वा सर्वेऽपि लिङ्गिनो लोकाश्च समायाताः । नमुचिना सर्वलोकसमक्षमुक्तम्, सर्वेऽपि लोका मम वर्धापनार्थं समायाताः, जैनयतयः केऽपि नायाताः । एवं छलं प्रकाश्य सुव्रताचार्या आकारिता आगताः । नमुचिना भणिता-भो जैनाचार्याः ! यो यदा ब्राह्मणो वा क्षत्रियो वा राज्यं प्राप्नोति, स तदा पाखण्डिभिरागत्य दृष्ट्व्यः । इयं लोकस्थितिः, यतो राजरक्षितानि तपोधनानि भवन्ति । यूयं पुनः स्तब्धाः सर्वपाखण्डदूषका निर्मर्यादा मां निन्दथ, अतो मदीयं राज्यं मुक्त्वाऽन्यत्र यथासुखं व्रजत । यो युष्माकं मध्ये कोऽपि नगरे भ्रमन् द्रक्ष्यते स मे वध्यो भविष्यति । सुव्रताचार्यैरुक्तं राजन्नस्माकं राजवर्धापनाचारो नास्ति, तेन वयं त्वद्वर्धापनकृते नायाताः, न च वयं किञ्चिन्निन्दामः, किन्तु समभावास्तिष्ठामः । ततः स रुष्टः प्रतिभणति यदि श्रमणं सप्तदिनो-पर्यहं द्रक्षिष्ये तमहमवश्यं मारयिष्यामि, नात्र सन्देहः । एतन्नमुचिवाक्यं श्रुत्वाचार्याः स्वस्था-नमायाताः, सर्वेऽपि साधवः पृष्टाः, किमत्र कर्तव्यं ? तत एकेन साधुना भणितम्, यथा सदा सेवititतपोविशेषो विष्णुकुमारनामा महामुनिः साम्प्रतं मेरुपर्वतचूलास्थो वर्तते । स च महापद्मचक्रिणो भ्रातास्ति, ततस्तद्वचनादयमुपशमिष्यति । आचार्यैरुक्तं तदाकारणार्थं यो विद्यालब्धिसंपन्नः स तत्र व्रजतु ।

तत एकेन साधुनोक्तमहं मेरुचूलां यावद्गगने गन्तुं शक्तोऽस्मि । पुनः प्रत्यागन्तुं न शक्तोऽस्मि । गुरुणा भणितं विष्णुकुमार एव त्वामिहानेष्यति । तथेति प्रतिपद्य स मुनिराकाशे उत्पतितः, क्षणमात्रेण मेरुचूलायां प्राप्तः । तमायान्तं दृष्ट्वा विष्णुकुमारेण चिन्तितं किञ्चिद् गुरुकं सङ्घकार्यमुत्पन्नम्, यदयं मुनिर्वर्षाकालमध्येऽत्रायातः । ततः स मुनिर्विष्णुकुमारं प्रणम्यागमनप्रयोजनं कथितवान् । विष्णुकुमारस्तं मुनिं गृहीत्वा स्तोकवेलयाऽऽकाशमार्गेण गजपुरे प्राप्तः, वन्दितास्ते गुरवः, गुर्वाज्ञया साधुसहितो विष्णु-कुमारमुनिर्नमुचिपर्षदि गतः सर्वैः सामन्तादिभिर्वन्दितः, नमुचिस्तु तथैव सिंहासने तस्थिवान्, न मनाग् विनयं चकार । विष्णुना धर्मकथनपूर्वं नमुचेरेवं भणितम्, वर्षाकालं

यावन्मुनयोऽत्र तिष्ठन्ति । नमुचिना भणितम्, किमत्र पुनः पुनर्वचनप्रयासेन ? पञ्चदिवसान् यावन्मुनयोऽत्र तिष्ठन्तु, विष्णुना भणितं, तवोद्याने मुनयस्तिष्ठन्तु । ततः सञ्जातामर्षेण नमुचिनैवं भणितम्-सर्वपाखण्डाधामैर्भवद्भिर्न मद्राज्ये स्थेयम्, मद्राज्यं त्वरितं त्यजत । यदि जीवितेन कार्यं । ततः समुत्पन्नकोपानलेन विष्णुना भणितम्-तथापि त्रयाणां पादानां स्थानं देहि । ततो भणितं नमुचिना, दत्तं त्रिपदीस्थानम्, परं यं त्रिपद्या बहिर्दक्ष्यामि तस्य शिरश्छेदं करिष्यामि । ततः स विष्णुकुमारः कृतनानाविधरूपो वृद्धिं गच्छन् क्रमेण योजनलक्षप्रमाणरूपो जातः । क्रमाभ्यां दर्दरं कुर्वन् ग्रामाकरनगरसागराकीर्णां भूमिमकम्पयत्, शिखराणि पातयति स्म । त्रिभुवने क्षोभं कुर्वन् स मुनिः शक्रेण ज्ञातः तस्य कोपोपशान्तये शक्रेण गायनदेव्यः प्रेषिताः । ताश्चैवं गायन्ति स्म -

"[1]सपर-संतावओ धम्मवणदावओ कुग्गइगमणहेउ कोवो ता ओवसमं करेसु भयवंति ।"

एवमादीनि गीतानि ता वारंवारं श्रावयन्ति स्म । स मुनिर्नमुचिं सिंहासनात्पृथिव्यां पातितवान् । दत्तपूर्वापरसमुद्रपादः स सर्वजनं भापयति स्म । ज्ञातवृत्तान्तो महापद्मश्चक्री तत्रायातः, तेन समस्तसङ्घेन सुरासुरैश्च शान्तिनिमित्तं विविधोपचारैः स उपशामितः । तत्प्रभृति विष्णुकुमारस्त्रिविक्रम इति ख्यातः । उपशान्तकोपः स मुनिरालोचितः प्रतिक्रान्तः शुद्धश्च । यत उक्तं-

"[2]आयरिए गच्छंमि, कुलगणसंघे अ चेइअविणासे ।
आलोइयपडिक्कंतो, सुद्धो जं निज्जरा विउला ॥ १ ॥"

निष्कलङ्कं श्रामण्यमनुपाल्य समुत्पन्नकेवलः स विष्णुकुमारः सिद्धिं गतः । महापद्मचक्रवर्त्यपि क्रमेण दीक्षां गृहीत्वा सुगतिभागभूत् । इति महापद्मदृष्टान्तः ॥ ८ ॥

एगच्छत्तं पसाहित्ता, महिं माणनिसूरणो ।
हरिसेणो मणुस्सिंदो, पत्तो गइमणुत्तरं ॥ ४२ ॥

पुनर्हे मुने ! हरिषेणो मनुष्येन्द्रो हरिषेणनामा नवमश्चक्री अनुत्तरां गतिं-सिद्धिं प्राप्तः । किं कृत्वा ? महीं पृथ्वीमेकच्छत्रां प्रसाध्य-प्रपाल्य । कीदृशो हरिषेणः ? माननिसूरणोऽहङ्कारिशत्रुमानदलनः ॥ ४२ ॥

अत्र हरिषेणदृष्टान्तः-

काम्पिल्ये नगरे महाहरिराज्ञो मेरादेव्याः कुक्षौ चतुर्दशस्वप्नसूचितो हरिषेणनामा चक्रवर्ती समुत्पन्नः । क्रमेण यौवनं प्राप्तः पित्रा राज्ये स्थापितः । उत्पन्नानि चतुर्दश रत्नानि, प्रसाधितं च भरतम्, कृतपट्टाभिषेको हरिषेण उदारान् भोगान् भुञ्जन् कालं गमयति । अन्यदा लघुकर्मतया भववासाद्विरक्तः स एवं चिन्तितुं प्रवृत्तः । पूर्वकृतसुकृतकर्मवशेन मयात्रेदृशी ऋद्धिः प्राप्ता, पुनरपि परलोकहितं करोमि । उक्तं च-

---

१ स्वपरसन्तापको धर्मवनदावकः कुगतिगमनहेतुः क्रोधस्तस्मात् उपशमं कुरुत भगवन् ! इति ।

२ आचार्ये गच्छे, कुलगणसङ्घे च चैत्यविनाशे, आलोचितप्रतिक्रान्तः, शुद्धो यत् निर्जरा विपुला ॥ १॥

"मासैरष्टभिरह्ना वा, पूर्वेण वयसा यथा। तत्कर्तव्यं मनुष्येण, यथान्ते सुखमेधते॥ १॥"

एवमादि परिभाव्य पुत्रं राज्ये निवेश्य स निष्क्रान्तः, उत्पन्नकेवलश्च सिद्धिं गतः। पञ्चदशधनुरुच्चत्वं दशवर्षसहस्रायुश्च सञ्जातमिति हरिषेणचक्रिदृष्टान्तः ९ ॥ ४२ ॥

अन्निओ रायसहस्सेहिं, सुपरिच्चाइ दमं चरे।
जयनामो जिणक्खायं, पत्तो गइमणुत्तरं॥ ४३ ॥

जयनामैकादशश्चक्री जिनाख्यातं - जिनोक्तं धर्मं चरित्वा चानुत्तरां गतिं प्राप्तः। कीदृशो जयनामा ? राजसहस्रैरन्वितो - नृपसहस्रेण परिवृतो जैनीं दीक्षामचरत्। पुनः कीदृशो जयनामा ? सुपरित्यागी-सम्यक् परित्यागी ॥ ४३ ॥

अत्र जयनामाचक्रवर्तिदृष्टान्तः-

राजगृहे नगरे वप्राया राज्ञ्याः कुक्षौ चतुर्दशस्वप्नसूचितो जयनामा पुत्रो जातः। क्रमेण संसाधितभरतश्चक्री जातः। राजश्रियमनुभवन् भोगेभ्यो विरक्तो जातः, एवं च चिन्तितवान्-

"सुचिरमपि उषित्वा, स्यात् प्रियैर्विप्रयोगः।
सुचिरमपि चरित्वा, नास्ति भोगेषु तृप्तिः॥
सुचिरमपि सुपुष्टं, याति नाशं शरीरं।
सुचिरमपि विचिन्त्यो, धर्म एकः सहायः॥ १॥"

एवं संवेगमुपागतो निष्क्रान्तोऽनुक्रमेण सिद्धः। द्वादशधनुर्देहमानो वर्षसहस्रायुश्चैष आसीदिति जयचक्रीदृष्टान्तः ॥ १० ॥

दसन्नरज्जं मुदियं, चइत्ताणं मुणी चरे।
दसन्नभद्दो निक्खंतो, सक्खं सक्केण चोइओ॥ ४४ ॥

दशार्णभद्रो राजा साक्षात् शक्रेण चोदितः-प्रेरितः सन् निष्क्रान्तः, गृहस्थावस्थातो निःसृतः। पुनर्मौनी सन्नचरत्, मुनेः कर्म मौनम्, मौनमस्यास्तीति मौनी, मुनिर्भूत्वा विहारमकरोत्। किं कृत्वा ? दशार्णराज्यं त्यक्त्वा, दशार्णानां देशानां राज्यं दशार्णराज्यम् कीदृशं दशार्णराज्यं ? मुदितं - समृद्धम् ॥ ४४ ॥

अत्र दशार्णभद्रदृष्टान्तः-

अस्ति विराटदेशे धन्यपुरं नाम सन्निवेशः, तत्रैको मदहरनामा महत्तरपुत्रोऽस्ति, तस्य भार्यादुःशीला नगररक्षकेण समं चौर्यरतिं कुर्वन्त्यस्ति। अन्यदा तत्र सन्निवेशे नटैर्नाट्यं प्रारब्धं तत्रैको नर्तकः स्त्रीवेषं कृत्वा नृत्यन्नस्ति। घनो लोको दर्शनार्थं मिलितोऽस्ति, सापि तत्र गतास्ति। सा स्त्रीरूपधरं तं नर्तकं प्रेक्ष्य पुरुषं च ज्ञात्वा कामविह्वला जाता। एवं तत्पुरुषं प्राह-यद्यसावनेन वेषेण मद्गृहे समागत्य मया समं रमते, तदाहमस्मै अष्टोत्तरशतद्रव्यं ददामि। तेन प्रतिपन्नम्, भणितं च त्वं याहि। एष तव पृष्ठौ त्वरितमेव समायास्यामि। एषोऽपि तत्पृष्ठौ तद्गृहे गतः तया पादशौचनं कृतम्, स भोक्तुमुपविष्टः।

तया परिवेषित क्षैरेय्या भृतं भाजनम्, यावदसौ भुङ्क्ते, तावतारक्षकस्तत्रायातोऽवदत् कपाटमुद्घाटयेति । सा नटपुरुषमुवाच, त्वं तिलगृहोदरे प्रविश, यावदेनं निवर्तयामि । स तिलगृहोदरे प्रविष्टः, बुभुक्षितः सन् कोणस्थांस्तिलान् फूत्कृत्य फूत्कृत्य खादति । आगतस्तलारक्षः कपाटं पिधाय । क्षैरेयीभृतं पात्रं दृष्ट्वा स भोक्तुमुपविष्टः, यावज्जेमति तावत्तस्याः पतिद्वारे समायातः । तयोक्तं तलारक्षस्य, शीघ्रमुत्तिष्ठ । प्रविशास्मिंस्तिलगृहोदरे, परं दूरे न गन्तव्यम्, कोणे सर्पस्तिष्ठति, त्वया तत्र प्रदेशे न गन्तव्यम् । प्रविष्टस्तलारक्षस्तिलगृहोदरे, पतिस्तत्रायातः क्षैरेयीपात्रं दृष्ट्वा तेन पृष्टं किमेतत् ? तयोक्तं बुभुक्षितास्मीति जेमामि । स उवाच त्वं तिष्ठ । अहं पथश्रान्तत्वाद्विशेषतो बुभुक्षितोऽस्मीति प्रथमं जेमामि । तयोक्तमद्याष्टमी वर्तते, कथमस्नातो जेमसि ? तेनोक्तं त्वं स्नातासीति तव स्नानेन मम स्नानं जातमिति प्रोच्य स भोक्तुमुपविष्टः ।

इतश्च तिलभक्षकनटफूत्कारश्रवणे सर्पोऽयमिति फूत्करोतीति भीतस्तलारक्षस्तिलगृहोदरान्निर्गतो नष्टः । ततोऽयमेवावसर इति कृत्वा स्त्रीवेषधरो नटोऽपि नष्टः । पत्या पृष्टा सा स्त्री किमेतत् ? तयोक्तं मया त्वं साम्प्रतमेव वारितो यदद्याष्टम्यां त्वमस्नातो मा भोजनं कुरु । त्वया चास्नातेनाद्य भोजनं कर्तुमारब्धम्, अतस्त्वद्गृहे सदा वसन्ताविमौ पार्वतीमहेश्वरौ नष्ट्वा गतौ । मदहर उवाच-हा ! दुष्ठु कृतं मया, एवं पश्चात्तापं कुर्वन् पुनस्तां स उवाच, कोऽप्यस्त्युपायो ? यदेतौ पुनरायातः ? सोवाच यदि न्यायेन वित्तमुपार्ज्य पूजां कुर्यास्तदा पुनरेतौ तव गृहे समायास्यतः । ततो गतो मदहरो देशान्तरे, दशार्णदेशे ईक्षुवाटककर्मणि लग्नः, दशगद्याणकसुवर्णं लब्धम्[1], तथाप्यल्पमिति कृत्वा स न तुष्टिं प्राप्तो इतस्ततो भ्रमन् स एकदाटव्यां प्रविष्टः, पिप्पलतरुमूले विश्रामं गृह्णाति । अत्रान्तरेऽश्वापहृतो दशार्णभद्रस्तत्रायातः, तं दृष्ट्वा राज्ञा पृष्टम्, कस्त्वं ? किमर्थमत्रायातः ? स उवाच यथास्थितवृत्तान्तम् । राज्ञा चिन्तितमसौ स्त्रिया विप्रतारितः परदेशे भ्रमन्नस्ति । ततस्तस्य स्त्रीचरितमुक्त्वा तं च स्वगृहे नीत्वा भोजनादिचिन्तनं विहितम् । राज्ञा चिन्तितमहो असत्यदेवेऽपीश्वरादौ कीदृशी भक्तिर्वर्तते ? मया सत्यदेवेऽपि श्रीमहावीरे विद्यमानेऽपि तादृशं भक्तिप्रपञ्चनं न विहितमिति राजा यावच्चिन्तयति तावदेकप्रतिहारपुरुषेण राज्ञोऽग्रे एवमुक्तं भगवान् श्रीमहावीरः समायातः । राजा परितुष्टश्चिन्तयति, यदि नामैष मदहरो विशिष्टविवेकरहितोऽपि निजदेवपूजासम्पादनार्थमेवं परिक्लिश्यते, ततोऽस्माभिरीदृशैः सारासारविवेचनविचक्षणैः समग्रसामग्र्या त्रिभुवनचिन्तामणिकल्पस्य श्रीमहावीरस्य विशेषेण पूजा कार्येति । ततः कल्येऽहं सर्वद्धर्या तथा महावीरं वन्दिष्ये, यथा केनाप्येवं न वन्दितः पूर्वं ।

ततो द्वितीयदिवसे कृतप्रभातकृत्यः स्नातविलिप्तालङ्कृतदेहः स्फाररूपयौवनलावण्यनेपथ्ययुक्तः सर्वाङ्गोपाङ्गालङ्कृतया चतुरङ्गिण्या सेनया सहितो बहुभिर्मन्त्रिसामन्तैः । श्रेष्ठिसार्थवाहैश्च परिवृतः, भम्भादिवादित्रश्रेणिबधिरितदिगन्तरालो गन्धर्वैर्गीयमानगुणो

१ गदीयाणा अथवा रति ।

नृत्यन्तीभिर्विलासिनीभिः पोषितनेत्ररसो गजेन्द्रारूढो दशार्णभद्रभूपतिर्भगवतो वन्दनार्थमायातः । विशुद्धभावेन भगवान् वन्दितः । राजा मदहरश्च हर्षं प्राप्तौ । अत्रान्तरे शक्रेण चिन्तितं मत्कृत्या महाविभूत्याऽसौ दशार्णभद्रः प्रतिबोधं यास्यतीति । शक्र ईदृशीं विभूतिं विकुर्वितवान् । तथाहि-ऐरावणहस्तिनोऽष्टौ दन्ता विकुर्विताः, दन्ते दन्तेऽष्टाष्ट पुष्करिण्यो विकुर्विताः । पुष्करिण्यां पुष्करिण्यामष्टावष्टौ पद्मानि, पद्मे पद्मेऽष्टाष्ट पत्राणि, पत्रे पत्रे द्वात्रिंशद्बद्धनाट्यानि । अनया विभूत्या ऐरावणारूढेन शक्रेण प्रदक्षिणीकृत्य भगवान् वन्दितः । तं तादृशं दृष्ट्वा दशार्णभद्रेण चिन्तितमहो खलु तुच्छोऽहम्, यस्तुच्छ-विभूत्या गर्वं कृतवान् यत उक्तम्-

[1]अदिट्ठभद्दा थोवेणवि, हुंति उत्ताणाणीया ।
णच्चइ उत्तालमुहो हु, मूसगो वीहिमासज्ज ॥ १ ॥

अनेन शक्रेण प्राग्भवे शुद्धो धर्मः कृतः तत ईदृशी ऋद्धिर्लब्धा, ततोऽहमपि तमेव धर्मं करोमि, किं ममात्र विषादेन ? उक्तं च-

समसंख्यावयवः सन्, पुरुषः पुरुषं किमन्यमभ्येति ।
पुण्यैरधिकतरं चे-न्नु, सोऽपि करोतु तान्येव ॥ १ ॥

इत्यादिसंवेगभावनया प्रतिबुद्धः क्षयोपशम-प्राप्तचारित्रमोहनीयो भगवन्तं प्रत्येवं दशार्णभद्रोऽवादीत्-भगवन् ! भवचारकादहं निर्विण्णोऽस्मि । ततश्चारित्रप्रदानेनानुग्रहं मम कुरु । भगवता तदानीमेव मदहरेण समं स दशार्णभद्रो दीक्षितः, शक्रेण तदा वन्दितः, उक्तं च श्रमणमार्गग्रहणेन त्वयैव जितम्, येनेदृशी ऋद्धिः सहसा परित्यक्ता । पूर्वं त्वयाऽभिमानग्रस्तेन द्रव्यवन्दनं कृतमधुना तु भाववन्दम् कृतमिति त्वमेव धन्यो नाहमिति दशार्णभद्रमुनेः प्रशंसां कृत्वा शक्रः स्वस्थानं गतवानिति दशार्णभद्रदृष्टान्तः ॥ ११ ॥

नमी नमेइ अप्पाणं, सक्खं सक्केण चोइओ ।
चइऊण गेहं वइदेही, सामन्ने पज्जुवट्ठिओ ॥ ४५ ॥

पुनर्हे मुने ! विदेहेषु देशेषु भवो वैदेही, विदेहदेशस्वामी नमिनामा नृपो गेहं-गृहवासं त्यक्त्वा श्रामण्यं-साधुधर्मं पर्युपस्थितः, चारित्रयोग्यानुष्ठानं प्रत्युद्यतोऽभूदित्यर्थः । पुनः स मुनिः साक्षाद्ब्राह्मणरूपेण शक्रेण प्रेरितः सन् ज्ञानचर्यायां परीक्षितः सन्नात्मानं 'नमेइ' इति नये स्थापयति, क्रोधादिकषायरहितो भवतीत्यर्थं ॥ ४५ ॥

अथ द्वाभ्यां गाथाभ्यां चतुर्णां प्रत्येकबुद्धानामेकसमये सिद्धानां नामान्याह-

करकंडू कलिंगेसु, पंचालेसु य दुम्मुहो ।
नमीराया विदेहेसु, गंधारेसु य निग्गई ॥ ४६ ॥

---

१ अदृष्टभद्रा नीचाः स्तोकेनाप्युत्तानी भवन्ती माद्यतीत्यर्थः,
हु इति वितर्के, मूषको व्रीहिमासाद्योत्तालमुख उच्चैर्मुखो नृत्यति ।

एए नरिंदवसहा, निक्खंता जिणसासणे ।
पुत्ते रज्जे ठवेऊणं, सामन्ने पज्जुवट्ठिया ॥ ४७ ॥

हे मुने ! करकण्डू राजा कलिङ्गेषु देशेष्वभूदित्यध्याहारः । च पुनः पाञ्चालेषु देशेषु द्विमुखो नृपोऽभूत्, विदेहेषु देशेषु नमी राजाभूत्, च पुनर्गन्धारेषु-गन्धारनामदेशेषु निर्गति-नामा राजाभूत् । एते चत्वारः करकण्डू-द्विमुख-नमि-निर्गतिनामानो नरेन्द्रवृषभा-राजमुख्याः पुत्रान् राज्ये स्थापयित्वा पञ्चाज्जिनशासने-जिनाज्ञायां श्रामण्ये-चारित्रे पर्युपस्थिताः, चारि-त्रयोग्यक्रियानुष्ठानतत्पराः सन्तो निष्क्रान्ताः-संसारान्निःसृताः, भवभ्रमणाद्विरता आसन्नित्य-ध्याहारः, सिद्धिः प्राप्ता इति भावः । एतेषां चतुर्णां प्रत्येकबुद्धानां कथा प्रसङ्गतः पूर्वं नमेरध्ययनतो ज्ञेया ॥ ४६ ॥ ४७ ॥

सोवीरायवसभो, चइत्ताण मुणी चरे ।
उदायणो पव्वइओ, पत्तो गइमणुत्तरं ॥ ४८ ॥

सौवीरराजवृषभः, सौवीराणां देशानां राजा सौवीरराजः, स चासौ वृषभश्च सौवीर-राजवृषभो राज्यभारधरणसमर्थः सौवीरदेशेषु भूपमुख्यः एतादृश उदायननामा राजा वीतभयपत्तनाधीशो मौनं-मुनिधर्ममाचरत् । किं कृत्वा ? राज्यं परिहृत्य । स चोदायनः प्रव्रजितः सन्ननुत्तरां-प्रधानां गतिं प्राप्तः ॥ ४८ ॥

अत्रोदायनभूपदृष्टान्तः ।

भरतक्षेत्रे सौवीरदेशे वीतभयनामनगरे उदायनो नाम राजा, तस्य प्रभावती राज्ञी, तयोर्ज्येष्ठपुत्रोऽभीचिनामाभवत् । तस्य भागीनेयः केशीनामाभूत् । स उदायनराजा सिन्धु-सौवीरप्रमुखषोडशजनपदानाम्, वीतभयप्रमुखत्रिशतत्रिषष्ठिनगराणां, महासेनप्रमुखाणां दशराज्ञां बद्धमुकुटानां छत्राणां चामराणां चैश्वर्यं पालयन्नस्ति ।

इतश्चम्पायां नगर्यां कुमारनन्दी नाम सुवर्णकारोऽस्ति । स च स्त्रीलम्पटो यत्र यत्र सुरूपां दारिकां पश्यति जानाति वा, तत्र तत्र पञ्चशतसुवर्णानि दत्वा तां परिणयति । एवं च तेन पञ्चशतकन्याः परिणीताः, एकस्तम्भं प्रासादं कारयित्वा स ताभिः समं क्रीडति । तस्य च मित्रं नागिलनामा श्रावकोऽस्ति । अथ पञ्चशैलद्वीपवास्तव्यहासाप्रहासाव्यन्तर्यौ स्तः, तयोर्भर्ता विद्युन्मालिनामदेवोऽस्ति, सोऽन्यदा च्युतः । ताभ्यां चिन्तितं कमपि व्युद्ग्राहयावः । स आवयोर्भर्ता भवति । स्वयोग्यपुरुष-गवेषणायेतस्ततो व्रजन्तीभ्यां ताभ्यां चम्पानगर्यां कुमारनन्दी सुवर्णकारः पञ्चशतस्त्रीपरिवृतो दृष्टः । ताभ्यां चिन्तितमेष स्त्रीलम्पटः सुखेन व्युद्ग्राहयिष्यते । कुमारनन्दी भणति के भवन्त्यौ ? कुतः समायाते ? ते आहतुरावां हासाप्रहासादेव्यौ, तद्रूपमोहितः कुमारनन्दी सुवर्णकारस्ते देव्यौ भोगार्थं प्रार्थितवान् । ताभ्यां भणितम् यद्यस्मद्भोगकार्यं तदा पञ्चशैल-द्वीपं समागच्छेः । एवं भणित्वा ते देव्यावुत्पतिते, गते च स्वस्थानम् । अथ स राज्ञः सुवर्णं दत्वा पटहं वादयति स्म, कुमारनन्दिसुवर्णकारं यः पञ्चशैलद्वीपं नयति तस्य स धनकोटिं ददाति । एकेन स्थविरेण

तत्पटहः स्पृष्टः, कुमारनन्दिना तस्य कोटिधनं दत्तम् । स्थविरोऽपि तद्धनं पुत्राणां दत्वा कुमारनन्दिना सह यानपात्रमारूढः समुद्रमध्ये प्रविष्टः । यावद्दूरे गतस्तावदेकं वटं दृष्टवान् । स्थविर उवाच तस्य वटस्याध इदं वाहनं निर्गमिष्यति, तत्र जलावर्त्तोऽस्तिततः वाहनं भङ्क्ष्यति, त्वं त्वेतद्वटशाखामाश्रयेः, वटेऽत्र पञ्चशैलद्वीपाद्धा-रण्डपक्षिणः समायास्यन्ति । सन्ध्यायां तच्चरणेषु स्वं वपुः स्ववस्त्रेण दृढं बध्नीयाः, ते च प्रभाते इत उड्डीनाः पञ्चशैलं यास्यन्ति, त्वमपि तैः समं पञ्चशैलं गच्छेः, स्थविरेणैवमुच्य-मानेन तद्वाहनं वटाधो गतम् । कुमारनन्दिना वटशाखावलम्बनं कृतम्, भग्नं च तद्वाहनम् । कुमारनन्दी तु भारण्डपक्षि-चरणावलम्बेन पञ्चशैले गतः, हासाप्रहासाभ्यां दृष्टः । उक्तं च तवैतेन शरीरेण नावाभ्यां भोगो विधीयते । स्वनगरे गत्वाङ्गुष्ठत आरभ्य मस्तकं यावज्ज्वलनेन स्वं शरीरं दह । यथा पञ्चशैलाधीशो भूत्वाऽस्मद्भोगेहां पूर्णीकुरु । तेनोक्तं तत्राहं कथं यामि ? ताभ्यां करतले समुत्पाट्य तन्नगरोद्याने स मुक्तः । ततो लोकस्तं पृच्छति, किं त्वया तत्राश्चर्यं दृष्टम् ? स भणति, दृष्टं श्रुतमनुभूतं पञ्चशैलं द्वीपं मया, यत्र प्रशस्ते हासाप्रहासाभिधे देव्यौ स्तः । अथात्र कुमारनन्दिना स्वाङ्गुष्ठेऽग्निं मोचयित्वा मस्तकं यावत् स्वशरीरं ज्वाल-यितुमारब्धम्, तदा मित्रेणायं वारितः । भो मित्र ! तवेदं कापुरुषजनोचितं चेष्टितं न युक्तम् । महानुभाव ! दुर्लभं मनुष्यजन्म मा हारय । तुच्छमिदं भोगसुखमस्ति । किं च यद्यपि त्वं भोगार्थी तथापि सद्धर्मानुष्ठानमेव कुरु । यत उक्तं-

"धणओ धणत्थियाणं, कामत्थीणं च सव्वकामकरो ।
सग्गापवग्गसंगम-हेऊ जिणदेसिओ धम्मो ॥ १ ॥"

इत्यादिशिक्षावादैर्मित्रेण स वार्यमाणोऽपि इङ्गिनीमरणेन मृतः पञ्चशैलाधिपति-र्जातः । तन्मित्रस्य श्रावकस्य महान् खेदो जातः । अहो ! भोगकार्ये जना इत्थं क्लिश्यन्ति । जानन्तोऽपि वयं किमत्र गार्हस्थ्ये स्थिताः स्म इति स श्रावकः प्रव्रजितः । क्रमेण कालं कृत्वाऽच्युतदेवलोके समुत्पन्नः । अवधिना स स्ववृत्तान्तं जानाति स्म । अन्यदा नन्दीश्वर-यात्रार्थं सर्वे देवेन्द्राश्चलिताः । स श्रावकदेवोऽप्यच्युतेन्द्रेण समं चलितः तदा पञ्चशैलाधि-पतेस्तस्य विद्युन्मालिनाम्नो देवस्य गले पटहो लग्नः, उत्तारितो नोत्तरति । हासाप्रहासाभ्या-मुक्तमियं पञ्चशैलद्वीपवासिनः स्थितिः- यन्नन्दीश्वरद्वीप-यात्रार्थं चलितानां देवेन्द्राणां पुरः पटहं वादयन् विद्युन्मालिदेवस्तत्र याति । ततस्त्वं खेदं मा कुरु । गललग्नमिमं पटहं वादयन् गीतानि गायन्तीभ्यामावाभ्यां सह नन्दीश्वरद्वीपे याहि । ततः स तथा कुर्वन्नन्दीश्वरद्वीपोद्देशेन चलितः । श्रावकदेवस्तं सखेदं पटहं वादयन्तं दृष्टवोपयोगेनोपलक्षितवान् । भणति च भो त्वं मां जानासि ? स भणति कः शक्रादिदेवान्न जानाति । ततस्तं श्रावकदेवस्तस्य स्वप्राग्भ-वरूपं दर्शयति स्म । सर्वं पूर्ववृत्तान्तमाख्याति । ततः संवेगमापन्नः स देवो भणति, इदानीमहं किं करोमि ? श्रावकदेवो भणति श्रीवर्धमानस्वामिनः प्रतिमां कुरु । यथा तव सम्यक्त्वं सुस्थिरं भवति । यत उक्तं-

---

१ धनदो धनार्थीनां, कामार्थीनां च सर्वकामकरः ।
स्वर्गापवर्गसङ्गम - हेतु जिनदेशितो धर्मः ॥ १ ॥

[1]जो कारवेइ जिणपडिमं, जिणाण जियरागदोसमोहाणं ।
सो पावेइ अन्नभवे, सुहजणणं धम्मवररयणं ॥ १ ॥ अन्यच्च

[2]दारिद्दं दोहग्गं, कुजाइकुसरीरकुगइकुमईओ ।
अवमाणरोयसोआ, न हुंति जिणबिंबकारीणं ॥ २ ॥

ततः स विद्युन्माली महाहिमवच्छिखराद्गोशीर्षचन्दनदारु छेदयित्वा श्रीवर्धमानस्वामिप्रतिमां निर्वर्तितवान् । कियन्तं कालं प्रतिमा पूजिता, तत आयुःक्षये तां च मञ्जूषायां क्षिप्तवान् । तस्मिन्नवसरे षण्मासान् यावदितस्ततो भ्रमद्वाहनं वायुभिरास्फाल्यमानं स विलोकितवान् । तत्र गत्वा चासौ तमुत्पातमुपशामितवान्, सांयात्रिकाणां च तां मञ्जूषां दत्तवान्, भणितवांश्च, देवाधिदेवप्रतिमा चात्रास्ति । ततस्तां लात्वा सांयात्रिका वीतभयपत्तनं प्राप्ताः । तत्रोदायनराजा तापसभक्तस्तस्य सा मञ्जूषा दत्ता, कथितं च सुरवचनम्, मिलितश्च तत्र ब्राह्मणादिकभूरिलोको । भणति च गोविन्दाय नम इत्युक्ते मञ्जूषा नोद्घटिता । तत्र केचिद् भणन्त्यत्र देवाधिदेवश्चतुर्मुखो ब्रह्मास्ति । अन्ये केचिद्वदन्त्यत्र चतुर्भुजो विष्णुरेवास्ति । केचिद्भणन्त्यत्र महेश्वरो देवाधिदेवोऽस्ति । अस्मिन्नवसरे तत्रोदायनराजपट्टराज्ञी चेटकराजपुत्री प्रभावतीनाम्नी श्रमणोपासिका तत्रायाता । तया तस्या मञ्जूषायाः पूजां कृत्वैवं भणितम् -

[3]गयरागदोसमोहो, सव्वन्नू अट्ठपाडिहेरसंजुत्तो ।
देवाहिदेवगुरुउ अइरा मे दंसणं देउ ॥ १ ॥

एवमुक्त्वा तया मञ्जुषायां हस्तेन परशुप्रहारो दत्तः, उद्घटिता सा मञ्जूषा, तस्यां दृष्ट्वाऽतीवसुन्दराऽम्लानपुष्पमालालङ्कृता श्रीवर्धमानस्वामिप्रतिमा, जिनशासनोन्नतिः जाता । अतिवानन्दिता प्रभावत्येवं बभाण ।

[4]सव्वन्नू सोमदंसण, अपुण्णभव भवियजणमणानंद ।
जय चिंतामणि जगगुरु, जय जय जिण वीर अकलंको ॥ १ ॥

तत्र प्रभावत्याऽन्तःपुरमध्ये चैत्यगृहं कारितं, तत्रेयं प्रतिमा स्थापिता । तां च त्रिकालं सा पवित्रा पूजयति । अन्यदा प्रभावती राज्ञी तत्प्रतिमायाः पुरो नृत्यति, राजा च वीणां

---

१ यः कारापयति जिनप्रतिमां, जिनानां जितरागद्वेषमोहानाम् ।
स प्राप्नोति अन्यभवे, शुभजननं धर्मवररत्नम् ॥ १ ॥

२ दारिद्र्यं दौर्भाग्यं, कुजाति-कुशरीर-कुगति-कुमतयः ।
अपमानरोगशोका-न भवन्ति जिनबिम्बकारीनाम् ॥ २ ॥

३ गत राग-द्वेष मोहः, सर्वज्ञोऽष्टप्रातिहार्यसंयुक्तः ।
देवाधिदेवगुरुकः, अचिरान्मे दर्शनं देहि ॥ १ ॥

४ सर्वज्ञः सौम्यदर्शनः, अपुर्नभवः भविकजनमनः-आनन्दः ।
जय चिन्तामणि जगद्गुरु, जय जय जिनवीर ! अकलङ्कः ॥ १ ॥

वादयति । तदानीं स राजा तस्या मस्तकं न पश्यति, राज्ञोऽधृतिर्जाता, हस्ताद्वीणा पतिता, राज्ञ्या पृष्टं किं मया दुष्टं नर्तितं ? राजा मौनमालम्ब्य स्थितः । राज्ञ्या अतिनिर्बन्धेन स उक्तवान्, यत्तव मस्तकमपश्यन्नहं व्याकुलीभूतो हस्ताद्वीणां पातितवान् । सा भणति मया सुचिरं श्रावकधर्मः पालितः । न काचिन्मम मरणाद्भीतिरस्ति । अन्यदा तत्प्रतिमापूजनार्थं स्नाता सा राज्ञी स्वचेटीं प्रति वस्त्राण्यानयेत्युवाच । तया च दत्तानि, परं प्रभावती दृष्टिभ्रमेण, तया च रक्तानि वस्त्राण्यानीतानीति ज्ञात्वा क्रुद्धा प्राह । जिनगृहे प्रविशन्त्या मम रक्तानि वस्त्राणि ददासीत्युक्त्वा चेटीमादर्शेण हतवती, मर्मणि तत्प्रहारलग्नात्सा मृता । प्रभावत्या चिन्तितं-हा ! मया निरपराधत्रसजीववधकरणाद् व्रतं भग्नम् । अतः परं किं मे जीवितव्येन ? ततस्तया राज्ञ्या राज्ञ उक्तमहं भक्तं प्रत्याख्यामि । राजा नैवेति प्रतिपादितम् । तया पुनः पुनस्तथैवोच्यते, तदा राज्ञोक्तम्-यदि त्वं देवी भूत्वा मां प्रतिबोधयसि तदा त्वं भक्तं प्रत्याख्याहि । राज्ञ्या तद्वचोऽङ्गीकृतम् । भक्तं प्रत्याख्याय समाधिना मृत्वा सा देवलोकं गता देवोऽभूत् । तां च प्रतिमां कुब्जा देवदत्ता दासी त्रिकालं पूजयति । प्रभावतीदेवस्तूदायनं राजानं प्रतिबोधयति, न च स सम्बुद्ध्यते । राजा तु तापसभक्तोऽतः स देवस्तापसरूपं कृत्वाऽमृतफलानि गृहित्वाऽऽगतो राज्ञे दत्तवान् । राज्ञा तान्यास्वादितानि, पृष्टश्च तापसः क्वैतानि फलानि ? तापसो भणति, एतन्नगराभ्यर्णेऽस्मदाश्रमोऽस्ति, तत्रैतानि फलानि सन्ति । राजा तेन सममेकाक्येव तत्र गतः, परं तत्र तापसैः स हन्तुमारब्धः । राजा ततो नष्टस्तस्मिन्नेव वने जैनसाधून् ददर्श, तेषामसौ शरणमाश्रितः । भयं मा कुर्विति तैराश्वासितः, तापसा निवृत्ताः, साधुभिश्च तस्यैवं धर्म उक्तः-

[1]धम्मो चेवेत्थ सत्ताणं, सरणं भवसायरे ।
देवं धम्मं गुरुं चेव, धम्मत्थी य परिक्खए ॥ १ ॥

[2]दसअट्ठदोसरहिओ, देवो धम्मोवि निउणदयसहिओ ।
सुगुरू य बंभयारी, आरंभपरिग्गहा विरओ ॥ २ ॥

इत्यादिकोपदेशेन स राजा प्रतिबोधितः, प्रतिपन्नो जिनधर्मं । प्रभावतीदेव आत्मानं दर्शयित्वा, राजानं च स्थिरीकृत्य स्वस्थाने गतः । एवमुदायनराजा श्रावको जातः ।

इतश्च गन्धारदेशवास्तव्यः सत्यनामा श्रावकः सर्वत्र जिनजन्मभूम्यादितीर्थानि वन्दमानो वैताढ्यं यावद् गतः । तत्र शाश्वतप्रतिमावन्दनार्थमुपवासत्रयं कृतवान् । तपस्तुष्टया तदधिष्ठातृदेव्या तस्य शाश्वतजिनप्रतिमा दर्शिताः, तेन च वन्दिताः । अथ तया देव्या तस्मै श्रावकाय कामितगुटिका दत्ता, ततः स निवृत्तो वीतभयपत्तने जीवितस्वामिप्रतिमां वन्दितुमायातः । गोशीर्षचन्दनमयीं तां स ववन्दे । दैवात्तस्यातीसारो रोग उत्पन्नः, कुब्जया

१ धर्मश्चैवात्र सत्त्वानां, शरणं भवसागरे । देवं धर्मं गुरुं चैव, धर्मार्थी च परीक्षते ॥ १ ॥
२ अष्टादशदोषरहितो, देवो धर्मोऽपि निपुणदयासहितः ।
सुगुरुश्च ब्रह्मचारी, आरम्भपरिग्रहात् विरतः ॥ २ ॥

दास्या स प्रतिचरितः । स नीरुग् जातः । तुष्टेन तेन तस्यै कामगुणिता गुटिका दत्ताः, कथितश्च तासां चिन्तितार्थसाधकप्रभावः । अन्यदा सा दास्यहं सुवर्णवर्णा सुरूपा भवामीति चिन्तयित्वैकां गुटिकां भक्षितवती, सुवर्णवर्णा सुरूपा च जाता । ततस्तस्याः सुवर्णगुलिकेति नाम जातम् ।

अन्यदा सा चिन्तयति भोगसुखमनुभवामि । एष उदयनराजा मम पिता, अपरे मत्तुल्याः केऽपि राजानो न सन्तीति चण्डप्रद्योतमेव मनसि कृत्वा द्वितीयां गुटिकां भक्षितवती । तदानीं तस्य चण्डप्रद्योतस्य स्वप्ने देवतया कथितम् । वीतभयपत्तने उदायन-राज्ञो दासी सुवर्णगुलिकानाम्नी सुवर्णवर्णाऽतीवरूपवती त्वद्योग्यास्ति । चण्डप्रद्योतेन सुवर्णगुलिकायाः समीपे दूतः प्रेषितः । दूतेनेकान्ते तस्या एवं कथितं चण्डप्रद्योतस्त्वा-मीहते । तया भणितमत्र चण्डप्रद्योतः प्रथममायातु, तं पश्यामि, पश्चाद्यथारुच्या तेन सहायास्यामि । दूतेन गत्वा तस्या वचनं चण्डप्रद्योतस्योक्तम् । सोऽप्यनलगिरिहस्तिनमारुह्य रात्रौ तत्रायात । दृष्टस्तया, रुचितश्च । सा भणति-यदिमां प्रतिमां सार्धं नयसि तदाहमायामि, नान्यथेति । ततस्तेन तत्स्थानस्थापनयोग्यान्यप्रतिमा तदानीं नास्तीति तस्यां रात्रौ तत्रोषित्वा स स्वनगरे पश्चाद्गतः । तत्र तादृशीं जिनप्रतिमां कारयित्वा पुनरत्रायातस्तां प्रतिमां तत्र स्थापयित्वा मूलप्रतिमां दासीं च गृहीत्वोज्जयिनीं स गतः ।

तत्रानलगिरिणा मूत्रपुरीषे कृते, तद्गन्धेन वीतभयपत्तनसत्का हस्तिनो निर्मदा जाताः । उदायनराज्ञा तत्कारणं गवेषितम्, अनलगिरिहस्तिनः पदं दृष्टम्, उदायनेन चिन्तितं स किमर्थमत्रायातः ? गृहमानुषैरुक्तं सुवर्णगुलिका न दृश्यते । राज्ञोक्तं सा चेटी चण्डप्रद्योतेन गृहीता, परं प्रतिमां विलोकयत । तैरुक्तं प्रतिमा दृश्यते, परं पुष्पाणि म्लानानि दृश्यन्ते । राज्ञा गत्वा स्वयं प्रतिमा विलोकिता, पुष्पम्लानिदर्शनेन राज्ञा ज्ञातम्, नेयं सा प्रतिमा, किन्त्वन्येति विषण्णेन राज्ञा दूतश्चण्डप्रद्योतान्तिके प्रेषितः, मम दास्या नास्ति कार्यं । प्रतिमां त्वरितं प्रेषयेति दूतेन चण्डप्रद्योतस्योक्तम् । चण्डप्रद्योतः प्रतिमां नार्पयति तदा सैन्येन समं ज्येष्ठमास एवोदायनश्चलितः, यावन्मरुदेशे तत्सैन्यमायातम्, तावज्जलाप्राप्त्या तत्सैन्यं तृषाक्रान्तं व्याकुलीबभूव ।

तदानीं राज्ञा प्रभावतीदेवश्चिन्तितः, तेन समागत्य त्रीणि पुष्कराणि कृतानि, तेषु जललाभात्सर्वं सैन्यं सुस्थं जातम् । क्रमेणोदायनराजोज्जयिनीं गतः, कथितवांश्च-भो चण्डप्रद्योत ! तव मम च साक्षाद्युद्धं भवतु किं नु लोकेन मारितेन । अश्वस्थेन वा त्वया मया च युद्धमङ्गीकर्तव्यम् । चण्डप्रद्योतेनोक्तं रथस्थेनैव त्वया मया च योद्धव्यम् । प्रभाते चण्डप्रद्योतः कपटं कृतवान् । स्वयमनलगिरिहस्तिनमारुह्य सङ्ग्रामाङ्गणे समायातः । उदायनस्तु स्वप्रतिज्ञानिर्वाही रथारूढः सङ्ग्रामाङ्गणे समायातः । तदानीमुदायनेन चण्ड-प्रद्योतस्योक्तं-त्वमसत्यप्रतिज्ञो जातः, कपटं च कृतवानसि । तथापि तव मत्तो मोक्षो नास्तीति भणतोदायनेन रथो मण्डल्यां क्षिप्तः, चण्डप्रद्योतेन तत्पृष्ठावनलगिरिहस्ती वेगेन

क्षिप्तः । स च हस्ती यं यं पादमुत्क्षिपति, तं तमुदायनः शरैर्विध्यति, यावद्धस्ती भूमौ निपतितः । तत्स्कन्धादुत्तरंश्चण्डप्रद्योतो बद्धः । तस्य च ललाटे मम दासीपतिरित्यक्षराणि लिखितानि ।

तत उदायनराज्ञा चण्डप्रद्योतदेशे स्वाधिकारिणः स्थापिताः । स्वयं तु चण्डप्रद्योतं काष्ठपिञ्जरे क्षिप्त्वा सार्धं च नीत्वा स्वदेशं प्रति चलितः । सा प्रतिमा तु ततो नोत्तिष्ठतीति तत्रैव सा मुक्ता । अविच्छिन्नप्रयाणैश्चलितस्य तस्यान्तरा वर्षाकालः समायातः, तेन रुद्धौ दशभी राजभिर्धूलीप्राकारं कृत्वा मध्ये स रक्षितः सुखेन तत्र तिष्ठति । यत्स्वयं भुङ्क्ते तत्प्रद्योतस्यापि भोजयति । एकदा पर्युषणादिनमायातम्, तदोदायनेनोपवासः कृतः, सूपकारैः प्रद्योतः पृथग्भोजनार्थं पृष्टः, स चिन्तयत्यद्य मां भोजनान्तर्विषदानेन मारयिष्यतीति पृथग्भोजनार्थं मां प्रश्नयन्ति ।

ततश्चण्डप्रद्योतेनोक्तमद्य किं पृथग्भोजनार्थं पृच्छ्यते ? तैरुक्तमद्य पर्युषणादिने उदायनराजोपोषितोऽस्तीति यद्भवतो रोचते तत्पच्यते । प्रद्योतेनोक्तम्-ममाप्यद्योपवासोऽस्ति, न ज्ञातं मयाद्य पर्युषणादिनम्, सूपकारैश्चण्डप्रद्योतोक्तं कथितमुदायनराज्ञः । तेनापि चिन्तितं जानाम्यहं यथायं धूर्तसाधर्मिकोऽस्ति । तथाप्यस्मिन् बद्धे मम पर्युषणा न शुद्धयति, इति चण्डप्रद्योतो मुक्तः क्षामितश्च । तदक्षराच्छादननिमित्तं रत्नपट्टस्तस्य मूर्ध्नि बद्धः, स्वविषयश्च तस्य दत्तः । ततः प्रभृति पट्टबद्धा राजानो जाताः, मुकुटबद्धाश्च पूर्वमप्यासन् । वर्षारात्रे व्यतिक्रान्ते उदायनराजा ततः प्रस्थितः । व्यापारार्थं यो वणिग्वर्गस्तत्रायातः स तत्रैव स्थितः, दशभी राजभिर्वासित्वाद्दशपुरं नाम नगरं प्रसिद्धं जातम् ।

अन्यदा स उदायनराजा पौषधशालायां पौषधिकः पौषधं प्रतिपालयन् विहरति । पूर्वरात्रसमये च तस्यैतादृशोऽभिप्रायः समुत्पन्नः, धन्यानि तानि ग्रामाकरनगराणि, यत्र श्रमणो भगवान् श्रीमहावीरो विहरति । धन्यास्ते राजेश्वरप्रभृतयो ये श्रमणस्य भगवतः श्रीमहावीरस्यान्तिके केवलिप्रज्ञप्तं धर्मं श्रृण्वन्ति, पञ्चाणुव्रतिकं सप्तशिक्षाव्रतिकं द्वादशविधं श्रावकधर्मं च प्रतिपद्यन्ति, तथा मुण्डीभूत्वाऽगारादनगारितां व्रजन्ति । ततो यदि श्रमणो भगवान् श्रीमहावीरः पूर्वानुपूर्व्या चरन् यदीहागच्छेत्, ततोऽहमपि भगवतोऽन्तिके प्रव्रजामि । उदायनस्यायमध्यवसायो भगवता ज्ञातः । प्रातश्चम्पातः प्रतिनिष्क्रम्य वीतभयपत्तनस्य मृगवनोद्याने भगवान् समवसृतः । तत्र पर्षन्मिलिता, उदायनोऽपि तत्रायातो भगवदन्तिके धर्मं श्रुत्वा हृष्टश्चैवमवादीत् । स्वामिन् ! भवदन्तिकेऽहं प्रव्रजिष्यामि । परं राज्यं कस्मैचिद्दादमीत्युक्त्वा भगवन्तं वन्दित्वा स स्वगृहाभिमुखं चलितः । भगवतापि प्रतिबन्धं मा कार्षीरित्युक्तम् ।

ततो हस्तिरत्नमारुह्योदायनराजा स्वगृहे समायातः । तत उदायनस्यैतादृशोऽध्यवसायः समुत्पन्नो यद्यहं स्वपुत्रमभीचिकुमारं राज्ये स्थापयित्वा प्रव्रजामि, तदायं राज्ये जनपदे मानुष्यकेषु कामभोगेषु मूर्च्छितोऽनाद्यनन्तं संसारकान्तारं भ्रमिष्यति, तत श्रेयः खलु मम

निजकं भगिनीजातं केशिकुमारं राज्ये स्थापयितुम् । एवं सम्प्रेक्ष्य शोभने तिथिकरणमुहूर्ते कौटुम्बिकपुरुषानाकार्यैवमवादीत्, क्षिप्रमेव केशिकुमारस्य राज्याभिषेकसामग्रीमुपस्थापयत । तैः कृतायां सर्वसामग्र्यां केशिकुमारो राज्येऽभिषिक्तः । ततस्तत्र केशिकुमारो राजा जातः । उदायनराजा च केशिकुमारराजानं पृष्ट्वा तत्कृतनिष्क्रमणाभिषेकः श्रीमहावीरान्तिके प्रव्रजितः । बहूनि षष्ठा-ऽष्टम-दशम-द्वादश-मासार्ध-मासक्षपणादीनि तपःकर्माणि कुर्वाणो विहरति ।

अन्यदा तस्योदायनराजर्षेरन्तप्रान्ताहारकरणेन महान् व्याधिरुत्पन्नः, वैद्यैरुक्तं दध्यौषधं कुरु । स चोदायनराजर्षिर्भगवदाज्ञयैकाक्येव विहरति, अन्यदा विहरन् स वीतभये गतः । तत्र तस्य भागिनेयः केशिकुमारराजाऽमात्यैर्भणितः, स्वाम्मिन्नेष उदायनराजर्षिः परिषहादिपराभूतः प्रव्रज्यां मोक्तुकाम एकाक्येवेहायातः, तव राज्यं मार्गयिष्यति । स प्राह दास्यामि । तैरुक्तं नैष राजधर्मः । स प्राह तर्हि किं क्रियते ? ते प्राहुर्विषमस्य दीयते । राज्ञोक्तं यथेच्छं कुर्वन्तु । ततस्तैरेकस्याः पशुपाल्या गृहे विषमिश्रितं दधि कारितम्, तेषां शिक्षया तया तस्य तद्दत्तम् ।

उदायनभक्त्या च देवतयाऽपहृतम्, उक्तं च तस्य देवतया-हे महर्षे ! तव विषं दत्तं दध्यन्तः, तेन दध्यौषधं परिहर । तद्वाक्यादधि परिहृतम्, रोगो वर्धितुमारब्धः, पुनस्तेन दध्यौषधं कर्तुमारब्धम् । पुनरपि तदन्तर्विषं देवतयापहृतम् । एवं वारत्रयं जातम् । अन्यदा देवता प्रमत्ता जाता, तैश्च विषं दत्तम् । तत उदायनराजर्षिर्बहूनि वर्षाणि श्रामण्यपर्यायं पालयित्वा मासिक्या संलेखनया केवलज्ञानमुत्पाद्य सिद्धः । तस्य शय्यातरः कुम्भकारस्तदानीं क्वचिद्ग्रामान्तरे कार्यार्थं गतोऽभूत् । कुपितया च देवतया वीतभयस्योपरि पांशुवृष्टिर्मुक्ता, सकलमपि पुरमाच्छादितम्, अद्यापि तथैवास्ति । शय्यातरः कुंभकारस्तु शनिपल्लयां मुक्तः । उदायनराजपुत्रस्याभीचिकुमारस्य तदायं वृत्तान्तो जातः । यदोदायनः केशिकुमारं राज्येऽभिषिच्य प्रव्रजितस्तदास्यायमध्यवसायः समुत्पन्नः । अहमुदायनस्य ज्येष्ठपुत्रः प्रभावत्यात्मजः, तादृशमपि मां मुक्त्वा केशिकुमारं राज्येऽभिषिच्योदायनः प्रव्रजितः, इत्यन्तर्मानसिकेन दुःखेन पराभूतोऽसौ वीतभयपत्तनं मुक्त्वा चम्पायां कोणिकराजानमुपसम्पद्य विपुलभोगसमन्वितोऽभूत् । स चाभिचिकुमारः श्रमणोपासकोऽधिगतजीवाजीवोऽप्युदायनराज्ञि समनुगतवैरोऽभूत् । अभीचिकुमारो बहूनि वर्षाणि श्रमणोपासकपर्यायं प्रतिपाल्यार्धमासिक्या संलेखनयोदायनवैरस्थानमनालोच्य कालं कृत्वाऽसुरकुमारत्वेनोत्पन्नः । एकपल्योपमस्थितिरस्यासीत् । महाविदेहे क्षेत्रे चायं सेत्स्यतीत्युदायनकथा ।

तहेव कासीराया, सेऊसंच्चपरक्कमो ।
कामभोए परिच्चज्ज, पहणे कम्ममहावणं ॥ ४९ ॥

हे मुने ! तथैव तेनैव प्रकारेण पूर्वोक्तनृपवत्काशीदेशपतिर्नन्दननामा राजा सप्तमबलदेवः कर्मरूपं महावनं प्राहनदुन्मूलयामासेत्यर्थः । किं कृत्वा ? भोगान् परित्यज्य, कीदृशो

नन्दनः ? श्रेयःसत्यपराक्रमः, श्रेयः-कल्याणकारकं यत् सत्यं - संयमः श्रेयःसत्यम् । तत्र पराक्रमो यस्य स श्रेयःसत्यपराक्रमः, मोक्षदायकचारित्रधर्मे विहितवीर्य इत्यर्थः ॥ ४९ ॥ अत्र काशीराजदृष्टान्तः-

वाराणस्यां नगर्यामग्निशिखो राजा, तस्य जयन्त्यभिधाना देवी, तस्याः कुक्षिसमुद्भूतः सप्तमबलदेवो नन्दनो नाम । तस्यानुजो भ्राता शेषवतीराज्ञीसुतो दत्ताख्यो वासुदेवः, स च पित्रा प्रदत्तराज्यः साधितभरतार्धो नन्दनानुगतो राज्यश्रियं स्फीतामनुबभूव । कालेन षट्पञ्चाशद्वर्षसहस्राण्यायुरतिवाह्य मृत्वा दत्तः पञ्चमनरकपृथिव्यामुत्पन्नः । नन्दनोऽपि च गृहीतश्रामण्यः समुत्पादितकेवलज्ञानः पञ्चषष्ठिवर्षसहस्राणि जीवितमनुपाल्य मोक्षं गतः । षड्विंशतिधनूंषि चानयोर्देहप्रमाणमासीत् । इति काशीराजदृष्टान्तः ।

तहेव विजओ राया, आणट्ठाकित्ति पव्वए ।
रज्जं तु गुणसमिद्धं, पयहित्तु महायसो ॥ ५० ॥

हे मुने ! तथैव विजयो नामा द्वितीयो बलदेवो राजा प्रव्रजितो दीक्षां प्रपन्नः । किं कृत्वा ? राज्यं तु 'पयहित्तु' इति प्रहृत्य । कीदृशं राज्यं ? गुणसमृद्धं गुणैः सप्ताङ्गैः पूर्णम् । स्वामी १, अमात्य २, सृहृत् ३, कोश ४, राष्ट्र ५, दुर्ग ६, बलानि ७, च राज्याङ्गानि । अथवा गुणैरिन्द्रियकामगुणैः पूर्णम् । कीदृशो विजयः ? अनार्त्त - आर्त्तध्यानरहितः । पुनः कीदृशः ? कीर्त्तिः कीर्त्त्योपलक्षितः । अथवा 'आणट्ठाकित्ति' इति आनष्टाऽकीर्त्तिः, आ-समन्तान्नष्टा अकीर्त्तिर्यस्य स आनष्टाऽकीर्तिः, अयशोरहितः । पुनः कीदृशः ? महायशा महद्यशो यस्य स महायशाः ॥ ५० ॥

अत्र विजयराजकथा-

द्वारावत्यां ब्रह्मराजस्य पुत्रः सुभद्राकुक्षिसम्भूतो विजयनामा द्वितीयो बलदेवोऽस्ति । स च स्वलघुभ्रातृद्विसप्तवर्षसहस्रायुर्द्विपृष्ठवासुदेवमरणानन्तरं श्रामण्यमङ्गीकृत्योत्पादितकेवलज्ञानः पञ्चसप्ततिवर्षशतसहस्राणि सर्वायुरतिवाह्य मुक्तिं गतः । सप्ततिधनूंषि चानयोर्देहमानम् । इति विजयराजकथा ॥ १५ ॥

तहेवुग्गं तवं किच्चा, अव्वक्खित्तेण चेयसा ।
महाबलो रायरिसी, आदाय सिरसा सिरिं ॥ ५१ ॥

तथैव महाबलनामा राजर्षिस्तृतीये भवे मोक्षं जगामेतिशेषः । किं कृत्वा ? अव्याक्षिप्तेन चेतसा, स्थिरेण चित्तेन, उग्रं-प्रधानं तपः कृत्वा । पुनः किं कृत्वा ? शिरसा-मस्तकेन श्रियं - चारित्रलक्ष्मीमादाय - गृहीत्वा ॥ ५१ ॥

अत्र महाबलराज्ञः कथा-

अत्रैव भरतक्षेत्रे हस्तिनागपुरं नगरमस्ति, तत्र बलनाम राजा, तस्य प्रभावतीनाम्नी राज्ञी, अन्यदा सा राज्ञी प्रवरशयनीयोपगतेषन्निद्रां गच्छती शशाङ्कशङ्खधवलं सिंहं स्वप्ने

दृष्ट्वा प्रतिबुद्धा । ततः सा तुष्टा यत्र बलस्य राज्ञः शयनीयं तत्रोपागच्छति । तं स्वप्नं च बलस्य राज्ञः कथयति । ततः स बलो राजा तं स्वप्नं श्रुत्वा हृष्टस्तुष्ट एवमवादीत् । हे देवि ! त्वया कल्याणकृत्स्वप्नो दृष्टः । अर्थलाभो भोगलाभो राज्यलाभश्च भविष्यन्ति । एवं खलु तव नवमासेषु सार्धसप्तदिनान्यधिकेषु गतेषु कुलप्रदीपः कुलतिलकः सर्वलक्षणसम्पूर्णो दारको भविष्यतीति । ततः सा प्रभावत्येतदर्थं श्रुत्वा हृष्टा तुष्टा बलस्य राज्ञस्तद्वचनं स्वीकरोति । राजानुज्ञया च स्वशयनीये समागच्छति । तत्प्रभृति च सा सुखेन गर्भमुद्वहति । प्रशस्तदोहदा प्रतिपूर्णदोहदा सा पूर्णेषु मासेषु सुकुमालपाणिपादं सर्वलक्षणोपेतं देवकुमारोपमं दारकं प्रसूतवती ।

ततः प्रभावत्या देव्याः प्रतिचारिका बलं राजानं विजयजयाभ्यां पुत्रजन्मना च वर्धयन्ति । ततो बलराजैतदर्थं श्रुत्वा हृष्टस्तुष्टो धाराहतकदम्बपुष्पमिव समुच्छ्वसितरोमकूपस्तासामङ्गप्रतिचारिकाणां मुकुटवर्जं सर्वं स्वशरीरालङ्कारं ददौ । [1]मस्तकस्नपनादिकं प्रीतिदानं च यथेच्छं वितीर्णवान् । ततः स बलो राजा कौटुम्बिकपुरुषानाकारयति । आगतांश्च तानेवमवादीत्-भो देवानुप्रियाः ! क्षिप्रमेव हस्तिनागपुरे नगरे चारकशोधनं मानोन्मानप्रवर्धनं कुरुत, वर्धापनं च घोषयत । एवं राजाज्ञया ते तथैव कृतवन्तः । प्राप्ते च द्वादशे दिवसे तस्य बालकस्य महाबल इति नाम चक्रतुः । ततो महाबलः पञ्चधात्रीपरिवृतो ववृधे । गृहीतकलाकलापश्च यौवनमनुप्राप्तोऽसदृशरूपलावण्यगुणोपपेतानामष्टानां राजवरकन्यानामेकस्मिन्नेव दिवसे पाणिग्रहणमकरोत् । ततस्तस्य महाबलकुमारस्य मातापितरावतिशयेन हर्षेण महदष्टप्रासादोपशोभितं वासभवनं कारयतः । एतादृशं च प्रीतिदानं ददतः-अष्टौ हिरण्यकोटयः, अष्टौ मुकुटानि, अष्टौ कुण्डलयुगलानि, अष्टौ हाराः, अष्टौ गौसाहस्रिकम्, अष्टौ ग्रामाः, अष्टौ दासाः, अष्टौ मदहस्तिनः, अष्टौ सौवर्णस्थालानि । एवमन्यदपि सारं [2]स्वापतेयं मातृपितृभ्यां तस्य दत्तम् ततः स महाबल प्रासादवरगत उदारभोगान् भुञ्जानो विचरति ।

तस्मिंश्च काले विमलस्वामिनः प्रपौत्रो धर्मघोषनामाऽनगारः पञ्चभिरनगारशतैः परिवृतो ग्रामानुग्रामं विहरन् हस्तिनागपुरमागतः । तस्यान्तिके नागरिकपरिषत्समागता । महाबलोऽपि धर्मं श्रोतुं तत्रायातः । श्रुत्वा च धर्मं वैराग्यमापन्नो महाबलकुमारो हृष्टस्तुष्टस्त्रिवारं नत्वैवमवादीत् । हे भगवन् ! श्रद्दधामि निर्ग्रंथं प्रवचनं यथा भवद्भिरुक्तं सत्यमेवेति । संयममार्गमहमङ्गीकरिष्यामि, नवरं मातापितरावापृच्छामि । गुरवः प्रोचुः प्रतिबन्धं मा कार्षीः । ततः स महाबलो धर्मघोषमनगारं वन्दित्वा हृष्टस्तुष्टो रथमारुह्य हस्तिनागपुरमध्ये यत्र स्वगृहं, तत्रोपागतो रथात्प्रत्यवतरति । यत्र मातापितरौ तत्रोपागत्यैवमवादीत्-अहो ! मातापितरौ ! मया धर्मघोषस्यानगारस्यान्तिके धर्मः श्रुतः स च धर्मो मेऽभिरुचितः ।

ततो महाबलकुमारं मातापितरावेवमवदताम्-पुत्र ! त्वं धन्यः कृतार्थश्च । ततः स महाबल एवमवादीत्-अहो ! मातापितरौ ! इच्छाम्यहं भवदाज्ञया प्रव्रजितुम्, संसारभयादह-

---

१ પહેલાનાં સમયમાં કોઈક આનંદ - પ્રીતિના અવસરે દાસદાસીઓનું દાસપણું દૂર કરવામાં આવતું તેને જણાવવા 'धौतमस्तकं', 'मस्तकस्नपनं' ઈત્યાદિ શબ્દો છે.

२ धनं ।

मुद्विग्नोऽस्मीति । ततः सा प्रभावत्यनिष्टामश्रुतपूर्वामिमां पुत्रवाचं श्रुत्वा रोमकूपगलत्स्वेदाकीर्णगात्रा शोकभरवेपिताङ्गा निस्तेजस्का दीनवदना करतलमर्दितकमलमालेव म्लाना विकीर्णकेशहस्ता त्रुटित्वा धरणीतले निपतिता मूर्च्छिता च । परिचारिकाभिः काञ्चनकलशोत्क्षिप्तशीतलजलधाराभिषिच्यमाना समाश्वासिता सती रुद्यमानैवमवादीत्-त्वमस्माकमेक एव पुत्रोऽसि, इष्टः कान्तो रत्नभूतो निधिभूतो जीवितभूत ऊंबरपुष्पवद्दुर्लभः । ततो नैवं वयमिच्छामस्तव क्षणमात्रमपि विप्रयोगम् ।

ततः पुत्र ! त्वं तावद्गृहे तिष्ठ यावद्वयं जीवामः । अस्मासु कालगतेषु परिवर्धितकुलसंतानस्त्वं पश्चात्परिव्रजेः । ततः स महाबल एवमवादीत्-हे मातर्यत्त्वं वदसि तत्सर्वं मोहविलसितम् । परं मनुष्यभवे जन्मजरामरणशोकाभिभूतेऽध्रुवे सन्ध्याभ्ररागसदृशे स्वप्नदर्शनोपमे विध्वंसनस्वभावे मम प्रीतिर्नास्ति । को जानाति हे मातः ! कः पूर्वं कः पश्चाद्वा गमिष्यति ? अतोऽहं शीघ्रमेव प्रव्रजिष्यामि । ततः सा प्रभावत्येवमवादीत्-पुत्र ! इदं ते शरीरं विशिष्टरूपलक्षणोपपेतम्, विज्ञानविचक्षणम्, रोगरहितम्, सुखोचितं प्रथमयौवनस्थं वर्तते । अतस्त्वमेतादृशशरीरयौवनगुणाननुभव पश्चाद् प्रव्रजेः । ततः स महाबल एवमवादीत्-हे मातरिदं मनुष्यशरीरं दुःखायतनम्, विविधव्याधिग्रस्तमस्थिसम्बद्धम्, [1]स्नसाजालसम्बद्धं, अशौचनिधानमनवस्थिताकारं विनश्वरमेव भविष्यतीतीच्छाम्यहं त्वरितं प्रव्रजितुम्-ततः सा प्रभावत्येवमवादीत्-पुत्र ! इमास्तव सर्वकालकोमलस्वभावा मार्दवार्जवक्षमाविनयगुणयुक्ता हावभावविचक्षणाः सुविशुद्धशीलाः कुलशालिन्यः प्रगल्भवयस्का मनोऽनुकूलभावानुरक्ता अष्टौ भार्याः सन्ति । ताभिः समं भोगान् भुंक्ष्व पश्चाद्वयःपरिपाके परिव्रजेः । ततः स महाबल एवमवादीत्-

इमे खलु मानुष्यकाः कामभोगा उच्चारप्रश्रवणश्लेष्मवातपित्ताश्रयाः शुक्रशोणितसमुद्भवा अल्पक्रीडिता बहूपसर्गाः कटुकविपाकदुःखानुबन्धिनः सिद्धिविघातकारिणः सन्तीति सद्य एवाहं प्रव्रजिष्यामि । पुनर्मातापितरावेवमूचतुः-पुत्र ! परम्परापर्यायाद्बहुहिरण्यसुवर्णविपुलधनधान्यानि स्वयमास्वादमानोऽन्येषां दानाच्चानुगृहाण । मनुष्यलोकसत्कारसन्मानान्यनुगृहाण, पश्चात्परिव्रजेः । ततः स महाबल एवमवादीत्-इदं सर्वं हिरण्यादिकं वस्त्वग्निग्राह्यम्, राजग्राह्यम्, दायादग्राह्यम्, भृत्यग्राह्यमध्रुवं विद्युच्चञ्चलम्, नास्य भोगः केनापि ग्रहितुं शक्यः, इति शीघ्रमेवाहं प्रव्रजिष्यामि । ततो मातापितरौ विषयप्रवर्तकवाक्यैरेनं गृहे रक्षितुं न शक्नुतः, अथ संयमोद्वेगकरैरेवमूचतुः-पुत्र ! अयं निर्ग्रन्थमार्गो दुरनुचरोऽस्ति । अत्र लोहमया यवाश्चर्वणीयाः सन्ति । गङ्गाप्रतिश्रोतसि गन्तव्यमस्ति । समुद्रो भुजाभ्यां तरणीयोऽस्ति, दीप्ताग्निशिखायां प्रवेष्टव्यमस्ति । खड्गधारायां सञ्चरणीयमस्ति । पुत्र ! निर्ग्रन्थानामाधाकर्मिकं बीजादिभोजनं च न कर्तव्यमस्ति । पुत्र ! त्वं तु सुकुमालोऽसि, सुखोचितोऽसि, न त्वं क्षुधातृषाशीतोष्ण्यादिपरीषहोपसर्गान् सोढुं समर्थोऽसि । पुनर्भूमिशयनम्, केशलोचनमस्नानम्, ब्रह्मचर्यम्, भिक्षाचर्यां च विधातुं न शक्नोसि । ततः पुत्र ! त्वं तावद्गृहे तिष्ठ यावद्वयं जीवामः ।

---

१ नसजालसम्बद्धं

ततः स महाबल एवमवादीत्-अयं निर्ग्रन्थमार्गः क्लीबानां-कातराणां चेहलोकप्रतिबद्धानां परलोकपराङ्मुखानां दुरनुचरोऽस्ति, न पुनर्वीरस्य-निश्चितमतेः पुरुषस्य किमप्यत्र दुष्करणीयमस्तीति मामनुजानीत प्रव्रज्याग्रहणार्थम्। अथ मातृपितृभ्यां तं गृहे रक्षयितुमशक्ताभ्यामवाञ्छयैव प्रव्रज्यानुमतिस्तस्य दत्ता। ततो बलराजा कौटुम्बिकपुरुषै-र्हस्तिनागपुरं बाह्याभ्यन्तरे संमार्जितोपलिप्तं कारयति, तं महाबलं कुमारं च मातापितरौ सिंहासने समारोपयतः। सौवर्णिककलशानामष्टोत्तरशतेन यावद्भौमेयानामष्टोत्तरशतेन सर्वद्धर्या महान् निष्क्रमणाभिषेकोऽस्य कृतः। पिता बभाण-पुत्र ! भण, तव किं ददामि ? कस्य वस्तुनः साम्प्रतं तवार्थः ? ततः स महाबल उवाच-इच्छामि तात ! कुत्रिकापणादेकेन लक्षेण पतद्ग्रहम्, एकेन लक्षेण रजोहरणम्, एकेन लक्षेण *काश्यपाकारणमिति।

ततो बलराजा कौटुम्बिकपुरुषैस्त्रीण्यपि वस्तूनि प्रत्येकमेकैकलक्षेणानायितवान्। ततः स काश्यपो वसुभूतिनामा बलेन राज्ञाभ्यनुज्ञातोऽष्टगुणपोतिकेन पिनद्धमुखश्चतुरङ्गुलवर्जकेशान् महाबलमस्तके चकर्त। प्रभावती तान् केशान् हंसलक्षणपटशाटके प्रतिक्षिपति, तच्च वस्त्रं स्वोच्छीर्षकस्थाने न्यस्यति। ततः स महाबलो गोशीर्षचन्दनानुलिप्तः सर्वालङ्कारविभूषितः पुरुषसहस्रवाह्यां शिबिकामारूढः। एकया वरतरुण्या धृतातपत्रो द्वाभ्यां वरतरुणीभ्यां चाल्यमानवरचामरो मातृपितृभ्यामनेकभटकोटिपरिवृतः प्रव्रज्याग्रहणार्थं चलितः।

तदानीं तं नगरलोका एवं प्रशंसन्ति। धन्योऽयं, कृतार्थोऽयं, सुलब्धजन्मायं महाबलकुमारो यः संसारभयोद्विग्नः सर्वं सांसारिकविलासमपहाय प्रथमवयःस्थ एवं परिव्रजति। एवं लोकैः प्रशस्यमानः प्रलोक्यमानोऽङ्गुलिभिर्दृश्यमानः पुष्पफलेषु विकीर्यमाणेषु, याचकेभ्यश्च स्वयं दानं ददद्धस्तिनागपुरमध्यं मध्येन निर्गच्छन् धर्मघोषानगारान्तिके समायातः, शिबिकातश्च प्रत्यवतीर्णः। ततो महाबलं कुमारं पुरतः कृत्वा मातापितरौ धर्मघोषानगारं वन्दित्वैवमवदताम्, भगवन्नेष महाबलकुमारः संसारभयोद्विग्नः कामभोगविरक्तो भवदन्तिके प्रव्रजितुमिच्छति तत इमां शिष्यभिक्षां वयं दद्मः, स्वीकुर्वन्तु भवन्तः। धर्मघोषानगार एवमुवाच यथासुखं देवानुप्रिय ! मा प्रतिबन्धं कुरुत।

ततः स महाबलो हृष्टस्तुष्टो धर्मघोषमनगारं वन्दित्वोत्तरपूर्वदिगन्तरालेऽपक्रम्यालङ्कारवर्गमुत्तारयति। अश्रूणि मुञ्चन्ती प्रभावतीदेव्युत्तरीयवस्त्रे तमलङ्कारवर्गं प्रक्षिपति। महाबलकुमारं प्रत्येवमवदत्। पुत्र ! अत्रार्थे विशेषाद् घटितव्यं यतितव्यम्, अत्रार्थे न प्रमाद्यम्। ततः स महाबलः पञ्चमौष्टिकं लोचं करोति। ततोऽसौ धर्मघोषानगारान्तिके समागत्यैवमवादीत्। भगवन्नयं लोक आदीप्तप्रदीप्तो जरामरणग्रस्तश्चास्तीति स्वयमेव मां प्रव्राजयत।

ततः स धर्मघोषसूरिस्तं स्वयमेव प्रव्राज्य सामाचारीमशिक्षयत्। ततो महाबलोऽनगारो जातः। पञ्चसमितित्रिगुप्तियुक्तः क्रमेण चतुर्दशपूर्वधरश्चाभूत्। बहुभिश्चतुर्थषष्ठाष्टमादिभिर्विचित्रैस्तपःकर्मभिरात्मानं भावयन्, द्वादशवर्षाणि श्रामण्यपर्यायमनुपालयन्, अन्ते मासिक्या संलेखनया आलोचितप्रतिक्रान्तः समाधिप्राप्तः कालमासे कालं कृत्वा स ब्रह्मकल्पे

* હજામ १ અનુમતિ અપાયેલો

दशसागरोपमस्थितिको देवो बभूव । ततश्च्युतश्च श्रेष्ठिकुले वाणिजग्रामे पुत्रत्वेनोत्पन्नः । तत्र सुदर्शन इति कृतनामोन्मुक्तबालभावः श्रमणस्य श्रीमहावीरस्यान्तिके प्रव्रजितः । क्रमेण सिद्धश्चेति महाबलकथा ॥ १६ ॥

कहं धीरे अहेऊहिं, उम्मत्तु व महिं चरे ।
एए विसेसमादाय, सूरा दढपरक्कमा ॥ ५२ ॥

हे मुने ! एते भरतादयः शूरा - धैर्यवन्तः, पुनर्दृढपराक्रमाश्च-संयमे स्थिरवीर्यभाजो बभूवुरिति शेषः । किं कृत्वा ? विशेषं मिथ्यादर्शिभ्यो जिनमतस्य विशेषं गृहीत्वा मनस्याधाय । तस्मात् हे मुने ! धीरः साधुरहेतुभिः क्रियाः १, अक्रिया २, विनय ३, अज्ञान ४, प्रमुखैः कुत्सितहेतुभिर्विपरीतभाषणैरुन्मत्त इव मद्यपायीव मह्यां-पृथिव्यां कथं चरेत् ? अपि तु स्वेच्छया यथातथा प्रलपनपरायणः सन्नाचरेत् । तस्मात्त्वयापि धीरेण सता तत्रैव मनो निश्चितं विधेयमिति हार्दम् ॥ ५२ ॥

अच्चंतनियाणखमा, सच्चा मे भासिया वई ।
अतरिंसु तरंतेगे, तरिस्संति अणागया ॥ ५३ ॥

हे मुने ! 'मे' मया सत्या 'वई' इति सत्या वाक् भाषिता, प्राकृतत्वात्तृतीयायां षष्ठी । जिनशासनमेवाश्रयणीयमित्येवरूपा वाणी मयोक्ता । अनया वाण्याङ्गीकृतया बहवो जना अतरन्, संसारसमुद्रं तरन्ति स्म, एकेऽनया वाण्येदानीमपि तरन्ति, अनागता अप्यग्रे भाविनो भव्या अप्यनया वाण्या भवोदधिं तरिष्यन्ति । कीदृशास्ते भूतभविष्यद्वर्तमानजनाः । अत्यन्त-निदानक्षमाः, अत्यन्तं निदानं कर्ममलशोधनं तत्र क्षमाः कर्ममलप्रक्षालनसावधानाः, नितरां दीयते शोध्यते पवित्रीक्रियतेऽनयेति निदानम्, 'दैप् शोधने' इत्यस्य रूपम् ॥ ५३ ॥

कहं धीरे अहेऊहिं, अत्ताणं परिआवसे ।
सव्वसंगविणिम्मुक्के, सिद्धे हवइ नीरए ॥ ५४ ॥ त्तिबेमि ॥

धीरः साधुरहेतुभिः क्रियावाद्यादिकुमतीनां वचोयुक्त्यसत्प्ररूपणालक्षणैर्मिथ्यात्वस्य कारणैरात्मानं स्वकीयमात्मानं कथं पर्यावासयेत् ? कुत्सितहेतूनामावासमात्मानं कथं कुर्यात् ? अपि तु न कुर्यादित्यर्थः । किमित्थं स्थितस्य फलं स्यादित्याह-सर्वसङ्गैर्द्रव्यभाव-भेदेन संयोगैः संयोगेभ्यो वा विशेषेण निर्मुक्तः सर्वसङ्गविनिर्मुक्तः सन् साधुः सिद्धो भवति, कर्ममलापहारेण नीरजा निर्मलः स्यादुज्ज्वलो भवेदित्याद्युपदेशं दत्वा क्षत्रियमुनिर्महीतले विजहार । संयतमुनिरपि चारित्रं प्रपाल्य मोक्षं प्रापेति सुधर्मास्वामी जम्बूस्वामिनं प्राह-हे जम्बू ! अहं ब्रवीमि, इति - परिसमाप्तौ ॥ ५४ ॥

इति संयतीयाख्यमध्ययनम्-१८ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायामुपाध्यायश्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविर-चितायां संयतीयाख्यमध्ययनमष्टादशमर्थतो व्याख्यातम् १८ ॥

॥ अथैकोनविंशतितमं मृगापुत्रीयाख्यमध्ययनं प्रारभ्यते ॥

अष्टादशेऽध्ययने भोगर्द्धीनां त्याग उक्तः, भोगर्द्धित्यागात्साधुत्वं स्यात् । तत्साधुत्वं ह्यप्रतिकर्मतया स्यात्, तत एकोनविंशतितमेऽध्ययने निष्प्रतिकर्मतां मृगापुत्रदृष्टान्तेन कथयति -

सुग्गीवे नयरे रम्मे, काणणुज्जाणसोहिए ।
राया बलभद्दो त्ति, मिया तस्सग्गमहिसी ॥ १ ॥

सुग्रीवे नाम्नि नगरे बलभद्र इति नामा राजाभूत् । कीदृशे सुग्रीवे नगरे ? रम्ये-रमणीये, पुनः कीदृशे ? काननोद्यानशोभिते, तत्र काननं-बृहद्वृक्षाणामाम्रराजादनादितरूणां वनम् । उद्यानं नानाविधपादपलतादीनां वनम्, अथवा क्रीडायोग्यं वनमुद्यानमुच्यते । ततः काननं चोद्यानं च काननोद्याने, ताभ्यां शोभितं काननोद्यान-शोभितम्, तस्मिन् । तस्य बलभद्रभूपस्य मृगा नाम्न्यग्रमहिष्यभूत्, महिषी-पट्टराज्ञी अग्रा प्रधाना, सा चासौ महिषी चाग्रमहिषी ॥ १ ॥

तेसिं पुत्ते बलसिरी, मियापुत्ते त्ति विस्सुए ।
अम्मापिऊण दइए, जुवराया दमीसरे ॥ २ ॥

'तेसिं पुत्ते' इति तयोर्बलभद्रमृगाराज्ञ्योः पुत्रो बलश्रीनामासीत् । बलश्रीरिति मातापितृभ्यां कृतनामा । स बलश्रीर्विश्रुतो-लोकप्रसिद्धो मृगापुत्र इत्यभूत् । मृगाया महाराज्ञ्याः पुत्रो मृगापुत्रः, लोकास्तं मृगापुत्रमित्यूचुरित्यर्थः । कीदृशो मृगापुत्रः ? 'अम्मापिऊण दइए' इति मातापित्रोर्दयितो-वल्लभः । पुनः कीदृशः ? युवराजः, युवा चासौ राजा च युवराजः- कुमारपदधारकः, पितरि जीवति सति राज्ययोग्यः कुमारो युवराज उच्यते । पुनः कीदृशः ? दमीश्वरः, दमो विद्यते येषां ते दमिनस्तेषामीश्वरो दमीश्वरः, उपशमवतां साधूनामैश्वर्यधारी अत्र कुमारावस्थायामेव दमीश्वर इति विशेषणमुक्तम्, तत्तु भाविनि भूतोपचारात् । अथवात्र द्रव्यनिक्षेपो ज्ञेयः, "[1]द्रव्यजिना जिनजीवा" इति वचनात् ॥ २ ॥

नंदणे सो उ पासाए, कीलए सह इत्थिहिं ।
देवो दोगुंदगो चेव, निच्चं मुइयमाणसो ॥ ३ ॥

मणिरयणकुट्टिमतले, पासायालोयणट्ठिओ ।
आलोएइ नगरस्स, चउक्कतियचच्चरे ॥ ४ ॥

उभाभ्यां गाथाभ्यां सम्बन्धः । स मृगापुत्रः कुमारो नन्दने विशिष्टवास्तुशास्त्रोक्त-सम्यग्लक्षणोपेते प्रासादे - राजमन्दिरे स्त्रीभिः सह क्रीडते । क इव ? दोगुन्दकदेव इव,

---

१ दव्वजिणा जिणजीवा - चैत्यवन्दनभाष्य गा. ५१ ॥

त्रायस्त्रिंशकसुर इव । इन्द्रस्य पूज्यस्थानीया देवास्त्रायस्त्रिंशका दोगुन्दका अप्युच्यन्ते । पुनः कीदृशः सः ? नित्यं मुदितमानसो-निरन्तरहृष्टचित्तः । एतादृशो मृगापुत्रः प्रासादालोकने स्थितः सन् नगरस्य चतुष्कत्रिकचत्वरानालोकते । प्रासादस्यालोकने-गवाक्षे स्थितो नगरस्य चतुष्कादिस्थितानि कौतूहलानि पश्यति । कीदृशे प्रासादालोकने ? 'मणिरयणकुट्टिमतले' मणयश्च रत्नानि च तैः कुट्टिमं-जटितं तलं यस्य तन्मणिरत्नकुट्टिमतलम्, तस्मिन् ॥ ३ ॥ ४ ॥

अह तत्थ अइच्छंतं , पासई समणसंजयं ।
तवनियमसंजमधरं, सीलड्ढं गुणआगरं ॥ ५ ॥

अथानन्तरं स मृगापुत्रः कुमारस्तत्र तस्मिंश्चतुष्क-त्रिक-चत्वरादौ 'अइच्छंतं' अतिक्रामन्तं विचरन्तं श्रमणं पश्यति । कीदृशं श्रमणम् ? संयतं-जीवयतनां कुर्वन्तम्, संयतमिति विशेषणेन वीतरागदेवमार्गानुसारिणम्, न तु शाक्यादिमुनिम् । पुनः कीदृशं ? तपोनियमसंयमधरम्, तपो बाह्याभ्यन्तरभेदेन द्वादशविधम्, नियमो द्रव्य-क्षेत्र-काल-भावेनाभिग्रहग्रहणम् । संयमः सप्तदशविधः, तपश्च नियमश्च संयमश्च तपोनियमसंयमास्तान् धरतीति तपोनियमसंयमधरस्तम् । पुनः कीदृशम् ? शीलाढ्यं शीलैरष्टादशसहस्त्रब्रह्मचर्यभेदैराढ्यं पूर्णम् । पुनः कीदृशं ? गुणाकरं गुणानां - ज्ञानदर्शनचारित्रगुणानामाकरं खनिसदृशम् ॥ ५ ॥

तं देहई मियापुत्ते, दिट्ठीए अणिमिसाए ।
कहिं मन्नेरिसं रूवं, दिट्ठपुव्वं मए पुरा ॥ ६ ॥

मृगापुत्रस्तं मुनिमनिमेषया दृष्ट्या 'देहई' पश्यति । दृष्ट्वा चैवं विचारयति-क्वचिदेतादृशं रूपं मया दृष्टपूर्वमहमेवं मन्ये-जानामि । मुनिं दृष्ट्वा प्रमुदितमना अभूत्, पूर्वपरिचितमिव मुनिं मेने इत्यर्थः ॥ ६ ॥

साहुस्स दरिसणे तस्स, अज्झवसाणंमि सोहणे ।
मोहं गयस्स संतस्स, जाईसरणं समुप्पन्नं ॥ ७ ॥

तस्य मृगापुत्रस्य कुमारस्य तस्य साधोर्दर्शने जातिस्मरणं समुत्पन्नम् । प्राग्भवस्मरण-ज्ञानं सञ्जातम् । तस्य कथंभूतस्य सतः ? शोभने अध्यवसाये, समीचीने मनसः परिणामे क्षयोपशमभावे मोहं-मूर्च्छां गतस्य प्राप्तस्य सतः । क्वाप्ययं मया दृष्ट इति चिन्तासङ्घट्टमूर्च्छात्मको मोहः । कोऽर्थः ? पुरा साधोर्दर्शनं जातम्, दर्शनात्सम्यग्मनः परिणामोऽभूत्, तदा च मूर्च्छोत्पन्ना, तस्यां मूर्च्छायां च जातिस्मृतिरभूदिति भावः ॥ ७ ॥

किं तज्जातिस्मरणम् तदाह -

देवलोअचुओ संतो, माणुस्सं भवमागओ ।
सन्निनाणे समुप्पन्ने, जाईसरणं पुराणयं ॥ ८ ॥

अहं देवलोकाच्च्युतः सन् मानुष्यं भवमागत इति संज्ञिज्ञाने समुत्पन्ने सति पुराणकं-प्राचीनं जातिस्मरणमभूदिति शेषः । संज्ञिनो गर्भजपञ्चेन्द्रियस्य ज्ञानं संज्ञिज्ञानम्, तस्मिन् संज्ञिज्ञाने ॥ ८ ॥

जाईसरणे समुप्पन्ने, मियापुत्ते महड्ढिए ।
सरई पोराणियं जाइं, सामण्णं च पुरा कयं ॥ ९ ॥

मृगापुत्रो महर्द्धिको राज्यलक्ष्मीयुक्तः पौराणिकीं - प्राचीनां जातिं स्मरति । किं स्मरति ? मया श्रामण्यं-चारित्रं पुरा कृतम्, पूर्वं पालितमभूत् । क्व सति ? जातिस्मरणे ज्ञाने समुत्पन्ने सति - सञ्जाते सति ॥ ९ ॥ इत्यत्र पाठान्तरमस्ति, गाथायाः पुनरुक्तित्वात् ।

विसएसु अरज्जंतो, रज्जंतो संजमंमि य ।
अम्मापिउरं उवागम्म, इमं वयणमब्बवी ॥ १० ॥

मृगापुत्रः 'अम्मापिउरं' मातापितरमुपागम्य - समीपमागत्येदं वचनमब्रवीत् । किं कुर्वन् ? विषयेष्वरजन् - विषयेभ्यो विरक्तो भवन्, च पुनश्चारित्रे संयमे रजन् - साधुमार्गे प्रीतिं कुर्वन्नित्यर्थः ॥ १० ॥

सुयाणि मे पंच महव्वयाणि, नरएसु दुक्खं च तिरिक्खजोणिसु ।
निव्विण्णकामो मि महन्नवाओ, अणुजाणह पव्वइस्सामि अम्मो ॥ ११ ॥

हे पितरौ ! 'मे' मया पञ्च महाव्रतानि प्राग्जन्मनि श्रुतानि, नरकेषु पुनस्तिर्यग्योनिषु दुःखं भुक्तमभूत् । ततोऽहं निर्विण्णकामोऽस्मि - निवृत्तविषयाभिलाषोऽस्मि महार्णवात्संसारसमुद्रात् प्रव्रजिष्यामि-निस्तरिष्यामि । यूयमतो मामनुजानीत-आज्ञां दत्त ॥ ११ ॥

अम्माताय मए भोगा, भुत्ता विसफलोवमा ।
पच्छा कडुयविवागा, अणुबंधदुहावहा ॥ १२ ॥

हे पितरौ ! मया पूर्वं भोगा भुक्ताः । कीदृशा भोगाः ? विषफलोपमाः, विषफलैरुपमीयन्ते इति विषफलोपमाः । पूर्वं भोगसमये मधुराः, परं पश्चात्कटुकविपाकाः, कटुको विपाको येषां ते कटुकविपाकाः, प्रान्ते दुःखदा इत्यर्थः । अथ पुनः कीदृशाः ? अनुबन्धदुःखावहा अनुबन्धं निरन्तरं दुःखस्य आवहा-दायकाः, अविच्छिन्नदुःखदायिनः ॥ १२ ॥

इमं सरीरं अणिच्चं, असुई असुइसंभवं ।
असासयावासमिणं, दुक्खकेसाण भायणं ॥ १३ ॥

हे पितराविमं शरीरमनित्यमशाश्वतम्, अशुच्यपवित्रं च वर्तते । पुनरिदं शरीरमशुचिसम्भवमशुचिशुक्रेतःसम्भूतम् । पुनरिदं शरीरमशाश्वतावासम्, अशाश्वतोऽनित्य आवासो

-जीवस्य निवासो यस्मिंस्तदशाश्वतावासम्। पुनरिदं शरीरं दुःखक्लेशानां भाजनम्, दुःखानि जन्मजरामृत्युप्रमुखाणि, क्लेशा-धनहानिस्वजनवियोगादयस्तेषां भाजनं - स्थानम्। अथवा दुःखहेतवो ये क्लेशा - रोगास्तेषां भाजनम् ॥ १३ ॥

असासए सरीरंमि, रइं नेव लभामिहं ।
पच्छा पुरा व चइयव्वे, फेणबुब्बुयसन्निभे ॥ १४ ॥

हे पितरावहमशाश्वते शरीरे रतिं न लभे । अहं स्वास्थ्यं न प्राप्नोमि । पुनः कीदृशे शरीरे ? पश्चाद्भोगभोगानन्तरं[1] पुरा-पूर्वं भोगभोगादर्वागेव[2] त्यक्तव्ये । पुनः कीदृशे शरीरे ? फेनबुद्बुदसन्निभे - पानीयप्रस्फोटकसदृशे ॥ १४ ॥

माणुसत्ते असारंमि, वाहिरोगाण आलए ।
जरामरणघत्थंमि, खणंपि न रमामिहं ॥ १५ ॥

हे पितरावसारे मनुष्यत्वेऽहं क्षणमपि न रमे, न हर्षं भजामि । कीदृशे मनुष्यत्वे ? व्याधिरोगाणामालये, व्याधयः कुष्ठशूलादयः, रोगा वातपित्तश्लेष्मज्वरादयः, तेषां गृहे । पुनः कीदृशे मनुष्यत्वे ? जरामरणाभ्यां ग्रस्ते ॥ १५ ॥

जम्मदुक्खं जरादुक्खं, रोगा य मरणाणि य ।
अहो दुक्खो हु संसारे, जत्थ कीसंति जंतुणो ॥ १६ ॥

हे पितरौ ! 'हु' इति निश्चयेन संसारो दुःखं - दुःखहेतुर्वर्तते । 'अहो' इत्याश्चर्ये, यत्र संसारे जीवाः क्लिश्यन्ति - क्लेशं प्राप्नुवन्ति । संसारे किं किं दुःखम् ? तदाह-जन्म दुःखं, जरा दुःखम्, पुनः संसारे रोगास्तापशीतशिरोऽर्तिप्रमुखाः, पुनर्मरणानि च, एतानि सर्वाणि दुःखानि यत्र सन्ति । तस्मादयं संसारो दुःखहेतुरेव । यत्र भवभ्रमणे जीवाः क्लिश्यन्ति, क्लेशार्त्ता भवन्ति ॥ १६ ॥

खित्तं वत्थु हिरण्णं च, पुत्तं दारं च बंधवा ।
चइत्ता णं इमं देहं, गंतव्वमवसस्स मे ॥ १७ ॥

हे पितरौ ! ममाऽवशस्य - परवशस्य सतः परभवे गन्तव्यम्। किं कृत्वा ? क्षेत्रं ग्रामवाटिकादिकं त्यक्त्वा, पुनर्वास्तु गृहम्, हिरण्यं रूप्यं स्वर्णम्, पुत्रं तनयम्, दारं कलत्रं च पुनर्बान्धवान् स्वज्ञातीन् भ्रातृपितृव्यान्, इमान् सर्वांस्त्यक्त्वा, इमं देहं शरीरमपि त्यक्त्वा ॥ १७ ॥

जहा किंपाकफलाणं, परिणामो न सुंदरो ।
एवं भुत्ताण भोगाणं, परिणामो न सुंदरो ॥ १८ ॥

---

१ इतोऽग्रे-(भुक्तभोगावस्थायां वार्धक्यादौ)-मू० ॥
२ इतोऽग्रे-(अभुक्तभोगितायां बाल्यादौ)-मू० ॥

हे पितरौ ! यथा किम्पाकफलानां - विषवृक्षफलानां परिणामो भक्षणानन्तरपरिणति-समयः सुन्दरो न भवति, एवं भुक्तानां भोगानामपि परिणामः सुन्दरो नास्ति । यादृशं विषफलानां भक्षणम्, तादृशो भोगानां परिणामः । किम्पाकफलानि हि दर्शनेन रमणीयानि, भक्षणसमयेऽपि सुस्वादूनि भवन्ति, भुक्तेरनन्तरं प्राणापहारीणि, तथा विषयसुखान्यपि ॥ १८ ॥

अद्धाणं जो महंतं तु, अपाहिज्जो पवज्जई ।
गच्छंतो सो दुही होइ, छुहातण्हाइ पीडिओ ॥ १९ ॥

हे पितरौ ! यः पुरुषो महान्तमध्वानं - दीर्घं मार्गमपाथेयः- शम्बलरहितः सन् प्रव्रजति, स पुमान् क्षुधातृष्णाभ्यां पीडितः सन् दुःखी भवति ॥ १९ ॥

एवं धम्मं अकाऊणं, जो गच्छइ परं भवं ।
गच्छंतो सो दुही होइ, वाहिरोगेहिं पीडिओ ॥ २० ॥

एवममुना प्रकारेण अशम्बलपुरुषदृष्टान्तेन यः पुरुषो धर्ममकृत्वा परभवं गच्छत्य-न्यज्जन्म व्रजति, स गच्छन् दुःखी भवति । कीदृशः सः ? व्याधिरोगैः पीडितः ॥ २० ॥

अद्धाणं जो महंतं तु, सपाहेज्जो पवज्जइ ।
गच्छंतो सो सुही होइ, छुहातिण्हा विवज्जई ॥ २१ ॥

हे पितरौ ! यः पुरुषो महान्तमध्वानं - दीर्घं मार्गं सपाथेयः - शम्बलसहितः सन् प्रव्रजति, स पुरुषः क्षुधातृष्णाभ्यां विवर्जितः क्षुधातृष्णाविवर्जितः सन् मार्गं गच्छन् सुखीभवति ॥ २१ ॥

एवं धम्मं पि काऊणं, जो गच्छइ परं भवं ।
गच्छंतो सो सुही होइ, अप्पकम्मे अवेयणे ॥ २२ ॥

एवममुना प्रकारेणानेन शम्बलसहितपुरुषदृष्टान्तेन यो मनुष्यो धर्मं कृत्वा परभवं-परलोकं गच्छति, स धर्माराधकः पुरुषः सुखी भवति । कीदृशः सः ? अल्पकर्मा अल्पानि कर्माणि यस्य सोऽल्पकर्मा लघुकर्मा । पुनः कीदृशः सः ? अवेदनः, न विद्यते वेदना यस्य सोऽवेदनः, अल्पवेदनो वेदनारहितो वा, अल्पपापकर्मा अल्पाऽसातावेदना इत्यर्थः ॥ २२ ॥

जहा गेहे पलित्तंमि, तस्स गेहस्स जो पहू ।
सारभंडाणि नीणेइ, असारं अवउज्जइ ॥ २३ ॥

हे पितरौ ! यथा गृहेऽग्निना प्रदीप्ते - प्रज्ज्वलिते सति तस्य गृहस्य यः प्रभुः स्वामी तदा सारभाण्डानि - सारपदार्थानाजीविकाहेतून् गृहात् 'नीणेइ' इति निष्कासयति, असारं भाण्डं चाऽपोज्झति - अपोहति - त्यजतीत्यर्थः ॥ २३ ॥

एवं लोए पलित्तंमि, जराए मरणेण य ।
अप्पाणं तारइस्सामि, तुज्झेहिं अणुमन्निओ ॥ २४ ॥

एवममुनाऽनेन दृष्टान्तेन लोके जरया मरणेन च प्रदीप्ते - प्रज्ज्वलिते सत्यहमात्मानं तारयिष्यामि । कीदृशोऽहं ? युष्माभिरनुमतो - भवद्भिर्दत्ताज्ञस्तस्मान्मह्यमाज्ञा दातव्या । अहं भवदाज्ञया आत्मन उद्धारं करिष्यामीति भावः ॥ २४ ॥

तं बिंति अम्मापियरो, सामन्नं पुत्त दुच्चरं ।
गुणाणं तु सहस्साइं, धारेयव्वाइं भिक्खुणा ॥ २५ ॥

अथ मातापितरौ तं मृगापुत्रं प्रति ब्रूतः, हे पुत्र ! श्रामण्यं दुश्चरम्, साधुधर्मो दुष्करोऽस्ति । हे पुत्र ! चारित्रस्योपकारकाणां गुणानां सहस्राणि भिक्षोर्धारयितव्यानि, मूलगुणाश्चोत्तरगुणाश्च भिक्षुणा धारणीयाः ॥ २५ ॥

समया सव्वभूएसु, सत्तुमित्तेसु वा जगे ।
पाणाइवायविरई, जावज्जीवाए दुक्करं ॥ २६ ॥

पुनर्हे पुत्र ! सर्वभूतेषु समता कर्तव्या, अथवा 'जगे' इति जगति शत्रुमित्रेषु समता कर्तव्या । पुनर्यावज्जीवं प्राणातिपातविरतिर्दुष्करमिति दुष्करा ॥ २६ ॥

निच्चकालप्पमत्तेणं, मुसावायविवज्जणं ।
भासियव्वं हियं सच्चं, निच्चाउत्तेण दुक्करं ॥ २७ ॥

पुनर्नित्यकालं-सर्वदा अप्रमादित्वेन मृषावादस्य विवर्जनं मृषावादविवर्जनं कर्तव्यम् । पुनर्हितं-हितकारकं सत्यं वक्तव्यम् । पुनर्नित्यायुक्तेन स्थातव्यम्, तदपि दुष्करमस्ति । आयुक्तः-क्रियासु सावधानत्वम्, नित्यमायुक्तो नित्यायुक्तस्तेन स्थातव्यम् । अत्र भावप्रधान-निर्देशो मन्तव्यः । नित्यमायुक्तत्वेन स्थातव्यं तदपि दुष्करमित्यर्थः ॥ २७ ॥

दंतसोहणमाइस्स, अदत्तस्स विवज्जणं ।
अणवज्जेसणिज्जस्स, गेण्हणा अवि दुक्करं ॥ २८ ॥

हे पुत्र ! पुनः साधुधर्मे दन्तशोधनप्रमुखस्याप्यदत्तस्य वस्तुनोऽपि विवर्जनम् । शलाकामात्रमपि वस्त्वदत्तं न ग्रहितव्यम् । अनवद्यं च तदेषणीयं चाऽनवद्येषणीयम् तस्यानवद्यैषणीयस्य पिण्डादेर्ग्रहणमपि दुष्करम् । अनवद्यं - निर्दूषणमचित्तं प्रासुकमेषणीयं द्विचत्वारिंशद्दोषरहितं पिण्डं ग्रहीतव्यम्, तदपि दुष्करमित्यर्थः ॥ २८ ॥

विरई अबंभचेरस्स, कामभोगरसन्नुणा ।
उग्गं महव्वयं बंभं, धारेयव्वं सुदुक्करं ॥ २९ ॥

हे पुत्र ! अब्रह्मचर्यस्य - मैथुनस्य विरतिः कर्तव्या, सापि दुष्करा । हे पुत्र ! कामभोग-रसज्ञेन पुरुषेणोग्रं-घोरं बम्भं-ब्रह्मचर्यं महाव्रतं धर्तव्यम्, तदपि दुष्करं । लब्धभोगसुखा-स्वादस्य भोगेभ्यो निवृत्तिरत्यन्तं दुष्करेत्यर्थः ॥ २९ ॥

धणधन्नपेसवग्गेसु, परिग्गहविवज्जणं ।
सव्वारंभपरिच्चाओ, निम्ममत्तं सुदुक्करं ॥ ३० ॥

धनधान्यप्रेष्यवर्गेषु परिग्रहविवर्जनं कर्तव्यम्, धनं-गणिमादि, धान्यं-गोधूमादि, प्रेष्यवर्गो-दासदास्यादिवर्गः । धनं च धान्यं च प्रेष्यवर्गश्च धनधान्यप्रेष्यवर्गास्तेषु मोहबुद्धेर्विशेषेण वर्जनम्, एतदपि दुष्करम् । पुनः सर्वारम्भपरित्यागः कर्तव्यः, स चापि दुष्करः । पुनर्निर्ममत्वचिन्तनं दुष्करम्, न मे कश्चिदस्ति, अहमपि कस्यापि नास्मीति चिन्तनं दुष्करम् ॥ ३० ॥

चउव्विहे वि आहारे, राईभोयणवज्जणा ।
सन्निहीसंचओ चेव, वज्जेयव्वो सुदुक्करं ॥ ३१ ॥

हे पुत्र ! पुनः साधुधर्मे चतुर्विधे आहारे रात्रिभोजनस्य वर्जना कार्या । अशनपानखा-दिमस्वादिमानां चतुर्णामाहाराणामपि रात्रौ भोजनत्याग एव कर्तव्यः च पुनः सन्निधिघृतगु-डादेरुचितकालातिक्रमेण स्थापनम् । ततः सन्निधिश्चासौ सञ्चयश्च सन्निधिसञ्चयः, एव निश्चयेन वर्जितव्यः, सोऽपि सुतरां दुष्करः ॥ ३१ ॥

छुहा तण्हा य सीउण्हे, दंसमसगवेयणा ।
अक्कोसा दुक्खसिज्जा य, तणफासा जल्लमेव य ॥ ३२ ॥

पुनर्हे पुत्र ! क्षुधा सहनीयेत्यध्याहारः । तृषा तृष्णा च सोढव्या, शीतोष्णं सहनीयम्, दंशमशकानां वेदना सहनीया, पुनराक्रोशा दुर्वचनानि, तत्सहनमपि दुष्करम् । पुनर्दुःखशय्या उपाश्रयस्य दुःखं शय्यादुःखं तदपि सहनीयम् । संस्तारके तृणस्पर्शदुःखम्, पुनर्जल्ल-मलपरीषहोऽपि सोढव्यः साधुना ॥ ३२ ॥

ताडणा तज्जणा चेव, वहबंधपरीसहा ।
दुक्खं भिक्खायरिया, जायणा य अलाभया ॥ ३३ ॥

पुनस्ताडना-चपेटाटक्करादिना हननम्, पुनस्तर्जनमङ्गुल्यादिना निर्भर्त्सनं भयो-त्पादनम्, पुनर्वधबन्धपरिषहाः सहनीयाः । तत्र वधो यष्ट्यादिभिर्हननम्, बन्धनं रज्ज्वादिना दमनम्, वधश्च बन्धश्च वधबन्धौ, तयोः परिषहाः सोढव्याः । पुनर्भिक्षाचर्याया दुःखम्, गृहस्थगृहे याचना कर्तव्या, तत्करणेऽपि दुःखमस्ति । तत्रापि याचनायां कृतायामप्यलाभ-ताऽप्राप्तिर्भवेत्, तदापि दुःखं न कर्तव्यमेतदपि दुष्करम् ॥ ३३ ॥

कावोया जा इमा वित्ती, केसलोओ य दारुणो ।
दुक्खं बंभवयं घोरं, धारेउं अ महप्पणा ॥ ३४ ॥

हे पुत्र ! साधुधर्मे पुनः कापोतीया वृत्तिर्वर्तते इति शेषः । कपोतानां पक्षिणां या इयं वृत्तिः सा कापोतीया । यथा हि पक्षिणो नित्यं शङ्किताः सन्तः स्वभक्षग्रहणे प्रवर्तन्ते । भक्ष्यं कृत्वा च पुनः सार्थे किमपि न गृह्णन्ति, कुक्षिशम्बला भवन्ति, तथा साधवोऽपि दोषेभ्यः शङ्कमाना आहारग्रहणे प्रवर्तन्ते । आहारं कृत्वा च किमपि सार्थे सञ्चयं न कुर्वन्ति । पुनः साधूनां केशलोचोऽपि दारुणो भयदोऽस्ति, पुनर्महात्मना साधुना ब्रह्मव्रतं धर्त्तुं दुःखमिति दुष्करम् । यद् ब्रह्मव्रतं महात्मना - महापुरुषेण धियते तद् ब्रह्मव्रतं धर्त्तुं दुष्करमिति भावः । कीदृशं ब्रह्मव्रतं ? घोरम्, अन्येषामल्पसत्त्वानां भयदायकम् ॥ ३४ ॥

सुहोइओ तुमं पुत्ता, सुकुमालो समुज्जिओ ।
न हु सी पभू तुमं पुत्ता, सामण्णमणुपालिउं ॥ ३५ ॥

हे पुत्र ! त्वं सुखोचितोऽसि । हे पुत्र ! पुनस्त्वं सुकुमालोऽसि, अथ चारित्रग्रहणाय समुद्यतोऽसि । परं त्वं श्रामण्यं साधुधर्ममनुपालयितुं प्रभुः समर्थो न भवसि ॥ ३५ ॥

जावज्जीवमविस्सामो, गुणाणं तुह महब्भरो ।
गुरुओ लोहभारुव्व, जो पुत्ता होइ दुव्वहो ॥ ३६ ॥

हे पुत्र ! यो गुणानां चारित्रस्य मूलोत्तरगुणानां महाभारः स लोहभार इव गुरुर्गरिष्ठो दुर्वहो भवति । कीदृशो गुणानां महाभारः ? यावज्जीवमविश्रामो विश्रामरहितः । अन्योऽपि गुरुभारो यदा वोढुं न शक्यते, तदा क्वचित्प्रदेशे विमुच्य विश्रामो गृह्यते, परमेवं चारित्र-गुणभारः कदापि न मोचनीयो, यावज्जीवं धारणीयोऽस्ति ॥ ३६ ॥

आगासे गंगासोउ व्व, पडिसोउव्व दुत्तरो ।
बाहाहिं सागरो चेव, तरिअव्वो गुणोयही ॥ ३७ ॥

हे पुत्र ! आकाशे गङ्गायाः श्रोतोवद्दुस्तरमिति योज्यम् । यथा हिमाचलात्पतद्गङ्गा-प्रवाहस्तरितुमशक्यस्तथा संयमो धारितुमशक्यः । प्रतीपजलप्रवाह इव दुस्तरो बाहुभ्यां सागरस्तरितव्यः । तथा गुणोदधिर्गुणानां ज्ञानादीनामुदधिर्गुणोदधिः, अथवा गुणा ज्ञानादयस्त एवोदधिर्गुणोदधिश्चारित्रसमुद्रस्तरणीयः (कायवाङ्मनोनियन्त्रणेनैव तत्तरणा-त्तस्य च दुष्करत्वात्) ॥ ३७ ॥

वालुयाकवले चेव, निरस्साए उ संजमे ।
असिधारागमणं चेव, दुक्करं चरिऊं तवो ॥ ३८ ॥

हे पुत्र ! वालुकाकवलो यथा निःस्वादस्तथा संयमः । असिधारागमनमसिधारायां गमनम्, खड्गधारायां चलनं यथा दुष्करं तथा तपश्चरितुं दुष्करं वर्तते ॥ ३८ ॥

अहीवेगंतदिट्ठीए, चरित्ते पुत्त दुच्चरे ।
जवा लोहमया चेव, चावेयव्वा सुदुक्करं ॥ ३९ ॥

हे पुत्र ! साधुरहिरिवैकान्तदृष्टिः, एकान्तो निश्चयो यस्याः सैकान्तनिश्चया, एकान्तनिश्चया चासौ दृष्टिश्चैकान्तदृष्टिः । यथा सर्प एकाग्रदृष्ट्या चलति, इतस्ततश्च न विलोकयति, तथा साधुमार्गे साधुश्चरेत्, मोक्षमार्गे दृष्टिं विधाय चरेत् । कीदृशे चारित्रे ? दुश्चरे चरितुमशक्ये । यथा लोहमया यवाश्चर्वितव्या दुष्करास्तथा चारित्रमपि चरितुं दुष्करम् ॥ ३९ ॥

जहा अग्गिसिहा दित्ता, पाउं होइ सुदुक्करा ।
तह दुक्करं करेउं जे, तारुण्णे समणत्तणं ॥ ४० ॥

हे पुत्र ! यथाग्निशिखा दीप्ता सती ज्वलन्ती पातुं-पानं कर्तुं सुतरां दुष्करा, तथा तारुण्ये यौवने श्रमणत्वं चारित्रं कर्तुं दुष्करम् । यौवनावस्थायां हीन्द्रियाणि दुर्दमानीत्यर्थः ॥ ४० ॥

जहा दुक्खं भरेउं जे, होइ वायस्स कुत्थलो ।
तहा दुक्खं करेउं जे, कीवेणं समणत्तणं ॥ ४१ ॥

हे पुत्र ! यथा वायोरिति वायुना भरितुं-पूरितुं कुत्थलो - वस्त्रमयं भाजनं दुष्करम्, तथा क्लीबेन हीनसत्वेन श्रामण्यं कर्तुं दुष्करम् ॥ ४१ ॥

जहा तुलाए तोलेउं, दुक्करं मंदरो गिरी ।
तहा निहुयं निस्संकं, दुक्करं समणत्तणं ॥ ४२ ॥

हे पुत्र ! यथा मन्दरो गिरिर्मेरुपर्वतस्तुलया तोलितुं दुष्करस्तथा निभृतं-निश्चलं निःशङ्कं शंङ्कारहितं यथास्यात्तथा शरीरापेक्षारहितं श्रमणत्वं-साधुत्वं शरीरेण धर्तुं दुष्करम् ॥ ४२ ॥

जहा भुयाहिं तरिउं, दुक्करं रयणायरो ।
तहा अणुवसंतेणं, दुत्तरं दमसागरो ॥ ४३ ॥

हे पुत्र ! यथा रत्नाकरः- समुद्रो भुजाभ्यां तरितुं दुष्करस्तथाऽनुपशान्तेन मनुष्येण दमसागरस्तरितुं दुष्करः । उपशान्तो जितकषायः, न उपशान्तोऽनुपशान्तस्तेन सकषायेण पुरुषेण दम इन्द्रियदमोऽर्थाच्चारित्रम्, दम एव दुस्तरत्वात्सागर इव दमसागरस्तरितुं दुःशक्य इत्यर्थः ॥ ४३ ॥

भुंज माणुस्सए भोए, पंचलक्खणए तुमं ।
भुत्तभोगी तओ जाया, पच्छा धम्मं चरिस्ससि ॥ ४४ ॥

हे पुत्र ! मानुष्यकान्, मनुष्यस्येमे मानुष्यकास्तान् मानुष्यकान् मनुष्यसम्बन्धिनः पञ्चलक्षणान् पञ्चविधान् भोगांस्त्वं भुंक्ष्वाऽनुभव । हे जात ! हे पुत्र ! ततः पश्चाद् भुक्तभोगीभूय धर्मं - यतिधर्मं चरिष्यस्यङ्गीकरिष्यसि । इदानीं तव भोगानुभवसमयोऽस्तीति, न पुनर्भोगत्यागावसर इति भावः ॥ ४४ ॥

[1]सो वि अम्मा पियरो, एवमेयं जहा फुडं ।
इहलोए निप्पिवासस्स, नत्थि किंचिवि दुक्करं ॥ ४५ ॥

अथ मृगापुत्रो बूते । हे पितरावेवमिति यथा भवद्भ्यां प्रोक्तं तत्तथैव । यथा प्रव्रज्याया दुष्करत्वं स्फुटं-प्रकटं वर्तते तदसत्यं नास्ति । तथापीह लोके निष्पिपासस्य, पिपासायास्तृष्णाया निर्गतो निष्पिपासस्तस्य निष्पिपासस्य-निःस्पृहस्य पुरुषस्य किञ्चिदपि दुष्करं नास्ति । निःस्पृहस्य तृणं जगदित्युक्तेः । यः स्पृहावान् भवति तस्य परिग्रहत्यागो दुष्कर एव । परं निरीहस्य साधुधर्मः सुकर एव तेनाहं निःस्पृहोऽस्मि, मया सुखेन साधुधर्मः कर्तव्यः ॥ ४५ ॥

सारीरमाणसा चेव, वेयणाओ अणंतसो ।
मए सोढाओ भीमाओ, असइं दुक्खभयाणि य ॥ ४६ ॥

हे पितरौ ! मया शारीरमानस्यो वेदना अनन्तशोऽनन्तवारान् सोढा अनुभूताः । चैव पादपूरणे । च पुनरसकृद्वारंवारं दुःखानि भयानि सोढानि । कीदृशा वेदनाः ? भीमाभयानकाः दुःखानां भयानां च भीमशब्दो विशेषणेन प्रतिपाद्यः । कीदृशानि दुःखानि भयानि च ? भीमानि भयोत्पादकानि । दुःखानि च भयानि च दुःखभयानि । अथवा दुःखहेतूनि भयानि दुःखभयानि, राजविड्वराग्निचौरधाटीप्रमुखाणि, तानि वारंवारमनुभूतानीत्यर्थः ॥ ४६ ॥

जरामरणकंतारे, चाउरंते भयागरे ।
मए सोढाणि भीमानि, जम्माणि मरणाणि य ॥ ४७ ॥

पुनर्मृगापुत्रो वक्ति-हे पितरौ ! चातुरन्ते संसारे भीमानी-भयदानि जन्मानि च पुनर्मरणानि मया सोढान्यनुभूतानि । चत्वारो देव-मनुष्य-तिर्यग्नरकरूपा भवा अन्ता-अवयवा यस्य स चतुरन्तः, चतुरन्त एव चातुरन्त इति व्युत्पत्तिः । अर्थात्संसारस्तस्मिंश्चातुरन्ते संसारे ।

---

१ अत्र - तं बिंतऽम्मापियरो - इति बृहद्वृत्त्याम् अन्यसंस्करणे च । तत्र 'अम्मापियरो' इति द्वितीयाद्विवचनम्, अत्र आमन्त्रणपदम् ।

कीदृशे चातुरन्ते ? जरामरणकान्तारे, जरामरणाभ्यामतिगहनतया कान्तारं-वनं जरामरण-कान्तारं, तस्मिन् जरामरणकान्तारे ॥ ४७ ॥

जहा इहं अगणी उण्हो, इत्तो अणंतगुणो तहिं ।
नरएसु वेयणा उण्हा, असाया वेइया मए ॥ ४८ ॥

हे पितरौ ! येषु नरकेष्वहमुत्पन्नस्तेषु नरकेषु मयोष्णाः स्पर्शनेन्द्रियदुःखदा असातावेदना वेदिता भुक्ताः । कीदृशा उष्णाः ? यथेह मनुष्यलोकेऽग्निरुष्णो वर्तते, इतोऽग्नेः स्पर्शात्तत्र नरकेष्वनन्तगुणोऽग्निस्पर्शः । तत्र च बादराग्नेरभावात् पृथिव्या एव तथाविधः स्पर्श इति गम्यते ॥ ४८ ॥

जहा इह इमं सीयं, इत्तोणंतगुणं तहिं ।
नरएसु वेयणा सीया, असाया वेइया मए ॥ ४९ ॥

यथेह मनुष्यलोके इदं प्रत्यक्षं शीतं वर्तते, इतः शीतात्तत्र नरकेषु मया शीता स्पर्शने-न्द्रियदुःखदाऽसातावेदनाऽनन्तगुणाधिका भुक्ताऽनुभूता ॥ ४९ ॥

कंदंतो कंदुकुंभीसु, उड्ढपाओ अहोसिरो ।
हुयासणे जलंतमि, पक्कपुव्वो अणंतसो ॥ ५० ॥

हे पितरावहं कन्दुकुम्भीषु - पाकभाजनविशेषासु लोहमयीषु हुताशने देवमायाकृते वह्नावनन्तशो - बहून् वारान् पक्वपूर्वः, पूर्वं पक्व इति पक्वपूर्वः । कीदृशोऽहम् ? ऊर्द्ध्वपाद-ऊर्द्ध्वचरणः, च पुनरधःशिरा अधोमस्तकः । अहं किं कुर्वन् ? क्रन्दन् पूत्कृतिं कुर्वन् । कीदृशे हुताशने ? ज्वलति देदीप्यमाने ॥ ५० ॥

महादवग्गिसंकासे, मरुंमि वइरवालुए ।
कलंबवालुयाए व, भट्ठपुव्वो अणंतसो ॥ ५१ ॥

हे पितरौ ! कलम्बवालुकाया नद्या मरुंमि वालुकानिवहेऽनन्तशो वारंवारमहं दग्धपूर्वः । कलम्बवालुका नरकनदी, तस्याः पुलिनधूल्यां भ्रष्टपूर्वः, यथात्र चणकादि-धान्यानि भ्राष्ट्रे भृज्यन्ते, तथाहमपि बहुशो दग्धः । कथंभूते मरौ ? महादवाग्निसंकाशे महादावानलसदृशे दाहकशक्तियुक्ते । पुनः कीदृशे मरौ ? वज्रवालुके, वज्रवालुका यस्य स वज्रवालुकस्तस्मिन् वज्रवालुके ॥ ५१ ॥

रसंतो कंदुकुंभीसु, उड्ढं बद्धो अबंधवो ।
करवत्तकरकयाईहिं, छिन्नपुव्वो अणंतसो ॥ ५२ ॥

हे पितरौ ! पुनरहं कन्दुकुम्भीषु लोहमयपाचनभाण्डविशेषेषु ऊर्द्ध्वं वृक्षशाखादौ बद्धः सन् परमाधार्मिकदेवैरिति बुद्ध्या मायमबद्धः कुत्रचिन्नष्ट्वा यायात्, तस्मादधोदेशे कुम्भी वर्तते, उपरि च वृक्षशाखायामहं बद्धः, करपत्रैः क्रकचैश्चानन्तशो-बहुवारं छिन्नपूर्वो द्विधा कृतः । यथा काष्ठं बद्ध्वा करपत्रैः क्रकचैश्छिद्यते, तथाहं छिन्नः । लघूनि काष्ठविदारणोपकरणानि क्रकचानि, बृहंति च तानि करपत्रकाण्युच्यन्ते । कीदृशोऽहं ? रसन्-विलपन् पूत्कृतिं कुर्वन्, पुनः कीदृशोऽहं ? अबान्धवः, न विद्यते बान्धवो हितकारी यस्य सोऽबान्धवः ॥ ५२ ॥

अइतिक्खकंटयाइन्ने, तुंगे सिंबलिपायवे ।
खेवियं पासबद्धेणं कड्ढोकड्ढाहिं दुक्करं ॥ ५३ ॥

हे पितरावतितीक्ष्णकण्टकाकीर्णे तुङ्गे-उच्चे शाम्बलपादपे कड्ढाकड्ढैः कर्षापकर्षणैः परमाधार्मिककृतैः क्षेपितं-पूर्वोपार्जितं कर्मानुभूतम् । मया यानि कर्माण्युपार्जितानि तानि भुक्तानीति शेषः । कीदृशेन मया ? पाशबद्धेन-रज्वा [1]सञ्जितेन । इदमपि दुष्करं कष्टं भुक्तमिति शेषः ॥ ५३ ॥

महजंतेसु उच्छू व, आरसंतो सुभेरवं ।
पीलिओमि सकम्मेहिं, पावकम्मो अणंतसो ॥ ५४ ॥

हे पितरौ ! पुनरहं पापकर्मा, पापं कर्म यस्य स पापकर्मा-पापः । अनन्तशो बहुवारं स्वकर्मभिर्महायन्त्रेषु पीडितोऽस्मि । क इव ? ईक्षुरिव, यथेक्षुर्महायन्त्रेषु पीड्यते । अहं किं कुर्वन् ? सुभैरवं सुतरामत्यन्तं भैरवं-भयानकं शब्दमारसन्नाक्रन्दं कुर्वन् ॥ ५४ ॥

कूवंतो कोलसुणएहिं, सामेहिं सबलेहि य ।
पाडिओ फालिओ छिन्नो, विफुरंतो अणेगसो ॥ ५५ ॥

हे पितरावनेकशोऽनेकवारं श्यामैः श्यामाभिधानैः, च पुनः शबलैः शबलाभिधानैः परमाधार्मिकदेवैर्भूमौ - पृथिव्यामहं पातितः । परमाधार्मिका हि पञ्चदशविधाः । अम्बे १ बध्नन्ति घ्नन्ति च । अम्बरीसे २ चेव करीषे पचयन्ति । सामेय ३ शासनां यातनां च कुर्वन्ति । सबलत्ति य ४ अन्त्रादि निष्काशयन्ति । रुद्दो ५ कुन्तादौ प्रोतयन्ति । अवरुद्द ६ अङ्गोपाङ्गानि मोटयन्ति । काले य ७ तैलादौ तलयन्ति । महाकाले ८ तहावरे स्वमांसानि खादयन्ति ॥ १ ॥ असिपत्ते ९ असिपत्रवनं विकुर्वन्ति । धणू १० धनुर्बाणैर्घ्नन्ति । कुंभे ११ कुंभिपाके पचन्ति । वालुया १२ भ्राष्ट्रे पचन्ति । वेयणत्ति य १३ वैतरिण्यामवतारयन्ति । खरस्सरे १४ शाल्मल्यामारोप्य खरस्वरान् प्रकुर्वन्ति । महाघोसे १५ नश्यतो नारकान् मिलयन्ति, महाशब्देन भापयन्ति च । इति परमाधार्मिकाः । कीदृशैः श्यामैः शबलैश्च ?

---

१ सञ्ज् - गण - १ - બાંધવું.

कोलशुनकैर्वराहकुर्कुररूपधारिभिर्देवैः पुनरहं स्फाटितः - पुरातनवस्त्रवद्विदारितः । पुनरहं तैर्वराहकुर्कुटैः स्फाटितो दन्तैर्दंष्ट्राभिश्च वृक्षवच्छिन्नश्च । पुनः कीदृशोऽहं ? कूजन्नव्यक्तं शब्दं कुर्वन् । पुनः कीदृशोऽहं ? विस्फुरन्नितस्ततस्तडफडन् ॥ ५५ ॥

असीहिं अयसिवन्नाहिं, भल्लीहिं पट्टिसेहि य ।
छिन्नो भिन्नो विभिन्नो य, उइन्नो पावकम्मुणा ॥ ५६ ॥

हे पितरौ ! पुनरहं पापकर्मणोदीर्णः प्रेरितः सन्नरकेष्वसिभिः- खड्गैः, पुनर्भल्लीभिः- कुन्तैस्त्रिशूलैर्वा, पुनः [1]पट्टिशैः प्रहरणविशेषैश्छिन्नो द्विधा कृतः भिन्नो विदारितः, च पुनर्विभिन्नो विशेषेण सूक्ष्मखण्डीकृतः । कथंभूतैरसिभिः ? अतसीकुसुमवर्णैः श्यामवर्णैरित्यर्थः ॥ ५६ ॥

अवसो लोहरहे जुत्ते, जलंते समिलाजुए ।
चोईओ तोत्तजुत्तेहिं, रोज्झो वा जह पाडिओ ॥ ५७ ॥

हे पितरौ ! पुनरहं नरके-लोहरथेऽवशः-परवशः सन् परमाधार्मिकदेवैर्ज्वलत्यग्निना जाज्वल्यमाने समिलायुगे युक्तो-योत्रितः । समिला-युगरन्ध्रक्षेपणीयकीलिका । युगस्तु धूसरः । उभयोरपि वह्निना प्रदीप्तत्वं कथितम् । तत्राग्निना ज्वलमाने रथेऽहं योत्रितस्तोत्रयोक्त्रैर्नोदितः-प्रेरितः, तोत्राणि-प्राजनकानि पुराणकादीनि । योक्त्राणि-नासाप्रोतबद्धरज्जुबन्धनानि, तैः प्रेरितः । पुनरहं 'रोज्झो वा' इति गवय इव पातितः, यष्टिमुष्ट्यादिना हत्वा पातितः । वा शब्दः पादपूरणे, यथाशब्द इवार्थे ॥ ५७ ॥

हुयासणे जलंतंमि, चियासु महिसो विव ।
दड्ढो पक्को य अवसो, पावकम्मेहिं पावियो ॥ ५८ ॥

हे पितरौ ! पापकर्मभिरहं प्रावृतो-वेष्टितः सन् ज्वलति हुताशने जाज्वल्यमानेऽग्नौ दग्धो-भस्मसात्कृतः । पुनरहं पक्वो वृन्ताकादिवद्भटित्रीकृतः । कीदृशोऽहं ? अवशः-परवशः । अहं क इवाग्नौ दग्धः पक्वश्च ? चितास्वग्निषु महिष इव, यथात्र पापाः [2]पडुकं बद्ध्वाग्नौ प्रज्वालयन्ति भटित्रीकुर्वन्ति, तथा तत्राहं परमाधार्मिकदेवैर्विक्रियारचिताग्नौ दग्धः पक्वश्च ॥ ५८ ॥

बला संदंसतुंडेहिं, लोहतुंडेहि पक्खीहिं ।
विलुत्तो विलवंतोहं, ढंकगिद्धेहिं णंतसो ॥ ५९ ॥

हे पितरावहमनन्तशो-बहुवारं ढङ्कगृद्धैर्ढङ्कपक्षिभिर्गृध्रपक्षिभिश्च बलाद्विलुप्तकुन्थितः, विशेषेण लुप्तो विलुप्तः, नासानेत्रान्त्रकालेयादिषु [3]चुण्टित इत्यर्थः । कथंभूतैर्ढं[4]ङ्कैर्गृध्रैश्च ?

---

१ पट्टिश-शब्दः प्रहरणविशेषेऽस्ति न पिट्टिशः । द्रष्टव्यः-शब्दरत्नमहोदधिः, अन्यवृत्त्यामपि पट्टिश एव ॥
२ પાડો. ३ छेदायो. ४ काकैः ।

सन्दंशतुण्डैः सन्दंशाकारं तुण्डं येषां ते सन्दंशतुण्डाः तैः सन्दंशाकारमुखैः । पुनः कीदृशैः ? लोहतुण्डैर्लोहवत्कठोरमुखैः । किं कुर्वन्नहं ? विलपन् - विलापं कुर्वन् ॥ ५९ ॥

तण्हाकिलंतो धावंतो, पत्तो वेयरणिं नइं ।
जलं [1]पाहंति चिंतितो, खुरधाराहि विवाइओ ॥ ६० ॥

हे पितरौ ! पुनरहं तृष्णाक्रान्तस्तृषाभिर्व्याप्तो धावन् वेतरणीं प्राप्तः सन् जलं पिबामीति चिन्तयन् क्षुरधाराभिर्व्यापादितः । कोऽर्थः ? यावदहं तृषाक्रान्तो मनसि पानीयं पिबामीति चिन्तयामि, तावद्वैतरणीनद्या ऊर्मिभिः- कल्लोलैर्हतो दुःखीकृतः, वैतरणीनद्या जलं हि क्षुरधाराप्रायं गलच्छेदकमस्तीति भावः ॥ ६० ॥

उण्हाभितत्तो संपत्तो, असिपत्तं महावणं ।
असिपत्तेहिं पडंतेहिं, छिन्नपुव्वो अणंतसो ॥ ६१ ॥

हे पितरौ ! पुनरहमुष्णाभितप्त - आतपपीडितश्छायार्थी असिपत्रमहावनं प्राप्तः । असिवत्खड्गवत्पत्रं येषां तेऽसिपत्राः खड्गपत्रवृक्षास्तेषां महावनमसिपत्रमहावनं गतः सन्नसिपत्रैः पतद्भिरनन्तशोऽनेकवारं छिन्नपूर्वो द्विधा कृतः ॥ ६१ ॥

मुग्गरेहिं मुसंढीहिं, सूलेहिं मूसलेहि य ।
गयासंभग्गगत्तेहिं, पत्तं दुक्खमणंतसो ॥ ६२ ॥

हे पितरावहं मुद्गरैर्लोहमयैर्गुरुजैः, च पुनर्मुसंढीभिः शस्त्रविशेषैर्लपेटाभिधानैः शस्त्रैर्वा, तथा शूलैस्त्रिशूलैश्च पुनर्मुशलैः पुनर्गदाभिर्लोहमयीयष्टिभिरनन्तशो दुःखं प्राप्तः । कथंभूतैरेतैर्मुद्गरादिभिः शस्त्रैः ? सम्भग्नगात्रैश्चूर्णितशरीरैः ॥ ६२ ॥

खुरेहिं तिक्खधारेहिं, छुरियाहिं कप्पणीहि य ।
कप्पिओ फालिओ छिन्नो, उक्कित्तो य अणेगसो ॥ ६३ ॥

हे पितरौ ! क्षुरै रोममुण्डनसाधनैः, पुनस्तीक्ष्णधाराभिः क्षुरिकाभिः, कल्पनीभिः- कर्त्तरीभिरहं कल्पितो वस्त्रवत्खण्डितः, पुनः स्फाटितो वस्त्रवदूर्ध्वं विदारितः, पुनश्छिन्नः क्षुरिकाभिः कर्कटीव खण्डितः । पुनरुत्कृतः शरीराद् दूरीकृतचर्मेत्यर्थः । एवमनन्तशो वारंवार कदर्थितः ॥ ६३ ॥

पासेहिं कूडजालेहिं, मिओ वा अवसो अहं ।
वाहिओ बद्धरुद्धो य, बहुसो चेव विवाइओ ॥ ६४ ॥

---

१ पाहंति-पास्यामि-इति बृहद्वृत्त्याम् ।

हे पितरौ ! पुनरहं बहुशो वारंवार पाशैर्बन्धनैस्तथा कूटजालैः [1]कुडिवागुरादिभिर्मृग इव 'वाहिओ' इति [2]भोलवितस्तथा बद्धो रुद्धश्च बाह्यप्रचारान्निषिद्धः । यथा मृगं वञ्चयित्वा पाशे निक्षिपन्ति, कूटजाले च पातयन्ति, तथाहं वञ्चितो बद्धो रुद्धश्च । च पुनरेव निश्चयेनावशः-परवशः सन् व्यापादितो - मारितः ॥ ६४ ॥

गलेहिं मगरजालेहिं, मच्छो वा अवसो अहं ।
उल्लिओ फालिओ गहिओ, मारिओ य अणंतसो ॥ ६५ ॥

हे पितरौ ! पुनरहं गलैर्मत्स्यानां पाशैर्मकरजालैर्मत्स्यजालैर्मत्स्य इव विद्धगलोऽभूवम् । पुनर्गृहीतो मकररूपधारिभिः परमाधार्मिकैर्बलादुपादत्तः । पुनः 'उल्लिओ' इति उल्लिखितश्चीरितः । पुनः स्फाटितः काष्ठवद्विदारितः । पुनरनन्तशो मारितो गर्दभ इव कुट्टितः ॥ ६५ ॥

वीदंसएहिं जालेहिं, लेप्पाहिं सउणो विव ।
गहिओ लग्गो य बद्धो य, मारिओ य अणंतसो ॥ ६६ ॥

हे पितरौ ! पुनरहं शकुनिरिव-पक्षीव, विशेषेण दंशन्तीति विदंशकाः श्येनादयस्तैर्जालैस्तादृग्बन्धनैः पक्षिबन्धनविशेषैर्बलाद्गृहीतः । 'वीतंसोमृगपक्षिणां' इति हैमः । पुनरहं जालैर्गृहीतः, पुनर्लेप्याभिः शिरीषलेपनक्रियाभिर्लग्नः श्लिष्टः, पुनरहं बद्धो दवरकादिना चरणग्रीवादौ नियन्त्रितः । पुनर्मारितः- प्राणैर्विहीनः कृतः ॥ ६६ ॥

कुहाडपरसुमाईहिं, वड्ढइहिं दुमो इव ।
कुट्टिओ फालिओ छिन्नो, तच्छिओ य अणंतसो ॥ ६७ ॥

हे पितरौ ! पुनरहं कुठारैः पश्वादिकैः काष्ठसंस्करणसाधनप्रहरणैर्वार्द्धकिभिः काष्ठवद्भिर्द्रुम इव कुट्टितः स्फाटितश्छिन्नश्च । यथा काष्ठवद्भिर्वृक्षः कुठारैः पश्वादिभिः प्रहरणैः कुट्यते स्फाट्यते छेद्यते, तथाहं परमाधार्मिकैर्वारंवारं पीडितः ॥ ६७ ॥

चवेडमुट्ठिमाईहिं, कुमारेहिं अयंपि व ।
ताडिओ कुट्टिओ भिन्नो, चुण्णिओ य अणंतसो ॥ ६८ ॥

हे पितरौ ! पुनरहं परमाधार्मिकैर्देवैश्चपेटाभिर्हस्ततलैः, पुनर्मुष्टयादिभिर्बद्धहस्तैः, आदिशब्दाल्लत्ताजानुकूर्परप्रहारैरनन्तशस्ताडितः कुट्टितः, भिन्नो - भेदं प्रापितः, चूर्णितः । कैः कमिव ? कुमारैर्लोहकारैरय इव - लोह इव । यथा लोहकारेण लोहः कुट्यते भेद्यते चूर्ण्यते श्लक्ष्णीक्रियते ॥ ६८ ॥

तत्ताइं तंबलोहाई, तउयाइं सीसगाणि य ।
पाईओ कलकलंताई, आरसंतो सुभेरवं ॥ ६९ ॥

---

१ फांसो. २ ઠગાયો.

हे पितरौ ! पुनरहं परमाधार्मिकैस्तप्तानि गालितानि ताम्रलोहादीनि । वैक्रियाणि त्रपुकानि *कस्तीरकाणि चाहं पायितः । कीदृशानि ताम्रादीनि ? कलकलन्तानि-कलकलशब्दं कुर्वन्ति, अत्यन्तमुत्कलितान्यव्यक्तं शब्दं कुर्वन्ति । कीदृशोऽहं ? सुभैरवमति-भीषणं शब्दं रसन् - विलपन् ॥ ६६ ॥

तुहं पियाइं मंसाइं, खंडाइं सोल्लगाणि य ।
खाविओ मि समंसाइ, अग्गिवण्णाइणेगसो ॥ ७०॥

हे पितरौ ! पुनः परमाधार्मिकैरिति स्मारयित्वा स्वमांसान्यहं खादितः- स्वमांसानि भोजितः । कीदृशानि स्वमांसानि ? खण्डानि-खण्डरूपाणि । पुनः कीदृशानि ? सोल्लकानि-भटित्रीकृतानि । स्वमांसान्येव भटित्रीकृत्य शूलीकृत्य च खादितानि । पुनः कीदृशानि ? अग्निवर्णानि जाज्वल्यमानानि, तान्यप्येकवारं न खादितानि, किन्त्वनेकवारं खादितानीति । किं स्मारयित्वा ? रे नारक ! तव प्राग्भवे मांसानि प्रियाण्यासन्, जीवानां हि त्वं मांसानि खण्डानि सोल्लकान्यादः, इदानीं त्वं स्वमांसमेवाद्धि । इत्युक्त्वा पूर्वकर्म स्मारयित्वा परमाधार्मिकैः स्वमांसानि खादितः, स्वमांसैरेव भोजित इत्यर्थः ॥ ७० ॥

तुहं पिया सुरा सीहू, मेरेई य महूणि य ।
पाइओ मि [१]जलंतीओ, वसाओ रुहिराणि य ॥ ७१ ॥

हे पितरौ ! पुनरहं परमाधार्मिकैर्वशा-अस्थिगतरसान्, च पुना रुधिराणि पायितोऽस्मि । किं कृत्वा ? इति स्मारयित्वेत्यध्याहारः । इतीति किं ? रे नारक ! तव प्राग्भवे सुरा चन्द्रहासाभिधं मद्यम्, सीधुस्तालवृक्षदुग्धोद्भवा, 'मेरेई' इति पिष्टोद्भवा शाटितोत्पन्नान्नरसा । पुनर्मधूनिपुष्पोद्भवानि मद्यानि प्रियाण्यासन् । इति निर्भर्त्सनापूर्वकं पायित इत्यर्थः ॥ ७१ ॥

निच्चं भीएण तत्थेण, दुहिएण वहिएण य ।
परमा दुहसंबद्धा, वेयणा वेईया मए ॥ ७२ ॥

हे पितरौ ! मया परमोत्कृष्टा वक्तुमशक्या दुःखसम्बद्धा, एतादृशी वेदना वेदिता भुक्तेत्यर्थः । कथंभूतेन मया ? नित्यं भीतेन, पुनः कीदृशेन ? त्रस्तेनोद्विग्नेन, पुनः कीदृशेन ? त्रासवशादेव दुःखितेन । पुनः कीदृशेन ? व्यथितेन कम्पमानसर्वाङ्गोपाङ्गेन ॥ ७२ ॥

तिव्वचण्डप्पगाढाओ, घोराओ अइदुस्सहा ।
महाभयाओ भीमाओ, नरएसु वेइया मए ॥ ७३ ॥

---

* कलई

१ जलंतीओ इत्यस्य व्याख्या-"ज्वलन्तीरत्युष्णतया वशा रुधिराणि च, ज्वलन्तीति लिङ्गविपरिमाणेन सम्बन्धनीयम् ॥

हे पितरौ ! मया नरकेषु वेदना वेदिता, असाताऽनुभूता । कथंभूता वेदना ? तीव्रचण्ड-प्रगाढा, तीव्रा चासौ चण्डा च तीव्रचण्डा, तीव्रचण्डा चासौ प्रगाढा च तीव्रचण्डप्रगाढा । तीव्रा-रसानुभवाधिक्यात्, चण्डोत्कटा-वक्तुमशक्या, गाढा-बहुलस्थितिका । पुनः कीदृशा वेदना ? घोरा-भयदा, यस्यां श्रुतायामपि शरीरं कम्पते । पुनः कीदृशा ? अतिदुस्सहाऽत्यन्तं दुरध्यासा, दुःखेनानुभूयते, अत एव महाभया । पुनः कीदृशा वेदना ? भीमा या श्रूयमाणापि भयप्रदा । एकार्थिकाश्चैते शब्दा, वेदनाधिक्यसूचकाः ॥ ७३ ॥

जारिसा माणुसे लोए, ताया दीसंति वेयणा ।
इत्तोणंतगुणिया, नरएसु दुक्खवेयणा ॥ ७४ ॥

हे तात ! मनुष्यलोके यादृश्यः शीतोष्णादिका वेदना दृश्यन्ते, इतस्तच्छीतोष्णवेदना-भ्यो नरकेषु दुःखवेदना अनन्तगुणा वर्तन्ते ॥ ७४ ॥

सव्वभवेसु असाया, वेयणा वेइया मए ।
निमिसंतरमित्तंपि, जं साया नत्थि वेयणा ॥ ७५ ॥

हे पितः ! मया वेदना सर्वभवेषु स्थावरत्रसभवेष्वसाता वेदिता, शीतोष्णक्षुत्पिपासा-दिकाऽनुभूता । हे पितः ! निमेषान्तरमात्रमपि यत्सातावेदना-सुखानुभवनं नास्ति । तदा दीक्षायां किं दुःखम् ? कथमहं भवद्भिः सुखोचित इत्युक्तः । मया तु सर्वत्र भवे दुःखमेवानु-भूतम् ॥ ७५ ॥

तं बिंतऽम्मापियरो, छंदेण पुत्त पव्वय ।
नवरं पुण सामन्ने, दुक्खं निप्पडिकम्मणा ॥ ७६ ॥

अथ पितरौ मृगापुत्रं ब्रूतः, हे पुत्र ! छन्दसा-स्वकीयेच्छया प्रव्रज-दीक्षां गृहाण । कस्त्वां निषेधयति ? नवरं शब्देनायं विशेषोऽस्ति । पुनः श्रामण्ये-चारित्रे एतद्दुःखं वर्तते, यन्निष्प्रतिकर्मतास्ति, रोगोत्पत्तौ प्रतीकारो न विधेयः । निर्गता प्रतिकर्मता निष्प्रतिकर्मता, चिकित्सा न कर्तव्या, न चिन्तनीयापि, सावद्यवैद्यकं न कारयितव्यम् ॥ ७६ ॥

सो बिंतऽम्मापियरं, एवमेयं जहा फुडं ।
पडिक्कमं को कुणई, अरण्णे मियपक्खिणं ॥ ७७ ॥

ततोऽनन्तरं मातापितरौ प्रति स मृगापुत्रः कुमारो ब्रूते-हे पितरौ ! एतद्भवद्भ्यामुक्तमेवं यथा स्फुटमवितथं, भवदुक्तं सत्यमित्यर्थः । हे पितरावरण्ये मृगाणां पक्षिणां च कः प्रति-कर्मणां कुरुते ? यदा हि मृगा व्याधिपीडिता वने भवन्ति, पक्षिणो वा वने रोगपीडिता भवन्ति, तदा को वैद्य आगत्य रोगचिकित्सां कुरुते ? न कोऽपि कुरुते इत्यर्थः ॥ ७७ ॥

एगभूओ अरण्णे वा, जहा य चरई मिओ ।
एवं धम्मं चरिस्सामि, संजमेण य तवेण य ॥ ७८ ॥

हे पितरौ ! यथा मृगोऽरण्येटव्याम्, 'वा' इति पादपूरणे । एकीभूत-एकाकी सन् चरति, स्वेच्छया भ्रमति । एवमनेन प्रकारेण मृगस्य दृष्टान्तेनाहं संयमेन सप्तदशविधेन, तपसा द्वादशविधेन, धर्मं श्रीवीतरागोक्तं चरिष्याम्यङ्गीकरिष्यामि ॥ ७८ ॥

जया मियस्स आयंके, महारन्नंमि जायई ।
अच्छंतं रुक्खमूलंमि, को णं ताहे तिगिच्छई ॥ ७९ ॥

यदा महारण्ये महाटव्यां मृगस्यातङ्को रोगो जायते, तदा तं मृगं वृक्षमूले संतिष्ठन्तं को वैद्यश्चिकित्सते ? परिचर्यां कुरुते ? सेवां कुरुते ? 'णं' इति वाक्यालङ्कारे ॥ ७९ ॥

को वा से ओसहं देइ, को वा से पुच्छई सुहं ।
को वा से भत्तपाणं च, आहारित्ता पणामए ॥ ८० ॥

हे पितरौ ! तस्य रोगग्रस्तस्य मृगस्य क औषधं ददाति ? वाऽथवा तस्य मृगस्य कश्चिदागत्य सुखं पृच्छति ? भो मृग ! तव समाधिर्वर्तते, इति कः पृच्छति ? वाऽथवा तस्य मृगस्य भक्तपानमाहारपानीयमाहृत्यानीय ददाति ? ॥ ८० ॥

जया य से सुही होइ, तया गच्छइ गोयरं ।
भत्तपाणस्स अट्ठाए, वल्लराणि सराणि य ॥ ८१ ॥

हे पितरौ ! यदा च स मृगः सुखी भवति, स्वभावेन रोगमुक्तो भवति, तदा गोचरं गच्छति, भक्ष्यस्थाने गच्छति । तत्र च भक्तपानस्यार्थं वल्लराणि-हरितस्थलानि, च पुनः सरांसि-जलस्थानानि विलोकयतीत्यध्याहारः ॥ ८१ ॥

खाइत्ता पाणियं पाउं, वल्लरेहिं सरेहिं वा ।
मिगचारियं चरित्ताणं, गच्छई मिगचारियं ॥ ८२ ॥

हे पितरौ ! स निरोगो मृगो मृगचर्यया - मृगभोजनपानविधिना चरित्वा, वल्लरेभ्यो-हरितप्रदेशेभ्यः खादित्वा, निजभक्ष्यं भुक्त्वा, तथा सरोभ्यस्तटाकेभ्यः पानीयं पीत्वा मृगो मृगचर्यां गच्छति, इतस्तत उत्प्लवनात्मिकां गतिं प्राप्नोतीत्यर्थः ॥ ८२ ॥

एवं समुट्ठिओ भिक्खू, एवमेव अणेगओ ।
मिगचारियं चरित्ताणं, उड्ढं पक्कमई दिसं ॥ ८३ ॥

एवममुना प्रकारेण मृगवत्समुत्थितः संयमक्रियानुष्ठानं प्रत्युद्यतो भिक्षुर्मृगचर्यां चरित्वाङ्गीकृत्योद्ध्वां दिशं प्रतिक्रमेत-प्रव्रजति । तथाविधरोगोत्पत्तावपि चिकित्साभिमुखो न भवति । पुनः कीदृशः साधुः ? एवमेवानेनैव प्रकारेण मृगवदनेकगोऽनेकस्थाने स्थितोऽनियतस्थानविहारी, यथा मृगो वनखण्डे नवीने नवीने स्थाने विहरति, तथा नानास्थानविहारीत्यर्थः । तथाहं मृगचर्ययाऽऽतङ्कस्याऽभावे भक्तपानादिगवेषणतयेतस्ततो भ्रमणेन भक्तपानं गृहीत्वा, संयमात्मानं धृत्वा पश्चादूद्ध्वां दिशम्, मुक्तिरूपां दिशं प्रतिक्रमिष्यामि, सर्वोपरिस्थो भविष्यामीति भावः ॥ ८३ ॥

जहा मिए एग अणेगचारी, अणेगवासे धुवगोयरे य ।
एवं मुणी गोयरियप्पविट्ठे, नो हीलए नोवि य खिंसइज्जा ॥ ८४ ॥

यथा मृग एकोऽसहायी सन्ननेकचारी भवति, अनेकभक्तपानाचरणशीलो नानाविधभक्तपानग्रहणतत्परः स्यात्, पुनर्यथा मृगोऽनेकवासः स्यात्, पुनर्यथा मृगो ध्रुवगोचरो भवेत्, ध्रुव-सदा गोचरो यस्य स ध्रुवगोचरः, निश्चयेन भ्रमणादेव लब्धाहारः स्यात् । एवममुना प्रकारेण मृगदृष्टान्तेन मुनिः साधुर्गोचर्यां भिक्षाटनं प्रविष्टः सन् नो हीलयेत्, अनिष्टं नीरसं लब्ध्वेदं कुत्सितं विरसमित्यादिवाक्यैर्न निन्दयेत् । तथा अपि निश्चयेन पुनर्नो खिंसयेत्, आहारे पानीये वाऽलब्धे सति कमपि गृहस्थं ग्रामं नगरमात्मानं वा न निन्देत् ॥ ८४ ॥

मिगचारियं चरिस्सामि, एवं पुत्ता जहासुहं ।
अम्मापिऊहिं अणुन्नाओ, जहाइ उवहिं तओ ॥ ८५ ॥

यदा मृगापुत्रेण पितरौ प्रतीत्युक्तम्-हे पितरावहं मृगचर्यां चरिष्यामि, यथा भवदग्रे मृगचर्योक्ता, तामङ्गीकरिष्यामि, साधुमार्गं ग्रहीष्यामि । यदा मृगापुत्रेणैवमुक्तं तदा मातापितरौ ब्रूतः-हे पुत्र ! यद्येवं तदा यथासुखम्, यथा तव सुखं स्यात्, यथा भवतेऽभिरुचितं सुखमिति यथासुखं तथा कर्तव्यम्, अस्माकमाज्ञास्ति । ततो मातृपितृभ्यामनुज्ञातो मृगापुत्रः कुमार उपधिं - परिग्रहं सचित्ताचित्तरूपं परित्यजति ॥ ८५ ॥

मिगचारियं चरिस्सामि, सव्वदुक्खविमोक्खणिं ।
तुब्भेहिं समणुन्नाओ, गच्छ पुत्त जहासुहं ॥ ८६ ॥

सर्वं परिग्रहं त्यक्त्वा पुनर्मृगापुत्रो वदति-हे पितरौ ! अहं भवद्भ्यामनुज्ञातः सन् मृगचर्यामङ्गीकरिष्यामि । कीदृशीं मृगचर्यां ? सर्वदुःखविमोक्षणीम्, सर्वविपत्तिविमोचिनीम् । तदा मृगापुत्रं प्रति पितरौ वदतः- हे पुत्र ! यथासुखं गच्छ । दीक्षां गृहाण ॥ ८६ ॥

एवं सो अम्मापियरो, अणुमाणित्ताण बहुविहं ।
ममत्तं छिंदए ताहे, महानागो व्व कंचुकं ॥ ८७ ॥

एवममुना प्रकारेण स मृगापुत्रो मातापित्रोरनुज्ञा लात्वा 'ताहे' इति तदा-तस्मिन् काले बहुविधं ममत्वं छिनत्ति । इदं धनं मम, इदं गृहं मम, इदं कुटुम्बं ममेति बुद्धिं त्यजतीत्यर्थः । कः किमिव ? महानागो-महासर्पः कञ्चुकमिव, यथा महासर्पो निर्मोकं त्यजति, तथा मृगापुत्रः सर्वं ममत्वं त्यजतीति भावः ॥ ८७ ॥

इड्ढी वित्तं च मित्ते य, पुत्ते दारं च नायओ ।
रेणुयं व पडे लग्गं, निद्धुणित्ताण निग्गओ ॥ ८८ ॥

मृगापुत्र एतत्सर्वं निर्धूय-त्यक्त्वा निर्गतः, संसाराद् गृहाच्च निःसृतः । किं किं त्यक्तमित्याह-ऋद्धिर्हस्त्यश्वादिः, वित्तं धनधान्यादिः च पुनर्मित्राणि सहजसहवर्धितसह-पांशुक्रीडितानि सुहृदः, पुनः पुत्राण्यङ्गजाः, पुनर्दाराः स्त्रियः, पुनर्ज्ञातयः स्वजनाः क्षत्रियाः, एतत्सर्वं परित्यज्य प्रव्रजितः । किमिव ? पटे लग्नं रेणुमिव-नूतनवस्त्रे लग्नं रज इव । यथा कश्चिच्चतुरो मनुष्यो वस्त्रे लग्नं रजो निर्धूनोति, तथा मृगापुत्रोऽपीत्यर्थः ॥ ८८ ॥

पंचमहव्वयजुत्तो, पंचसमिओ तिगुत्तिगुत्तो य ।
सब्भिंतरबाहिरिए, तवोकम्मंमि उज्जुओ ॥ ८९ ॥

तदा मृगापुत्रः कीदृशो जातः ? पञ्चमहाव्रतयुक्तो जातः, पुनः पञ्चसमितिसहितः, ईर्याभाषैषणाऽऽदाननिक्षेपणोच्चारप्रश्रवणखेलजल्लसिङ्घाणपारिष्ठापनिकासमितियुक्तः । पुनस्त्रगुप्तिगुप्तो - मनोवाक्कायगुप्तिसहितः । पुनः साभ्यन्तरबाह्यतपःकर्मण्युद्यतः ।

पायच्छित्तं विणओ, वेयावच्चं तहेव सज्झाओ ।
झाणं उस्सग्गोवि य, अब्भिंतरओ तवो होइ ॥ १ ॥

अणसणमूणोयरिआ, वित्तीसंखेवणं रसच्चाओ ।
कायकिलेसो संलीणया, य बज्झो तवो होइ ॥ २ ॥
[नवतत्त्वप्रकरणे गा. ३५-३६]

द्वादशविधतपःकर्मणि सावधानो जातः ॥ ८९ ॥

निम्ममो निरहंकारो, निस्संगो चत्तगारवो ।
समो य सव्वभूएसु, तसेसु थावरेसु य ॥ ९० ॥

पुनः कीदृशो मृगापुत्रः ? निर्ममो वस्त्रपात्रादिषु ममत्वभावरहितः । पुनः कीदृशः ? निरहङ्कारोऽहङ्काररहितः । पुनः कीदृशः ? निःसङ्गः बाह्याभ्यन्तरसंयोगरहितः । पुनः कीदृशः ?

---

१ प्रायश्चित्तं विनयो, वैयावृत्त्यं तथैव स्वाध्यायः ।
ध्यानम् उत्सर्गोऽपि च, आभ्यन्तरं तपो भवति ॥ १ ॥

२ अनशनमूनोदरिका, वृत्तिसंक्षेपनं रसत्यागः । कायक्लेशः संलीनता च बाह्यं तपो भवति ॥ २ ॥

त्यक्तगारवो-गारवत्रयरहितः, ऋद्धिगारव-रसगारव-सातागारव इत्यादिगर्वत्रयरहितः। पुनः कीदृशः ? सर्वभूतेषु समो रागद्वेषपरिहारात् समस्तप्राणिषु त्रसेषु स्थावरेषु च समस्तजीवेषु सदृशः ॥ ९० ॥

लाभालाभे सुहे दुक्खे, जीविए मरणे तहा ।
समो निंदापसंसासु, तहा माणावमाणओ ॥ ९१ ॥

तथा पुनर्मृगापुत्रो लाभे, आहारपानीयवस्त्रपात्रादीनां प्राप्तौ, तथाऽलाभेऽप्राप्तौ, तथा सुखे तथा दुःखे, तथा पुनर्जीविते मरणे समः समानवृत्तिः। तथा पुनर्निन्दासु तथा प्रशंसासु स्तुतिषु, तथा माने आदरे, अपमानेऽनादरे, मानश्चापमानश्च मानापमानौ, तयोर्मानापमानयोः समः सदृशः। केनाप्यादरे प्रदत्ते सति मनसि न प्रहृष्टो भवति, केनाप्यपमाने प्रदत्ते सति मनसि दूनो न भवति ॥ ९१ ॥

गारवेसु कसाएसु, दंडसल्लभएसु य ।
नियत्तो हाससोगाओ, अनियाणो अबंधणो ॥ ९२ ॥

पुनः स मृगापुत्रः कीदृशो जातः ? गारवेभ्यो निवृत्तः, पुनः कषायेभ्यः क्रोधादिभ्यो निवृत्तः। च पुनर्दण्डशल्यभयेभ्यो निवृत्तः, दण्डत्रयं-मनोवाक्कायानामसद्व्यापारो दण्ड उच्यते, तस्मान्निवृत्तः। पुनः शल्यत्रयान्निवृत्तः- मायाशल्यम्, निदानशल्यम्, मिथ्यादर्शन-शल्यं चैतच्छल्यत्रयम्, ततो निवृत्तः। तथा पुनः सप्तभयेभ्यो निवृत्तः- सप्त भयानीमानि-इहलोकभयम् १, परलोकभयम् २, आदानभयम् ३, अकस्माद्भयम् ४, मरणभयम् ५, अयशोभयम् ६, आजीविकाभयम् ७ च। एवं सप्तभयानि। अत्र सर्वत्र प्राकृतत्वात्पञ्चम्यां सप्तमी। पुनः कीदृशो मृगापुत्रः ? हास्यशोकाभ्यां निवृत्तः। पुनः कीदृशः ? अनिदानो निदानरहितः। पुनः कथंभूतः ? अबन्धनो - रागद्वेषबन्धनरहितः ॥ ९२ ॥

अणिस्सिओ इहं लोए, परलोए अणिस्सिओ ।
वासीचंदणकप्पो य, असणे अणसणे तहा ॥ ९३ ॥

पुनः कीदृशः ? अनिश्रितो-निश्रारहितः, कस्यापि साहाय्यं न वाञ्छति। तथा पुनरिह लोके राज्यादिभोगे, तथा परलोके देवलोकादिसुखेऽनिश्रितो-निश्रां न वाञ्छते। पुनः स मृगापुत्रो वासीचन्दनकल्पः, यदा कश्चिद्वास्या-पर्शुना शरीरं छिनत्ति, कश्चिच्चन्दनेन शरीर-मर्चयति, तदा तयोरुपरि समानकल्पः- सदृशाचारः। तथा पुनरशने-आहारकरणे, तथाऽनशने - आहाराऽकरणे सदृशः ॥ ९३ ॥

अप्पसत्थेहिं दारेहिं, सव्वओ पिहियासवे ।
अज्झप्पज्झाणजोगेहिं, पसत्थदमसासणे ॥ ९४ ॥

पुनर्मृगापुत्रोऽप्रशस्तेभ्यो द्वारेभ्यः कर्मोपार्जनोपायेभ्यो हिंसादिभ्यो निवृत्त इति शेषः । पुनः कीदृशः ? अप्रशस्तद्वारेभ्यो निवर्तनादेव सर्वतः पिहिताश्रवः, पिहिता-निरुद्धा आश्रवाः- पापगमनद्वाराणि येन स पिहिताश्रवः । पुनः कीदृशः ? अध्यात्मध्यानयोगैः प्रशस्तदम-शासनः, अधि आत्मनि ध्यानयोगा अध्यात्मध्यानयोगास्तैरध्यात्मध्यानयोगैर्मनसि शुभव्यापारैः प्रशस्ते दमशासने यस्य स प्रशस्तदमशासनः । दम-उपशमः, शासनं-सर्वज्ञसिद्धान्तः, यस्य शुभध्यानयोगैरुपशमश्रुतज्ञाने शुभे वर्तते इत्यर्थः ॥ ९४ ॥

एवं नाणेण चरणेण, दंसणेण तवेण य ।
भावणाहि य सुद्धाहिं, सम्मं भावित्तु अप्पयं ॥ ९५ ॥

बहुयाणि य वासाणि, सामन्नमणुपालिया ।
मासिएण उ भत्तेणं, सिद्धिं पत्तो अणुत्तरं ॥ ९६ ॥ युग्मम् ॥

उभाभ्यां गाथाभ्यां वदति-तु-पुनर्मृगापुत्रो मुनिर्मासिकेन भक्तेन सिद्धिं प्राप्तो मोक्षं गतः । मासे भवं मासिकम्, तेन मासिकेन भक्तेन, मासोपवासेनेत्यर्थः । कथंभूतां सिद्धिम् ? अनुत्तरां-प्रधानाम्, सर्वस्थानकेभ्य उत्कृष्टं स्थानमित्यर्थः, जन्मजरामृत्यूपद्रवेभ्यो रहितत्वात्, किं कृत्वा ? एवममुना प्रकारेण ज्ञानेन मतिश्रुतादिकेन, पुनश्चरणेन यथाख्यातेन, पुनर्दर्शनेन शुद्धसम्यक्त्वश्रद्धारूपेण, पुनस्तपसा द्वादशविधेन, च पुनर्भावनाभिर्महाव्रतसंबंधिनीभिः पञ्चविंशतिसंख्याभिर्भावनाभिः । अथवाऽनित्यादिभिर्द्वादशप्रकाराभिरात्मानं सम्यक् प्रकारेण भावयित्वा, निर्मलं कृत्वा । कथंभूताभिर्भावनाभिः ? शुद्धाभिर्निदानादिदोषमलरहिताभिः । पुनः किं कृत्वा ? बहूनि वर्षाणि श्रामण्यं-यतिधर्ममनुपाल्याराध्य ॥ ९५-९६ ॥

एवं करंति संबुद्धा, पंडिया पवियक्खणा ।
[1]विणिवट्टंति भोगेसु, मियापुत्ते जहा मिसी ॥ ९७ ॥

सम्बुद्धाः- सम्यग्ज्ञाततत्त्वाः पुरुषाः, पण्डिता-हेयोपादेयबुद्धियुक्ताः, अत एव प्रकर्षेण विचक्षणा-अवसरज्ञाः, एवं कुर्वन्ति भोगेभ्यो विशेषेण निवर्तन्ते । क इव ? यथाशब्द इवार्थे, मृगापुत्रर्षिरिव । यथा मृगापुत्रर्षिर्भोगेभ्यो विनिवृत्तस्तथान्यैरपि चतुरैर्भोगेभ्यो विनिवर्तितव्यमिति भावः । अत्र 'मिसी' त्ति मकारः प्राकृतत्वादलाक्षणिकः ॥ ९७ ॥

महप्पभावस्स महाजसस्स, मियाए पुत्तस्स निसम्म भासियं ।
तवप्पहाणं चरियं च उत्तमं, गइप्पहाणं च तिलोयविस्सुयं ॥ ९८ ॥

वियाणिया दुक्खविवद्धणं धणं, ममत्तबंधं च महाभयावहं ।
सुहावहं धम्मधुरं अणुत्तरं, धारेह निव्वाणगुणावहं ([2]महं) ॥ ९९ ॥ त्तिबेमि ॥

---

१ विणियट्टंति-अन्य संस्करणे ॥

२ महं-मू. नास्ति, अन्य संस्करणेऽस्ति, तत्र व्याख्या एवं-'महंति'-अपरिमितमाहात्म्यतया महतीम्

पुनर्गाथायुग्मेन सम्बन्धः । भो भव्या ! अनुत्तरां-सर्वोत्कृष्टां धर्मधुरं धर्मरथस्य भारं धारयध्वम् । कथंभूतां धर्मधुरम् ? सुखावहां-सुखप्राप्तिहेतुभूतम् । पुनः कीदृशां धर्मधुरम् ? निर्वाणगुणावहाम्, निर्वाणस्य गुणा निर्वाणगुणा-मोक्षगुणाः, अनन्तज्ञानदर्शनान्तसुखानन्तायुरनन्तवीर्यरूपास्तेषामावहा-पूरका निर्वाणगुणावहा, तां निर्वाणगुणावहाम् । किं कृत्वा धर्मधुरं धारयध्वम् ? धनं दुःखविवर्धनं विज्ञाय, च पुनर्ममत्वं बन्धमिव संसारस्य बन्धनं विज्ञाय । कीदृशं धनं ममत्वं च ? महाभयावहं महाभयदायकम्, चौराग्निनृपादिभ्यः कष्टप्रदाम् । पुनः किं कृत्वा ? च पुनर्मृगाया राज्ञः पुत्रस्य मृगापुत्रस्योत्तमंप्रधानं चरितं-चरित्रं-चारित्रवृत्तान्तम्, तथा तस्य मृगापुत्रस्य भाषितम्, मातृपितृभ्यां संसारस्यानित्यतोपदेशदानं निशम्य हृदि धृत्वा । कीदृशं मृगापुत्रस्य चरित्रम् ? 'तवप्पहाणं' तपःप्रधानम्, पुनः कीदृशं मृगापुत्रस्य चरित्रम् ? 'गइप्पहाणं' गत्या प्रधानम्, गतिर्मोक्षलक्षणा, तया प्रधानं श्रेष्ठम्, मोक्षगमनार्हम् । पुनः कीदृशं मृगापुत्रस्य चरित्रम् ? त्रिलोकविश्रुतं त्रिलोकप्रसिद्धम् । कीदृशस्य मृगापुत्रस्य ? महाप्रभावस्य, रोगादीनामभावेन दुष्करप्रतिज्ञा प्रतिमारूपाभिग्रहाणां पालनेन महामहिमान्वितस्य । पुनः कीदृशस्य मृगापुत्रस्य ? महायशसः, महद्यशो यस्य स महायशास्तस्य महायशसः, सर्वदिग्व्यापिकीर्तेः । इत्यहं मृगापुत्रस्य चरितं तवाग्रे ब्रवीमीति सुधर्मास्वामी जम्बूस्वामिनं प्रत्याह ॥ ९९ ॥

इति मृगापुत्रीयमेकोन-विंशतितममध्ययनमर्थतः सम्पूर्णम् ॥ ९९ ॥

इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायां श्रीलक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायामेकोनविंशतितमं मृगापुत्रीयमध्ययनमर्थतः सम्पूर्णम् ॥ ९९ ॥

इति

श्री लक्ष्मीकीर्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां

श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायां

प्रथमभागः



ભરત પ્રિન્ટરી (કાંતિલાલ ડી. શાહ) અમદાવાદ-૧. ફોન : ૨૧૩૭૯૬૪